ŚAŚADHARA'S

# NYĀYASIDDHĀNTADĪPA

## WITH ṬIPPAṆA BY GUṆARATNASŪRI

L. D. SERIES 56

GENERAL EDITORS

DALSUKH MALVANIA

NAGIN J. SHAH

EDITED BY

BIMAL KRISHNA MATILAL

UNIVERSITY OF TORONTO

CANADA

L. D. INSTITUTE OF INDOLOGY AHMEDABAD 9.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ŚAŚADHARA'S
# NYĀYASIDDHĀNTADĪPA
## WITH ṬIPPANA BY GUṆARATNASŪRI

**L. D. SERIES 56**

GENERAL EDITORS
**DALSUKH MALVANIA**
**NAGIN J. SHAH**

EDITED BY
**BIMAL KRISHNA MATILAL**
UNIVERSITY OF TORONTO
CANADA

L. D. INSTITUTE OF INDOLOGY AHMEDABAD-9

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Text Printed by
Mahanta Tribhuvandas Shastri
Shree Ramanand Printing Press
Kankaria Road
Ahmedabad-22

and Published by
Nagin J. Shah
Director
L. D. Institute of Indology
Ahmedabad-9

FIRST EDITION
November, 1976

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शशधरकृतः

# न्यायसिद्धान्तदीपः

## गुणरत्नगणिविरचितटिप्पनयुतः

संपादक
विमल कृष्ण मतिलाल

प्रकाशक
लालभाई दलपतभाई भारतीय संस्कृति विद्यामंदिर
अहमदाबाद–९

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# PREFACE

It is really a matter of great pleasure to place before lovers of Indian Philosophy the present edition of Mahopādhyāya Śaśadhara's Nyāyasiddhāntadīpa along with a hitherto unpublished commentary (Ṭippana) by Guṇaratnasūri who seems to be identical with Guṇaratna, the author of Ṣaḍdarśanasamuccayaṭīkā (1412 A.D.). A considerable portion of Nyāyasiddhāntadīpa was printed before fifty years. But this volume gives for the first time the complete and correct text of Nyāyasiddāntadīpa.

We are very grateful to Professor (Dr.) B. K. Matilal for undertaking the editing of this important pre-Gaṅgeśa text on Navya-nyāya. He has taken great pains to make the text of Nyāyasiddhāntadīpa and also of Ṭippana as flawless as possible. His introduction is interesting and instructive. Therein he has given good reasons for his contention that Śaśadhara was a pre-Gaṅgeśa Navya-nyāya writer. He has ably discussed the problem of Śaśadhara's date and has furnished strong grounds for identifying Śaśadhara with Śaśidhara mentioned in the Bheraghat Inscription which contains some interesting information. He has given a good account of four Guṇaratnas and finally concluded that our Guṇaratna is most probably indentical with Guṇaratna, the author of Ṣaḍdarśanasamuccayaṭīkā. Again, he has noted some textual peculiarities of the Ṭippana.

Our thanks are due to Pt. Babulal S. Shah for correcting proofs.

We hope that this publication will be of great value to the keen students of Indian Logic and Philosophy.

L. D. Institute of Indology,
Ahmedabad-380009.
15th Nov. 1976.

Nagin J. Shah
Director

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# विषयानुक्रमः


| विषयः | पत्रम् |
|---|---|
| न्यायसिद्धान्तदीपः | १-१२७ |
| १ मङ्गलवादः | १-४ |
| २ अन्धकारवादः | ५-११ |
| ३ कारणतावादः | १२-१४ |
| ४ पदशक्तिवादः | १५-१७ |
| ५ शक्तिवादः | १८-२३ |
| ६ आधेयशक्तिवादः | २४-२५ |
| ७ मनोऽणुत्ववादः | २६-२७ |
| ८ शब्दप्रामाण्यवादः | २८-२९ |
| ९ ज्ञानकर्मसमुच्चयवादः | ३०-३२ |
| १० मुक्तिवादः | ३३-३८ |
| ११ सिद्धार्थप्रामाण्यवादः | ३९-४० |
| १२ अन्वयशक्तिनिरासवादः | ४१ |
| १३ वायुप्रत्यक्षतावादः | ४२-४४ |
| १४ निर्विकल्पकवादः | ४५-४८ |
| १५ सुवर्णतैजसवादः | ४९-५३ |
| १६ योगरूढिवादः | ५४-५९ |
| १७ लिङ्गपरामर्शवादः | ६०-६४ |
| १८ व्याप्तिवादः | ६५-६९ |
| १९ व्याप्तिग्रहवादः | ७०-७३ |
| २० विधिवादः | ७४-८७ |
| २१ अपूर्ववादः | ८८-९० |
| २२ अन्यथाख्यातिवादः | ९१-९८ |
| २३ अर्थापत्तिवादः | ९९-१०१ |
| २४ शब्दानित्यतावादः | १०२-१०७ |
| २५ ईश्वरवादः | १०८-११८ |
| २६ अभाववादः | ११९-१२७ |
| न्यायसिद्धान्तदीपटिप्पनम् | १२९-२२९ |
| १ विधिवादटिप्पनम् | १३०-१७३ |
| २ अपूर्ववादटिप्पनम् | १७४-१८७ |
| ३ अन्यथाख्यातिवादटिप्पनम् | १८८-२२० |
| ४ अर्थापत्तिवादटिप्पनम् | २२१-२२९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# INTRODUCTION

*"Dūṣyaṃ vaco mama paraṃ nipuṇam vibhāvya*
*Bhāvāvabodhavihito na dunoti doṣaḥ"* — Raghunātna Śiromaṇi

## I

### The Title : *Nyāyasiddhāntadīpa*

The *Nyāyasiddhāntadīpa* (NSD) is a Navya-nyāya text written by Śaśadhara, or Śaśadharācārya, who held, as almost all the manuscripts unanimously note, the glorious title of *Mahopādhyāya* 'the Great Teacher'. The most famous exponent of the Navya-nyāya school of philosophy was Gaṅgeśa Upādhyāya of Mithilā. The approximate date assigned to Gaṅgeśa is 1300–1350 A. D. But Śaśadhara, as I shall argue below, must have preceded Gaṅgeśa almost by a century and a half.

The title of Śaśadhara's work is usually given as *Nyāyasiddhāntadīpa*— 'The Lamp of Nyāya Doctrinal Conclusions'. The second introductory stanza of the text states :

"This is 'The Lamp of Nyāya Doctrinal Conclusions', which is brightened by the oil of good reasonings and should be maintained with care by those who wish to win at philosophic debates."

But a problem arises in this regard when it is seen that several manuscripts end with the following colophon :

*"iti mahopādhyāya-śrī-Śaśadhara-viracitaṃ Nyāyaratna-prakaraṇaṃ samāptam"*("Thus ends the *prakaraṇa* called *Nyāyaratna* composed by Mahopādhyāya Śrī Śaśadhara.")

Such a colophon obviously creates the impression that another, perhaps an alternative, title of the work was *Nyāyaratna*. Compilers of different manuscript-catalogues were in doubt also about the real title of the work. In some cases, it was listed as *Nyāyaratna*, in other cases, as *Nyāyasiddhāntadīpa*. Thus, the Jesalmer Catalogue has two entries on p. 324 :

Nyāyaratna-prakaṇaṇam Śaśadharasūtra folios 39

Nyāyaratna-prakarnam Śaśadhara-sūtra Tippaṇī-saha folios 43.

The Jodhpur Catalogue has the following entry on p. 162 :

1364 E. 4341 Nyāyaratna-prakaraṇam Śaśadhara-śarmā falios 32.

But the Nagpur Catalogue, the Benares Catalogue, and many others give the title as *Nyāyasiddhāntadīpa*. And the commentaror Śeṣānanta in the

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Printed Edition unambiguously calls it *Nyāyasiddhāntadīpa* and accordingly names his commentary *Nyāyasiddhāntadīpa-prabhā* 'The Lustre of the Lamp of Nyāya Doctrinal Conclusions'.

This evidence seems to suggest that the alternative title of the work was *Nyāyaratna*, and it was a *prakaraṇa-grantha* 'independent treatise' as opposed to being a commentary or *ṭīkā*. But there was another improtant pre-Gaṅgeśa text on Navya-nyāya, which was called *Nyāyaratna*(NR). This was written by Maṇikaṇṭha Miśra of Mithilā. Thus, it might be supposed that when both Śaśadhara and Maṇikaṇṭha became recognised auothers in Navya-nyāya, the necessity arose to distinguish the two texts clearly. Hence, the alternative title of Śaśadhara's work was gradually pushed into the background.

There is, however, another way of construing and interpreting the above evidence. It may be that when both texts, NSD and NR, became recognised authorities in Navya-nyāya, the scribes and the compilers of manuscripts confused the title of one with that of the other. And this explains the prevalence of the title *Nyāyaratna* in the colophons of NSD mss. I am, however, inclined to accept the first hypothesis. For the earliest manuscript of NSD that I have examined belongs to the 16th century (see below) and mentions, nevertheless, the title *Nyāyaratna* in its colophon.

## II

## Manuscript Materials

A considerable portion of Śaśadhara's NSD was printed and serialized in different issues of a now defunct Sanskrit journal : *The Pandit*, of Benares (vols; XXV-XLII, 1876-1920). Later on, in 1924, Pandit Dhundhiraj Shastri, in collaboration with MM. Vindhyeshwari Prasad Dwivedi, published an edition of NSD along with the commentary of Śeṣānanta, *NSD-Prabhā*. This edition (published by E. J. Lazarus & Co., Benares Cantt.) barely added anything more than what had already come out in the previous issues of *The Pandit*. Dhundhiraj Shastri said in the Introduction that he had prepared the editon having obtained, from Principal Arthur Venis of Benares Sanskrit College, two *incomplete* manuscripts of NSD and three manuscripts of the *NSD-prabhā*. He also admitted that the manuscripts he used were full of mistakes and lacunae. In fact, certain folios of mss. were missing. Thus, the text of NSD that was published remained incomplete.

The beginning portion of the chapter called *Abhāvavāda* was missing. Pandit Dhundhiraj remarked in this context as follows (in a footnnte on p. 573): "*abhāvavāde yatra yatra mūlaṃ kāṭhinyenopalabdhaṃ tatra tatra dṛśyate, samagrasyānupalambhād iti.*" ("Since the entire text of the Abhāvavāda is not available, only such portions of the text will be given as could be deç-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

phered with difficulty.") The next chapter called *Śabdānityatāvāda* was printed in fragments only. Almost half of the text was missing. And Dhundhiraj noted on p. 624n: *Ataḥ paraṃ mūlam asmin prakaraṇe nopalabdham* "The text after this portion is not available." Due to a printer's devil, however, this footnote was not given in its proper place, i. e., on p. 625, but on p. 624. Almost a folio from the beginning of the *Īśvaravāda* chapter was missing. But unfortunately, Pandit Dhundhiraj did not add any footnote to explain the abrupt beginning. Scholars, for some time, must have puzzled over the opening sentence of this chapter. To complicate the matter further the printed text stops with an unfinished sentence after p. 652. The concluding protion of this chapter was apparently not avilable to the editor. But Pandit Dhundhiraj did not make any comment here. Curiously enough, on p. 646, when the commentary *NSD-prabhā* ended abruptly with an incomplete sentence, Pandit Dhundhiraj remarked as follows :

*Ataḥ paraṃ ṭīkaitat prakaraṇe nopalabhyate iti samāpto 'yaṃ yathāprāpto grantho veditavyaḥ.*

"After this, the commentary on this section is not avilable. Thus ends the book as it has been obtained (from mss.)."

It is clear from the above account that the 1924 edition was incomplete and left many things to be desired. Prof. D. C. Bhattacharya remarked of this edition as follows : "...the edition is full of lacunas and is incomplete towards the end." In fact, at present, when publication of many manuscript-catalogues in India reveal the existence of several complete manuscripts of NSD, the 1924 edition has simply the value of being used as another manuscript for the purpose of preparing a critical editon. Thus, while preparing the critical edition of NSD I have used the 1924 edition as another source-book for comparing variants.

The present edition has been prepared from the following materials :

$M_1$——A manuscript from L. D. Institute of Indology. No. 5280 in Muni Punyavijayaji's collection; Cat. serial no 77; folios 1-47 complete; 15 lines in a page. Size of each folio : 26.8 x 10.5 c.m. Script : Jaina character.

$M_2$——A manuscript from L. D. Institute of Indology. No. 5303 in Muni Punyavijayaji's collection. Cat. serial no. 76. Folios 1-62 complete. 11 lines in a page. Size of each folio : 26.7 x 11 c.m. Script : Jaina character.

I.O.——A photocopy of a manuscript from the India Office Library, London, England. Cat. No. 1988 I. O. 614a. Folios 1-52 complete. 15 lines in a page. Size of each folio : 9 3/4 x 4 in. Script : Jaina character

P——The available printed material of the 1924 edition.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

The press-copy of this edition was colated further with the following two manuscripts :

The *Limbḍi* manuscript of NSD. No 1465 of the Seth Anandaji Kalyanji Jaina Pustak Bhandar. Folios 1-76 complete. (In the printed catalogue of Limbdi manuscript Library, the number of this manuscript is wrongly given as 1505. This manuscript was obtained on loan by Pandit Dalsukh Malvania while I was working at the L. D. Institute of Indology. It was Pandit Sukhlalji Sanghavi who first mentioned to me the existence of this very beautifully inscribed manuscript.)

The *Nagarseṭh* manuscript at the Nagarseth collection, Cat. No. 15203 at the L. D Institue of Indology. Folios 1-30, 21 lines in a page. Size of each folio : 26.5 x 11 c. m. It contains many corrections in margins.

$P_n$——This refers to the variants noted in the footnote of the 1924 edition.

The press-copy of Guṇaratna's commentary has been prepared from a single manuscript at the L. D. Institute of Indology: No. 8312 of Muni Punyavijayaji's collection, Cat. serial No 79.

**Dating of the three principal manuscripts, $M_1$, $M_2$ and I. O.**

Some interesting historical evidence can be collected from the three manuscripts, $M_1$, $M_2$ and I. O.

$M_1$ starts straightforwardly with NSD text, "*Dhvaṃsita*—...etc" without any preliminary from the scribe. But the scribe identifies himself as well as his time in the concluding remarks. It ends as follows :

> श्रीसंवत् अष्टादशाधिकषोडशतमे वर्षे शिशिरऋतौ माघे मासि शुक्लपक्षे नवम्यां तिथौ शुक्रवासरे एवं समये सूरात्मजेन हीरनाम्ना स्वपठनार्थं तथा परार्थमलेख्यध्ययनसमये । श्रीरामाय नमः । शुभं भवतु ।

Thus it is clear that this manuscript was copied in 1618 Samvat, i e., 1561 A. D., by a student called Hīra, son of Sūra, for his own study (*Svapaṭhanārtham*) as well as for the sake of others (*parārtham*). The text was copied by the scribe while he was studying NSD (*Cf. adhyayanasamaye*). This is the earliest of the three principal manuscripts that I have used.

A question naturally arises in this connection. Is this, then, the manuscript that was used by the well-known Jaina scholar (*ācārya*), *Śrī Hīravijaya*, whose biography was the theme of *Vijaya-praśasti* ? The answer to this question has to be in the negative for two reasons :

(a) According to M. D. Desai's historical account of Hīravijaya (see his Gujarati book on the History of Jaina Literature, p. 537). the father of

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Hıravijaya was called Kunrā. But here, the father of the scribe was Sūra (*cf sūrātmajena*).

(b) M. D. Desai also wrote that Hıravijaya became a *vācaka* or *upādhyāya* (teacher) in 1608 Samvat, and a Sūri in 1610 Samvat, i.e., 1553 A. D. If this account is true, as it should be because Desai was a recognized authority on the history of Jaina literature, then our Hıra, the scribe of $M_1$ cannot be identical with the well-known Hıravijaya. It is obvious that Hıravijaya could not have been, merely a student in 1561 A. D., when $M_1$ was copied for study.

$M_2$ starts with a *namaskāra* 'salutation' "*Om namo* (*namaḥ*) *Śrī gaṇapataye*". And folio 62a ends as follows : "*iti Śrī–mahāmahopādhyāya Śrī–Śaśadharakṛtaṃ prakaraṇaṃ sampūrṇam*" Then there is a "puzzle" verse by the scribe followed by the date and place of the copying of the manuscript :

न सुमुखी (?) न बकी न च काकी तोयवहा न नदी
न च वापी सा चतुरा चतुरेण गृहीता
मुंचति वाक्यं वाक्ययुतानि पदानि ।।

संवत् १६५० फाल्गुनमासे कृष्णपक्षे द्वितीयदिने गुरुवासरे बुकाह्नापुरे लिखितम् लेखक–काह्नाजी शुभं भवतु ।

Thus, the copying of the manuscript was complete in the month of Phālguna of 1650 Samvat (i. e., 1593/94A. D.) The scribe was Kāhnāji, and most probably he was neither a student nor a Jaina as is evident from the obeisance to Gaṇapati (and not Mahāvıra)

I. O. starts as follows :

"*Vācakaśiraḥkoṭir-ahīravācakaśrī-5 Kalyāṇavijayagaṇi·caraṇendīvarebhyo namaḥ / Śrī–Śāradāyai namaḥ / Śrī–vītarāgāya namaḥ. /*"

This clearly indicates that the scribe was a Jaina, and most probably a pupil of Kalyāṇavijayagaṇi. According to Desai's account, Kalyāṇavijaya was a direct pupil of Hıravijaya of *Vijaya-praśasti*. In 1644 Samvat (1587 A.D.), Kalyāṇavijaya performed the *Pratiṣṭhā* 'inaugaration' of an image at Śirohi.

If we can hazard an intelligent guess, then this manuscript should belong to the end of 16th century. Thus, all the three manuscripts consulted belong to the the latter half of 16th century, and probably $M_1$ was the earliest of the three.

I have also reason to believe that these three manuscripts represent three different "families" of manuscript. In other words, one had not been copied from the other. The main argument in favour of this view is the fact that the order and numbering of the 26 or 27 chapters of I.O. is quite

Jain Education International For Private & Personal Use Only www.jainelibrary.org

different from that of $M_1$ and $M_2$ (see below). Although $M_1$ and $M_2$ agree in the arrangement of chapters, there are some disagreements of another kind between them, which shows that they come from different "families". $M_1$ is generally correct. $M_2$ contains many spelling errors, and sometimes such errors have been erased. $M_2$ contains some marginal notes in a different hand. There are also such places where $M_1$ contains errors but $M_2$ gives the correct forms. The scribal peculiarities of $M_2$ may be briefly noted as follows : स्थ is always written as च्छ; स्य as त्य, and के as ८क.

The *Limbdi* manuscript ends as follows (folio 76) :

इति महामहोपाध्यायश्रीशशधरविरचितं न्यायप्रकरणं समासम् । इति । ग्रन्थाग्र २५००। शुभं भवतु । संवत् १६६४ वर्षे वैशाखमासे कृष्णपक्षे एकादश्यां तिथौ शनिवासरे श्रीभावडहराजगच्छे पण्डितश्री ५ जिनदेवसूरिविजयराज्ये उंपाध्यायश्रीमंगलजोशिष्यक्षेमराजलिखितं पिचमन्दपुरीमध्ये ॥

It is clear that this manuscript was copied by a student-scribe for the purpose of study in 1607 A. D. This manuscript agrees with the I. O. in many respects. And I think they both belong to the same "family". The manuscript of the Jodhpur collection is dated. It belongs to the 16th centuary A.D. and begins exactly as the I. O., viz., "*Vācakaśiraḥ*--" Thus, it must also belong to the same "family" as I.O. The alternative title is also given at the end of the Jodhpur ms. as *Nyāyaratna*. The Jesalmer catalogue lists two manuscripts both of which are called Nyāyaratna-prakaraṇa Śaśadhara-sūtra. One of these two belongs to 1761 A.D. while the other has no date. The Nagpur collection lists a manuscript of NSD which is probably the earliest of the available mss. of NSD: Serial No. 973, Accession No. 355, Script : Nagri, folios 1-184. This manuscript is dated 1453 Śaka era (i.e., 1531 A.D.) .This one presumably predates our $M_1$. But I was unable to examine this manuscript.

## Arrangement of Chapters in NSD.

The NSD contains several chapters or *Vādas*. The number of chapters is 27 or 26 (if we combine the chapters on *Vyāpti* and *Vyāptigraha* as one.) The last few chapters are found to be differently arranged in different manuscripts. H. T. Colebrooke listed a few chapters in his I. O. Mss. catalogue and then noted : "For a more complete list of *Vādas* see Burnell's Tangore Catalogue of Manuscripts."

The following computation of the lists of chapters may be useful for comparison. Chapter titles are usually supplied from the colophons of chapters. But, as will be clear from the following lists, such colophons were sometimes missing :

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| P. chapters | I. O. colophons | Limbdi Ms. colophons | $M_1$ and $M_2$ |
|---|---|---|---|
| 1. मङ्गलवादः | मंगलवादः प्रथमः।। | मंगलवादः समाप्तः।। | मंगलप्रकरणम्।। |
| 2. अन्धकारवादः | '२' (no title) | इत्यन्धकारवादः।। | इत्यन्धकारप्रकरणम्।। |
| 3. कारणतावादः | कारणतावादस्तृतीयः।। | कारणवादः।। | कारणताप्रकरणम्।। |
| 4. पदशक्तिवादः | चतुर्थः।। (no title) | पदशक्तिवादः।। | पदशक्तिप्रकरणम्।। |
| 5. सहजशक्तिवादः | पञ्चमोवादः।। | सहजशक्तिवादः।। | शक्तिवादः।। |
| 6. शक्तिवादः | शक्तिवादः।। | इत्याधेयशक्तिवादः।। | आधेयशक्तिवादः।। |
| 7. मनोऽणुत्ववादः | मनोऽणुवादः सप्तमः।। | मनोवादः।। | मनोऽणुत्ववादः।। |
| 8. शब्दप्रामाण्यवादः | शब्दस्वातन्त्र्यवादाष्टमः।। | शब्दस्वातन्त्र्यप्रामाण्य...<br>(Text destroyed) | शब्दप्रामाण्यवादः।। |
| 9. ज्ञानकर्मसमुच्चयवादः | नवमोवादः।। | ज्ञानकर्मसमुच्चयवादः।। | ज्ञानकर्मसमुच्चयवादः।। |
| 10. मुक्तिवादः | दशमोवादः।। | मुक्तिप्रकरणम्।। | मुक्तिवादः।। |
| 11. सिद्धार्थप्रामाण्यवादः | एकादशः।। | अभिहितान्वयवादः | सिद्धार्थानुभावकतावादः।। |
| 12. अन्वयशक्तिनिषेधवादः | द्वादशः।। | (Text destroyed) | अन्वयशक्तिनिषेधवादः।। |
| 13. वायुप्रत्यक्षतावादः | त्रयोदशः।। | वायुप्रत्यक्षतावादः।।१३।। | वायुप्रत्यक्षतानिरासः।। |
| 14. निर्विकल्पकवादः | चतुर्दशः।। | निर्विकल्पवादः।।१४।। | निर्विकल्पकवादः।। |
| 15. सुवर्णतैजसवादः | पञ्चदशः।। | सुवर्णवादः।। | सुवर्णतैजसत्ववादः।। |
| 16. योगरूढिवादः | षोडशः।। | योगरूढिप्रकरणम्।। | योगरूढिवादः।। |
| 17. लिङ्गपरामर्शवादः | सप्तदशः।। | इत्यनुमितिवादः।। | तृतीयलिंगपरामर्शवादः।। |
| 18. व्याप्तिवादः } | समाप्तोऽयं व्याप्तिकलहः।। | ।।छ।। | व्याप्तिवादः।। |
| 19. व्याप्तिग्राहकतावादः } | १८।। | समाप्तोऽयं व्याप्तिवादः।।छ। | ।।छ।। |
| 20 विधिवादः | १९।। | विधिवादः।। | विधिवादः।। |
| 21. अपूर्ववादः | २०।। | अपूर्ववादः।। | अपूर्ववादः।। |
| 22. अन्यथाख्यातिवादः | २१।। | इति संक्षेप ।। | अन्यथाख्यातिवादः।। |
| 23 अर्थापत्तिवादः | २२।। | इति संक्षेपः।। | अर्थापत्तिवादः।। |
| 24. अभाववादः | २३।।<br>(almost illegible) | इति महोपाध्याय श्रीशश-<br>धरकृतौ यदत्र प्रकरणं<br>शब्दानित्यता।। } | शब्दानित्यतावादः।। |
| 25. शब्दानित्यतावादः | (no number) | इति महोपाध्यायश्रीशश-<br>धरकृतौ न्यायरत्ने प्रकरण-<br>मीश्वरस्य समाप्तम्।। } | ईश्वरवादप्रकरणम्।। |
| 26. ईश्वरवादः | (no number) | इत्यभाववादः।।(folio75a | अभाववादः।। |
| | | Folio 76b–no name but end of अनुपलब्धिवादः marked with।।छ।। } | अनुपलब्धिवादः।। |

From the above computation, the following points become clear : I.O. numbers the chapters upto 23,and, unlike P., combines chapters 18 and 19 into one and calls it *Vyāpti–kalaha* 'controversy over pervasion.' It is rather strange that I. O. fails to give numbers for the last two chapters : *śabdānityatā-vāda* and *īśvara–vāda*. Moreover, I.O. does not name the *vādas* or *prakaraṇas* for the last few chapters (from 20 to 27). Both P. and I. O. have not separated *anupalabdhi–vāda* from *abhāva–vāda*, and thus, both of them have only 26 chapters. And both have placed *abhāva*-cum-*anupalabdhi-vāda* between *arthāpatti-vāda* and *śabdānityatā–vāda*. A considerable portion of the text of the *anyathākhyāti-vāda* from I. O. has unfortunately been destroyed.

The *Limbdi* ms. separates *vyāpti-vāda* from *vyāpti-graha-vāda* by a ॥छ॥ only. *Abhāva-vāda* and *anupalabdhi-vāda* are arranged here as two concluding chapters. Folio 75a has a colophon *'ity abhāva-vādaḥ'* after which *anupalabdhi-vāda* follows. But folio 76b contains the concluding portion of *anupalabdhi-vāda* without any colophon. Thus, in fact, when all *vādas* are counted we get 27 *vādas*, i. e., 27 chapters. The order of the concluding chapters in *Limbḍi* ms., unlike that in I. O., are as follows :

23 *arthāpatti-vāda*
24 *śabdānityatā-vāda*
25 *īśvara-vāda*
26 *abhāva-vāda*
27 *anupalabdhi-vāda*

Both $M_1$ and $M_2$ agree with the *Limbḍi* ms. in this respect. Accordingly, I have accepted the number of chapter to be 27 (and not 26 as found in P. and I. O.). I have also accepted the sequence of the concluding chapters following these three manuscripts.

It is also interseting to see that the *Limbḍi* manuscript concludes chapters 24 and 25 as follows:

Folio 64a : *iti mahopādhyāya-śrī-Śaśadhara-kṛtau yadatra prakaraṇaṃ śabdānityatā.*

Folio 70b : *iti mahopādhyāya-śrī-Śaśadhara-kṛtau Nyāyaratne prakaraṇam īśvarasya samāptam.*

One can imagine that the scribe might have first thought that the text ended with *Īśvara-vāda*. Since we know that both I.O. and P.end with *Īśvaravāda* we can infer that a reason for such a scribal confusion might have existed. It is probable that the scribe had actually used two manuscripts while copying the *Limbḍi* ms. Probably the first original ended with the *Īśvaravāda*, and the *Abhāva-vāda* and the *Anupalabdhi–vāda* were supplied from the

Jain Education International For Private & Personal Use Only www.jainelibrary.org

second original. This second manuscript was probably our $M_1$ or $M_2$, or at least one belonging to the same family. Since $M_1$ was written at least forty six years earlier (and $M_2$ was written about twelve years earlier) this conjecture is not without foundation. In any case, $M_1$ is undoubtedly the oldest of these manuscripts, as has been shown above. Thus, I have followed $M_1$ and placed the *Abhāva-vāda* and the *Anupalabdhi-vāda* after the *Īśvara-vāda*.

Moreover, S. C. Vidyabhusana in his *Hitory of Indian Logic* (p, 396–397) reported that he had consulted one complete manuscript of NSD, which was in the personal collection of MM. Vindhyeswari Prasad Dwivedin and it ended with the *Abhāva-vāda* (and not with the *Īśvara-vāda.*). Two interesting points may be noted in this connection : (a) when Vidyabhusana wrote his account of Śaśadhara and NSD, the 1924 edition was not fully published. (The excerpts in *The Pandit* were, of course, available.) (b) The 1924 edition, of which MM. Vindhyeswari prasad Dwivedin was the co-editor, was incomplete and ended with the *Īśvara–vāda* (and not with the *Abhāva-vāda*). (Apparently Pandit Dhundhiraj did not use the manuscript that was in the possession of his co–editor !) Pandit Dhundhiraj inserted *Abhāvavāda* (and *Anupalabdhivāda*) between *Arthāpatti–vāda* and *Śabdānityatā–vāda.*

## Śaśadhara's Date

Pandit Sukhlalji Sanghavi, in his personal discussion with me, asked the following question : why should Śaśadhara be regarded as a pre–Gaṅgeśa Navya–nyāya writer ? In fact, he made the following point. The NSD appears structurally to be a collection of a number of *Vādas* or 'discussions' on various philosophical issues. Unlike the *Tattva-cintāmaṇi* of Gaṅgeśa, it is not a unified work where different chapters and sections are organically related to the main theme of the book. A comparatively late Navya–nyāya writer, Gadādhara ( 17 th ceutury A. D.), wrote a number of *Vādas* (about 64, according to the tradition among the Pandits, 9 of which are already published in the collection called *Vādavāridhi* 'Ocean of *Vādas*)', such as *Śaktivāda, Vyutpattivāda* and *Vidhivāda*. The list of chapters found in NSD is strikingly similar to the list of *vādas* written by the post–Gaṅgeśa Navya-nyāya authors like Gadādhara. Thus, it is plausible that the NSD is likewise a post–Gaṅgeśa composition.

Beisdes, the only exhaustive commentary on the whole of NSD that is available to us, the NSD–*Prabhā* of Śeṣānantācārya, notes in a couple of places that Śaśadhara's argument was probably an attempt to meet the objection of Gaṅgeśa [vide : *Sahajaśaktivāda*). Moreover, under chapter *Śabdaprāmāṇyavāda,* Śeṣānanta very definitely remarks that in line "*na*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*caiṣānvayajñāne janayitavye sva-jñānam apekṣate,*" Śaśadhara is trying to criticize Gaṅgeśa's view. I quote the relevant passage from the commentary

यत्तु राजा पुत्रमाकाङ्क्षति पुरुषं चेति संशयव्यतिरेकनिश्चयप्रतिबन्धकतया तात्पर्यगर्भाकाङ्क्षाज्ञानस्य कारणताभिधानं चिन्तामणिकृतस्तात्पर्यज्ञानस्य कारणतां गमयति न तदितरगर्भस्येत्यप्रयोजकमित्यभिप्रेत्याह — न चैषान्वयेति ।

Thus, it appears that there is scope for some doubt (about the chronological priority of Śaśadhara over Gaṅgeśa, a chronology which historians like S.C. Vidyabhusana unanimously accepted. D.C. Bhattacharya discussed the problem of chronology, and to my mind successfully proved that Śaśadhara preceded Gaṅgeśa by at least fifty years. One important evidence cited by D. C. Bhattacharya was this :

"...it is definitely stated by Vidyānivāsa Bhaṭṭācārya in the *Pratyakṣa-maṇi-ṭīkā* (Saraswati Bhavana Ms., fol. 22a) that Gaṅgeśa refuted the views of Śaśadhara in a well-known passage of the Maṅgalavāda (B. I. ed., p. 110): *Viṣṇupurāṇānusāri-Śaśadharīya-lakṣaṇam āha – yat tu rāgeti.*" (p. 87)

I have examined both the passages in question, that of Gaṅgeśa and Śaśadhara. Śaśadhara defined a *śiṣṭa* 'respectable person' as a person without any 'fault' i. e. attachment and aversion (*rāga* and *dveṣa*). Thus, he remarked :

*Kṣīṇadoṣapuruṣatvam eva śiṣṭatvam / tathābhūtatvaṃ ca manvādīnām eva suprasiddham. /*

Gaṅgeśa replied :

*Yat tu rāgadveṣahīnaḥ śiṣṭaḥ, sa ca sarvajñatvān manvādir eva, avigītatādācārād eva vedānumānam iti / tan na /* p. 110–1.

In fact Gaṅgeśa took a liberal view here. He argued that even a modern person could be called a *śiṣṭa* provided he abided by what was called *sadācāra*, rules of good conduct, and the norm of good conduct varied from one country to another. But care should be taken to reconcile this norm with the scriptural authority. Compare :

*Ādhunikānām api śiṣṭatvena vyavahriyamāṇatvāc ca / tathā ca Smṛti :*
*yasmin deśe ya ācāraḥ pāramparyakramāgataḥ.*
*śrutismṛty-avirodhena Sadācāraḥ sa ucyate*" (p. 112)

It is, thus, clear that Gaṅgeśa's remark is an improvement on Śaśadhara's conception of a *śiṣṭa*. Besides, almost all the problems discussed by Śaśadhara in 27 chapters of NSD are found in Gaṅgeśa's *Tattvacintāmaṇi*. A comparative study of both texts reveal that Gaṅgeśa's treatment is often more advanced and comprehensive, besides being sometimes

Jain Education International For Private & Personal Use Only www.jainelibrary.org

an improvement on that of Śaśadhara. Thus, we should have no doubt about the fact that Śaśadhara preceded Gaṅgeśa. Our next problem should be to ascertain an approximate date of Śaśadhara.

MM. S. C. Vidyabhusana in his *History of Indian Logic*, Calcutta University, 1921, gave a brief account of Śaśadhara and NSD based on his examination of a manuscript of NSD in the possession of MM. Vindhyeswari Prasad Dwivedin. This account is interesting although it is somewhat outdated and contains some inconsistent remarks regarding the date of Śaśadhara and NSD. I quote below a few lines from this book :

"Śaśadhara's *Nyāya-Siddhānta-dīpa* (about 1300 A. D.) is a most important work of this kind."

29. ŚAŚADHARA

(ABOUT 1125 A. D.)

Śaśadhara, styled Mahopādhyāya Śaśadhara, is reputed to have been a native of Mithilā. The time in which he flourished is not definitely known. Probably he flourished before Gaṅgeśa and after Udayana whose words he quotes under the designation of *kecit* (some). Śaśadhara and Maṇidhara were, according to a Bengali tradition, two logicians, whose definitions of *vyāpti* (invariable concomitance) were criticized by Gaṅgeśa Upādhyāya in the 12th century A.D., under the title of *Siṃha-vyāghrokta-lakṣaṇa* or definitions as given by "the Lion" and "the Tiger." In reality it was the Jaina logicians, Ānanda Sūri and Amaracandra Sūri, who were called the Lion (*Siṃha*) and the Tiger (*vyāghra*), not Saśadhara and Maṇidhara. According, however, to the Bengali tradition, Śaśadhara lived in the 12th century A.D." p. 396.

It is obvious that if Śaśadhara lived in about 1125 A. D., the NSD could not have been written in about 1300 A. D. Vidyabhusana followed apparently a Bengali tradition in assigning 1125 A. D. as Śaśadhara's date. But he did not give his reasons for believing that the NSD was written in about 1300 A.D. Professor D.C. Bhattacharya was highly critical of Vidyabhusana's suggestion about the two Jaina logicians, Ānanda Sūri and Amaracandra Sūri, which we shall discuss below.

Pandit Dhundhiraj Sastri wrote in his Sanskrit Introduction to the 1924 edition of NSD as follows : (I translate :)

"This Śaśadhara, it is heard (*śrūyate*), belonged to Maunasa gotra. He was the son of Dharaṇīdhara, and grandson of Maheśvara Paṇḍita. Pṛthvīdharācārya was his brother. He must have flourished later than

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Udayana since he quoted some verses of Udayanācārya. He was also later than Vādi-Vāgīśvara (who is mentioned here by name). He seemed to have been (*pratīyate*) alive between 1200 and 1300 Śaka era (1278 and 1378 A. D.)."

Professor D.C. Bhattacharya, who spent his life working on the chronological history of Navya-nyāya authors of Bengal and Mithilā by examining manuscripts and other original documents such as genealogical tables, appeared to have been quite upset at the seemingly irresponsible and obviously undocumented statement of Pandit Dhundhiraj. In fact, he interpreted Dhundhiraj's statement as 'hearsay' and remarked: "The whole of it seems to be a canard. Hearsay in the present century cannot record so many exact details about a scholar of the 13th century." (*History of Navya-nyāya in Mithilā*, 1958, p. 90)

In the earlier book on the History of Navya-nyāya in Bengal (in Bengali: *Baṅge Navya-nyāyā Carcā*, Calcutta, 1952), Professor Bhattacharya was a bit milder in his criticism of Pandit Dhundhiraj. He remarked: (I translate) "According to the editor (Pandit Dhundhiraj Sastri) the date of Śaśadhara is 1200 Śaka era, i.e. 1278 A. D. Although this is possible no evidence has been cited in this regard. It is a great pity that although the name of Śaśadhara's father as well as that of his gotra has been mentioned in the preface, no trace of any evidence has been provided." (p. 11)

It seems that Professor Bhattacharya was unable to trace the source of the informations supplied by Pandit Dhundhiraj. Thus, in his last book *Hisory of Navya-nyāya in Mihilā*, which was posthumously published in 1958 he rejected these informations using such hard language as 'hearsay' and 'canard'. But I shall show below that Pandit Dhundhiraj's informations were not entirely baseless, although it was probable that he himself received them on second hand and hence did not mention his source.

Śaśadhara was mentioned in some manuscripts as Śaśidhara. For example B. R. Bhandarkara in his Report on the Manuscripts in Central India and Rajputana (*Hindi title* : *Rājāsthan me Saṃskṛta Sāhitya khoj ke viṣayame ek viśiṣṭa vivaraṇ*) noted a manuscript of NSD by Śaśidhara (cf. "*Śaśidhara-kṛta*" p. 52). This manuscript is dated 1631 Samvat (1575 A.D.). Moreover, Śaśadhara, in the seminaries of Mithilā and Bengal, is sometimes referred to as "Śaśidhara" (see *History of Navya-nyāya in Mithilā*, p. 88-9). Thus, we may conclude that Śaśidhara was an alternative name for Śaśadhara. If this conjecture is right, then Pandit Dhundhiraj's information as well as the following evidence becomes very much pertinent in assigning a date of Śaśadhara and NSD.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

One Śaśidhara, who described himself as a great logician (*tarkaniṣṇāta*), composed the Bheraghat Stone Inscription of Queen Alhaṇadevi. In 1859-60, Dr. Fitz Edward Hall edited and translated, for the first time, this Bheraghat Inscription in the *Journal of the American Oriental Society*, vol. VI. 1858-60. In fact as early as October 26, 1859, Dr. F. E. Hall presented a paper entitled "Two Inscriptions" to the American Oriental Society, which was later published in the JAOS, vol. VI, pp. 499-532. Hall reported that the Bheraghat Inscription was rescued when "it was on the point of being buried, face downward, in one of the walls" of a temple that was being built in Bheraghat near Jubbalpur, India. The stone on which this inscription was found had, in fact, been brought, as a serviceable building material, to the site where a temple was being erected at Bheraghat on the bank of the Narmada river. Hall rescued the Inscripton from its threatened fate.

I quote below the relevant sections from the Bheraghat Inscription :

मौन्या(ना)न्वये भार्ग्गववैतहव्यसावेतसेतिप्रवरत्रयाढये ।
महेश्वराख्याद्धरणीधरोभून्नाम्ना गरिम्णा यशसा श्रिया च ॥32
कोमल–कान्तिसटालेनोच्चैः स्नेहातिभारभरितेन ।
दीर्घमनोज्ञदशेन त्रिभुवनदीपायितं येन ॥33
पृथ्वीधरस्तस्य सुतः समस्तगभीरशास्त्रार्ण्णवपारदृश्वा ।
प्रशस्तिमेतामलिखद्यदीयैर्द्दिङ्मण्डली शिष्यगणैर्व्विजिग्ये ॥34
एतस्यावरजस्तर्क्कनिष्णातोद्भुतनैपुणः ।
प्रशस्तिमकरोदेतान् सूरिः शशिधराभिधः ॥35
असूत्रयदिदं सर्व्वं विश्वकर्म्मविधानवित् ।
पीथेसमभिधः सूत्रधारः पृथ्वीम्पृथुर्यथा ॥36
सूत्रधाराग्रणीवा(बा)लसिन्हसूनुर्म्महीधरः ।
शिलान्तथाकरोद्वर्ण्णैं नभस्तारकितं यथा ॥37
संवत् ९०७ मार्ग्गसुदि ११ रवौ ॥

" In the family of Maunin (or Mauna) —enriched with three *Pravaras* Bhārgava, Vaitahavya and Sāvetasa—was born, of Maheśvara, a person Dharaṇidhara by name and adorned with fame, reputation and fortune:(32)

"Who enlightened the three worlds like a lamp, by shedding a pleasing lustre, being filled with overflowing kindness ('oil' in the case of a lamp), and enjoying a long and gratifying position ('having a long and beautiful wick' in the case of a lamp). (33)

"His Son Pṛthvidhara, who has seen the other shores of all the deep oceans of learning, (and) whose crowds of disciples conquered the quarters of the earth, wrote (i.e., inscribed) this eulogy. (34)

" His younger brother, Śaśidhara by name, a great teacher, well versed in logic and wondrously clever, composed this eulogy. (35)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" The architect named Pṛthe, who is versed in the rules of Viśvakarman, constructed all this, as Pṛthu did the earth. (36)

"Mahīdhara, a son of the chief of artizans Bālasimha, engraved this stone with letters in such a way that it is like the star-studded sky.

"The year 907, on Sunday, the 11th of the bright half of Mārgaśīrṣa."

The inscription is dated at the end of the last line. The author was Śaśidhara, a younger son of Dharaṇīdhara, and a grandson of Maheśvara of the Mauna or Maunin gotra. His elder brother, Pṛthvīdhara, wrote this panegyric (*praśasti*) on stone, and it was finally engraved by Mahīdhara, a son of the artizan Bālasiṃha.

Alhaṇadevī was the queen of Gayakarṇa Deva, and daughter of a Rāṇā of Udaypur. She was grand-daughter, through her mother, of King Udayāditya of Malwa. Hall noted (JAOS, VI, p.522) that while Udayāditya's son, Lakṣmīdhara, was reigning, a grant of a village was issued by his younger brother, Naravarman. This grant was dated 1104 A.D. Thus, Hall conjectured that Udayāditya might have flourished in about 1075 A.D. But the inscription we are considering is in the year 907, on Sunday, the 11th of the bright half of Mārgaśīrṣa, at which time Alhaṇadevi's son Narasiṃha was reigning, and Alhaṇadevī was also alive. Thus, the year 907 cannot, as Hall rightly noted, be identified with the Vikrama era, nor can it be identified with the era of Śālivāhana. Besides, the eleventh day of the bright fortnight of Mārgīśīrṣa, 907, was not a Sunday in the era of Vikramāditya.

Hall was himself puzzled by this chrohological difficulty and the problem of identification of the year 907. But from other sources he settled the chronology as follows; "Udayāditya ... may ... have flourished about 1075. Alhaṇa Devī ... was a granddaughter ... of Udayāditya. She may thus have been born about 1100." (p. 501, JAOS, VI).

Hall mentioned also about another inscription, whose author was Śaśīdhara, son of Dharaṇidhara. Its date was 926. Here are his comments about this inscription:

"When passing through the station of Jubulpoor, in February of last year, I found, in the Museum at that place, a somewhat weather-worn inscription, hitherto inedited, of the same class with those which precede. Unhappily, I had neither leisure nor health to take a copy of it. The date that it bears is 926: संवत् षड्विंशत्युत्तरनवशताब्देपि ९२६. Its poet was Śaśidhara, son of Dharaṇidhara; and it makes mention of Nāmadeva, son of Mahīdhara, as a *sūtradhāra*. Three of these names we have met with in the record of 907. At the foot of the stone, the ensuing benediction, in the *Āryā* measure, is legible without difficulty;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत् सूर्याचन्द्रौ यातायातं नभस्तले तपतः
तावत् कीर्तनमेतत् कीर्त्यै कर्तुः स्थिरं भूयात् ।

'As long as the sun and the moon, going and returning, shall shine in the firmament, so long may this eulogy endure, conducing to the renown of the doer *of the transaction herein memorialized*'. JAOS, VI p. 533

F. Kielhorn re-edited and re-translated, with a few corrections, the Bheraghat Inscription. This was published in *Epigraphia Indica*, Vol. II, Calcutta 1894 (reprint in 1970, Delhi, Motilal Banarsidass). Kielhorn remarked on the date of this Inscription as follows:

"Our inscription is dated, at the end of the last line, in the year 907, on Sunday, the 11th of the bright half of Mārgaśırsha, —a date which must of course be referred to the Kalachuri or Chedi era...With my epoch of the Kalchuri era, as to the general correctness of which there can now be hardly any doubt, and according to the way in which the other Kalachuri dates yield satisfactory results, our date should fall in A.D. 1155. But in A.D. 1155 the 11th *tithi* of the bright half of Mārgaśirsha *commenced* 2 *h.* 12 *m.* after mean sunrise of Sunday, the 6th November, and ended O *h.* 43 *m.* after mean sunrise of Monday, the 7th November apparently causing sudi 11 to correspond, civilly, to the Monday. In the following year, A.D. 1156, on the other hand, the same 11th *tithi* of the bright half of Mārgaśırsha *ended* 1 h. 46 *m.* after mean sunrise Sunday, the 25th November, and consequently, in that year, sudi 11 was, civilly, really a Sunday. Now that the day intended by the original date is either Sunday the 6th November A.D. 1155, or Sunday, the 25th November A.D. 1156, appears to me certain; but I am not at present prepared to say confidently which of these two Sundays is the true date." (p.9, *Epigraphia Indica*, II).

If we accept this method of calculation of Kielhorn to be correct, then the other inscription of Śaśidhara that was mentioned by Hall would be placed in 1174 A.D.

Now, it can be clearly noticed that Pandit Dhundhiraj Sastri reported "many exact details" about Śaśadhara most probably on the basis of a tradition current in western India — a tradition that identified Śaśadhara of NSD with the Śaśidhara of the two inscriptions cited above. In fact, Pandit Dhundhiraj's expression "*Śrūyate*" can be better interpreted as 'it is heard from traditional lore'. It is, however, doubtful whether this tradition was also aware of the existence of the two inscriptions by Śaśidhara. Pandit Dhundhiraj obviously was not directly acquainted with the Bheraghat Inscription, nor did he know about its existence (although it was twice edited and dated before 1924 A.D. when Dhundhiraj apparently wrote his Introduction). He was also unaware of the date mentioned in the Inscription,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

and hence, on the basis of the citations from other authors (like Udayana and Vādi Vāgīśvara) in NSD. placed Śaśadhara in 1274 A. D. Furthermore, he did not mention the alternative name of the author Śaśidhara (which was found in the inscriptions). The *gotra* of Śaśadhara was according to Pandit Dhundhiraj, Maunasa, and D. C. Bhattacharya rightly put a question-mark after this *gotra* name (p.90). The Bheraghat inscription tells that the gotra name was Manunin (or, according to Kielhorn, Mauna). Hall rightly noted that 'Maunin', was a well-known family name. For all these reasons, I am inclined to believe that Pandit Dhundhiraj's source of information was not the inscriptions, but some traditional lore current in western India regarding Śaśadhara, the author of NSD. And it is only ususal that a traditional lore of this nature seldom bothers about the exact date of the author, but supplies, instead, details of his family, *gotra*, father's name and so on.

We can now re-consider S.C. Vidyabhusana's brief account of Śaśadhara and the NSD in the light of the above informations. A Bengali tradition, according to Vidyabhusana, speaks of the 12th century A.D. as the probable date of Śaśadhara. It is significant that this comes very close to the date settled by the above inscriptions.

Vidyabhusana's identification of 'the Lion' and 'the Tiger' with two Jaina logicians, Ānanda Sūri and Amaracandra Sūri (see above) was strongly criticizeds by D.C. Bhattacharya in his *History of Navya-nyāya in Mithilā*. Bhattacharya called it "a curious suggestion" and "on the face of it improbable" (p. 89) . But I think Professor Bhattacharya was a bit high-handed in this criticism of Vidyabhusana. In fact, Bhattacharya's reason for rejecting Vidyabhusana's view amounts, at best, to a prejudice. He asserted that Gaṅgeśa could not refer to any logician outside Mithilā or Bengal.

In the present state of our knowledge, it should be admitted with fairness, we cannot decide definitely whether the nicknames 'the Lion' and 'the Tiger' in *Tattvacintāmaṇi* referred to the two Jaina scholars (as Vidyabhusana suggested) or to Śaśadhara and Maṇidhara (as the traditional pandits used to suggest). But two points may be noted in this connection. 1 ) Śaśadhara supported the modified forms of both the definitions of *Vyāpti* 'pervasion' (ascribed to 'the Lion' and 'the Tiger' in the *Tattvacintāmaṇi*), and Gaṅgeśa rejected both of them in favour of his improved 'final' definition or 'most acceptable definition' (cf. *siddhānta-lakṣaṇa*) of *vyāpti*. 2) Maṇikaṇṭha's (Maṇidhara's) 'final' definition of *vyāpti* must have influenced Gaṅgeśa when he formulated his own 'final' definition of *vyāpti*.

Vidyabhusana's suggestion may indicate another point. Almost all the creative 'logicians' between Udayana and Gaṅgeśa concerned themselves, in

Jain Education International For Private & Personal Use Only www.jainelibrary.org

one way or the other, with the clarification of the concept of *vyāpti* and *vyāpti-graha*, but not all of them came from either Mithilā or Bengal. It is probable that the logicians of western India also discussed the problems of logic and epistemology which Gaṅgeśa tried to grapple with in his *Tattva-cintāmaṇi*. On this point D. C. Bhattacharya held a dogmatic view that almost all the creative Navya-nyāya authors came form either Mithilā or Bengal.

From what has been discussed above, I wish to draw the following conclusions:

(a) Śaśadhara most probably belonged to Western India. There is no factual evidence to show that he hailed from Mithilā (as D. C. Bhattacharya obviously took for granted).

(b) Śaśadhara may be identical with Śaśidhara, the author of the two inscriptions mentioned above. One is dated in 1156 A. D. (according to Kielhorn), accordingly the second is to be placed in 1174 A. D. Thus, the NSD might have been written not later than 1200 A. D. This date does not seem to be in contradiction with any interanal evidence to be gleaned from NSD. Śaśadhara respectfully quotes Udayan several times, and Udayana's date, according to the latest research (see D. C. Bhattacharya), falls in between 1025 and 1100 A.D. Śaśdhara also refers to another author by name, Vādī Vāgīśvara, the author of *Māna-manohara*. The same *Māna-manohara* has been referred to by name by the great polymath Veṅkaṭanātha Śrī Vedāntadeśika of the Rāmānuja school of Vedānta in his *Nyāyapariśuddhi* (Chowkhamba edition p. 278). Veṅkaṭanātha lived between 1267 and 1369 A. D. (a life-span of 102 years, see Introduction of *Yādavābhyudaya-kāvya*, Vani Vilas Edition). Even Citsukha (1200 A. D.) refuted Vādī Vāgīśvara's view. In our opinion, Vādī Vāgīśvara was an older contemporary of Śaśadhara. Thus, Śaśadhara must have preceded Gaṅgeśa almost by 150 years.

The above two conclusions obviously run contrary to the conclusions reached by previous scholars like D. C. Bhattacharya. But I think the evidence collected by me shows the plausibility of the above conclusions. It is worth pointing out that my dating of Śaśadhara is not too far away from the date 1125 A. D., which S. C. Vidyabhusana assigned to Śaśadhara. I am, of course, not in agreement with Vidyabhusana when he claims that Śaśadhara was believed to be a native of Mithilā. It is also worth pointing out that Pandit Dhundhiraj Sastri's account of the personal history of Śaśadhara helps us to identify him with Śaśidhara, author of the Bheraghat Inscription, although it must be admitted that Dhundhiraj's account is of

3

Jain Education International For Private & Personal Use Only www.jainelibrary.org

no help to us in settling the date of Śaśadhara. It is a pity that D. C. Bhattacharya for whose scholarly contribution to the reconstruction of the History of Navya-nyāya I have great admiration, was rather hasty in rejecting the accounts of both S. C. Vidyabhusana and Pandit Dhundhiraj.

I further adduce the following arguments to strengthen the above conclusions:

(1) Śaśadhara was a popular Navya-nyāya author in Western India in the 16th and 17th century. The biography of Hīra-vijaya Sūri, the famous Jaina scholar who was honoured by the Moghal Emperor Akbar is the subject matter of a Sanskrit poem *Hīra-saubhāgya-kāvya*. M. D. Desai gleaned the following historical material from this poem:

Hīra-vijaya Sūri was born in 1583 Vikrama Samvat and received his *dīkṣā* 'initiation' at the age of thirteen in order to study the *Śāstras*. By 1607 Vikrama Samvat ( 1551 A. D. ) he became a *vācaka* or *upādhyāya* 'a teacher', and three years later he became the *ācārya*. Before he became a teacher in 1551 A. D., he had learnt *Tarka-paribhāṣā*, *Mitabhāṣiṇī*, Śaśadhara, Maṇikaṇṭha, *Varadarāji*, *Praśastapāda-bhāṣya* with *Kiraṇāvalī* etc. He studied in Devagiri in the South, and his teacher was a Brahmin Naiyāyika. When he finished his study, a book called *Cintāmaṇi* by Gaṅgeśa was given to Hīra-vijaya by his teacher as a present.

This information from the *Hīra-saubhāgya-kāvya* is quite significant for our purpose. It reveals, besides Śaśadhara's popularity in Southern and Western India, the fact that although Gaṅgeśa's text *Tattvacintāmaṇi* was available at that time, it was still regarded as a comparatively new text and hence not included in the regular reading lists of the seminaries outside Mithilā and Bengal. It is clear that the texts of Śaśadhara, Maṇikaṇṭha and Udayana would be read just after the reading of primers of logic like *Tarkabhāṣa*– (*Tarka-paribhāṣā*).

(2) There is another sanskrit poem *Vijaya-praśati* with a commentary by Guṇa-vijaya Gaṇi. It describes the biography of Vijaya-sena Śuri, chief disciple of Hīra-Vijaya Sūri. The verse 9 of Canto 1 of this poem is:

*ye tarka–karkaśadhiyā dhiṣaṇānurūpāḥ*
*sāhitya–śāstra–maṇibhir makarākarā ye*
*salakṣaṇekṣaṇa–vicakṣaṇa–cakṣuṣo ye*
*te māṃ svam abjam iva padmakarāḥ karantu*

The commentary explains the term *tarka–karkaśa–dhiyā* as follows:

*Tarkabhāṣā-Saptapadārthī-Varadarājī-Pramāṇamañjarī-Praśastapādabhāṣya-Kaṇādarahasyādayaḥ Śaśadhara–Maṇikaṇṭha–Kusumāñjali–Kiraṇāvalī–Vardhamāna–Tattvacintāmaṇi–paryantāḥ Śaiva–Pramāṇa–Śāstrāṇi.*

(See *Vijaya–praśasti*, Eds.: Hargovinda Das and Bechar Das,Varanasi, 1911 A.D.)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

According to M. D. Desai, the commentator Guṇa-Vijaya Gaṇi completed his *Ṭīkā* in 1632 A.D. Thus, Śaśadhara's NSD was a compulsory textbook for Navya-nyāya by 1600 A. D. It was studied along with *Kiraṇāvalī, Kusumāñjali and Tattvacintāmaṇi.*

(3) Śaśadhara referred to Vādī Vāgīśvara as follows:

*"Vādi-Vāgīśvaras tu suvarṇaṃ na pārthivaṃ tathāvidhānalasaṃyoge sati bhaṣmānārambhakatvād ity āha – tad api tuccham"*

The Commentator Śeṣānanta rightly identified him with the author of *Māna-manohara*. The text of *Māna-manohara* has been published only recently by Swami Yogindrananda in Varanasi ( in 1973). I located the passage that Śaśadhara had in mind (p. 19) :

*"Vivādādhyāsitāḥ paramāṇavo na pārthivāḥ atyantānalasaṃyoge sati bhaṣmānārambhakatvāt, jala-paramāṇu-vat".*

It is significant that Śaśadhara referred to Vādī Vāgīśvara in the singular (cf. *Vādi-Vāgīśvaras tu ... ... ity āha*). This indicates that Vādī Vāgīśvara of the 12th century A.D. was a close contemporary of Śaśadhara. If Vādi Vāgīśvara had flourished much earlier than Śaśadhara, one would then expect the plural number to be used in such a reference (cf. *gaurave bahuvacanam*).

(4) The discovery of Guṇaratna Gaṇi's commentary on the four chapters of NSD throws much light on the problem of Śaśadhara's date. This Guṇaratna must be identified with the author of *Ṣaḍdarśanasamuccaya-ṭīkā* and *Kriyāratna-samuccaya* (see below), and hence he must be placed between 1363 A.D. and 1439 A.D. (S. C. Vidyabhusana, *History of the Medieval School of Indian logic*, Calcutta, 1909, p. 52–53). Neither D. C. Bhattacharya nor S. C. Vidyabhusana (nor Pandit Dhundhiraj) knew about the existence of Guṇaratna's commentary on NSD. Only in the recent publication of the Manuscript—catalogue of the L. D. Institute, did it come to light that Guṇaratna wrote a commentary on the NSD. Neither in the *Ṣaḍdarśanasamuccaya-ṭīkā* nor in the *NSD-Ṭīkā* did Guṇaratna mention Gaṅgeśa—a fact that shows that Gaṅgeśa's fame as a Navya-nyāya author was yet to reach Western India at the time of Guṇaratna. Śeṣānanta the author of *NSD-Prabhā*, an extensive commentary on NSD, probably belonged to 1450-1500 A.D., and he did not come from Mithilā. D. C. Bhattacharya reported that Jayadeva Pakṣadhara Miśra of Mithilā wrote a commentary on NSD, a manusctipt of which was preserved at Varanasi (p. 90, 119). The tentative name of this commentary was *Śaśadharavyākhyā*. But D. C. Bhattacharya was unable to see or examine this manuscript personally. In my recent visit to Benares, I tried to locate this manuscript but failed. Thus, now I have doubt whether Jayadeva wrote a commentary on NSD at

Jain Education International For Private & Personal Use Only www.jainelibrary.org

all. I have examined, on the other hand, two other manuscripts (Nos.30238 and 33214), both being copies of a commentary on NSD by Viśvanātha. One manuscript is fragmentary, and the second manuscript gives the name of the commentary *Komalā*. It is significant that the second manuscript gives the name of the author of NSD as Śaśidhara—an evidence which strengthens our identification of Śaśadhara with the Śaśidhara of the Bheraghat Inscription.

(5) Last but not the least, verse 3 of the Bheraghat Inscription describes the eightfold forms of Lord Śiva in a manner which matches well with the Nyāyavaiśeṣika ontological principles, i. e., its system of *padārthas*. I quote below the verse in question:

*bhūtaṃ sad vibhu yad vibhāti bhuvanaṃ yad–vibhramād yaj jagan*
*netrānandakaraṃ dharāśrayarasādy–anyatvahetuś ca yat/*
*yad gandhoddhuradhāma yac ca yajate śītaṃ yad ekāntataḥ*
*saśparsaṃ yad arūpam ebhir avatād yuṣmān śarīraiḥ śivaḥ / /*

"That (form) which, being a gross element, is all–pervading; that by whose revolution the earth is illuminated; that which delights the eyes of all; that which causes the savour *(rasa)* and other qnalities of earth to change; that which is the vast substratum of odour; he that sacrifices; that which has by nature cold touch; and that which possesses touch but no (visible) colour; may Śiva,by virtue of these bodies, protect you."

The eight forms of Śiva are the five elements, Earth, Air, Water, Fire/heat, and the Sky or phyical space, and the sun, the moon and the sacrificing priest. It is obvious that the five elemental 'forms' are described here following the Vaiśeṣika metaphysics. All the five physical sense–properties are referred to here as connected with the fivc phyical subsances. Technical terms like '*bhūta*' and '*vibhu*' are typical of the Vaiśeṣika school. The expression '*dharāśrayarasādyanyatvahetuḥ*' is a very clever way of referring to Heat/Fire and the theory of *pākaja rasa* and *pākaja sparśa* of the Vaiśeṣika school. It justifies the auther's own description of himself as *tarka–niṣṇāta* 'one well versed in the *tarka–śāstra*.' For comparing this verse with a more poetic description of the same eight–fold forms of Śiva we can turn to the opening verse of *Abhijñānaśākuntala* by Kālidāsa:

*yā sṛṣṭiḥ sraṣṭur ādyā vahati vidhihutaṃ yā havir yā ca hotrī*
*ye dve kālam vidhattaḥ śrutiviṣayaguṇā yā sthitā vyāpya viśvam/*
*yām āhuḥ sarvabījaprakṛtir iti yayā prāṇinaḥ prāṇavantaḥ*
*pratyakṣābhiḥ prapannas tanubhir avatu vas tābhir aṣṭābhir īśaḥ / /*

("May Lord Śiva protect you – Śiva who is possessed of the (following) eight perceptible forms: that which is the first creation of the Creator, that

Jain Education International For Private & Personal Use Only www.jainelibrary.org

which carries the oblation offered in accordance with the (scriptural) injunction, that (he) who performs sacrifice, those two (viz., the Sun and the Moon) which regulate time, that which possessing, as its attribute, the object of hearing (i.e., Sound) remains pervading the universe, that which is designated (by people) as the source of all seeds, and that by which the living (breathing) beings are endowed with life (breath)."

## GUṆARATNA SŪRI

M. D. Desai mentions three Guṇaratnas, all of whom were Jaina teachers (*ācāryas*)."

(1) One Guṇaratna belonged to the Kharargaccha group of the Śvetāmbara Sect. He was a pupil of Sādhunandana and flourished in 1501 Vikrama Samvat (i.e., 1445 A. D.). He wrote a commentary on a text called *ṣaṣṭiśataka*.

(2) The second Guṇaratna belonged to the Āgamagacchīya group. His teacher's name was not given. His pupil was Devaratna who wrote a book in 1513 A. D. Thus, this Guṇaratna must belong to 1500 A. D. (see Desai's A *Concise History of Jaina Literature* in Gujarati, p. 523 )

(3) The third Guṇaratna was a pupil of Devasundara Sūri of the Tapāgaccha group. He is the famous author of *Kriyāratnasamuccaya*, a book on Grammar. This text was written in 1468 Vikrama Samvat (1412 A. D. ). The same Guṇaratna wrote the well known commentary *Ṣaḍ-darśanasamuccaya-ṭīkā*, on Haribhadra's *Ṣaḍ-darśanasamuccaya*.

The biography of this Guṇaratna has been described in the poem called *Gurvāvalī* by Munisundara Sūri. (See *Guravāvalī*, Śrī-Jaina-Yośovijaya-granthamālā-4, Benares, 1905). The author of *Gurvāvalī*, Munisundara Śūri, was a contemporary of this Guṇaratna. The account of Guṇaratna's life and works starts from p. 86 upto p. 89 of the printed text of *Gurvāvalī*. The colophon of the text reads:

"*Śrī-bṛhat-Tapāgaccha-Śrī-Gurvāvalī bṛhatī Śrī-Munisundara-Sūri-kṛtā*"

I quote below the following relevant verses :

"*sarva-vyākaraṇāvadāta-hṛdayāḥ sāhitya-satyāsavo*
*gambhīrāgamadugdhasindhulaharīpānaikaprītābdhayaḥ*
*jyāyojyotiṣanistuṣaḥ pradadhatas Tarkeṣu cācāryakam*
*vāde te' tra jayanty aśeṣa-viduṣāṃs traividya-darpoṣmalān// 83*
*cakrus Ṭīkā-śalākām te Ṣaḍ-darśanasamuccaye*
*jñāna-netrāñjanāyeva satām tattvārthadarśinīm//88*
*uddhṛtya ye vyākaraṇāmbu-vāśito*
*vilobhya buddhi-prasarāmarādriṇā/*
*śuddha-Kriyāratnasamuccayaṃ satām*
*āścaryabhūtaṃ vibudhālaye daduḥ//89*"

Jain Education International For Private & Personal Use Only www.jainelibrary.org

From our point of view, it is significant that Muni-sundara, while mentioning the two important works of Guṇaratna, referred also to Guṇaratna's vast learning and great skill in *Tarkaśāstra* (logic, *Navya-nyāya*) as well as in the art of philosophic debate (cf. *pradadhatas Tarkeṣu cācāryakam* and *Vāde te 'tra jayanty* in verse 83 above). It is also indicated that he overcame the pride of many orthodox (Vedic) logicians.

Our Guṇaratna, commentator on the four chapters of NSD, must be identified with this third Guṇaratna. The other two Guṇaratnas apparently did not study any logic or *Tarkaśāstra* (or *Vāda-śāstra* ). Thus, it would be impossible for them to write a learned commentary on such a technical text as the NSD.

Apart from the Gurvāvalı account, there is also further evidence for the third Guṇaratna's deep knowledge of *Tarkaśāstra* or *Navya-nyāya*. Vādındra's *Mahāvidyāviḍambana* is undoubtedly a text belonging to the early period of Navya-nyāya. This is further proved by the fact that Maṇikaṇṭha, a reputed Navya-Naiyāyika, devoted the last chapter of his *Nyāyaratna* to the discussion of the *Mahāvidyā* type of inference. Vādındra of South India (1210-47 A. D.) mentioned also that Tārkikas (= *Navya-naiyāyikas*) like Śivāditya Miśra tried to establish the validity of the *Mahāvidyā* type of inference. It was Bhuvanasundara, a Jaina scholar and a pupil of our third Guṇaratna, who wrote an excellent commentary on Vādındra's *Mahāvidyā-viḍambana* called *Mahāvidyā-viḍambana-ṭīkā* (printed along with Vādındra's text in the Gaekwad Oriental Series no. 12). Bhuvana-Sundara referred to his teacher Guṇaratna in the opening verses as follows:

"*Tarkādigranthaviṣaye yatkiñcij jñāyate mayā/*
*tatra Śrī—Guṇaratnāhva-gurūnāṃ vāg-vijṛmbhitam//*"

("The little that I know about the texts on Tarka etc. is simply the verbal explantion of my teacher called Sri Guṇaratna.")

The learned commentary of Bhuvanasundara bespeaks of his excellent knowledge and understanding of the Navya-nyāya techniques and methodology. Thus, his teacher Guṇaratna must certainly have been an expert on Navya-nyāya.

Guṇaratna in his *Ṣaḍ-darśanasamuccaya-ṭīkā* supplied two independent lists of older Nyāya-Vaiśeṣika authors. It is significant that he mentioned neither Śaśadhara nor Gaṅgeśa in this connection. The latest important author he mentioned was Śri-vallabhācārya, the author of *Nyāyalīlāvatī*. This shows that in 1411 A. D. Gaṅgeśa's fame did not extend outside Mithilā and Bengal. It is probable that Guṇaratna studied Śaśadhara and commented upon only four chapters of NSD after he finished his *Ṣaḍ-darś-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*anasamuccayaṭīkā*. Śaśadhara's work was just becoming popular in Western India. This also explains the fact that Guṇaratna's commentary is only on four chapters from the middle of NSD, and not on the whole of NSD.

There was a fourth Guṇaratna, who was also an expert on Navya-nyāya. Unfortunately, an account of this fourth Guṇaratna is not to be found in M. D. Desai's *A Concise History of Jaina Literature*. This fourth Guṇaratna was the author of an excellent and very eleborate commentary, *Tarka-taraṅgiṇī*, in fact a sub-commeotary on Govardhana's *Tarka-prakāśikā*, which is itself a commentary on Keśava Miśra's *Tarka-bhāṣā*. The text of *Tarka-taraṅgiṇi* was edited by Dr. V. G. Parikh as his Ph. D. dissertation under the late professor J. S. Jetly. I have had the privilege of examining this hitherto unpublished but carefully edited text of *Tarka-taraṅgiṇī*, which is at present, a manuscript accepted for publication by the L. D. Institute of Indology. According to J. S. Jetly (Introduction to the above work), this Guṇaratna beloged to 17th century A. D.

The *Tarka-taraṅgiṇī* of Guṇaratna abounds in references to almost all the important late (*i*. e., post- Gaṅgeśa) Navya-naiyāyikas such as Jayadeva Pakṣadhara, Raghunātha, Bhavānanda, Haridāsa, Kṛṣṇadāsa, and Yajñapati. Almost in every page, some important post-Gaṅgeśa author was quoted. But I have been unable to locate a single reference to Śaśadhara or the NSD. It is, on the face of it, improbable that if the same author had written another important commentary on a Navya-nyāya text like NSD, he should be silent about it altogether in his apparently larger work.

Our Guṇaratna's commentary on NSD, on the other hand, does not contain any reference to any post-Gaṅgeśa Navya-nyāya author. In fact, it does not contain a single reference to even Gaṅgeśa. The only other Navya-nyāya author, besides Udayana, mentioned in Guṇaratna's NSD-*ṭīkā*, was Sundala (or Sondaḍa) Upādhyāya. Sondala or Sondaḍa, as we all know, was an important pre-Gaṅgeśa author whose view was contested by Gaṅgeśa in his *Tattvacintāmaṇi*. It would thus be odd again to assume that a Navya-nyāya author of the 17th century would be silent about Gaṅgeśa while he wrote a Navya-nyāya commentary.

Besides, I have examined myself the *Anyathākhyātivāda* section of *Tarka-taraṅginī* along with Guṇaratna's NSD commentary on the *Anyathākhyātivāda* chapter (which is, fortunately for us, one of the four chapters commented upon by Guṇaratna), and from this comparative study I am forced to conclude that these two sections on the same topic could not have been written by the same author. Thus, all the above evidence shows that 17th century Guṇaratna was a different person, and that our Guṇaratna should be identified with the author of *Ṣaḍ-darśanasamuccaya-ṭīkā*. The NSD commentary was probably the last work of the author, and that is why it was left unfinished.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## SOME TAXTUAL NOTES

The NSD commentary of Guṇaratna contains some un–Pāṇinian forms like *ānayitvā* and *parityaktvā*. Such forms may very well be peculiarities of Jain Sanskrit. It is by now well–known that like Buddhist Sanskrit, Jain Sanskrit has some peculiarities. For preliminary reference, one can see M. Bloomfield's 'Some aspects of Jaina Sanskrit' in Festschrift Jacob Wackernagel, Gottingen (pp. 220–230). On some occasions, it seems that the scribe did not apply the obligatory *sandhi* rules within long compounds in order, perhaps, to render the meaning of the words clear. Thus, we have sometimes such expressions in the manuscript as"*-graha-agraha-*".

Guṇaratna was also aware of the *saṅgati* problem that was usually discussed by Navya–nyāya commentators. *Saṅgati* is the relational tie that is purported to exist between two distinct, consecutive chapters in a book. The idea behind the *saṅgati* theory is that a book is supposed to be an *organic* whole where different chapters and sections must be related to each other. Thus, in the beginning of the commentary on the *Arthāpatti* chapter, Guṇaratna points out that there is either *upodghāta saṅgati* or *prasaṅga saṅgati* (or, perhaps, both) between the preceding *Anyathākhyāti-vāda* chapter and the folliwing *Arthāpatti-vāda* chapter.

In editing the text of NSD, I have used, as I have already mentioned above, the text of P. as another manuscript. Thus, when I have differed from the readings recorded in P., I have noted the P. variants in footnotes. But when I have found some palpable misprints in P. (and there are many, as Pandid Dhundhiraj himself gracefully admitted), I have corrected them without any comment. It is worth pointing out here that P. sometimes betray the characteristics of a manuscript, since it systematically misprints certain letters like "Stha" (स्थ) as "ccha" (च्छ). (See pp. 182, 214, 215. 141, 148). we should also note that on p. 461–2, P. drops an entire line of the text, and renders the meaning of the passage absolutely unclear.

In the *Vyāptivāda* chapter, P. reads 18 different definitions of *vyāpti*. But later on in the following text only 17 definitions of *vyāpti* are examined one by one and rejected. One additional definition of *vyāpti* found in P. must then have been the result of a misreading from corrupt manuscripts. Our I. O. numbers these definitions of *vyāpti*. The total number is 17. And all these seventeen definitions were subsequently examined and rejected. Thus, I suggest the following exicision from P. :

"*Sādhanātyantābhāvavyāpakābhāvapratiyogisādhyasāmānādhikaraṇyaṃ vā*",

Both $M_1$ and $M_2$ agree in this respect.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

In the *Vidhivāda* chapter, P. reads the fourth *vipratipatti* ('controversy') as simply "*niyojyaprayojanikā*," but on p. 446 of P., it is referred to as "*niyojyaprayojanikā bhāvaneti pakṣaḥ*." Thus, we have corrected the reading of the fourth *vipratipatti* here following I. O., $M_1$ and $M_2$.

There are two occurrences of the expression "*koṭyam*" in connection with *Śakti*. (see p. 326 and 338 of P.). The commentator Śeṣānanta explains: "*koṭyam saṃkocaḥ*" (p. 327). But $M_1$ and $M_2$ have the expression "*kocyam*" in these two places.

Guṇaratna in the commentary uses an expression "*cakra-marda*" obviously referring to some herb or creeper. I have consulted through Pandit Malvania an Ayurvedic physician about the significance of this word. This Sanskritist physician has suggested the following etymology of "*cakra-mardaḥ*": *cakraṃ dadraṃ mardayati iti cakra-mardaḥ*. In other words, the suggestion is that it is the name of a herb which is used to cure ringworm.

There may be some doubt as to whether the NSD was contemplated and written as a single book or it is the result of a compilation of different *vādas* separately written at different periods. I give below some internal evidences to dispel this doubt and show that the first alternative is plausible.

(a) In the *Śaktivāda* chapter, Śaśadhara refers twice to his later chapter on *Abhāvavāda*.

(i) *tasmād avaśyam tad-anyonyābhāvasya saṃsargaḥ pratiyogitāvacchedaka iti svī-kartavyam iti vācyam/ ABHĀVA-sthale nirasanīyatvāt.*

(ii) *na ca pratiyogy-avṛtti sadātanābhāvavatvam ghaṭa-paṭau nāyaṃ ghaṭaḥ iti vyāsajya-pratiyogikānyonyābhāvavyāpakam iti vācyam / tasyāpy ABHĀVA-sthale nirasanīyatvāt.*

(*b*) In the chapter on *Liṅgaparāmarśa-vāda*, Śaśadhara refers to the *Arthāpatti-vāda* (or *Arthāpattinirāsa-vāda*) chapter as follows :

"*Sarvaṃ caited Vyatireki-sthale sphuṭī-bhaviṣyati.*"

We also find examples of back reference in NSD. Śaśadhara refers to a former chapter in his *Arthāpattinirāsa-vāda* chapter in the following manner:

"*Yathā punar asannikṛṣṭo 'pi liṅgaparāmarśodayaḥ tathoktaṃ TṚTĪYA-LIṄGAPARĀMARŚA-sthale.*"

This is obviously a reference to the chapter called *Liṅgaparāmarśavāda*. These evidences show that the whole NSD was at least contemplated as one single book on Navya-nyāya.

**B. K. Mati Lal**

4

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# BIBLIOGRAPHY


**Catalogues of Manuscripts consulted**

Benares Catalogue : *A Descriptive Catalogue of the Sanskrit Manuscripts* (at the Saraswati Bhavan). Vol. VIII, Ed.: Subhadra Jha. Benares 1962.

Bikaner Catalogue : Anupa Sanskrit Literary Bikaner Eds. Kunhan Raj and K. M. K. Sarma,

India Office Lib : *Catalogue of the Sanskrit Manuscripts in the Library of the India Office.* part IV. Ernst Windsch and Julius Eggeling. London. 1894.

Jesalmir Catalogue : *Catalogue of Sanskrit and Prakrit Manuscripts in Jesalmir,* Compiled by Sri Muni Punyavijayaji. Ahmedabad. 1972

Jodhpur Catalogue : *A Classified list of Manuscripts in the Rajasthan Oriental Research Institute, Jodhpur.* Ed. Muni Jinavijaya. Jodhpur. 1960

L. D. Institute Catalogue : *Catalogue of Sanskrit and Prakrit Manuscripts at the L. D. Institute of Indology. Mahārāja Punyavijayaji's Collection.* L. D. S. 2. Ed. Ambalal P. Shah. Ahmedabad. 1963.

Limbdi Catalogue : *Catalogue of Seth-Anandaji-Kalyanaji-Jaina-Pustak-Bhandar* Ed. Sri Caturavijayaji. Agamodayasamiti Bombay. 1928.

Nagarseth Collection: *Catalogue of Manuscripts of the Nagarseth Collection at the L. D. Institute of Indology* (unpublished).

Nagpur Catalogue : *Catalogue of Sanskrit Manuscripts in the Nagpur University Library.* Ed. Dr. V. W. Karmarvelkar. Nagpur. 1957.

Pattan Catalogue : *A Descriptive Catalogue of Manuscripts in the Jaina Bhandar.* Ed. C. D. Dalal. Gaekwad's Oriental Series. Baroda. 1915.

**Books and Articles referred to in the Introduction**

Bhanderkar, B. R. Report on the Manuscripts in Central India and Rajputana. Hindi Title: *Rājasthān me Samskṛt Sāhitya ki khonjke viṣayame ek viśiṣṭa vivaraṇi.*

Bhattacharja, D. C. *Bange Navya-nyāya Carcā.* Calcutta: Bangiya Sahitya Parisat. 1952

——*History of Navya-nyāya in Mithilā.* Darbhanga; Mithila Institute. 1958.

Bloomfield, M. "Some Aspects of Jaina Sanskrit," *Festschrift Jacob Wackernagel,* Gottingen, pp. 220–230.

Citsukha. *Tattvapradīpikā.* Bombay : Nirnaya Sagar Press. 1915.


Jain Education International For Private & Personal Use Only www.jainelibrary.org

Desai, M. D. *A Concise History of Jaina Literature* (in Gujarati). Jaina Svetambara Conference, Bombay. 1933

Gangesa. *Tattvacintāmaṇi: Anumāna-khaṇḍa* Edited with *Dīdhiti* and *Gadādharī* by Pandit Bamacharan Bhattacharya and others. Beneras: Chowkhamba Sanskrit Series. 1923–1927.

——*Tattvacintāmaṇi : Pratyakṣa-khaṇḍa* Edited with *Māthurī* by Pandit Kamakhyanath Tarkavagisa. Calcutta : Asiatic Society of Bengal. 1884 –1901. Reprinted in Delhi : Motilal Banarsidas. 1973.

Guṇaratna Sūri. *Ṣaḍ-darśanasamuccaya-ṭīkā* on Haribhadra's *Ṣaḍ-darśanasamuccaya* (Ed. Dr. Mahendrakumar Jain). Varanasi; Bharatiya Jnanapitha. 1969.

——*Kriyāratnasamuccaya*. Vāraṇasi; Yasovijaya Granthamala. 1907.

Guṇaratna Sūri II. *Tarkataraṅgiṇī* : Sub-commentary on Govardhana's Commentary *Tarkaprakāśikā* on Keśava Miśra's *Tarkabhāṣā* press-copy. Forthcoming in L. D. Institute of Indology publications, Ahmedabad. Ed. By Dr. V G. Parikh. Introduction by Dr. J. S. Jetly.

Guṇavijaya Gaṇi *Vijaya-praśasti*. Eds: Hargovinda Das and Bechar Das. Varanasi. 1911

Hall, F. E. "Two Sanskrit Inscriptions," *Journal of the American Oriental Society*, Vol. VI New Haven: American Oriental Society 1859–60.

Kalidasa. *Abhijñānaśākuntala*. Ed. A. B. Gajendragadkar. Surat: Popular Book Store. Sixth Edition.

Kielhorn, F. "Bheraghat Inscription of Alhaṇadevī," *Epigraphia Indica*, Vol. II. Calcutta 1894. Re-printed in Delhi; Motilal Banarsidass. 1970.

Maṇikaṇṭha Miśra. *Nyāyaratna*. Ed. V. S. Subrahmanya Sastri and V. Krishnamacharya. Madras: Government Oriental Mss. Library. 1953

Munisundara. *Gurvāvalī*. Benares: Sri-yasovijaya Grathamala-4. 1905.

Śrīvallabha. *Nyāyalīlāvatī*. Eds. Pandit Dhundhiraj Sastri and others. Benares: Chowkhamba Sanskrit Series. 1927—32.

Udayana. *Nyāyakusumāñjali*. Eds, Pandit Dhundhiraj Sastri and others. Benares: Kashi Sanskrit Series. 1957.

Vādīndra. *Mahāvidyāviḍambana*. with *Mahāvidyāviḍambana-ṭīkā* of Bhuvanasundara. Ed. M. R. TELANG, Baroda; Gaekwad's Oriental Series. 1920

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Vādı Vāgīśvara. *Māna-manohara*. Ed. Svami Yogindrananda. Varanasi : Ṣaḍ-darśana Prakasan Pratisthana. 1973.

Veṅkaṭanātha.. *Nyāya-pariśuddhi*. Ed. Vidyabhusan Lakshmanacharya Benares : Chowkhamba Sanskrit Series. 1918-22

Vidyabhusana, S. C. *A History of Indian Logic*. Calcutta. 1920. Re-printed in Delhi: Motilal Bhnarsidass. 1971.

——*History of the Mediaeval School of Indian Logic*. Calcutta: Calcutta University. 1909.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# न्यायसिद्धान्तदीपः ।

(१) मङ्गलवादः

ध्वंसितापरसिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरशर्म्मा प्रकाशयति ॥१॥
न्यायसिद्धान्तदीपोऽयं कथासु विजिगीषुभिः ।
धारणीयः प्रयत्नेन सत्तर्कस्नेहसुप्रभः ॥२॥

इह तावदभीष्टकर्मणो निर्विघ्नपरिसमाप्तिमुद्दिश्य बहुशः प्रवर्त्तमाना विनायकार्चनदधिदूर्वादौ मङ्गले दृश्यन्ते प्रेक्षावन्तः । तत्र मङ्गलस्य तद्विशेषस्य वा नमस्कारस्य प्रतिबन्धकदुरिताद्युत्सारणद्वाराऽभीष्टसमाप्तिं प्रति कथमुपायत्वं ग्राह्यम् । श्रुतेरिति चेन्न । तथाविधश्रुतेरनाकलनात् । शिष्टाचारात् तदनुमानमिति चेन्न । शिष्टाचारस्यानिर्वचनात् । तथाहि—किं शिष्टाचारत्वं वेदप्रामाण्याभ्युपगन्तृपुरुषोत्पाद्यमानत्वं वा १ उद्देश्यविशेषितमेतदेव वा २ एवम्भूतपुरुषेण वेदमूलकतया स्वीक्रियमाणत्वं वा ३ वेदमूलकतया प्रमीयमाणत्वं वा ४ वेदोपदिष्टहेतुभावक्रियावत्त्वमेव वा ५ अन्यद्वा ६ । तथाविधपुरुषक्रियमाणजलताडनस्यापि[1] शिष्टाचारत्वप्रसङ्गात् । तथा च तेनापि वेदानुमानं स्यात् । नापि[2] द्वितीयः । घटादेरपि शिष्टाचारत्वप्रसङ्गात् । न तृतीयः । अवेदमूलकेऽपि वेदमूलकतया तथाविधभ्रान्तपुरुषस्वीकारसम्भवेनाऽतिव्यापकत्वात् । न तुरीयः[3] । प्रकृते तदसिद्धेः । तथाहि—नमस्कारो वेदबोधिताभीष्टोपायताकः वेदमूलकतया प्रमीयमाणत्वाद्[4] इत्यत्र साध्यसमो हेतुः । अत एव न पञ्चमोऽपि । नान्त्यस्तदनिर्वचनात् ।

किञ्च शिष्टाचारत्वेनैव[5] तदनुमानसम्भवात् अलं तेन श्रुतिमनुमाय तयाऽभीष्टोपायताऽवगमकल्पनया । किञ्च, मङ्गलस्याभीष्टसमाप्तिं प्रति कारणत्वे कथं[6] तद्व्यतिरेकेण प्रमत्तनास्तिकाद्यनुष्ठिताभीष्टसमाप्तिः[7] । कथं वा साङ्गे तस्मिन्ननुष्ठितेऽपि कार्यानुदयः श्रौतात् साङ्गात् कर्मणः फलावश्यम्भावात्[8] । अन्यथा फलव्यभिचारशङ्कया यागादौ निःशङ्को न प्रवर्त्तेत ।

१. P drops-अपि Pn—जलताडनादेरपि । २. P reads न द्वितीयः । ३. Pn—न चतुर्थः । ४. $M_1$ has प्रतीयमानत्वात् । ५. Pn -शिष्टाचारेणैव । ६. $M_1$ drops कथं । ७. P omits अभीष्ट । ८. P reads, ०भावनियमात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च । किं[1] नमस्कारत्वम् । न तावद्विघ्नवारकत्वम्[2] । अदृष्टादावतिव्यापकत्वात् । नापि तद्वारणासाधारणकारणत्वम् । अनुगतरूपाऽपरिचये कारणत्वस्यैव दुर्ग्रहत्वात् मङ्गलमात्रसाधारणत्वाच्च । न च कायिकादित्रिकसाधारणजातिविशेष एव नमस्कारत्वं साङ्कर्यप्रसङ्गात् । एवं मङ्गलत्वमप्यशक्यनिर्वचनम् । विघ्नोत्सारणासाधारकारणत्वस्यानुगतस्या[3]नुपस्थितावपरिच्छेद्यत्वात् । न[4] च श्रुतौ स्मृतौ वा मङ्गलशब्दाभिधेयं यत् तदेव मङ्गलम् । प्रवृत्तिनिमित्त[5]स्यापि तदभिधेयत्वेन मङ्गलत्वप्रसङ्गात् । न च मङ्गलशब्दाभिधेयं विशेष्यं यत् तदेव मङ्गलम् । एतावदप्रतिसन्धानेऽपि मङ्गलव्यवहारात् । अन्यस्यापि विशेष्यत्वे सति मङ्गलशब्दाभिधेयत्वसम्भावनायां संदिग्धव्यभिचारात्[6] । अपि च विघ्नवतो नमस्कारादावधिकारस्तथा चाधिकारनिश्चयं विना कथं प्रवृत्तिः ? न चात्मनो विघ्नवत्त्वं केनापि प्रमाणेन प्रथमत एव तेनावधारितम् । न च विघ्नज्ञानवतोऽधिकारित्वं[7] संशयस्यापि ज्ञानत्वमस्त्येव, तथा च विघ्नसंशयेऽप्यधिकाराप्रच्यवात् प्रवृत्तिरुपपन्नैवेति वाच्यम् । एवं हि सति वस्तुतो निर्विघ्नेन विघ्न[8]-संशयवता समारब्धान्मङ्गलात् फलोदयप्रसङ्गः । अधिकारिणा कृतस्य साङ्गस्य कर्मणः फलोपधाननियमादिति ॥ छ ॥

अत्रोच्यते । क्षीणदोषपुरुषत्वमेव शिष्टत्वम् । तथाभूतत्वं च मन्वादीनामेव सुप्रसिद्धम् । तदाचारत्वं च[9] तेन परलोकानुकूलतया क्रियमाणत्वं[10] तेन प्रतिबन्धकदुरितवारणमुद्दिश्य क्रियमाणत्वं वा । अश्वमेधकारीर्यादौ च व्याप्तिः सुप्रसिद्धा । यत् कार्यं प्रति यस्य कारणत्वमन्वयव्यतिरेकोपजीवनेन गृह्यते तत्कार्यमुद्दिश्य शिष्टेन क्रियमाणत्वमेव शिष्टाचारत्वम् । एवमन्यदप्यूहनीयम् ।

न च शिष्टाचारत्वेनैव नमस्कारादीनामभीष्टसमाप्त्युपायतानुमानसम्भवेन[11] किमिति तदर्थं श्रुतिकल्पनमिति युक्तम् । व्याप्तिबलेन श्रुतेः कल्पनात् । तथाभूताचारस्य श्रुतिव्याप्तत्वात् । न च प्रमत्तनास्तिका[12]द्यनुष्ठितकर्मसमाप्तौ व्यभिचारदर्शनात् अकारणत्वं[13] मङ्गलस्येति युक्तम् । तत्रापि पूर्वजन्मकृतमङ्गले तत्कारणत्वस्येष्य[14]माणत्वात् ।

१. P adds नाम । २. P reads निवारकत्वम् । ३. P has (अ)नुगतरूपस्य । ४. $M_1$ drops च । ५. P reads मङ्गलशब्दप्रवृत्तिनिमित्तस्यापि । ६. $M_1$ reads संदिग्धव्यभिचारित्वात् । ७. $M_1$ reads अविकारत्वं । ८. $M_1$ drops विघ्न । ९. $M_1$ drops च । १०. $M_1$ adds तेन तदानीमसाक्षात् क्रियमाणफलानुकूलतया क्रियमाणत्वं वा । ११. P and $M_1$ read सम्भवे । १२. P and $M_1$ drop -नास्तिक । १३. P reads तदकारणत्वं । १४. P reads पूर्वजन्मकृततत्कारणत्वस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् पुनरुक्तम्[1] साङ्गे तस्मिन्ननुष्ठितेऽपि कार्यानुदयः, श्रौतस्य साङ्गस्य[2] कर्मणः फलोत्पत्तिनियमादिति तदपि मन्दम् । क्वचिद् विघ्नस्यैव प्रचुरत्वाद[3]न्तरा विघ्नान्तरोत्पत्तेर्वा । विघ्नर[4]हितदशायां कृतस्य नमस्कारस्य यद्यपि द्वारस्या[5]न्यथासिद्धत्वात् तद्व्यक्तौ कारणता नास्ति तथापि व्यक्त्यन्तरं प्रति जन्मान्तरे तस्मिन्नेव वा जन्मनि जनकता[6] भविष्यतीति को विरोधः ? न हि व्यक्त्यपेक्षया श्रुतिः कारणतां बोधयति किन्तु तज्जातीयापेक्षया । अत एव क्वचिन्नमस्कारादर्शनेऽपि अभीष्टसिद्धिरुदेति ।

न च श्रौतस्य साङ्गस्य कर्मणः फलोत्पादनियमः । फलमदत्त्वाऽपि कीर्तनादिना तद्विनाशावधारणात् । नमस्कारत्वं तु यद्यपि कायिकादौ नानुगतमुपलभ्यते तथापि ज्ञानविशेषपूर्वकत्व[7]मप्रतिसन्धाय न कायिकादौ नमस्कारत्वव्यपदेश इति । नागृहीतविशेषणन्यायेन ज्ञानविशेष एव नमस्कारत्वम् । स च विशेषो व्यवहारसाक्षिको जातिभेद[8] एव । ननु साक्षात्कारत्वादिना परापरभावानुपपत्त्या कथमेतत् सङ्गच्छते । कथं वा न तथाभूतप्रमारूपासाधारणफलकरणस्य[9] प्रमाणान्तरत्वम्[10] । कुतो वाऽसाधारणप्रयोजकप्रमाणविरहे तथाभूता[11]साधारणानुभवफलसिद्धिरिति[12] । मैवं, [13]साक्षात्कारविशेषस्यैव मानसस्य तथात्वात्[14]। तथापि किंविषयकोऽसावाराधकात्मविषय एव आराधनीयविषयको वा । न च प्रमाणान्तरापत्तिः[15] । मनस एव तत्करणत्वात्[16]। न च मनसो बहिरस्वातन्त्र्यम् । आत्मविशेषगुणोपग्रहेण[17] बहिरपि तस्य साक्षात्कारिज्ञाने प्रवृत्तिदर्शनादित्यन्यत्र विस्तरः । गुणग[18]तजातौ परापरभावानुपपत्तिरेव नास्तीत्यन्ये ।

यद्वा कायिकादिषु त्रिषु[19] नमस्कारशब्दो नानार्थः[20]। तदन्यतमत्वमेव[21] वा[22] नमस्कारत्वम् । एवं विघ्नोत्सारणाऽसाधारणकारणत्वे सति साध्यत्वमेव

१. P adds कथं here. २. $M_2$ drops साङ्गस्य । ३. P reads प्रचुरतरत्वाद् । ४. P substitutes विरह instead of रहित । ५. P reads तद्द्वारस्य । ६ $M_2$ Pn reed कारणता । ७. $M_1$ reads पूर्वकम् । ८. P and $M_2$ have जातिविशेष एव । ९. P reads कारणस्य । १०. P–$M_2$ reads प्रमाणान्तरतापत्तिः, ११. P has तथाविध । १२. P adds चेत् । १३. M reads मैदम् । १४. Pn has तथाभूतत्वात् । १५. P प्रमाणान्तरतापत्तिः । १६. P तत्कारणत्वात् । १७. $M_1$ reads उपग्रहणेन । १८. $M_1$ drops गत । १९. $M_1$ drops त्रिषु । २०. P. adds एव । २१. P+$M_2$ read एतदन्यतमत्वमेव । २२. $M_1$ drops वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मङ्गलत्वम् । [1]तत्कारणताग्रहस्तु विनायकार्चनं[2]त्वादिनैवेति न किञ्चिदनुपपन्नम् । वस्तुतो निर्विघ्नेनै[3] समारब्धे कर्मणि या गतिः सा दर्शितैव । सोऽयं नमस्कारो नाङ्गं विघ्नवतो विघ्नज्ञानवतो वा नमस्कारेऽधिकारात् । परिसमाप्तौ विघ्नशून्यस्याधिकारात् । न [4]चाधिकारिभेदेनाङ्गप्रधानभावो भवति । अन्तरायविरहपूर्वकप्रारिप्सितपरिसमाप्तिकामो वा तत्राधिकारी । तथैवाचारात् । कर्मसमारम्भे च[5] तत्समाप्तिकाम एव । तथाऽप्यधिकारिभेद एव । नाऽपि नैमित्तिकः । अकरणे प्रत्यवायप्रसङ्गात् । न चात्राऽनुमतिरेव निस्ताराय[6] । प्रायश्चित्तानुपदेशात् । तस्मात् प्रधानमेवेदम् । न चैवमन्यदाऽपि करणप्रसङ्गः[7] नियतसमयकर्तव्यत्वात् । तथैवाऽऽचारादिष्टापत्तेर्वा । सोऽयं क्वचिदैहिकः क्वचिदामुष्मिकः । तथैवाचारात् । न [8]च कारीरीवदैहिक एवेत्यवधातव्यमिति दिक् ॥ इति मङ्गलप्रकरणम्[9] १॥

१. P drops तत् from तत्कारणता । २. P adds दधिदुर्वा । ३. P adds पुंसा । ४. P reads चाधिकारभेदेन । ५. P drops च । ६. $M_1$ reads न चात्रानुमितिरेव विस्ताराय । ७. P reads करणत्वप्रसङ्गः । ८. $M_2$ reads पुनः ९. P reads इति मङ्गलवादः समाप्तः । I.O. reads इति मङ्गलवादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (२) अन्धकारवादः ।

अन्धकारे[1] विप्रतिपत्तिः । अन्धकारत्वं भाववृत्ति न वा । तत्रान्धकारत्वं भाववृत्ति इति तौतातिताः[2] । नेति वैशेषिकादयः । तत्र परेषामयमाशयः । यथा घटादीनां भावत्वं प्रत्यक्षसिद्धम् तथा तमसोऽपि । न हि नीलं तम इति भ्रमः । तथात्वे बाधकाभावात्[3] । अभावत्वे तु प्रतियोगिविशेषोल्लेखप्रसङ्गात् । एवम्भूतस्याप्यालोकाभावत्वे आलोकस्यैव तदभावत्वं किमिति नाङ्गीक्रियते ? भावत्वसाधकस्योभयत्रापि तुल्यत्वात् ।

ननु भावषट्कान्तर्भावे बाधकसद्भावादतिरिक्तभावस्याप्रामाणिकत्वाद् यावद्विशेषबाधेन भावत्वमेवास्य बाधितम् । तथाहि—न तावत् सामान्यम्, असदातनत्वात् । सामान्यं च सद् द्रव्यवृत्ति वा गुणवृत्ति वा कर्मवृत्ति वा स्यात् । नाद्यः द्रव्याऽभानेऽपि[4] गहनं तम इति प्रतीतेः । नेतरः[5] । रूपाद्यवृत्तितया गृह्यमाणत्वात् । नान्त्यः कर्माभानेऽपि[6] भासमानत्वात् । नातिरिक्तवृत्ति अन्यस्य सामान्यवतोऽभावात् । प्रत्यक्षत्वादनित्यत्वाच्च न विशेषोऽपि । नापि समवायः । सम्बन्धत्वेनानवगमादनित्यत्वाच्च । नापि गुणश्चतुर्विंशतावनन्तर्भावात् । नीलरूप एव वाऽस्यान्तर्भाव[7] इति चेन्न नीलरूपं तम इति प्रत्ययाभावात् । एतेनारोपितं तदिति[8] परास्तम् । अन्यत्रापि नीलीद्रव्योपरक्तेषु वस्त्रचर्मादिषु[9] तमोव्यवहारप्रसङ्गात् । 'गुणे शुक्लादयः पुंसी'ति कृत्वा नीलस्तम इति प्रत्ययप्रसङ्गाच्च ।

किं चायमन्धकारोऽसमवेतो वा द्रव्यान्यसमवेतो वा द्रव्यसमवेतो वा स्यात्[10] । असमवेतोऽपि जातिमान्न वा । आद्ये द्रव्यं स्यान्न गुणः । द्वितीये समवायाभावयोरन्यतरत्वप्रसङ्गः[11] । तथापि गुणत्वव्याघातः । नाऽपि द्वितीयः । गुणत्वव्याघातात् । नाऽपि तृतीयः पृथिव्यादिषु नवस्वसमवेतत्वात्[12] । तथाहि नायं दिक्कालमनोगुणः[13]

१. P adds च । २. $M_1$ reads तौतातिकाः । ३. P + $M_1$ read प्रमाणाभावात् । ४. $M_1$+ I. O. read द्रव्याभावेऽपि । ५. $M_1$ + $M_2$ read. नेतरे । ६. $M_1$ and I. O. read कर्माभावेऽपि । ७. $M_1$ reads वाऽस्यान्तर्भावात् । ८. P has आरोपितं नीलं रूपं तम इति तदपि । $M_2$ has आरोपितं नीलं रूपं तदिति । Pn reads आरोपितं रूपं तदिति । ९. P adds कम्बल, Pn reads पटादिषु । १०. P drops स्यात् । ११. P+$M_1$ read प्रसङ्गात् । १२. Pn reads नवस्वनवकाशात् । १३. P+$M_2$ read दिक्कालमनसां गुणः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यक्षत्वात् । नाप्यात्मसमवेतः चाक्षुषत्वात् । अत एव न नभोनभस्वतोः । नापि तेजसः तेन समं विरोधात् । तेजोरूपाविषयचाक्षुषसाक्षात्कारविषयत्वाच्च[1] । न च[2] तेजोरूपमेव तमः । शुक्लभास्वरत्वानाश्रयत्वात् । इन्द्रनीलप्रभावदाश्रयसम्पर्कान्नीलबुद्धिरुपजायते[3] इति चेन्न । तथाभूताश्रयाननुविधानात् । तद्वत् परप्रकाशकत्वप्रसङ्गाच्च । नापि पृथिवीजलयोस्तद्रूपेऽन्धकारस्य व्यवहाराभावात्[4] । न चोपलभ्यमानरूपातिरिक्तमेव पृथिव्या जलस्य वा रूपमेकदैकत्र[5] रूपद्वयासमावेशात् आलोकं विना तद्रूपे[6]चाक्षुषताविरोधाच्च । तेजोऽभावग्रहे तेजोपेक्षया विरोधेन परिहृतत्वात् ।

नापि कर्म[7], चलनात्मकतयाऽनुपलम्भात् । अन्धकारवति गेहादौ चलतीति प्रत्ययप्रसङ्गाच्च ।

नापि द्रव्यम्, पृथिव्यादिनवकबहिर्भावात्[8] ।

ननु नीलरूपवत्त्वेन पृथिव्यामेवासावन्तर्भवतु । उद्भूतरूपस्य पार्थिवस्योद्भूतस्पर्शवत्तानियमो[9]ऽसिद्ध एव । इन्द्रनीलप्रभासहचरनीलभागेन व्यभिचारात् । तदीयस्पर्शायोग्यत्वे[10]ऽपि नीलरूपस्य योग्यत्वात् । न चोद्भूतस्पर्शेन्द्रनीलमणिरूपमेव प्रभायामारोप्यत इति युक्तम् । इन्द्रनीलग्रहव्यतिरेकेऽपि तत्प्रभायां नीलप्रत्ययदर्शनादिति । मैवम् । एवम्भूतोदाहरणासिद्धेः । सिद्धावपीन्द्रनीलस्यान्यस्य वा स्मर्यमाणस्यैव रूपस्यारोपेणाऽन्यथासिद्धौ तत्सहचरतया तथाभूतनीलभागाकल्पनात्[11] ।

न च जालान्तर्गतमरीचिस्थोद्भूतरूपसूक्ष्मपार्थिवेन व्यभिचारः । वस्त्रपाटनानन्तरमुपलभ्यमानजालमरीचिस्थसूक्ष्मभागवत् तस्यापि उद्भूतस्पर्शवत्तानुमानात् । तर्हि त्रसरेणुस्पर्शः किमिति नोपलभ्यते । महत्त्वसमानाधिकरणो-

१. P reads चाक्षुषप्रतीतिविषयत्वाच्च । २. $M_2$ drops च । ३. P reads (आ)श्रयसम्पर्कवन्नीलबुद्धिः । ४. P reads (अ)न्धकारव्यवहाराभावात् । ५. P reads रूपमेकत्रैकदा । ६. $M_1$ reads तद्रूपे चाक्षुषताविरोधाच्च । ७. M adds स । ८. P+$M_2$ read बहिर्भूतत्वात् । ९. P has स्पर्शवत्त्वनियमो । १०. P has स्पर्शस्यायोग्यत्वेपि । ११. P reads तत्सहचरतथाभूतनीलभागाकल्पनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूभूतस्पर्शस्य योग्यत्वादिति चेन्न[1]। गृह्यत एव विविच्य न गृह्यते सूक्ष्मत्वादिति प्राञ्चः। अनेन रूपेण स्पर्शयोग्यतैव[2] नास्ति। किन्तु महत्त्वविशेषसामानाधिकरण्येन स च विशेषः कार्यैकोन्नेयः। अत एव[3] त्रसरेणुस्पर्शस्यायोग्यत्वात् त्रसरेणुर्न स्पार्शन इति[4]। जलादित्रिकव्यतिरेकस्तु स्फुट एव।

न च तेजोविशेष एव तमः, सूर्यादितेजसा सह विरोधात्, तद्विरोधि तेजोऽन्तरमेवेदमिति चेन्न। सप्रभेषु रत्नादिषु छायारूपं तमो न स्यात्। रत्नप्रभया[5] सह विरोधात्। अनभिभूतया तया सह विरोधः। सा चाभिभूतैवेति[6] चेन्न। पृथिव्यादिना तेजसोऽनभिभवात्[7]। तेजोऽन्तरस्य तदभिभावकस्यानुपलम्भात्। न च छाययैव तदभिभवः[8]। बहलतमे तमसि तदग्रहप्रसङ्गात्। न च तेजोऽन्तरमेवाभिभावकम्[9]। तस्यानुपलम्भात्। तेजोऽभिभावकस्य छायाभिभावकत्वापाताच्च।

नापि विभुचतुष्कम्। अव्यापकत्वादनित्यत्वाच्च। न मनः प्रत्यक्षत्वात्। तस्माद् यावद्विशेषबाधाद् भावत्वमेवास्य बाधितमिति।

मैवम्। रूपवत्त्वक्रियावत्त्वपरिमाणवत्त्वादिना द्रव्यत्वस्यैवोचितत्वात्। न च पृथिव्यादिनवकानन्तर्भावाद् बाधितमस्य द्रव्यत्वमिति वाच्यम्। अन्यथाऽनुपपत्त्या दशमद्रव्यकल्पनात्[10]। अन्यथा जलत्वबाधात्[11] पृथिव्यपि द्रव्यान्तरं न स्यात्। न च विषयसंस्कारकबाह्यालोकासहकृतचक्षुर्ग्राह्यत्वात्[12] द्रव्यत्वमस्य बाधितमिति वाच्यम्। तेजस्येव व्यभिचारात्। अन्ये तु न तेजसि[13] व्यभिचारस्तत्राऽप्यवयविग्रहेऽवयवस्यावयविनोऽवयवान्तरस्यै[14] वा विषयसंस्कारकतेजसो[15] विद्यमानत्वात्। न च तैजसत्रसरेणुस्थले न चैवं[16] सम्भवतीति वाच्यम्। तस्य जालस्थसौरालोकै[17]संस्कार्यत्वात्। न च संयोगेन

१ P wrongly combines न with गृह्यते; $M_2$ inserts न with a caret। २. P has स्पार्शनयोग्यतैव। ३. P adds हि। ४. P+$M_1$ add केचित् here। ५. P. reads रत्नादिप्रभया। ६. P+$M_1$ read चाभिभूतेति। ७. $M_2$ and $M_1$ read तेजोऽनभिभवात्। ८. Pn reads अभिभावुकः। ९. P. reads तस्याभिभावकम्। १०. P+I. O. read दशमद्रव्यपरिकल्पनात्; $M_2$ reads दशमस्यैव द्रव्यस्य कल्पनात्। ११. Pn read जलत्वव्याघातात्, $M_2$ +I. O. read जलत्वादिबाधात्। १२. P. reads विषयसंस्कारकबाह्यालोकसहकृतचक्षुर्ग्राह्यत्वाभावात्।१३. P+$M_2$ read तेजसि न। १४. P. reads (अ)वयविनो ग्रहेऽवयवस्यावयवावयवस्यावयवान्तरस्य। Pn reads (अ)वयविनो ग्रहेऽवयवस्य अवयवस्य ग्रहेऽवयविनोऽवयवान्तरस्य। $M_2$ reads (अ)वयविनो ग्रहेऽवयवस्यावयवान्तरस्य वा। १५. P+$M_2$ reads विषयसंस्कारकस्य तेजसो। १६. P+$M_2$ read मैवम्। १७. $M_1$ reads सुरालोक।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाह्यालोकस्य संस्कारकत्वम् । संयोगत्वेस्यातन्त्रत्वात् । तस्माच्चाक्षुषभावसाक्षात्कारमात्र एव बाह्यालोकापेक्षेत्याहुः ।

तन्न । तथाहि[2]–अन्वयव्यतिरेकाभ्यां घटादिचाक्षुषसाक्षात्कारे बाह्यालोकसम्बन्धस्य कारणता गृह्यते । सा च न सम्बन्धिसम्बन्धत्वेन, परम्परासम्बन्धेऽपि कार्योदयप्रसङ्गात् । नापि संयोगसमवायसाधारणेन[3] साक्षात्सम्बन्धत्वेन, तस्यैवानिर्वचनात् । [4]निर्वचनेऽपि वा तदपेक्षया संयोगत्वस्यैव[5] लघुत्वात् । तथा च संयोगत्वमेव तन्त्रम् । न च तेजोग्रहेऽपि बाह्यालोकसंयोगापेक्षैव चक्षुषः महालोकस्यावयवावयवसंयोगसम्भवेऽपि तेजश्चतुरणुके तदवयवावयवस्यायोग्यत्वेन[6] तथाभूतसंयोगाद्यभावात्[7] । [8]तेजश्चाक्षुषसाक्षात्कारे तथाभूतालोकसम्बन्ध[9][10]व्यतिरेकात् क्वचिदपि न व्यतिरेकसिद्धिरित्याद्यूह्यम् ।

प्रमाणबलात् तेजोव्यतिरिक्तत्वेन विशेषणीयमिति यदि तदा[11] तमोव्यतिरेकेणापि प्रमाणबलादेव विशिष्यताम् । प्रत्युत एतस्य बाह्यालोकव्यतिरेकसहकृतचक्षुर्ग्राह्यत्वावधारणबलेन पृथिव्यादेर्बाह्यालोकसापेक्षचक्षुर्ग्राह्यत्वाद् भावत्वं त्यज्यताम् । इन्द्रियान्तरमेव वा तमोग्राहकमस्तु । अत एव तामसादिन्द्रियादन्धतमसेऽपि पेचकादीनाम् सततं[12] तत्तद्वस्तुग्रहः ।

स्यादेतत् । तमः किं नित्यमनित्यं वा । आद्ये रूपवतो नित्यस्याचाक्षुषत्वप्रसङ्गात्[13] । द्वितीये त्वारभ्यं स्यात् । न च निःस्पर्शद्रव्यस्यारम्भकत्वम्[14] । द्रव्यसमवायिकारणतायां स्पर्शद्रव्यत्वस्य[15] प्रयोजकत्वात् । न च मूर्त्तत्वमेव तत्र प्रयोजकम्[16] । मनसोऽप्यारम्भकत्वप्रसङ्गात् । एतदपि न । रूपवत्त्वेन नित्यत्वेऽपि त्रुटेश्चाक्षुषत्वस्वीकारात्[17] । मनसि मूर्त्तत्वानङ्गीकारात् ।

---

१. $M_1$ reads संयोगस्य । २. P drops तथाहि । ३ preads ०साधारण साक्षात्सम्बन्धत्वेन । ४. P reads तन्निर्वचने । ५. $M_1$+$M_2$ read संयोगस्यैव । ६. P reads तदवयवावयवसंयोगस्य । ७. $M_1$ reads ०संयोगाभावात् । ८. P adds न च here । ९. $M_1$ reads तेजश्चाक्षुषसाक्षात्कारस्य । १०. P+$M_2$ read तथाभूतालोकसम्बन्धस्य व्यभिचारात् । ११. P. reads तर्हि for तदा । १२. P+$M_1$ drop सततं । १३. P reads प्रसङ्गः । १४. Pnreads निःस्पर्शस्य द्रव्यस्य । १५. P. reads स्पर्शवद्द्रव्यत्वस्य, $M_2$ reads स्पर्शवत्त्वस्य । १६. $M_2$ reads तत्प्रयोजकम् । १७. P reads चाक्षुषत्वाभ्युपगमात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुद्भूतस्पर्श एव वा[1] कल्प्यताम् । न चोद्भूतनीलरूपस्योद्भूत[2]स्पर्शसामानाधिकरण्यनियमः । पृथिव्यामेव तथात्वात् । एवं रसानुद्भवोऽपि कल्प्यताम् । तेजोवन्नीरसत्वमेव वाऽङ्गीक्रियताम् । तेजोऽभावत्वे तु कथं गत्यादिप्रत्ययः । अभावत्वेनोपस्थिते भावधर्मानारोपात्[3] । अन्यथा तदनुपस्थितेरारोपासम्भवात्[4] । न च स्वाभाविकगतेरन्यथागत्यनुविधानानुपपत्तिः[5] । आश्रयचलनाऽनुविधानस्य पद्मरागप्रभायामेव दर्शनात् ।

किञ्च तेजोऽत्यन्ताभावरूपत्वे तमसि[6] उत्पन्नादिव्यवहारो[7] न स्यात् । प्रागभावरूपत्वेऽपि[8] तथा । ध्वंसत्वे तु विनाशित्वं न स्यात्[9] । अन्योन्याभावत्वे तथा[10] । अपि च तमसि नीलसाक्षात्कारस्य भ्रान्तत्वेऽनीलं तम इति विपरीतसाक्षात्कारोऽपि स्यात् । न चाऽयं कदाचिदपि[11] कस्यापि भवति । प्रत्युत योगिनोऽपि तत्र नीलप्रत्यय एवोन्नीयते[12] । नीलत्वेनाप्रतीयमाने च[13] तस्मिंस्तमोव्यवहार एव न भवति[14] । नात्राऽऽलोकः किं पुनरन्धकार इति व्यवहाराच्च आलोकाभावातिरिक्त[15] एवान्धकार इति पूर्वपक्षसंक्षेपः[16] ।

अत्रोच्यते । यद्यपि भावत्वतन्नियतधर्मप्रकारिका प्रतीतिस्तमोविषयाऽनुभवसिद्धा तथापि तेजोव्यतिरिक्तभावगोचरचाक्षुषसाक्षात्कारस्य[17] विषयसंस्कारकबाह्यालोकापेक्षानियमावधारणबलेन भ्रान्तत्वकल्पनमेव युक्तम् तस्याः[18] । न च तेजोव्यतिरेकवत्तमोव्यतिरेकेण विशेषणीयमिदम् । तेजोद्रव्यत्वस्या[19]नन्यथासिद्धप्रमाणावधृतत्वात् । न च तमोव्यतिरेक एव तेज आस्तामिति वाच्यम् । तथा सत्युष्णस्पर्शभास्वररूपाश्रयद्रव्यान्तरकल्पनापातात् । अन्यथा कस्य रूपारोपः[20] तेजसि स्यात् । तमसि तु क्लृप्तस्यैव नीलरूपादेरारोप इति न[21] कल्पनागौरवम् । न च तमोऽभावत्वग्रहात् नियततेजोऽपेक्षैव

१. $M_2$ drops वा । २. $M_1$ drops (उ)द्भूतनीलरूपस्य । ३. P reads (आ)रोपासम्भवात् । ४. P reads अन्यथा तदनुपस्थितेः भावधर्मारोपासम्भवात् and puts this sentence in parenthesis (......) । ५. $M_2$ reads स्वाभाविकगतावन्यगत्यनुविधानानुपपत्तिः । ६. $M_1$+$M_2$ reads तमसः । ७. P reads उत्पन्नव्यवहारो; $M_2$+I. O read उत्पन्नत्वादिव्यवहारो । ८. I. O. reads प्रागभावत्वे । ९. $M_1$ reads तथा ध्वंसे विनाशित्वं न स्यात्; Pn reads विनाशितत्वं न । १०. P+$M_2$ read अन्योन्याभावेऽपि तथा । ११. $M_2$ reads कदापि कस्यापि संभवति । १२. P योगिनोपि नीलप्रत्यय एव तत्रोन्नीयते, $M_2$ योगिनोपि नीलप्रत्यय एवोन्नीयते । १३. $M_1$ drops च । १४. P reads स्यात् instead of भवति । १५. $M_2$ reads व्यवहारादालोकाभावातिरिक्त । १६. P reads इति पूर्वपक्षः । १७. $M_1$ reads गोचराच्चाक्षुषसाक्षात्कारस्य । १८. P drops तस्याः, Pn adds तस्याः प्रतीतेः । १९. $M_1$ reads तेजोद्रव्यस्य । २०. $M_2$+I. O. read कस्यारोपः । २१. $M_1$ drops this impotant न ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्कोच्यतामिति वाच्यम् । तथा सति गौरवप्रसङ्गात् । तथाहि । तमो द्रव्यान्तरं कल्पनीयम् । तत्र रूपवत्त्वे सति निःस्पर्शत्वं[1] कल्पनीयम् । उद्भूतनीलरूपवत्त्वे वाऽनुद्भूतस्पर्शवत्त्वम् । निःस्पर्शस्य वा[3] कथमारम्भकत्वम् । तत्र स्पर्शवद्द्रव्यत्वस्य[4] प्रयोजकत्वात् । मूर्तत्वापेक्षया[5] तस्य लघुत्वात् । आलोकाभावव्यङ्ग्यत्वमधिकमेव कल्प्यम्[7] । न च पृथिव्यादीनामप्येवमभावत्वापत्तिरिति वाच्यम् । तत्र गन्धादेरनन्यथासिद्धस्य गुणस्य द्रव्यत्वव्यवस्थापकत्वात् । तमसस्तु न तथाभूतो गुण उपलभ्यते । उपलभ्यमानस्त्वन्यथासिद्ध एव । कथं वा विशेषगुणयोग्यतामन्तरेण प्रत्यक्षमूर्त्तत्वमप्यस्य । भावधर्मारोपोऽप्यभावत्वानुपस्थितिदशायामुपपद्यते अभावत्वानुपस्थितिस्तु दोषवशादेव समर्थनीया, दोषस्तु तथाभूतवस्तुस्वरूपमेव अदृष्टादिकमेव वा । पद्मरागादिप्रभायां चलनबुद्धेराश्रयचलनानुविधायितानियमो नास्त्येव कारणवशादन्यत्रापि प्रभांचलनोपलम्भात् ।

यद्वा[11] तमो यदि गतिमत् स्यात् तेजोऽभावाविषयकचाक्षुषसाक्षात्काराविषयो न स्यात् । तथा यदि तमस्तेजोभिन्नत्वे सति गतिमत् स्यात् [12]तेजोविषयकचाक्षुषसाक्षात्कारविषयगतिमत् स्यात्[12]—इत्यत्र तात्पर्यात् । न च प्रतियोगिग्रहानुपपत्तिः सर्वत्र तथाकल्पनात् । तमोमात्रव्यवहारस्तु प्रौढप्रकाशकयावत्तेजःसंसर्गाभावनिबन्धन एव । दोषवशात् प्रतियोगिनोऽनवभासनेऽपि तेजोभावावभासाविरोधात्[13] । अभावत्वग्रहे हि प्रतियोगिग्रहापेक्षणात् । तत्र राशिष्विव कश्चित्[14] समुदायिव्यतिरेकप्रयुक्त एव विनाशप्रत्ययः एवमुत्पत्तिप्रत्ययोऽप्यूह्यः । नीलरूपारोपविशिष्टतेजःसंसर्गाभावस्तम इति केचित्[16] । अत्र चाक्षुषप्रत्ययः कथमिति चिन्त्यम्[17] ।

---

१. I. O. reads रूपवत्त्वेपि निःस्पर्शत्वकल्पनम्, P reads ० निःस्पर्शवत्त्वकल्पनम्, $M_2$ reads रूपवत्त्वे निःस्पर्शकल्पना । २. $M_2$ reads च instead of वा । ३. $M_1$+ I. O. drops वा । ४. $M_2$ reads स्पर्शवत्त्वस्यै; $M_1$ reads स्पर्शद्रव्यस्य । ५. $M_1$ reads मूर्त्तापेक्षया । ६. $M_2$+I. O. add अपि here । ७. P reads कल्पनीयम् ; I. O reads कल्पनार्हम् । ८. $M_2$ reads पृथिव्यादेः instead of गन्धादेः । ९. I. O. drops गुणस्य । १०. P. reads तथा० instead of प्रभा० । ११. $M_2$ drops यद्वा । १२–१२ $M_1$ drops this portion. $M_2$ reads तेजोऽभावविषयक० । commentator शेषानन्त supports the reading accepted here । १३. P+$M_2$ reads ०विरोधाच्च । १४. $M_1$+$M_2$ + I. O read किञ्चित् । १५. $M_2$ drops तेजः । १६. $M_2$+Pn read कश्चित् । १७ P reads तच्चिन्त्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् पुनरुक्तम् नीलं तम इति प्रत्ययस्य[1] भ्रान्तत्वेऽनीलं तम इति प्रतीतिः कदाचिदपि[2] स्यादिति तन्मन्दम्[3] । शरीरेऽहंप्रत्ययवदुपपत्तेः । अत एव योगिनोऽपि तथाप्रत्यय एवोन्नीयत इति निरस्तम् । पेचकादीनां बाह्यालोकनिरपेक्षं चक्षुर्ग्राहकमित्यसिद्धमेव । तत्र[4] तेजोऽन्तरस्य विद्यमानत्वात् । अत एव ते[5] दिवा न पश्यन्ति । तस्य सौरालोकेनाभिभूतत्वात् । तेषां तत्सहकृतचक्षुर्ग्राहित्वनियमात्[6] । नात्राऽऽलोकः किं पुनरन्धकार इति व्यवहारस्तु नाऽत्र घटः किन्तु तदभाव इतिवद्विवरणरूपत्वादिना समर्थनीयमिति सर्वं समञ्जसम् ॥ श्रीः ॥[7]

१. $M_1$+$M_2$ drop प्रत्ययस्य । २. $M_2$ reads कस्यापि । ३. P+I. O. read तदपि मन्दम् । ४. $M_2$ omits तत्र । ५. $M_1$+I. O. omits ते । ६. I.O. reads तत्सहचरचक्षुर्ग्राहित्वमिति नियमात् । ७. P adds इत्यन्धकारवादः ।

## (३) कारणतावादः ।

[1]किं तत्कारणत्वं कार्यनियतपूर्ववर्त्तित्वं वा कार्यनियतपूर्ववर्त्तिजातीयत्वं वा । अनन्यथासिद्धनियतपूर्ववर्त्तित्वं वा कार्यसहभावे सत्येतदेव वा । सहकारिविरहप्रयुक्तकार्याभाववत्त्वं वा । अन्यद्वा । नाद्यः कुम्भकारपितुरपि कुम्भं प्रति कारणत्वप्रसङ्गात् । आकाशादेः कार्यमात्रं प्रति कारणत्वप्रसङ्गाच्च ।

किञ्च पूर्ववर्त्तित्वं प्रागभावावच्छिन्नसमयवर्त्तित्वमिति चेत्, न[2] । तथा तयोरकारणत्वप्रसङ्गात् । न हि प्रागभावावच्छिन्ने समये प्रागभावो वर्त्तते, समये समयो वा । किञ्चैवं घटादिकं प्रति रासभोऽपि कारणं स्यात् । तस्यापि घटादिनियतपूर्वसमयवर्त्तित्वात् । न ह्यनादौ संसारे कस्यापि घटस्य पूर्वं रासभो न वर्त्तते । अत एव न[3] द्वितीयः । आकाशादेरकारणत्वप्रसङ्गाच्च । न ह्याकाशादीनां तज्जातीयत्वेन कारण[4]त्वमेकव्यक्तित्वेन तत्र जातेरभावात् । न च जातित्वमुपलक्षणम् । उपाधेरपि तदवच्छेदकस्याभावात् । न ह्याकाशादिकारणत्वं केनाप्यवच्छिद्यते ।

नापि तृतीयः । अनन्यथासिद्धत्वं ह्यन्यथासिद्धिविरहः अन्यथासिद्धिश्च प्रकारान्तरेणोत्पत्तिर्ज्ञप्तिर्वा । अन्यत्वं च कार्यापेक्षयाऽन्यापेक्षया वा । न तावदाद्यः । दण्डादेर[5]कारणत्वप्रसङ्गात् । न हि घटादिभिन्नप्रकारेण दण्डादेर्नोत्पत्तिः । नित्यस्य कार्यमात्रे[6] कारणत्वप्रसङ्गाच्च । एवं ज्ञप्तिपक्षोऽपि[7] निरस्तः । न द्वितीयः । यत्किञ्चिदपेक्षया प्रकारान्तरेणोत्पत्तिज्ञप्त्योः सर्वसाधारण्यात् ।

अनन्यथासिद्ध्यनिर्वचनादेव न चतुर्थोऽपि । तन्निर्वचने त्वनन्यथासिद्धनियतपूर्ववर्त्तित्वेन तत्त्वे शेषवैयर्थ्यात् । न च कुम्भं प्रति कुम्भकारपितुरपि कारणत्वव्युदासार्थं[9] सहभावोऽपि[8] विशेषणमिति वाच्यम् । अनन्यथासिद्ध्यैव तन्निरासात् । कथमन्यथा घटसहभावेऽपि न कपालरूपादेः कारणत्वम् । कथं वा कार्याऽसहभूतस्य यागादेः कारणत्वम् । न च व्यापारद्वारा

---

१. I.O. adds कारणत्वविवेचना । २. $M_1$ drops न; P drops इति चेत् । ३. $M_2$ reads नापि । ४. P reads कारणत्वावधारणम् । ५. P adds अपि । ६. P reads कार्यमात्रं प्रति । ७. $M_1$ drops अपि । ८. $M_2$ drops अपि । ९. $M_2$+I.O. reads व्युदासाय । १०. P drops अपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य[1] सहभाव इति वाच्यम् । बाधात् । न च सहभावनिरूपकत्वमेव सहभावार्थ इति वाच्यमेतदन्तर्भावेन कारणपदार्थत्वे[2] व्यापाराग्रहदशायां कारणव्यवहारोच्छेदप्रसङ्गात् । न च विनश्यदवस्थकर्मादिकारणत्वव्यावृत्त्यर्थं सहभावो[3] विशेषणमिति वाच्यम् । तत्रापि स्वरूपयोग्यतारूपकारणत्वस्येष्टत्वात् । कार्याभावस्तु तत्र सहकारिविरहात् । किञ्च, कार्यसहभूतत्वे सत्यनन्यथासिद्धनियतपूर्ववर्त्तिजातीयत्वं त्वयाऽपि वाच्यम् । न तु प्रतिव्यक्ति कार्यसहभावः । अन्यथा कारणत्वानिश्चयेन प्रवृत्तिः क्वापि न स्यात् । सहभावस्य कार्योत्पत्तेः पूर्वं निरूपयितुमशक्यत्वात् । तज्जातीयत्वं तु विनश्यदवस्थसाधारणमिति कथं सहभावेनापि विशेषणेन तद्व्यवच्छेदः ।

नापि पञ्चमः । सहकारित्वनिर्वचने[4] आत्माश्रयप्रसङ्गात् । सहकारिपदेन तदन्यविवक्षायां विरहपदेन च संसर्गाभावविवक्षायां च तदितरसंसर्गाभावविवक्षायां च तदितरसंसर्गाभावप्रयुक्तकार्याभाववत्त्वमित्यर्थः स्यात् । तत्र किं प्रयुक्तत्वं, जन्यत्वं वा व्याप्यत्वं वा व्यापकत्वं[5] वा । एवं कार्याभावोऽपि प्रागभावो वा अत्यन्ताभावो वा प्रध्वंसो वा । संसर्गाभावत्वेन रूपेण त्रितयमपि वा । न तावदाद्यः प्रागभावाऽत्यन्ताभावयोरसाध्यत्वात्[6] । प्रध्वंसस्यापि दण्डविरहाजन्यत्वात् । संसर्गाभावत्वेन त्रितयसाधारणेऽप्येतदेव दूषणम् । नापि द्वितीयः । यावत् तदितरसमवहितेऽपि तत्र[7] शिलाशकलादौ विकल्पितकार्याभावस्य दर्शनात् । सहकारिविरहव्यतिरेकेण[8] कार्याभावस्य[9] सम्भवाद् अव्याप्यत्वात् । नापि तृतीयः । प्रागभावस्य तदितरविरहव्यापकत्वाभावात् । तदितरविरहिणि[10] क्वचिच्छिलाशकलादौ प्रागभावाभावात् । एवमत्यन्ताभावोऽपि न तदितरविरहव्यापकः । तदितरविरहिणि अङ्कुरप्रागभाववति बीजादौ[11] तदत्यन्ताभावाभावात् । एवम्भूतात्यन्ताभावस्य शिलाशकलादावपि विद्यमानत्वेनातिव्यापकत्वाच्च । एवं प्रध्वंसोऽपि । संसर्गाभावविवक्षायामत्यन्ताभावमादाय शिलाशकलादावप्यतिप्रसक्तिस्तदवस्थैव । न चैतदनुरोधेनाऽन्योन्याभावविशेष एव कारणत्वमिति कल्पनीयम् । क्लृप्तप्रतियोगिकान्योन्याभावस्या-

१. $M_2$ omits तस्य । २. P drops कारणत्व– । ३. $M_2$ adds अपि । ४. $M_1$ reads सहकारिनिर्वचने । ५. P reads तज्जन्यत्वं वा, तद्व्याप्यत्वं, तद्व्यापकत्वं वा । ६. $M_2$ +I.O. read अजन्यत्वात् । ७. Pn-reads तत्र तत्र । ८. P reads ०व्यतिरेकेऽपि । ९. P reads कार्याभावसम्भवात् । १०. $M_1$ reads तदितरविरहित्वे । ११. P+$M_2$+I.O. omit बीजादौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथात्वात्[1] । अतिरिक्तान्योन्याभावकल्पनायाम्[2] तत्प्रतियोगिनोऽप्यतिरिक्तस्य कल्पनापातात् । शक्तेर्नामान्तरकरण[3]प्रसङ्गाच्चेति ।।श्रीः।।

अत्रोच्यते—कार्यनियतपूर्ववर्त्तिजातीयत्वमेव कारणत्वम् । न चाकाशादेरपि कारणत्वम् । सामान्यत इष्टत्वात् । न ह्याकाशादिकं न किञ्चिदपि [4]प्रति कारणम् ।

विशिष्य[5] तु अनन्यथासिद्धेतरपूर्ववर्त्तित्वानुरजोविघटपूर्ववर्त्तित्वनिरूपितनियतसमवधानप्रतियोगिजातीयत्वं तत् । अनन्यथासिद्धत्वं च यत्कार्यं प्रति यस्य नियतान्वयव्यतिरेकौ तदुपजीवनेन यस्यान्वयव्यतिरेकौ तदनव[6]च्छिन्नान्वयव्यतिरेकप्रतियोगित्वम् । प्रागभावत्वं च गन्धानाधारसमयानाधारभावत्वादिकमूह्यम् ।

यद्वा सहकारिविरह[7]प्रयुक्तकार्याभाववत्त्वमेव कारणत्वम् । अस्यार्थः । इतरव्यतिरेकावच्छिन्नकार्यानुत्पादव्याप्यत्वम् । अनुत्पादश्चोत्पत्त्यवच्छिन्नप्रतियोगिकोऽत्यन्ताभावः । स चोत्पत्तिप्रत्यासत्तिविरोधिप्रत्यासत्तिकोऽतो नातिप्रसङ्गः । एवं सहकारिप्रयुक्तत्वादिदूषणानवकाशः ।। श्रीः ।। छ ।। [8]इति कारणतावादस्तृतीयः ।।

1. I.O.+P. read तत्त्वायोगात् । 2. Pn reads (अ)न्योन्याभावविषयकल्पने, P+$M_2$+I.O. read–०कल्पने । 3. Pn reads नामान्तरकल्पनापातात् । 4. $M_2$+I.O. drop प्रति० । 5. Pn reads विशिष्ट तु । 6. P reads तदवच्छिन्न० । 7. P+$M_2$ read ०वैकल्य० । 8. Found only in I.O. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (४) पदशक्तिवादः ।

गवादिपदानां जातावेव शक्तिरिति तौतातिताः । व्यक्त्याकृतिजातिषु[1] शक्तिरिति गौतममततत्त्ववेदिनः । तत्रैवं विप्रतिपत्तेः[2] संशयः । गवादिपदनिरूपितशक्यत्वं जातिमात्रवृत्ति न वा । जातिवाचकपदशक्यत्वं जात्यति[3]रिक्तवृत्ति न वा । अभिधेयत्वं नित्यप्रकारमात्रवृत्ति न वा इत्यपि कश्चित् ।

तत्र तौतातितानामयमाशयः । वाक्यार्थप्रतिपत्त्यनुकूलपदार्थस्मरणजनकपदपदार्थयोः सम्बन्धस्तावद् वाचकत्वं नाम सकलवादिसिद्धम् । तत्सङ्केतो वा पदार्थान्तरं वेति अन्यदेतत् । स च सम्बन्धः कुत्र कल्प्यताम् । जातिमात्रे च जातिव्यक्त्योर्वेति विमर्शे जायमाने जातावेव तत्कल्पना ज्यायसी, नागृहीतविशेषणान्यायेन, न तु व्यक्तौ । अनन्ताभिः[4] सह सम्बन्धग्रहस्याशक्यत्वात् । सामान्यलक्षणायाः प्रत्यासत्तेः प्रमाणाभावेनानङ्गीकारात् । तथात्वे[5] व्यक्तेरन्यथालाभसम्भवेन तत्र शक्तिकल्पनस्य गौरवपराहतत्वात् । तदिदमुक्तं–

"विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे[6]" इति ।

व्यक्तेः कथं लाभ इति चेत् आक्षेपात् ।

ननु व्यक्तिं विना किमनुपपन्नम् । न तावज्जातिः, व्यक्तिं विनापि जातिस्वरूपावस्थानादिति । मैवम् । जातेर्हि व्यक्तिवृत्तिता नियतेति कथमाक्षेपानुपपत्तिः । न च जातिव्यक्त्योर्युगपत्प्रतीतिदर्शनादाक्षेप्याक्षेपकभावानुपपत्तिरिति वाच्यम् । गौरवप्रसङ्गबाधकबलेन युगपत्प्रतीतेर्भ्रान्तत्वकल्पनस्योचितत्वात् । न च जातिभान[7]सामग्री व्यक्तिभानसामग्रीनियतेति तदैव व्यक्तेर्भाननियमात् कथमाक्षेप इति वाच्यम् । जातिसाक्षात्कारे ह्ययं नियमो न तु तत्स्मरणेऽपि ।

ननु जातिमात्रज्ञानात् व्यक्तिमात्रमाक्षेप्तव्यम् । तथा च व्यक्तिविशेषलाभः कथम् । जातिविशेषप्रतिसन्धानाद् व्यक्तिविशेषलाभ[8] इति यदाऽभ्युपगतं[9]

---

१. P reads व्यक्त्याकृतिषु जातिषु । २. P reads विप्रतिपत्तिजः । ३. P reads जातिव्यतिरिक्त० । ४. P adds व्यक्तिभिः । ५. $M_2$ adds अपि, P adds वा । ६. Quoted in काव्यानुशासनविवेक comm–on काव्यानुशासनम् of हेमचन्द्र Bombay 1938 । ७. Pn reads ज्ञान instead of भान । ८. P+$M_2$ read व्यक्तिविशेषाक्षेप । ९. P+$M_2$ read यदभिमतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा जातौ विशेषो व्यक्तिरेव, तस्याश्च भानं जातिज्ञाने वृत्तमेवेति किं केनाक्षेप्तव्यम् । मैवम् । किंचिद्धि वस्तु स्वत एव विलक्षणमिति न्यायेन जातेः स्वत एव विलक्षणत्वात् । अन्यथा अन्योऽन्याश्रयानवस्थाप्रसङ्गाद्[1] व्यक्तेः प्राधान्यानुभवाल्लक्षणा व्यक्तौ आक्षेपे तूपसर्जनता स्यादिति तदेकदेशिनः[2] । तदाहुः—

"जातावस्तित्वनास्तित्वे[3] न हि कश्चिद्[4] विवक्षति[5] ।
नित्यत्वाल्लक्षणीयायाः[6] व्यक्तेस्ते[7] हि विशेषणे ॥" [ श्लोकवार्त्तिक, वाक्याधिकरण—३११ ] इति ।

विशिष्टगोचरा एकैव शक्तिः किन्तु जातिनिष्ठतया सा ज्ञातोपयुज्यते व्यक्तौ तु सा स्वरूपसती । समानसंवित्संवेद्यतया व्यक्तेरपि भानमिति गुरुमततत्त्ववेदिनः । व्यक्तेरन्वयप्रकारतया[8] भानमिति गुरुमतैकदेशिनः । अनुमानं त्वगोव्यक्त्याकृती न गोशब्दवाच्ये गोत्वभिन्नत्वात् घटवदिति[9]॥श्रीः॥

अत्रोच्यते । गामानयेति वाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य गवानयने प्रवृत्तिर्दृश्यते तावत् । सा च गवानयनज्ञानसाध्या, तच्च ज्ञानं गामानयेतिवाक्यजन्यम् । वाक्यजे च[10] ज्ञाने पदोपस्थापित एवार्थोऽन्वयप्रतियोगितया भासते इति व्यवस्थापितं योगरूढिस्थले । तथा च गोपदाद् गोव्यक्तेरनुपस्थितौ कथमन्वयप्रत्ययः । आक्षेपोपस्थितस्य वाक्यजन्यप्रत्ययेऽन्वयप्रतियोगित्वाभावात्[11] । अन्यथा घटमानयेति वाक्यं रूपसंख्यापरिमाणपृथक्त्वादिकमाक्षिप्य[12] त्वन्वयबोधमादध्यात्[13] । न चैवं, तथानुभवाभावात् । किं चाक्षेपे व्यक्तेः प्राधान्येन भानं[14] न स्यात् । न च लक्षणया तदुपस्थितिरिति वाच्यम् । शक्यार्थव्यवहितव्यक्तिबुद्धेरत्रासिद्धेः ।

किञ्च यत्र जात्यन्वयानुपपत्तिर्नास्ति गां पश्य घटं पश्येत्यादौ तत्र कथं व्यक्तिलाभः, लक्षणाया अभावात् । व्यक्तितात्पर्यव्यतिरेकेणाऽपि व्यक्ते-

---

१. Pn+M.$_2$ drops अन्योन्याश्रय । २. P+$M_2$+I.O. read भाट्टैकदेशिनः । ३. मुद्रिते श्लोकवार्त्तिके—जातेरिति पाठः । ४. $M_2$+I.O. read कोऽपि । ५. $M_2$ reads विवक्ष्यति । ६. मुद्रिते-लक्ष्यमाणाया इति पाठः । ७. P reads (ल)क्षणीयायास्ते हि व्यक्तेर्विशेषणे । ८. $M_2$ adds किन्तु here. । ९. P reads पटवदिति, I.O. reads इति संक्षेपः । १०. P+I.O. drop च । ११. P reads वाक्यजप्रत्ययान्वयप्रतियोगित्वाभावात्, I.O. reads वाक्यजन्यप्रत्ययान्वयप्रतियोगिताभावात् । १२. P+I.O drop तु here । १३. P reads विदध्यात् । १४. Pn reads ज्ञानं instead of भानं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रन्वयबोधदर्शनाच्च । न हि तात्पर्यज्ञानं वाक्यार्थप्रतिपत्तिजनकमिति प्रतिपादितमधस्तात् । न च जातिप्रत्ययानन्तरमत्र व्यक्तिप्रतीतिः किन्तु युगपदेव । न च गौरवभयेन क्रमकल्पनम् । प्रमाणवतो गौरवस्यापि न्याय्यत्वात्

किञ्च, जातौ निर्विकल्पोपस्थितायां न शक्तिग्रहः किन्तु सविकल्पोपस्थितायां, जातौ च विशेषणं व्यक्तिरेव । अन्यद्विशेषतो नावधारितमिति नागृहीतविशेषणान्यायस्य वैपरीत्यमापतितम् । एवं च जातेः स्मरणमपि सविकल्पकतया विशेषणापेक्षं, विशेषणं च तत्र व्यक्तिरेवेति समानसंवित्संवेद्यतया कथमाक्षेपः । नान्वयप्रकारकतया व्यक्तेर्भानमपि तु प्राधान्येन । किञ्च पदार्थोपस्थितावन्वयप्रकारता स्यात् । व्यक्त्या विना तु जात्युपस्थितिरेव नास्तीति कस्यान्वये व्यक्तिः प्रकारः स्यात् । समानसंवित्संवेद्यतानियमेऽपि जातौ शक्तिर्न व्यक्ताविति चेन्न । शक्तिर्हि सामर्थ्यं, तच्च कार्यापेक्षम् । कार्यं चात्र ज्ञानात्मकमेकमेवेति क्व गौरवम् । न च जातिविषयतया ज्ञानं कार्यं न तु व्यक्तिविषयतयेति वाच्यम् । उभयविषयकं ज्ञानं पदजन्यमित्यस्यैव तदर्थत्वात् । किञ्चास्मन्मते पदानां शक्तिः सङ्केतो न तु पदार्थान्तरं, स च व्यवहारबलेन जातौ व्यक्तावपि गृह्यते । न हि गोपदाज्जातिमात्रं वाऽवह्रियते न तु व्यक्तिरिति युक्तिमत् । तस्मात् सङ्केतग्राहकस्य जातिव्यक्तिसाधारणस्य प्रमाणसिद्धत्वादुभयत्रापि सङ्केतरूपा शक्तिरिति न किञ्चिदनुपपन्नम् । एतेन गुरूणामर्द्धजरती निरस्ता । स्वरूपसत्याः शक्तेः पदार्थोपस्थित्यनङ्गत्वात् तदर्थमेव च तस्याः कल्पनात् । अन्यथा जातावपि स्वरूपसत्येवास्तामिति अस्यापि वाचाटवचसोऽवकाशप्रसङ्गात् । तस्माज्जातिवद् व्यक्तिरपि यथासम्भवमाकृतिरपि पदार्थ इति निर्धार्य सूत्रितमक्षपादेन 'व्यक्त्याकृतिजातयस्तु पदार्थाः' [ न्यायसूत्र २. २. ६६] इति तदेव युक्तमिति सर्वं समञ्जसम् ॥४॥

१. $M_2$ reads ०प्रतीत्यनन्तरम् । २. P+I. O. read भ्रमकल्पनम् । ३. P drops विशेषतो नावधारितमिति ना... । ४. P reads विशेषणसापेक्षम् । ५. $M_2$ reads कथम् । ६. $M_2$ reads नये instead of मते । ७. $M_2$ reads जातिवद् व्यक्तावपि । ८. P reads वाचालवचसः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(५) शक्तिवादः ।

अथ शक्तिः । तत्र विप्रतिपत्तिः । अयं वह्निर्दाहानुकूलाऽतीन्द्रियाद्विष्ठधर्मसमवायी न वा । अनुकूलत्वं च कार्याभावनियताभावप्रतियोगित्वं कारणतदवच्छेदकोभयसाधारणम् । अतीन्द्रियत्वं च साक्षात्कारत्वनियामकप्रत्यासत्त्यनाश्रयत्वम् । यद्वा वह्निनिष्ठदाहकारणत्वमतीन्द्रियधर्मावच्छेद्यं न वा ।

तत्र परेषामयमाशयः । यादृशादेव करतलानलसंयोगाद्दाहो जायते तादृशादेव सति प्रतिबन्धके न जायते । प्रतिबन्धकत्वं च कार्यानुकूलकिञ्चिद्धर्मविघटकत्वमेव । तत्र न प्रतिबन्धकस्य दृष्टविघटकत्वम् । दृष्टस्य पूर्ववत् प्रमाणसिद्धत्वात् । न चादृष्टविलम्बात् कार्यविलम्ब इति वाच्यम् । दृष्टकारणकलापे सत्यदृष्टविलम्बस्यासिद्धत्वात् । अन्यथा सत्यप्यन्त्यतन्तुसंयोगे कदाचित् पटानुत्पत्तिप्रसङ्गात् । सत्यपि कर्मणि वा कदाचिद्विभागानुत्पत्तिप्रसङ्गात् । तस्मादतीन्द्रियकिंचिद्दाहानुकूलविघटकत्वं प्रतिबन्धकत्वं मण्यादेरन्यथाऽनुपपत्त्या कल्पनीयमित्यर्थापत्तिरेव शक्तौ प्रमाणम् ।

न च प्रतिबन्धकाभावेनान्यथासिद्धिः अभावस्यातिरिक्तस्य मयाऽनङ्गीकारात्, अङ्गीकारे वा कारणत्वस्य भावत्वव्याप्तत्वात्, भावत्वस्याभावे निवृत्त्या कारणत्वस्यानिवृत्तेः । किञ्च । न प्रतिबन्धकाभावत्वेन कारणत्वम् । अन्योन्याश्रयप्रसङ्गात् । प्रतिबन्धकत्वं हि कारणीभूताभावप्रतियोगित्वं, तच्च कारणत्वग्रहाधीनग्रहं, कारणत्वं च तद्ग्रहाधीनग्रहमिति । नापि मण्याद्यभावत्वेन । मणिसमवधानेऽपि तदन्योन्याभावमादाय दाहप्रसङ्गात् । नापि मणिप्रागभावत्वेन । उत्पन्नविनष्टे मणौ दाहानुत्पादप्रसङ्गात् । नापि मणिप्रध्वंसत्वेन । अनुत्पन्ने मणौ दाहानुत्पादप्रसङ्गात् । नापि मण्यत्यन्ताभावत्वेन उत्पन्नविनष्टे मणावत्यन्ताभावस्य तदाऽभावात् । नापि मण्यादिसंसर्गाभावत्वेन । अन्योन्याभावातिरिक्तस्य संसर्गाभावस्य निर्वक्तुमशक्यत्वात् ।

तथाहि—तत् संसर्गाभावत्वं संसर्गप्रतियोगिकाभावत्वं वा तादात्म्यातिरिक्तप्रतियोगिकाभावत्वं वा । अन्यद्वा । नाद्यः । संसर्गान्योन्याभावेऽतिव्याप्तत्वात् । न द्वितीयः । तादात्म्यात्यन्ताभावेऽव्यापकत्वात् । नान्त्योऽसम्भवात् । किञ्च । मण्यभावस्य कारणत्वे मणेः प्रतिबन्धकत्वं न स्यात् ।

---

१. P reads सहजशक्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिबन्धकत्वं हि कार्यानुकूलकिञ्चिद्धर्मविघटकत्वं, न च मणिः किञ्चिदनुकूलं विघटयति स्वत एवानुकूलविघटनरूपत्वात् । किञ्च, प्रतिबन्धकसद्भावेऽप्युत्तेजकसमवधाने दाहदर्शनात् कथं व्यभिचारात् प्रतिबन्धकाभावस्य कारणत्वं, न चोत्तेजकसद्भावेन प्रतिबन्धकसद्भावः । उत्तेजकाभावविशिष्टप्रतिबन्धकाभावस्तर्हि कारणं, विशिष्टं च विशेषणविशेष्यतत्सम्बन्धातिरिक्तं नास्ति । तथा च विशेषणविशेष्यतत्सम्बन्धाभावाः प्रत्येकं कारणं मिलिता वा । नाद्यः । प्रत्येकं व्यभिचारात् । न द्वितीयः । अभावमेलकाभावेऽपि दाहदर्शनात् । न च विशिष्टाभावोऽतिरिक्त एवेति वाच्यम् । विशिष्टस्य हि विशेषणाद्यनतिरेके विशिष्टाभावस्य विशेषणाद्यभावातिरेके का प्रत्याशा ? । न च विशिष्टमतिरिक्तमेव । प्रतिक्षणं यत्किञ्चिद्विशेषणावश्यंकत्वेन क्षणभङ्गप्रसङ्गात् प्रत्यभिज्ञानं च क्वचिदपि न स्यात् । विशेषणादिनैव विशिष्टव्यवहारोपपत्तावतिरिक्तविकल्पनायोगाच्च ।

किञ्च, मण्यादिसमवधानदशायामुत्तेजकसद्भावे[3] यो दाहो जायते स किं प्रतिबन्धकप्रागभावेन उत प्रतिबन्धकध्वंसात् तदत्यन्ताभावाद्वा । न तावदाद्यः । असिद्धेः । प्रागभावस्य कार्यैकोन्नेयत्वात् । न द्वितीयः । उत्तेजकापनयेऽपि दाहप्रसङ्गात् । ध्वंसस्य विद्यमानत्वात्[5] । अत एव न तृतीयः । अत्यन्ताभावस्य नित्यत्वादुत्तेजकापनयेऽपि दाहप्रसङ्गात् । किञ्च, न मण्यादिसंसर्गाभावत्वेन कारणत्वं, तथा च तत्समवधानेऽपि यत्किञ्चिन्मणिसंसर्गाभावमादाय दाहप्रसङ्गात् । न हीतरसमवहितदण्डसमवधाने दण्डान्तरविलम्बेन कार्यविलम्बो दृश्यते ।

किञ्च, प्रहरं मा दहेत्यादौ मन्त्रस्य प्रतिबन्धकत्वं वाच्यम् । तथा च तदभावस्य कारणत्वे प्रहराभ्यतर एव दाहः स्यात् । मन्त्रस्य शब्दरूपतयाऽऽशुतरविनाशित्वात् । किञ्च, तार्णादौ वह्नित्वप्रयोजकं न तृणत्वादिकं

---

१. P reads ०विशेषणावच्छेदकत्वे । २. P reads (अ)तिरिक्तकल्पनायोगाच्च । ३. Pn reads समवधाने । ४. P reads ० प्रागभावात् । ५. Pn reads उत्तेजकापनयेऽपि ध्वंसस्य विद्यमानत्वाद्दाहप्रसङ्गात् । ६. I.O. + P read सदातनत्वात् । ७. Pn reads उत्तंभक० । ८. P reads मण्यादिसंसर्गाभावस्य संसर्गाभावत्वेन । ९. P reads तथा चेतरसमवधानेपि यत्किञ्चित्मणिसंसर्गाभावमादाय मणिसमवधानेपि । १०. Pn reads न हीतरदंडसमवधाने । ११. P reads वह्निजनकताप्रयोजनकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यभिचारात् । अन्यस्यानुगतस्याभावात् तृणादीनामेकशक्तिमत्त्वं प्रयोजकं वह्नित्वे[1] स्वीकर्त्तव्यम् ।

किञ्च । पिपासोपशमनसमर्थमिदं जलं[2] जलत्वादित्यत्र सामर्थ्यं तावदनुमीयते । तच्चावश्य पिपासोपशमनकारणत्वम् । तद्धि[3] पिपासोपशमनस्वरूपयोग्यत्वं वा । सहकारियोग्यत्वं वा । नाद्यः । स्वरूपयोग्यत्वस्य प्रत्यक्षेणैव ग्रहात्[4] । न द्वितीयः । व्यभिचारात् । न हि सर्वं जलं पिपासोपशमनसहकारियोग्यं भवतीति नियमः । तस्मात् सामर्थ्यं कारणत्वातिरिक्तमनुमेयं, तदेव[5] च शक्तिः ।

एवं व्यस्थितेऽनुमानमप्युच्यते । अयं[6] वह्निर्दाहानुकूलातीन्द्रियैकवृत्तिधर्मसमवायी दाहकारणत्वादात्मवत् । न चात्मत्वमुपाधिस्तेजोद्व्यणुक एव साध्याव्यापकत्वात् । अत्रापि दाहानुकूलस्यातीन्द्रिय[7]स्पर्शस्य विद्यमानत्वात् न चासौ न दाहहेतुः । उद्भूतोष्णस्पर्शमात्रस्यैव तत्त्वात्[8] । यद्वा करतलानलसंयोगः कार्यानुकूलातीन्द्रियधर्मसमवायी कारणत्वादात्मवत् । अत्रात्मत्वोपाधेः साध्याव्यापकत्वं स्फुटमेव । न च द्रव्यत्वमुपाधिः । धर्माधर्मादौ साध्याव्यापकत्वात् । अत्र धर्मत्वादेरेव तथाभूतस्य विद्यमानत्वात् । न चातीन्द्रियप्रतियोगिकसादृश्येन सिद्धसाधनम् । सादृश्यपदार्थस्याभावान्तर्भावेनासमवेतत्वात् । वह्निः कार्यानुकूलाऽतीन्द्रियैकवृत्तिधर्मसमवायी कारणत्वादात्मवदिति वा ॥ छ ॥

एवं प्राप्तेऽभिधीयते[9] । अन्यथाऽनुपपत्त्या[10] शक्तिः कल्पनीया । न चात्र सा, प्रतिबन्धकाभावेनोपपत्तेः । न चाऽन्योन्याभावमादाय अतिप्रसङ्गः प्रागभावत्वादिनाऽननुगमो वा संसर्गाभावत्वेन कारणत्वे तयोर्निरासात् । न चान्योन्याश्रयः, मण्यादिसंसर्गाभावत्वेनैवोपस्थिते कारणत्वग्रहस्य[11] सुकरत्वात् ।

न चान्योन्याभावसंसर्गाभावयोरभेदः । [12]आपाततः संसर्गावच्छिन्नप्रतियोगिकाभावत्वप्रतियोग्यवृत्तिसदातनाभावत्वयोर्व्यावर्त्तकयोर्विद्यमानत्वात् । न च संसर्गावच्छिन्नप्रतियोगिकाभावत्वमन्योन्याभावविशेषेऽतिप्रसक्तम् । तथाहि-

१. P reads वह्निजनकत्वे । २. P drops जलम् । ३. P reads तदपि । ४. P reads ग्रहणात् । ५. Pn reads सैव । ६. $M_1$ drops अयं । ७. P reads अतीन्द्रियस्य स्पर्शस्य । ८. Pn reads तथात्वात् । ९. Pn reads प्राप्ते ब्रूमः । १०. I. O.+$M_1$ read अन्यथाऽनुपपत्त्यादिशक्तिः । ११. I.O.adds वक्तुं । १२. Pn drops आपाततः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृहधृतबहुघटमध्यादेकस्मिन् बहिरानीते घटेऽधुना गृहसंसर्गिघटभिन्नोऽयं घट इति व्यवहारोऽस्ति । न च तद्घटवृत्त्यन्योन्याभावस्य प्रतियोगितावच्छेदकं घटत्वं, घटत्वस्य तत्राऽप्यनुयोगिनि वृत्तेः । तस्मादवश्यं तदन्योन्याभावस्य संसर्गः प्रतियोगितावच्छेदक इति स्वीकर्त्तव्यमिति वाच्यम् । अभावस्थले निरसनीयत्वात् । न च प्रतियोग्यवृत्तिसदातनाभावत्वं घटपटौ नायं घट इति व्यासज्यप्रतियोगिकान्योन्याभावेऽव्यापकमिति वाच्यम् । तस्याऽप्यभावस्थले निरसनीयत्वात् । न चाभावस्य[2] कारणत्वे मणेरकिञ्चित्करत्वेन प्रतिबन्धकत्वानुपपत्तिः । मणेः प्रतिबन्धकत्वाभावात् । किन्तु मण्यादिकमेव सामग्रीविघटनैरूपं[3] । तत्प्रयोक्ता पुरुषः प्रतिबन्धकः । न च विशिष्टस्यानतिरेके तदभावातिरेकानुपपत्तिः । प्रतियोगिभेदेनेवावच्छेदकभेदेनाप्यभावभेदस्वीकारात् ।

भवति हि केवलदण्डसद्भावे केवलपुरुषसद्भावे तदुभयाभावे च दण्डी पुरुषो नास्तीति व्यवहारः । विशिष्टाभावस्यातिरेकेऽपि कतमोऽसाविति चेत् न, तदनुपन्यासेऽप्यक्षतेः । अतिनिर्बन्धकरणेऽत्यन्ताभाव इति गृहाण । न चात्यन्ताभावस्य सदातनत्वादुत्तेजकापनये[4] दाहप्रसङ्ग इति वाच्यम् । विशेषणाद्यन्यतमाभावस्य विशिष्टाभावप्रत्यासत्तित्वेनेष्टत्वात् । यद्वा विशेषणाद्यभावेनैव[5] विशिष्टाभावव्यवहारोपपत्तौ नातिरिक्तविशिष्टाभावकल्पनम् । न चानुगमाभावः विशिष्टविरोध्यभावत्वेनेवानुगमात् । न च किञ्चित्प्रतिबन्धकसद्भावे प्रतिबन्धकान्तराभावमादाय दाहापत्तिरिति वाच्यं[6], प्रतिबन्धकसजातीयासमानाधिकरणप्रतिबन्धकसंसर्गाभावस्य[7] कारणत्वात् । तथैवाऽन्वयव्यतिरेकाभ्यामवधारणात् । परेणापि शक्तिं प्रति[8] प्रतिबन्धकाभावहेतुताया[9] व्यवस्थाप्यत्वात् । प्रहरं मा दहेत्यादौ तु तथाभूताभिप्रायविषयसमयस्यैव प्रतिबन्धकत्वं, तथा च नातिप्रसङ्गः ।

न च तार्णादावेकजातीयप्रयोजकतया[10] शक्तिस्वीकारः । शक्तिं विनाऽपि पवनादिकारणादेवोपपत्तेः । शक्तिवादिनाऽपि विजातीयानां कारणानामेकजातीयशक्तिमत्त्वस्यानभ्युपगन्तव्यत्वात् । अन्यथा कार्यविशेषात्[11] कारणविशेषानुमानं कारणविशेषाभावात् तत्कार्यविशेषाभावानुमानं च क्वचिदपि न

१. P reads (अ)न्योन्याभावत्वव्यापकम् । २. P reads न चाभावकारणत्वे । ३. P reads विघटनं । ४. P adds अपि । ५. P reads विशेषणाद्यन्यतमाभावेन । ६ P drops वाच्यं । ७. $M_2$ drops संसर्ग० । ८. $m_2$ drops प्रति । ९. P adds च । १०. P reads ०जात्यप्रयोजकतया । ११., $m_2$ drops ०विशेष० and ०(अ)भाव० ।

स्यात् । तज्जातीयशक्तिमतोऽन्यस्मादपि तत्कार्योत्पत्तिसम्भावनायाः जाग-रूकत्वात् । तथापि तृणादीनां वह्निं प्रति कथं कारणत्वग्रहः । तेषां दहनमात्रं प्रति व्यभिचारात् । दहनाऽवान्तरविशेषस्य च कारणताग्रहोत्तरकालीनत्वात् । न च [3]तृणाद्यन्यतमत्वं नियामकं, विशकलितसमवधानेऽपि कार्योत्पादप्रस-ङ्गात् । व्यक्तिविशेषान्वयव्यतिरेकयोः रासभादिसाधारणत्वादिति । मैवं, तुल्य-त्वात् तत्रापि नैकशक्तिमत्त्वेन कारणत्वं गृह्यते । किन्तु कारणत्वग्रहानन्तरं शक्ति-कल्पनं युक्तम् । अन्यथा रासभस्यापि वह्निशक्तिकल्पनाप्रसङ्गात् । तथापि यदि[4] सुहृद्भावेन पृच्छसि तदोच्यते—यज्जातीयमेलकात्[5] तृणासमवधाने कार्यं[6] न जायते तज्जातीयमेलकादेव तृणसमवधाने जायत इत्येवंरूपाऽन्वयव्यतिरेका-भ्यामेव तदवधारणात् । न चैतत् रासभादिसाधारणं, तृणासमवहिते तस्मिन् मेलके रासभसमवधानेऽपि कार्यानुत्पादनात्[7], दण्डव्यतिरेकेणापि पटोत्पत्ति-दर्शनवत् तृणव्यतिरेकेऽपि दहनोत्पत्तिदर्शनात् कथं तृणकारणताग्रह इति चेन्न । एवंभूतव्यभिचारग्रहस्य पूर्वोक्तान्वयव्यतिरेकापरिपन्थित्वात् । यत्र तु न तथाभूतान्वयव्यतिरेकग्रहस्तत्र तथाभूतव्यभिचारस्य[8] विरोधित्वात् । अन्यथा वह्न्यर्थिनां तृणादिषु निःशङ्कं प्रवृत्त्यनुपपत्तेः । यद्वा प्रदीपादिष्ववा[9]-न्तरजातिभेदस्य प्रत्यक्षसिद्धत्वात् विशिष्यैवान्वयव्यतिरेकाभ्यां कारणत्वग्रह इति न किञ्चिदनुपपन्नम् ।

पिपासोपशमनसमर्थं जलमित्यादौ सहकारिविरहप्रयुक्तकार्याभाववत्त्व-मेवानुमेयं तथाचैतदनुरोधेनापि न शक्तिसिद्धिः । ननु दीपस्य बीजोपरिन-यनम् अङ्कुरप्रतिबन्धकम्, अन्यथा[10] तदनन्तरम् अङ्कुरोत्पादप्रसङ्गात्, तस्माद्-गत्याङ्कुरोत्पादानुकूलं बीजनिष्ठं किञ्चिदतीन्द्रियं दीपोपरिनयनस्य विना-श्यमवश्यं स्वीकरणीयमिति । मैवम् । दीपोपरि सम्बन्धात्यन्ताभावास्यानादि-तत्संसर्गाभावस्य वा कारणत्वात् । न चानुमानात् शक्तिसिद्धिः । प्रथमानुमा-नेऽचाक्षुषद्रव्यत्वस्योपाधेः[11] सत्त्वात् । द्वितीयानुमाने प्रत्यक्षगुणान्यत्वस्य

१. $P+m_2$ drop तत्० । २. P reads ग्रहोत्तरकल्प्यत्वात । ३. $P+m_1$ read न चान्यतमत्वं । ४. $m_1$ drops यदि । ५. $m_2$ adds एव । ६. $m_2$ adds च । ७. P reads कार्यानुत्पादात् । ८. $Pn+m_1$ read तथा व्यभिचारस्य । ९. $m_1$ has दीपादि । १०. $P+m_2$ read नाङ्कुरप्रतिबन्धकं तदनन्तरमंकुरोत्पादप्रसङ्गात् ११. P reads (उ)पाधित्वात्, Pn has अद्रव्यद्रव्यत्वस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयोगेतरत्वस्य वोपाधेः सत्त्वात् । एकवृत्त्या साध्यविशेषणे द्रव्यत्वस्यै-वोपाधेः सत्त्वात् । तृतीयानुमाने स्थितिस्थापकेन सिद्धसाधनात्, अचाक्षुष-द्रव्यत्वस्य चोपाधेस्तथैव सत्त्वात् । सर्वेषामप्रयोजकत्वाच्चेति[२] ॥ ५ ॥

१. $m_2$ drops संयोगेतरत्वस्य । २. P adds इति सहजशक्तिवादः, I.O.adds पंचमो वादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्वस्त्वाधेयशक्तिः । तथाहि व्रीहीन् प्रोक्षतीत्यादौ व्रीह्यादीनां प्रोक्षणादौ कर्मता[1] प्रतीयते । सा च तत्फलाधारत्वव्यतिरेकेणानुपपद्यमाना व्रीह्यादेस्तत्फलाधारतामवगमयति, कथं वान्यथा प्रोक्षितस्यैव व्रीहेरुत्तरत्रोपयोगः । प्रोक्षणस्य चिरध्वस्तत्वात् । न च प्रोक्षणमुपलक्षणं ध्वंसव्यापारकं[2] वा यागादावपि तथाभावप्रसङ्गात् । प्रोक्षणस्य पुरुषसमवेतसंस्कारजनकत्वे व्रीहिकर्मतानुपपत्तेरुक्तत्वात्[3] । न च संस्कारेण परम्परासम्बन्धात् कर्मतोपपत्तिः । साक्षात्सम्बन्धबाधे परम्परासम्बन्धस्य कल्पनार्हत्वात्[4] । अतिप्रसङ्गाच्च ।

किञ्च, कामिनीचरणाघातात् पुष्पोदयदर्शनादाघातजन्यातिशयाश्रयत्वमशोकस्य कल्पनीयम् । तथा कांस्यादौ भस्मादिसंयोगेनावश्यम[5]तिशयाश्रयत्वं स्वीकर्त्तव्यम् । अन्यस्य तत्र शुद्धिपदार्थस्य निर्वक्तुमशक्यत्वात् । एवं प्रतिमादावपि प्रतिष्ठादिप्रयोज्यमतिशयाधानमूहनीयम् । किञ्च, कलमादेरा[6]परमाण्वन्तभङ्गात् परमाणुष्ववान्तरजातेरभावात् कथमतिशयाधानमन्तरेण तेभ्यः[7] कार्यविशेषो जायत इति ॥

अत्रोच्यते । प्रोक्षणजन्यसंयोगरूपफलभागित्वेनैव व्रीहिकर्मतोपपत्तौ न तदर्थं व्रीहिनिष्ठातिशयकल्पनम्, न च संयोगस्य न प्रोक्षणफलत्वम्, उत्तरसंयोगावच्छिन्नद्रवद्रव्यकर्मविशेषस्यैव प्रोक्षणपदार्थत्वादिति वाच्यम् । ग्रामं गच्छतीत्यादावपि तथात्वेन ग्रामकर्मत्वानुपपत्तिप्रसङ्गात् । तस्माद्यथा तत्र गमनविशेषणत्वेऽपि संयोगस्य तदाधारतया ग्रामकर्मत्वं भवति[8] तथाऽत्रापि[9] वाच्यम् । कथमन्यथा सक्तून् प्रोक्षतीत्यादौ लौकिकप्रोक्षणे सक्तूनां कर्मत्वम् ।

किञ्च, व्रीहेः प्रोक्षणजन्यसंस्काराश्रयत्वे कल्प्यमाने प्रतिव्रीहि भिन्नाः[10] संस्काराः कल्पनीयास्तावद्वृत्तिरेक एव वा । न तावदाद्यः । गौरवप्रसङ्गात् । न द्वितीयः । किञ्चिद्व्रीहिनाशे तन्नाशस्यावश्यकत्वेन व्रीह्यन्तरस्याऽप्युत्तरत्रोपयोगो[11] न स्यात् । न च यावदाश्रयनाशात् तन्नाश इति युक्तम् ।

---

१. P+I.O. read प्रोक्षणादिकर्मता । २. P reads ध्वंसव्यापारकत्वं । ३ P adds च । ४. P reads साक्षात्सम्बन्धाबाधे....कल्पनानर्हत्वात् । ५. P adds अस्य । ६. P+$m_2$ add ०बीज । ७. Pn omits तेभ्यः, $m_1$ adds एव । ८. $m_2$ drops भवति । ९. P adds इति । १०. $m_1$ reads प्रतिव्रीहिव्यक्तिभिन्नाः, P reads भिन्नसंस्काराः । ११. P reads प्रयोगः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत्त्वस्यापि गौरवकरत्वेनानवच्छेदकत्वात् । यद्वा पुरुषसमवेतेनापि संस्कारेण स्वरूपसम्बन्धात् व्रीहेः कर्मतोपपत्तिः ।

किञ्च, किं तत्कर्मत्वं यस्यात्रानुपपत्तिः । न तावत् क्रियाफलभागित्वं, घटं जानाति देवदत्त इत्यादौ ज्ञानलक्षणक्रियाजन्यसंस्कारफलभागित्वेनात्मनोऽपि कर्मत्वप्रसङ्गात् । न चान्यसमवेतक्रियाफलभागित्वं कर्मत्वम् । आत्मानमात्मना[1] जानामीत्यत्रात्मनोऽकर्मत्वप्रसङ्गात् । न चात्मनोऽत्रामुख्यं[2] कर्मत्वं, मुख्यत्वे बाधकाभावात् । तस्मात् करणव्यापारविषयकारकत्वादिकमन्यत् कर्मलक्षणं वाच्यम् । तथा च व्रीहेः प्रोक्षणफलानाश्रयत्वेऽपि न कर्मत्वानुपपत्तिः । कामिनीचरणाघातव्यापारत्वेन वृक्षस्यातिशयकल्पनमपि न वाच्यम् । चरणाघातजनिताध्यात्मिकवायुक्रियाजनितभागान्तराकर्षणेन वृक्षोपष्टम्भादपि तदुपपत्तेः । चरणाघातेन तत्तत्कर्तृसमवेतमपूर्वमुत्पद्यत इति केचित् ।

न चाऽन्यस्य शुद्धिपदार्थस्य निर्वक्तुमशक्यतया कांस्यादौ भस्मादिप्रयोज्यातिशयकल्पनमिति युक्तमेतत्, तत्तत्समयावच्छेदेन भस्मादिसंयोगप्रतियोगिकानादिसंसर्गाभावविरहस्य तत्समानकालीनचाण्डालादिस्पर्शादिप्रतियोगिकयावदनादिसंसर्गाभावसमानाधिकरणस्य शुद्धिपदार्थत्वात् । एवमेतद्विपर्ययेणाशुद्धिपदार्थोऽपि[5] निर्वक्तव्यः । यद्वा शुद्धिजनकत्वाभिमतेनाम्लादिसंयोगेन ताम्रादौ[6] तत्तद्देवतासन्निधिरेव क्रियते, स एव शुद्धिपदार्थः । अस्पृश्यसम्बन्धेन तु तद्विरहः । स एव चाशुद्धिपदार्थः ।

अन्ये तु भस्मादिप्रयोक्तृनिष्ठ एव संस्कारस्तेन जन्यते । स एव शुद्धिपदार्थः इति । अशौचापादकेन तदपनयो जन्यते स एवाशुद्धिपदार्थः इत्याहुः । प्रतिमादौ तु प्रतिष्ठादिना देवतासन्निधिरेव क्रियते । स चाऽहङ्कारममकारलक्षणः[7] । तथा घटादावपि शुद्धप्रतिज्ञादिकमपेक्ष्य[8] प्रतिष्ठादिविधिना जयप्रयोजकीभूतो धर्मो जन्यते । अविशुद्धिमपेक्ष्य भङ्गप्रयोजकोऽधर्मो जन्यते । एवं परमाणुगतपाकजविशेषगुणात्[9] तत्तत्पार्थिवकार्यविशेषो द्रष्टव्यः । जलादौ तु[10] अदृष्टादिनिमित्तभेदात् कार्यवैचित्र्यमूहनीयम् । न च शक्तिव्यवहारान्यथाऽनुपपत्त्यातिरिक्तपदार्थकल्पनम्, कारणत्वेनैवोपपत्तेरित्युपरम्यते ॥६॥[11]"

---

१. $M_2$ reads आत्मनात्मानं । २. P reads (अ)मुख्यकर्मत्वं । ३. P+I. O. add कामिनी० । ४. P reads भस्मसंयोगप्रयोज्य० । ५. $M_2$+P drop अपि । ६. P reads स्नानादियोगेन तन्त्रादौ । ७. $M_2$ reads ०ममकारप्रवाहलक्षणः । ८. P reads अशुद्धप्रतिज्ञामपेक्ष्य । ९. P. reads पाकजगुणविशेषात्, $M_1$ reads पाकविशेषात् । १०. P adds here मन्त्रिते विशेषः । ११. I. O. adds इति शक्तिवादः. But P has इति आधेयशक्तिवादः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (७) मनोऽणुत्ववादः।

मनस्त्वं परमाणुवृत्ति न वा। मूर्त्तत्वं निःस्पर्शवृत्ति न वा। [1]अणुत्वं वा तथा न वा। यद्वा स्पर्शवत्त्वं अणुत्वसमानाधिकरणात्यन्ताभावप्रतियोगि न वेति विप्रतिपत्तेः[2] संशयसम्भवे विचारावतारः। सुखप्रतीतिः सकरणिका क्रियात्वात् रूपप्रतीतिवदिति प्रमाणं न समीचीनं शरीरादिना सिद्धसाधनात्[3]। नाप्यसाधारणकरणिकेति साध्ये निर्देशेऽपि मनःसिद्धिः[4]। निःस्पर्शत्वाद्यनुल्लेखितया चार्थान्तरत्वात्। नापीन्द्रियकरणिकेति साध्यनिर्देशे[5] तत्सिद्धिः। त्वचैव सिद्धसाधनात्, अतिरेकेऽप्यणुत्वाद्यसिद्धिः विभुत्वेनैवोपपत्तेः। सर्वदा स्पर्शरहितद्रव्यत्वादेर्विभुत्वसाधकस्य विद्यमानत्वात्[6]। न च विभुत्वपक्षे व्यासङ्गानुपपत्तिः। व्यासङ्गस्यैव ज्ञानान्तरोत्पत्तौ प्रतिबन्धकत्वात्। एकदाऽनेकक्रियाजनकत्वानुपपत्तेश्च[7]। न च सुखादिप्रादेशिकत्वानुपपत्तिः, विषयसम्बन्धप्रादेशिकत्वेनैवोपपत्तेः। मनोऽणुत्वपक्षेऽपि तस्यैवोपजीव्यत्वात्। अन्यथाऽणुमात्रदेशता सुखस्य स्यात्। सर्वाङ्गीणमेव सुखमुत्पद्यते। बुभुत्साया एव व्यासङ्गे[8] नियामकत्वमन्यस्य वा कस्यचिन्नियामकत्वम्। कथमन्यथा मनोऽणुत्वपक्षे वीणानादाकर्ण्णनव्यासक्तस्य न पुनर्भेरीरवाकर्णनमिति नियमः। कथं वा द्वित्रिच्छिन्नगोधाशरीरभागे[9] चेष्टोद्गमः प्रयत्नवदात्ममनःसंयोगस्य[10] कारणत्वात्, तस्य च मनस्संयोगं[11] विनाऽनुपपत्तेः॥७॥छ॥

अत्रोच्यते। व्यासक्तस्य देवदत्तस्य घटसंयुक्तं त्वगिन्द्रियं घटसाक्षात्कारकारणकिञ्चिद्द्रव्यसंयोगरहितं तदा घटसाक्षात्काराजनकत्वात् त्वगिन्द्रियासंयुक्तपटवदिति तावद्व्यापककरणसिद्धिः। तस्य सावयवत्वकल्पनायां गौरवमित्यनवयवत्वे व्यवस्थिते—न च तत् स्पर्शवत्, स्पर्शवतो गन्धग्राहकस्य घ्राणत्वप्रसङ्गेन रूपाद्यग्राहकत्वे[12]प्रसङ्गात्। एवं तैजसत्वे चाक्षुषत्वप्रसङ्गेनापि गन्धाग्राहकत्वमापादनीयम्।

---

१. This is missing from here to नवेति in P I. O. +$M_2$। २. P reads विप्रतिपत्तिसम्भवे। ३. $M_2$ reads सिद्धसाधनत्वात्। ४. P reads मनसः सिद्धिः। ५. $M_2$ drops निर्देशे। ६. Pn reads इष्यमाणत्वात्। ७. P reads क्रियाप्रयोजकत्व०। ८. P reads नियामकत्वात्। ९. P reads द्वित्रिच्छिन्ने गोधाशरीरे। १०. P reads (आ)त्मसंयोगस्य। ११ P reads मनोयोगं। १२. P reads घ्राणत्वप्रसङ्गरूपाद्यग्राहकत्वप्रसङ्गात्।

यद्वा सुखादिप्रतीति[1]रिन्द्रियकरणिका जन्यसाक्षात्प्रतीतित्वाद्रूपप्रतीतिवदित्यपि मनसि मानं, न च त्वचा सिद्धसाधनम् । स्पर्शोपग्रहेणैव तत्कारणत्वावधारणात् । न चैवमणुत्वाद्यसिद्धिः, धारावाहनज्ञानक्रमवद् व्यासङ्गस्योपपत्तेरिति[2] वाच्यम् । तत्र हि पूर्वपूर्वज्ञानापेक्षिकत्वमेवोत्तरोत्तरस्य विशेषणज्ञानत्वेनापेक्षणात् । ननु तथापि बुभुत्सैवास्तु नियामिका तस्या अवश्यं नियामकत्वेनाङ्गीकर्त्तव्यत्वात् घटायोन्मीलने पटप्रकाशनं क्रमेण भवति बुभुत्सापगमात्[4] तस्मादन्यथासिद्धस्य व्यासङ्गस्य कथं मनोऽणुत्वसाधकत्वमिति[5] । मैवम् । सुखादिप्रादेशिकत्वनियमार्थं प्रादेशिकमसमवायिकारणत्वमङ्गीकार्यं[6] विभुकार्ये तथैवावधारणात् । न च शरीरसंयोगस्य तथात्वं सकलशरीरावच्छेदेन तदुत्पत्तिप्रसङ्गात् । न च तदवयवानामवच्छेदकत्वम् । अवयवाव्यापिसुखस्य[7] दर्शनात् । न च तत्राऽप्यन्यस्यावच्छेदकत्वम् अननुगमात्[8] । न च विभुमनःसंयोग एवासमवायिकारणं प्रादेशिकत्वानुपपत्तिप्रसङ्गात् । न च तत्राऽप्यव्याप्यवृत्त्यवच्छेदककल्पना, शरीरादीनामवच्छेदकत्वे दोषस्योक्तत्वात् । अतिरिक्तस्यासिद्धत्वात्, सिद्धत्वे वा तदेव मनःस्थानेऽभिषिच्यताम् । योगशास्त्रबोधितप्रत्याहारान्यथाऽनुपपत्त्या च मनोऽणुत्वसिद्धिरिति केचित् ।

न च मनोणुत्वपक्षेऽणुमात्रदेशतापत्तिः[8] सुखादीनामिति वाच्यम् । यावदवच्छेदेनासमवायिकारणं वर्त्तते तावदवच्छेदेन कार्यमपि । न तु[9] तावदवच्छेदेनैवेति नियममङ्गीकुर्मः । न च द्वित्रिच्छिन्नगोधाशरीरचलनाऽनुपपत्तिः[10] मनोन्तरप्रवेशस्यादृष्टवशादुपपत्तेः । समयसौक्ष्म्यानाकलनाद्वा तत्र यौगपद्याभिमानः । वेगवत्प्राणपवनसंयोगात् चलनोपपत्तिरिति केचित् । एवमणुत्वे सिद्धे पूर्वन्यायेन पृथिव्यादिभिन्नत्वे च स्पर्शकल्पनायां कल्पनागौरवमेव बाधकमिति[11] न किञ्चिदनुपपन्नम्[12] ॥श्री ७॥

१. Pn+$m_2$ read सुखाद्युपलब्धिः । २ Pn reads धारावाहिकज्ञानक्रमवत् । ३. P reads पूर्वपूर्वज्ञाने चोत्तरस्य । ४. P reads बुभुत्सापगमे वा । ५. $M_2$ adds वाच्यम् । ६. P+I. O. add अपि । ७. Pn reads अननुगतत्वात् । ८. P reads ०देशवृत्तिता । ९. P reads च instead of तु । १०. $M_1$ reads चलनान्यथानुपपत्तिः । ११. P misses एव बाधकम् । १२. I. O. adds इति मनोऽणुत्ववादः समाप्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (८) शब्दप्रामाण्यवादः।

इह हि शब्दस्य स्वातन्त्र्येण प्रामाण्यमनिच्छन्तोऽनुमानान्तर्भावेन तत्प्रामाण्यमिच्छन्ति वैशेषिकादयः[1]। तेषामयमाशयः। गामानयेति वाक्यश्रवणानन्तरमन्वयप्रतीतिस्तावदनुभूयते वाक्ये चाकांक्षादिमत्त्वप्रतिसंधानं तदर्थप्रतिपै[2]त्त्यनुकूलतयाऽवधृतम्। तथा चाकांक्षादिमत्पदकदम्बकप्रतिसन्धानस्यावश्यकतया तस्य[3] च स्मारितार्थसंसर्गविज्ञप्तिपूर्वकत्वनियमेनाऽनुमानादेव तत्[4]फलसिद्धौ किमिति शब्दस्य प्रमाणान्तरत्वाभ्युपगमः। तथाहि एतानि पदानि [5]स्वस्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बकत्वात्। गामभ्याजेति पदकदम्बकवदिति ज्ञानावच्छेदकतया संसर्गसिद्धिरनुमानादेव सम्भवति। [6]अत्रार्थपक्षकेऽनुमाने साक्षादेव संसर्गसिद्धिः। एवं हि तत्। एते पदार्था [7]मिथःसंसर्गवन्त आकाङ्क्षादिमत्पदकदम्बकस्मारितार्थत्वात् गामभ्याजेति पद[8]कदम्बकस्मारितपदार्थवत्। न च संसर्गविशेषासिद्धिः, प्रतियोगिन एव तत्र[9] विशेषत्वात्, तस्य च पक्षधर्मताबलात् सिद्ध्यविरोधादिति ॥श्री॥

अत्रोच्यते। घटमानयेत्यस्य वाक्यस्य वक्तृज्ञानानुमापकत्वेऽपि तत्र प्रतियोगिविशेषोपरक्तसंसर्गगोचरत्वेऽपि न घटकर्मकानयनसिद्धिः[10]। तत्र पक्षधर्मताया असामर्थ्यात्। घटानयनयोरन्यथाऽपि संसर्गसम्भवात्। एवमर्थपक्षकेऽपि दूषणमूहनीयम्। यत्र वा वक्तुर्न संसर्गज्ञानं शुकवद् वाक्यमात्रमसौ प्रयुङ्क्ते तत्र कथं वक्तृज्ञाने[11]नानुमापकत्वम्। न च तत्र संसर्गप्रत्यय एव न जायते, बाधा[12]भावात्, प्रतीतेरनुभवसाक्षिकत्वाच्च।

किञ्च केयमाकाङ्क्षा यया हेतुर्विशेषणीयः। न तावत् प्रतिपाद्यजिज्ञासा घटो भवतीत्यस्य रूपादिविशेषाकाङ्[13]क्षायां साकाङ्क्षत्वप्रसङ्गात्।

---

१. P adds तत्र। २. $M_2$ reads प्रत्यय instead of प्रतिपत्ति। ३. P reads तस्य स्वस्मारित०। ४. P reads तदुत्पत्तिफलसिद्धौ। ५. P reads तात्पर्यविषयस्वस्मारित०। ६. P+$M_2$ drop अत्र। ७. P adds तात्पर्यविषयमिथः०। ८. P+$M_2$+I. O. drop पदकदम्बक०। ९. P+$M_2$ drop तत्र। १०. Pn+o गोचरत्वेऽपि घटकर्मकानयनासिद्धिः। ११. P.+$M_2$+I. O. read (अ)नुमानम्। १२. P+$M_2$+I. O. read बाधकाभावात्। १३. $M_1$ reads o (आ)काङ्क्षया।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा च किञ्चिदपि वाक्यं न[1] निराकाङ्क्षं स्यात् । समभिव्याहृतपदार्थविषया सेति चेत् , न, एतस्याः सर्वत्राभावात् । तथाहि अनिच्छन्नपि चक्षुरादेरिव वाक्यादन्वयमनुभवति । एवमपि सा ज्ञाता न कारणं भवति[2] प्रमाणाभावात् । तथा च कथमनया[3] मनस्संयोगादिनेव हेतुर्विशेषणीयः । न चान्वयानुपपत्तिराकांक्षा, अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र पुरुषान्वयेनाप्युपपन्नसमभिव्याहारस्य राज्ञ इत्यस्य पुत्रे साकाङ्क्षताविरहप्रसङ्गात् । न चान्वयापर्यवसानं सापेक्षत्वं वाऽऽकाङ्क्षा । अनयोर्निर्वक्तुमशक्यत्वात् । नाऽप्यविनाभावमाकांक्षां स्वीकुरुषे[4] घटवद्भूतलमित्यत्राऽविनाभावाऽभावेप्यन्वयबोधदर्शनात् । यथाकथञ्चिदविनाभावस्य गौरश्व इत्यादावपि भावात् ।

तस्माज्जिज्ञासां प्रति योग्यताऽऽकाङ्क्षा[5] सा च समभिव्याहारविशेषः तथाभूते कदाचिज्जायते[6] जिज्ञासा । सा[7] च गौरश्व इत्यादौ नास्ति तेन कदाचिदपि समभिव्याहृतपदार्थविषयजिज्ञासाया अजननात् । एतदेवाभिसन्धायोक्तं "श्रोतरि तदुत्पाद्य संसर्गावगमप्रागभाव आकांक्षे"ति । [न्यायकुसुमाञ्जलि, ३, १३ वृ०]

न चैषाऽन्वयज्ञाने जनयितव्ये स्वज्ञानमपेक्षते तथात्वेऽपि वा व्याप्तिज्ञा[8]र्निर्विषयतया वाक्यज्ञानस्यान्वयबोधजनकतायामेव कल्पनागौरवे[9]पराघातः । अपि च व्याप्तिसंशयेऽपि विशिष्टबोधस्य जायमानत्वात् ।

गुरूणां तु वैदिकवाक्यस्य स्वातन्त्र्येणैव प्रामाण्यं, [10]लोके तु वक्तृज्ञानानुमानादेव संसर्गसिद्धौ तस्यानुवादकत्वमात्रमिति यदभ्युपगमस्तदतित्रपाकरम् । तथाहि आकाङ्क्षादिमत्तया तावत्संसर्गप्रत्यायकत्वं वैदिकवल्लौकिके[11]ऽपि साधारणम्[12] । न च लौकिके तात्पर्यग्रहापेक्षया[13] विलम्बः । तात्पर्यग्रहस्यान्वयबोधानङ्गत्वात् तात्पर्यसंशयेऽपि वाक्यार्थबोधदर्शनात् । अन्यथा अर्थान् पक्षीकृत्य वेदेऽपि संसर्गानुमानसम्भवात् तस्याऽप्यनुवादकता स्यादित्यास्तां विस्तरः[14] ॥८॥

---

१. P misses न but commentator शेषानन्त accepted the reading given above । २. $M_2$+P+I. O. drop भवति । ३. $M_2$ drops अनया । ४. P reads नाप्यविनाभाव आकाङ्क्षा । ५.न्यायकुसुमाञ्जलि chap III, verse 13. । ६. $M_2$ adds एव । ७. P+$M_1$ read स च । ८. $M_1$ drops ०ज्ञान० । ९. $M_2$+I. O. read ०गौरवेन पराघातः । १०. P+I. O read लौकिके । ११. P reads लौकिकवद् वैदिकेऽपि but शेषानन्त follows the reading we accepted here । १२. $M_2$ reads समानम् । १३. $M_1$ reads (अ)पेक्षाविलम्बः । १४. I. O. adds इति शब्दस्वातंत्र्यवादाष्टमः, P reads इति शब्दस्वातन्त्र्यप्रामाण्यवादः समाप्तः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (२) ज्ञानकर्मसमुच्चयवादः ।

अत्र कर्मतत्त्वज्ञानयोस्तुल्यवत्समुच्चयेनापवर्गकारणत्वमित्येके । तत्त्वज्ञानद्वारा कर्मणां तत्र कारणत्वं, तथा च न तुल्यवत्समुच्चय इत्याचार्याः । तत्र तेषामयमाशयः । तीर्थविशेषस्नानादियमनियमादिकर्मणां तावन्निःश्रेयसकारणत्वं शब्दबलादेवावगम्यते । तत्र निःश्रेयसे जनयितव्ये तत्त्वज्ञानव्यापारकत्वं तेषां न तावच्छब्द एव बोधयति । तत्र तस्यौदासीन्यात् । न च कर्मणामाशुतरविनाशित्वेन व्यापारोऽवश्यं स्वीकरणीयः ।

तत्र दृष्टेनैव तत्त्वज्ञानेनोपपत्तौ चादृष्टकल्पनाया अयुक्तत्वात् तत्त्वज्ञानव्यापारकत्वसिद्धिरिति वाच्यं, तत्त्वज्ञानस्यापि व्यवहितत्वेन तदर्थमपि कर्मकारणतानिर्वाहार्थमपूर्वव्यापारकत्वस्यावश्यं कल्पनीयत्वात् । तथा च निःश्रेयस एव जनयितव्येऽदृष्टमेव तदास्तामावश्यकत्वात्[6] । उत्पन्नेऽपि तत्त्वज्ञाने यमनियमादिकमवश्यमनुष्ठेयं तदानीमपि मोक्षार्थिनो यमनियमादावधिकारानपायात् । न चोत्पन्ने तत्त्वज्ञाने निःश्रयसोत्पत्तेर्यमनियमाद्यनुष्ठानानवकाश इति वाच्यम् । न ह्येकस्मात् तत्त्वज्ञानादपवर्गः किन्तु तदभ्यासश्रवणात् । तथा च श्रुतिः–

"अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्यायां रताः ॥" [ईशोपनिषत् ९]

अस्यार्थः । 'अविद्या' कर्म तद् 'उपासते' तत्रैवासक्ता भवन्ति ते 'अन्धं तमः प्रविशन्ति' संसारान्न प्रच्यवन्ते । तेन केवलकर्मोपासनेन न जन्मादिव्यवच्छेदः । ये च 'विद्यायां रताः' विद्या तत्त्वज्ञानं तन्मात्रासक्तास्ते 'भूयो'ऽतिशयेनान्धं तमः प्रविशन्ति, नित्याकरणेन प्रत्यवायस्य बहुतरत्वात् । न च नित्यस्यापि संन्यासः, तत्सन्न्यासस्यापि प्रतिक्षिप्तत्वात् । समुच्चयप्रतिपादिका च श्रुतिः–

---

१. P reads ०स्नानयमनियमकर्मणाम् । २. $M_1$+P reads शब्दबलादवगम्यते । ३. P reads स्वीकर्त्तव्यः । ४. P reads तत्त्वज्ञानव्यापारकत्वमिति । ५. P misses अदृष्टमेव । ६. I.O. adds लाघवाच्च । ७. P. adds here निःश्रेयसोत्पत्तये । ८. $M_2$ adds अपि । ९. I. O. adds अव्यवधानेन । १०. $M_1$+P+I. O. drops किन्तु । ११. P reads अतिबहुतरत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥" [ईशोपनिषत् ११]

अस्यार्थः । 'अविद्यां' कर्म 'विद्यां' च तत्त्वज्ञानं 'सह' तुल्यवत् यो 'वेद' प्राप्नोति । वेदेति प्रयोगस्य विदुर्लाभे[1] इत्यस्य छान्दसत्वेन भास्करीयैर्दर्शितत्वात् ।

"तमेव विदित्वातिमृत्युमेति नान्यः पन्थाः विद्यतेऽयनाये"त्ति [श्वेताश्वतरोपनिषत्, ३. ८, ६. १५] तु वाक्यं तत्त्वज्ञानस्यापवर्गसामग्रीनिवेशननियम[2]परं, न तु वाक्यान्तरावधृतकारणान्तरव्युदासार्थम् ।

ननु समुच्चये उपपत्तिविरोधः, तथाहि काम्यनैमित्तिकाभ्यां[3] कर्मभ्यां[4] न समुच्चयः तयोस्त्यागात् । न नित्येन, एकैकशो व्यभिचारात् । न साकल्येनासम्भवात् । नापि यत्याश्रमविहितेन, गृहस्थस्यापि मोक्षश्रवणादिति ।

मैवम् । निःश्रेयसहेतुतया प्रतिपादितैरेव यमादिभिः समुच्चयसम्भवात् । न च कर्मणां परस्परव्यभिचारात्, निःश्रेयसे च स्वर्गवद्वैचित्र्याभावान्न तत्प्रति कारणत्वमिति वाच्यम् । स्वाभाविकविशेषविरहेऽपि प्रतियोगिभेदेन विशेषस्य निःश्रेयसेऽप्यविरोधात् । एतस्य चाऽभावरूपकार्येऽवश्याभ्युपेयत्वात् । कथमन्यथाश्रयनाशपाकयो रूपनाशकारणत्वमिति । न च ज्ञानस्य[5] विहितत्वात् अदृष्टजनकत्वेनादृष्टस्यैव प्राधान्यम् । दृष्टेनैवोपपत्तावदृष्टकल्पनाऽयोगात्[6] । न चावघातवन्नियमादृष्टकल्पना । तत्र वैतुष्यस्यान्यथाऽपि सम्भवेन नियमादृष्टकल्पना[7] । अत्र तु मिथ्याज्ञाननिवृत्तेरन्यथाऽसम्भव इति विशेषादिति ।

अत्राहुः । यद्यपि तत्तत्कर्मविशेषस्यापवर्गकारणत्वं शब्दबलादवगम्यते, तत्त्वज्ञानस्य व्यापारत्वं[8] न शाब्दं, तथापि न कर्मणस्तत्त्वज्ञाननिरपेक्षस्य मिथ्याज्ञानोन्मूलनव्यतिरेकेण कारणत्वं संसाराविच्छेदात् । तदुन्मूलनस्य तत्त्वज्ञानसाध्यत्वेन लोकत एवावधारणात् । तथा तत्त्वज्ञानमवश्यमपेक्षणीयम् । एवं च निःश्रेयसे जनयितव्ये यावत् तदनुकूलं जन्यं च तत्सर्वं कर्मणि उपहर-[9]

१. P reads विद्लृ लाभे । २. $M_2$ drops ०नियम० । ३. P reads काम्यनिषिद्धाभ्याम् । ४. $M_2$ drops कर्मभ्याम् । ५. P reads तत्त्वज्ञानस्य । ६. P reads अदृष्टकल्पनाया अयुक्तत्वात् । ७. P reads ०कल्पनात् । ८. $M_2$ reads द्वारत्वम्; P reads तत्त्वज्ञानव्यापारकत्वं । ९. P reads कर्मोपहरणीयम्, I. O. reads कर्मणोपहरणीयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णीयम्। एवंभूतं च तत्त्वज्ञानं, तथा च किमिति तेन न जननीयम्। इदमेव च तुल्यकक्षतया समुच्चयो नेष्ट इत्यनेन विवक्षितम्। एवंभूतसमुच्चये न नो विवादः।

किञ्च, यमनियमादेः[1] कर्मविशेषस्य तत्त्वज्ञानानुकूलत्वं तावच्छब्दादेवावगम्यते, तथा च विवादास्पदीभूतस्यापि[2] कर्मणस्तद्द्वारेणैव जनकत्वं कल्प्यते, लाघवात्। क्वचिन्मोक्षफलत्वेन श्रुतस्यापि वाराणसीप्रायणादेस्तत्त्वज्ञानोत्पादकत्वस्य[3] शब्दादेवावगम्यत्वात्[4]। तेषां च कर्मणां तत्त्वज्ञाने जनयितव्ये सत्त्वशुद्धिरेवावान्तरव्यापार इति न तदर्थमपूर्वकल्पनम्। न च वाराणसीप्रायणादिव्यतिरेकेण तत्त्वज्ञानस्याऽप्यनुत्पत्तिप्रसङ्गः। अपवर्गेऽप्यस्य समानत्वादत्रावान्तरविशेषकल्पनमिति यदि प्रकृतेऽपि तुल्यम्। श्रुतिरपि तत्त्वज्ञानकर्मणोः[5] कारणतामात्रं बोधयति, न तु तुल्यकक्षतया समुच्चय इति संक्षेपः[6] ॥९॥

१ P drops यमनियमादेः। २. P reads विवादास्पदीभूतकर्मणः। ३. P+$M_1$ read ०(उ)त्पादकस्य। ४. P+$M_1$ read ०(अ)वगतत्वात्। ५. $M_2$ reads ज्ञानकर्मणोः। ६. P adds इति ज्ञानकर्मसमुच्चयवादः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१०) मुक्तिवादः ।

अपवर्गस्तावदान्वीक्षिकीप्रयोजनत्वेन महर्षिणा प्रदर्शितः। स च नानाविधविप्रतिपत्तिकवलितत्वादव्यवस्थित इति प्रयोजनत्वमेव तस्य न सम्भ[1]वतीति तद्व्यवस्थापनार्थमपवर्गो विविच्यते। तत्र नित्यनिरतिशयसुखाभिव्यक्तिर्मोक्ष इति तौतातिताः। जीवस्य लिङ्गशरीरापगम इति भास्करीयाः। प्रकृतितद्विकारोपधानविलये पुरुषस्य स्वरूपेणावस्थानमिति सांख्याः। निरुपप्लवा चित्तसन्ततिरित्यन्ये। अग्रिमचित्तानुत्पादे पूर्वचित्तनिवृत्तिरित्यन्ये। आत्महानमित्येके[2]। दुःखप्रागभावपरिपालनमिति मीमांसकाः[3]। आत्यन्तिकी दुःखनिवृत्तिरिति गौतमीयाः। तत्र सर्वेषामनुपपन्नत्वाच्चरमपक्षो[4] न्याय्यः।

तथाहि—न तावदाद्यः, [5]तथाविधसुखे प्रमाणाभावात्। ननु "नित्यं विज्ञानमानन्दं ब्रह्मेति" श्रुतिरेवात्र प्रमाणम्[6]। न च नित्यसुखस्यासाध्यत्वादपुरुषार्थत्वमिति वाच्यम्। तदभिव्यक्तेरेव पुरुषार्थत्वात्। नन्वभिव्यक्तिरपि यदि नित्या तदा न पुरुषार्थः, [7]सिद्धत्वात्। अथानित्या तथा चोत्पन्नस्य भावस्य विनाशित्वनियमादभिव्यक्तेर्विनाशे मुक्तस्य संसारित्वप्रसङ्गः[8]। न हि तदनन्तरमभिव्यक्त्यन्तरमुत्पद्यते, तदुत्पादकस्य शरीरादेरभावात्। न च शरीरादिकमपि[9] तदा कल्पनीयम्, त्वया[10]ऽनभ्युपगमात्, अभ्युपगमे वा[11] तन्नियतदुःखाद्युत्पत्तिप्रसङ्गादिति। मैवम्। प्रमाणबलेनोत्पन्नस्यापि भावस्याविनाशित्वकल्पनात्। अन्यथोत्पन्नस्य प्रमेयस्य विनाशित्वदर्शनात्[12] प्रध्वंसस्यापि विनाशित्वं कल्पेत। तत्र प्रमाणबलेन भावमात्रे व्याप्तिसङ्कोच इति यदि तद्वत्रापि[13] प्रमाणबलात् तथाभूताभिव्यक्तिव्यतिरिक्ते भावे व्याप्तिः सङ्कोच्यताम्। [14]अभिव्यक्त्यन्तरोत्पादस्य[15] शरीरादिकं विना नानुपपत्तिः। तथाभूताऽभिव्यक्तौ शरीरादिव्यतिरेकस्य कारणत्वं, प्रमाणबलेन तथाकल्पनात्। अत एव तस्य

---

१. I. O. reads प्रयोजनत्वमपि न सम्भवति, $M_1$ omits तस्य। २. P reads (इ)त्यपरे। ३. P reads गुरुमततत्त्ववेदिनः। ४. P reads चरम एव पक्षः। ५. P adds तत्र। ६. I. O. reads मानं भवति, P reads मानम्। ७. $M_2$ reads स्वतः सिद्धत्वात्। ८. I. O. reads संसारित्वं प्रसज्येत। ९. P drops अपि। १०. $M_1$ reads तथा। ११. P reads तु। १२. $M_2$ reads विनाशित्वनियमात्। १३. $M_2$+Pn read तद्वदत्रापि। १४. I. O. adds किञ्च। १५. P reads (उ)त्पादे, $M_2$ reads (उ)त्पादेऽपि।

५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखस्य संसारिदशायां शरीरादिनैव प्रतिबन्धान्नाभिव्यक्तिः। तथा च न योग्यानुपलम्भबाधोऽपि ॥श्रीः॥

अत्रोच्यते। न तावदियं श्रुतिर्नित्यसुखे प्रमाणं, तथाहि लोकसिद्धेन सुखेनानया श्रुत्या ब्रह्माभेदो बोध्यते, सुखान्तरेण वा। न तावदाद्यः। लोकसुखस्य विनाशित्वेन ब्रह्माभेदे बाधात्। नेतरः। सुखान्तरं हि प्रमाणान्तरसिद्धं, श्रुतिसिद्धं वा। न तावदाद्यः। तथाविधसुखबोधकस्य प्रमाणान्तरस्याभावात्। न द्वितीयः। श्रुतेः सुखनित्यतांशेऽसामर्थ्यात्। न च नित्यत्वविशेषणबलात् प्रथमतस्तावन्नित्यं सुखं श्रुत्या बोध्यतेऽनन्तरं तेन सह ब्रह्माभेद इति वाच्यम्। तथा सति वाक्यभेदप्रसङ्गात्। न हि नित्यत्वविशेषणस्य सुखेनान्वयसम्भवः, अयोग्यत्वात्—किन्तु ब्रह्मणैव।

किञ्च सुखाभेदबोधनमपि ब्रह्मणोऽनुपपन्नमेव। तस्य सुख्यहमित्यनुभवेन तदाश्रयत्वेन विषयीक्रियमाणत्वात्। न च ब्रह्माभेदान्यथाऽनुपपत्त्या नित्यसुखसिद्धिरिति वाच्यम्। इतरेतराश्रयत्वप्रसङ्गात्। सिद्धे हि तथाविधे सुखे ब्रह्माभेदप्रतिपत्तिः, ब्रह्माभेदप्रतिपत्तौ च तथाविधसुखसिद्धिरिति। तस्माद्बाधिततया ग्रावप्लवनश्रुतिवदुपचरितार्थत्वमेव श्रुतेर्युक्तम्। एवम् "आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितम्" इत्यत्राप्यानन्दस्य ब्रह्मधर्मत्वेनैव प्रतीतेर्मोक्षपदेन जीवन्मुक्तिरेव विवक्षितेत्यन्यथासिद्धौ न सुखस्वरूपे तस्मिन् प्रमाणं श्रुतिः। प्रत्युत "दुःखेनात्यन्तं विमुक्तश्चरति" इत्यादिश्रुतिबलादेवात्यन्तिकदुःखविरहरूपत्वमेवापवर्गस्य प्रतीयते।

तथा च प्रमाणबलेन भावत्वपुरस्कारेण व्याप्तिसङ्कोच इति यदुक्तं तन्मन्दमेव। [10]ध्वंसे तु घटादिप्रतियोगिक एव तथात्वकल्पनात्। नादृष्टकल्पनापि दोषायेति संक्षेपः। द्वितीयस्यायमर्थः। लिङ्गशरीरस्य एकादशेन्द्रियपञ्चभूतरूपस्य जीवात्मन्यपगमो विश्लेषः। स एव परब्रह्मणि लय इत्युच्यते। अयमप्यनुपपन्नः। तथाभूतस्य पुरुषार्थत्वे प्रमाणाभावात्। दुःखहेतुविवक्षायामस्मत्सिद्धान्ताव्यतिरेकात्[10]। नापि तृतीयः। तथाविधप्रक्रियायां मानाभावात्। अन्यदर्शनाभ्युपेतपरत्वे चाविप्रतिपत्तेः। नापि [11]चतुर्थः। किमिदं

१. P reads सांसारिकदशायाम्, Pn + I. O. read संसारदशायाम्। २. P+$M_2$ read लोकसिद्धस्य सुखस्य। ३. P reads असिद्धत्वात्। ४. I. O. + $M_2$ read सुखस्य नित्यतांशे। ५. P drops एव। ६. P reads प्रतीति instead of प्रतिपत्ति। ७. P reads ग्रावाणः प्लवन्ते यजमानो वै प्रस्तर इति श्रुतिवत्। ८. P reads प्रतीतौ। ९. P reads विवक्ष्यते। १०-१०. $M_1$ has very corrupt reading for this portion। ११. I.O. reads तुरीयः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हि निरुपप्लवत्वं–दुःखविरहितत्वं[1] यदि तदा तावन्मात्रस्य पुरुषार्थत्वव्यवस्थितौ चित्तसन्ततेरकाम्यत्वेन तद्बहिर्भावात् । न च मुक्तिदशायां चित्तसन्ततेरवस्थानमपि सम्भवति । सम्भवे वा उत्पन्न[2]सन्तानस्य विनष्टत्वात् । अन्यस्यापि शारीरादिव्यतिरेकेणोत्पादासम्भवात् । न च मुक्तिदशायां तन्न[3] करणमिति वाच्यम् । तन्मात्रे तत्कारणत्वावधारणादिति ।

नापि पञ्चमः । पूर्वचित्त[4]निवृत्तेरयत्नसिद्धत्वेन तदर्थं प्रवृत्त्यनुपपत्तेः । अग्रिमचित्तानुत्पादस्य प्रागभावरूपतयाऽसाध्यत्वात् । ध्वंसस्यासम्भवात्[5] । न च[6] चित्तनिवृत्तेः कथमपि पुरुषार्थत्वम् । सुखदुःखाभावेतरत्वादिति । नापि षष्ठः । आत्महानस्या[7]नुद्देश्यत्वात् नित्यतयाऽशक्यत्वाच्चेति । नापि सप्तमः । प्रागभावस्य प्रतियोग्युत्पत्तिनियतत्वेन मोक्षानन्तरं दुःखोत्पत्तिप्रसङ्गात् । प्रतियोग्युत्पत्तेरावश्यकत्वेन तदुत्पादकनिवर्त्तनस्याशक्यत्वात् । न च दुःखहेतूच्छेद एव तत्प्रागभावपरिपालनमिति वाच्यम् । तन्मात्रस्यैव पुरुषार्थत्वेनैवान्यथोपपत्तौ[8] तस्यां दशायां प्रागभावानुवृत्तौ प्रमाणाभावात् ।

एतेन कस्यचित् प्रागभावस्य प्रतियोग्युत्पत्तिनियतत्वमपि त्यज्यतामिति निरस्तम् । अन्यथोपपत्तेर्दर्शितत्वात् । न च प्रागभाव एवोत्तरसमयसम्बन्धित्वेन साध्यत इति वाच्यम् । तदुत्तरसमयसम्बन्धो हि किं नवमद्रव्यसम्बन्धः तदुपाधिसम्बन्धो वा । सोऽपि[9] स्वरूपमेव[10] वा अतिरिक्तो वा । न तावदाद्यः । नवमद्रव्यस्वरूपसम्बन्धस्याकार्यत्वात् । प्रागभाववत् तस्यासाध्यत्वात् । न द्वितीयः । उपाधेरागन्तुकत्वेन[11] स्वकारणाधीनतयाऽयत्नसिद्धत्वात् । अतिरिक्तसम्बन्धस्यानङ्गीकारात् । अप्रामाणिकत्वाच्चेति । किं बहुना ? ।

नन्वात्यन्तिकी दुःखनिवृत्तिरित्यनुपपन्नम् । तथाहि दुःखनिवृत्तिरिति दुःखध्वंसो वा विवक्षितः । अभावान्तरं वा[12] । नाद्यः । उत्पन्नदुःख[13]ध्वंसस्याऽयत्नसिद्धत्वेन तदर्थं प्रवृत्त्यनुपपत्तेः । अनुत्पन्नप्रतियोगिकस्य दुःख[13]ध्वंसस्याशक्यत्वात् । प्रत्युत दुःखोत्पादार्थं प्रवृत्तिप्रसङ्गात् । न चैवं दृश्यते । नेतरः । अभावान्तरस्यासाध्यत्वेन पुरुषार्थत्वानुपपत्तेः । किं वा[14] दुःखनिवृत्ते-

---

१. P adds इति । २. I. O. reads उपपन्नसन्तानस्य । ३. $M_1$ reads तन्निराकरणम् । ४. P reads पूर्वं चित्त० । ५. P omits ध्वंसस्यासम्भवात् । ६. P reads न वाऽस्याः चित्त° । ७. $M_2$ adds here पुरुषार्थत्वेन । ८. P reads अन्यथोत्पत्तौ । ९. P reads सम्बन्धो हि स्व° । १०. $M_2$ reads स्वरूपसम्बन्ध एव वा । ११. P reads (आ)गन्तुकत्वेपि । १२. P adds विवक्षितम् here । १३. $M_1$+$M_2$ drop दुःख । १४. P reads किञ्च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रात्यन्तिकत्वं विवक्षितम् । समानाधिकरणदुःखासमानकालीनत्वमिति[1] चेत् न । एवंविधदुःखाभावे प्रमाणाभावात् । प्रत्युत दुःखध्वंसस्यैव समानाधिकरणदुःखसमानकालीननियतत्वेन[2] तत्र प्रमाणसद्भावात् । कथं वास्याः पुरुषार्थत्वम् । सुखस्यापि हानिव्यवस्थितौ[3] तुल्यायव्ययफलत्वेनानुद्देश्यत्वात् । न च जीवन्मुक्तिसमानकालीनसुखमुद्दिश्य[4] प्रवर्त्तते, परममुक्तेस्त्वन्यथा लाभ इति वाच्यम् । परममुक्तेरपुरुषार्थत्वप्रसङ्गात् । रागाभावेन सुखस्योद्देश्यत्वानभ्युपगमाच्च[5] ।

किं च परममुक्तित्वम् ? समानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वम्[6] इति चेन्न । सुखान्तमुक्तौ पूर्वमपि तथाविधदुःखध्वंसस्य जातत्वात् । भोगदशायां मुक्तत्वप्रसङ्गात् ।[7] न च दुःखान्तैव मुक्तिः, सुखमरणस्यापि श्रवणात् । नापि संस्काराजनकसाक्षात्कारविषयदुःखध्वंसत्वं सुखान्तमुक्तौ भोगदशायां मुक्तित्वप्रसङ्गात्[7] । मुक्तेरुद्देश्यतावच्छेदकजिज्ञासायामेवैतस्योपन्यासानर्हत्वात्[8] । न ह्यनेन मुक्तेरुद्देशतावच्छिद्यते । अत एव संस्काराजनकानुभवध्वंसत्वादृष्टनाशनाश्यदुःखध्वंसत्वे निरस्ते । अदृष्टनाशनाश्यत्वमपि दुःखस्यासिद्धमेव । दुःखस्य भोगैकनाश्यत्वात् । संशयस्य संस्काराजनकत्वेन संसारिदशायामपि मुक्तत्वप्रसङ्गादित्यप्याहुः । नाप्यजनकदुःखध्वंसत्वम्[9] । असिद्धत्वात् । लिङ्गत्वेनानुमितौ विषयीभूय योगिसाक्षात्कारे च जनकत्वस्य सम्भवात् । नापि सकलात्मविशेषगुणध्वंसत्वं सकलदुःखध्वंसत्वं वा ।[10] मिलितप्रतियोगिकध्वंसस्यासिद्धेः[11] । नापि दुःखध्वंसमात्रम् । प्रत्येकविवक्षायामतिव्याप्तेः । चरमदुःखध्वंसविवक्षायां[12] तु तस्यावश्योपजीव्यत्वेनान्येषां परित्यागात् । नाप्यदृष्टाभावहेतुकानुभवध्वंसत्वम् । अस्यापुरुषार्थत्वात् । न च प्रायणान्त्यानुभवध्वंसेऽतिव्याप्तिः । तस्याः संस्कारेणैव विनाशोपपत्तिरिति'[13] ।

१. I.O. reads ०कालीनदुःखध्वंसत्वम् । २. P reads ०नियतत्वे प्रमाणसद्भावात् । ३. P reads हानेरिति व्यवस्थितौ । ४. P reads जीवन्मुक्तिदशकसुखम् । ५. P reads सुखस्यानुद्देश्यत्वाभ्युपगमात् । ६. I. O. reads समानाधिकरणदुःखासत्त्वमिति । ७–७. This portion is missing in $M_1$ । ८. P+$M_1$ drop मुक्तत्व०, I. O. reads अतिप्रसङ्गात् । ९. $M_1$ adds here नापि द्वेषाजनकदुःखध्वंसः । तस्यासिद्धेः । १०. I. O. adds समुदायविवक्षायाम् । ११. P reads (अ)नुपपत्तेः । १२. P reads ध्वंसत्वविवक्षायाम् । १३. P+I. O. reads नाशोपपत्तेरिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोच्यते । दुःखान्तरध्वंसस्यायत्नसिद्धत्वेऽपि तथाविधदुःखध्वंसस्य प्रयाससाध्ययोगाभ्याससाध्यत्वात् । दुःखोत्पादनार्थप्रवृत्तिप्रसङ्गस्त्विष्ट एव । जीवन्मुक्तिदशायां तथा प्रमाणसिद्धत्वात् । किञ्च नोत्पन्नदुःखध्वंसार्थमनागतदुःखध्वंसार्थं[1] वा प्रवर्त्तते । किन्तु दुःखहेतुसंसारनाशाय । एतदेवाभिसन्धाय दुःखहेतौ दुःखत्वोपचारः, शास्त्रे हेतूच्छेदे[2] पुरुषव्यापारादित्याहुः ।

न च तत्रापि उत्पन्नानुत्पन्नविकल्पसम्भवेनायत्नसाध्यत्वमशक्यत्वं[3] वा शङ्कनीयम् । उत्पन्नस्यैव[4] दुःखहेतोरहिकण्टकादौ लोके परिहारस्य यत्नसाध्यत्वस्य दर्शनात् । न च यदि तेन हेतुना दुःखमवश्यं जनयितव्यम् तदा [5]परिहारानुपपत्तिः । न जनयितव्यं चेत् । किमर्थं परिहरणीयमिति वाच्यम् । कण्टकादिपरिहारेऽप्यस्य समानत्वात् । न चैवम्भूतदुःखध्वंसस्याप्रामाणिकत्वम् । देवदत्तदुःखत्वम् दुःखत्वमेव वा स्वाश्रयासमानकालीनध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्तिधर्मत्वात् प्रदीपसन्ततित्ववद् इत्यनुमानस्यागमस्य च विद्यमानत्वात् । तथाच न दुःखध्वंसत्वं समानाधिकरणदुःखसमानकालीनत्वव्याप्यम्[6] ।

न च तुल्यायव्ययत्वेना[7]पुरुषार्थत्वम् । अतिदुःखितस्य सुखेऽपि वैराग्यदर्शनेनैवंविधपुरुषार्थत्वस्य प्रमाणसिद्धत्वात् । न च सुखान्तमुक्तौ भोगदशायामपि मुक्तत्वप्रसङ्गो दोषाय । इष्टत्वात् । यथोक्तात्यन्तिक[8]दुःखध्वंसस्यैव मुक्तित्वात् । न च जीवन्मुक्तिपरममुक्त्योः व्यतिभेदका[9]नुपपत्तिः । योगजादृष्टजन्यतत्त्वसाक्षात्कारत्वस्य[10] समानाधिकरणविशेषगुणावच्छिन्नसवासनमिथ्याज्ञानध्वंसत्वस्य च यथासम्भवं जीवन्मुक्तिपरममुक्त्योर्लक्षणस्योहनीयत्वात् । उभयसाधारणं तु सवासनमिथ्याज्ञानध्वंसत्वं तत्त्वसाक्षात्कारप्रागभावविरहत्वम्[11] योगजधर्मप्रागभावविरहत्वमित्यादि स्वयमूहनीयम्[12] ।

प्राञ्चस्तु दुःखात्यन्ताभाव एव मुक्तिरात्यन्तिकी दुःखनिवृत्तिरित्यनेनैव तस्य विवक्षितत्वात् । न चैवम् असाध्यत्वेनापुरुषार्थत्वप्रसङ्गः । आका-

१. $M_1$ drops अनागतदुःखध्वंसार्थं । २ $M_2$ reads दुःखहेतूच्छेदे । ३. P reads अशक्यसाध्यत्वं । ४. P reads उत्पन्न एव दुःखहेतौ । ५. $M_2$ adds तत् । ६. $M_2$ reads व्याप्तम् । ७. P reads व्ययफलकत्वेन, I. O. reads फलत्वेन । ८. P reads यथोक्तोत्पन्नदुःख० । ९. P reads व्यतिरेकानु० । १०. P reads °कारवत्त्वस्य । ११. P reads विरहितत्वम् in both places । १२. $M_2$ reads स्वरूपमूह्यम् , I. O. drops स्वयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शादेरपि मुक्तत्वप्रसङ्गो दोषाय। उक्तदुःखध्वंसरूपस्य तत्सम्बन्धस्य साध्यत्वात् । न चावश्यकत्वेन स एव मुक्तिरिति[1] वाच्यं, 'दुखेनात्यन्तविमुक्तश्चरति' इति श्रुत्या मुक्तिदशायामात्मनो दुःखात्यन्ताभावस्य बोधनात् । न श्रुतावपि तथाविधध्वंस एवं विवक्षित इति वाच्यम् । अत्यन्तविमोचके[2]पदस्य अत्यन्ताभावे[3] व्युत्पन्नत्वात् । एवंविधध्वंस[4]परत्वे लक्षणाप्रसङ्गादि[5]त्याहुरिति सङ्क्षेपः[6] ॥ १० ॥

१. P reads मुक्तिपदार्थ इति । २. P reads अत्यन्तविमोकपदस्य । ३. P adds एव । ४. P reads एवंविधदुःखध्वंस० । ५. P reads प्रसङ्गः । ६. P reads इति मुक्तिवादः, I. O. reads इति दशमो वादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (११) सिद्धार्थप्रामाण्यवादः ।

सिद्धार्थस्यानुभावकताया अभावात् तत्र व्युत्पत्तिग्रहो नास्तीति केषाञ्चिन्मतम् । तत्र तेषामयमाशयः[1]—प्रयोजकवृद्धोदीरितवाक्यश्रवणानन्तरं प्रयोज्यवृद्धव्यवहारमाकलयन् तेन व्यवहारकारणीभूतं तदीयं ज्ञानमवगच्छन् तत्र चावापोद्वापक्रमेण तत्तत्पदानां कारणतामवधारयन् [2]तत्रैवार्थे वाच्यवाचकभावलक्षणं सम्बन्धमवधारयति तटस्थो व्युत्पित्सुः । सिद्धार्थस्य साध्यतोपरागविरहात् कथं तदधीनव्युत्पत्तिग्रहः । अनुभावकत्वे[3] वाऽऽकाङ्क्षादिवत् साध्यतोपरागस्यापि प्रयोजकत्वात् । तत्साध्यतोपरागपरा[4]द्वाक्यात् प्रवृत्तिलक्षणव्यवहारसंदर्शनात् । तेन च तत्प्रयोजकज्ञानोन्नयनात्, तत्र च[5] शब्दस्य तद्भावभावित्वेन[6] तत्कारणत्वावधारणात् व्युत्पद्यते बाल इति युक्तम् ।

न च पुत्रस्ते जात इति सिद्धार्थादपि हर्षप्रयुक्तमुखप्रसाददर्शनात् हर्षस्य ज्ञानसाध्यत्वात् तत्रापि शब्दस्यैव[7] हेतुत्वमिति वाच्यम् । हर्षहेतूनामानन्त्येन शब्दजन्यज्ञानसाध्यत्वासिद्धेः । न च सुरसमाम्रफलमिति[8] वाक्यश्रवणानन्तरं तत्र प्रवृत्तिदर्शनात् ततोऽनुभवकल्पने[9] व्युत्पत्तिग्रहसम्भव इति वाच्यम् । यतः साध्यार्थस्थले क्लृप्तसाध्यतोपरागस्य[10] प्रयोजकत्वव्यवस्थितौ तत्रापि तदध्याहृत्यैव[11] प्रवर्त्तेत इति युक्तम् । तदिदमुच्यते कार्यपराणामन्विते शक्तिरिति[12] ।

अत्रोच्यते । हर्षहेतूनामानन्त्यादित्यनेन ज्ञानव्यतिरेकेणैव तत्र हर्ष उत्पद्यत इति वाभिमतम्[13] प्रमाणान्तरोपजातज्ञानाद्वा । न तावदाद्यः । हर्षस्य सुखस्वरूपतया तस्य ज्ञानकारणकत्व[14]व्यवस्थितौ तदन्तरेण तदुत्पत्तेरसम्भवात् । अन्यथा प्रवृत्तेरपि ज्ञाननैरपेक्ष्यकल्पनाप्रसङ्गात् । न द्वितीयः । वाक्याद्न्यस्य प्रमाणस्य तत्र कल्पनीयत्वात् । वाक्यकारणत्वस्यैव युक्तत्वात् । अन्यथा गामानयेत्यादावपि प्रमाणान्तरजन्यज्ञानेनान्यथासिद्धिप्रसङ्गात् ।

१. I. O. reads इदमाकूतम् । २. P+I. O. read तत्र चार्थे । ३. P reads अनुभावकत्वेन । ४. P+I.O read साध्यतोपरक्तात् । ५. P drops च । ६. Pn read तद्भावभावितया । ७. $M_2$ drops एव । ८. P reads परिणतिसुरसम् । ९. $M_2$ reads (अ)नुभावकत्वकल्पने । १०. P reads क्लृप्तस्य साध्यतोपरागस्य । ११. $M_2$ reads तदेव साध्यमाहृत्य । १२. I.O. adds पूर्वपक्षः । १३. $M_2$ reads तवाभिमतम् । १४. P reads ज्ञानकारणत्व० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च सुरसमाम्रफलमित्यत्राध्याहृत्ये[1] प्रवर्त्तेत इति युक्तम् । अध्याहारे प्रमाणाभावात् । न च साध्यतोपरागस्य वाक्यार्थानुभावकतायां[2] प्रयोजकत्वम् । आकाङ्क्षादिमत्त्वेनैव तदुपपत्तावन्यस्य[3] गौरवकरत्वात् । न च सिद्धार्थादसंसर्गाग्रहेण व्यवहारोपपत्तिरिति वाच्यम् । बाधकाभावात् । अन्यथा वैपरीत्यस्य[4] वक्तुं सुकरत्वात् । न च प्रवृत्तिरूपव्यवहारस्यैव व्युत्पत्तौ प्रयोजकत्वम् । लाघवेन व्यवहारमात्रस्य तथात्वात् । सिद्धार्थात् व्युत्पत्तिविरहेऽप्यन्यत्र व्युत्पन्नस्य तस्मादनुभवे बाधकाभावात् । तस्मात् सिद्धार्थस्यानुभावकता नास्ति इति वदतो गुरोरपि लघुत्वमेवेति[5] ॥छ॥११॥

१. P+I.O. add एव । २. P reads साध्योपरागस्य वाक्यानुभावकल्पनायाम् । ३. $M_1$ तदुत्पादकोपपत्तावन्यस्य, $M_2$ reads तदुत्पत्तावन्यस्य । ४. P+$M_2$ add एव, I.O. adds अपि । ५ P adds इति सिद्धार्थवादः समाप्तः, I.O. इत्येकादशमो वादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१२) अन्वयशक्तिनिरासवादः ।

अन्विते शक्तिरित्यपि विचारणीयम् । तत्र परेषामयमाशयः । तत्तदर्थान्वयबोधजनकत्वं तावत्तत्पदकदम्बकस्येति सुप्रसिद्धम् । तत्रान्वयबोधजनकत्वं न तस्य नियामकं विना सम्भवति । नियामकत्वं च पदशक्तेर्वा तदर्थशक्तेर्वा । तत्र द्वितीये गौरवप्रसङ्गात् पदानामेवोपजीव्यत्वेनान्वयांशेपि शक्तिः स्वीक्रियताम् । तदिदमुच्यते ।

"प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि ।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम् ॥"

[ प्रकरणपञ्चिका, वाक्यार्थमातृका–प्रथमपरिच्छेद–११ ]

किं चान्वयस्याशक्यत्वे क्रियामात्राभिधाने कर्मविशेषजिज्ञासा कर्ममात्राभिधाने क्रियाविशेषजिज्ञासा च कथं स्यात् । न हि सामान्याप्रतीतौ विशेषजिज्ञासा सम्भवति । न चान्वयांशस्यापि शक्यत्वे यत्किंचित्पदेन अन्वयबोधोपपत्तौ पदान्तरवैफल्यमिति वाच्यम् । प्रतियोगिविशेषोपस्थितौ तदुपयोगादिति ।

अत्रोच्यते । घटादिपदानामितरान्विते शक्तिरानयनादिविशेषेतरान्विते वा । न तावदाद्यः । कारकक्रियासमभिव्याहृतवाक्यात् कारकान्विता क्रिया क्रियान्वितं कारकमिति प्रतिपत्तिप्रङ्गात्[1] । तथा च वाक्यभेदो विशेषाप्रतिपत्तिश्च स्यात् । आकाङ्क्षादिमत्समभिव्याहारविशेषाद् विशेषलाभ इति चेत् । तर्हि तस्मादन्वयलाभोपपत्तौ तत्र शक्तिकल्पनाया अन्याय्यत्वात् । तदिदमुच्यते[2] ।

"अन्वयस्यान्यतः प्राप्तेरन्यथाऽनुपपत्तितः ।
अनन्यलभ्यमात्रार्थशक्तान्येव पदानि नः ॥" [ ] इति

न द्वितीयः । वाक्यार्थस्य[3] घटमित्यनेनैव बोधितत्वात् आनयनादिपद[4]वैफल्यप्रसङ्गात् । न च विशेषजिज्ञासाऽन्यथाऽनुपपत्त्याऽन्वयशक्तिकल्पनं युक्तम् । अन्वयमात्रस्य व्याप्तिबलेन प्राप्तौ तद्विशेषजिज्ञासाया अन्यथैवोपपत्तेः । अन्यथा चक्षुःपरिदृष्टजम्बीरादौ रसविशेषजिज्ञासाबलेन रसमात्रं चक्षुर्ग्राह्यं स्यात् । न च पदानां पदार्थानाम् अन्वये शक्तिः । अन्वयस्य प्राधान्येन प्रतियोगिनश्च[5] उपसर्जनत्वेन प्रतीतिप्रसङ्गात् । न च तथा । किं त्वन्वयस्योपसर्जनतया प्रतियोगिनः प्रधानतया भानमिति सङ्क्षेपः ।।छ।। १२ ।।[6]

---

१. P+$M_2$ read प्रतिपत्तिः स्यात् । २. $M_1$ reads यदिदमुच्यते । ३. I. O. reads वाक्यार्थान्वयस्य, $M_2$ adds एव । ४. P reads पदप्रयोगवैफल्य०, I.O. reads आनयनादिप्रयोग० । ५. P+$M_1$ drop च । ६. P adds इति अन्वयशक्तिनिरासवादः, I. O. reads इति द्वादशो वादः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१३) वायुप्रत्यक्षतावादः ।

वायुः प्रत्यक्ष इत्येके । तेषामयमाशयः । त्वगिन्द्रियव्यापारानन्तरं वायुर्वातीति प्रतीतिः सकलजनसिद्धा[२] । नेयं स्पर्शादिलिङ्गजन्या व्याप्त्यादिप्रतिसन्धानविरहेऽपि[३] जायमानत्वात् । अन्यथा त्वगिन्द्रियव्यापारानन्तरं जायमानघटप्रतीतेः साक्षात्कारित्वे का प्रत्याशा । तत्रापि स्पर्शादिलिङ्गप्रभवत्वस्य वक्तुं सुकरत्वात् ।

ननु बहिरिन्द्रियजद्रव्यसाक्षात्कारविषयत्वावच्छेदकमुद्भूतरूपवत्त्वे सति महत्त्वं, तच्च वायौ नास्तीति कथं तत्प्रत्यक्षत्वम् । त्वगिन्द्रियव्यापारस्तु स्पर्शादिलिङ्गप्रतीतावेवान्यथासिद्धः । धूमप्रतीतौ[५] चक्षुर्वत् । व्याप्त्यादिप्रतिसन्धानविरहेऽपि जायमानत्वमसिद्धमिति । मैवम् । उद्भूतरूपवत्त्वे सति महत्त्वस्य बहिरिन्द्रियजद्रव्यसाक्षात्कारविषयत्वावच्छेदकत्वासिद्धेः[६] । उद्भूतस्पर्शवत्त्वे सति महत्त्वस्यैव हि तत्रावच्छेदकत्वम् । न चैवमूष्मादेः स्पर्शनत्वापत्तिर्दोषाय । इष्टापत्तेः । न चैवं[९] प्रभादेर्बहिरिन्द्रियजद्रव्यसाक्षात्कारविषयत्वानुपपत्तिः[१०] । तत्र तथाभूतसाक्षात्कारविषयत्वासिद्धेः । एवं हि तत्रापि वक्तुं शक्यते । चक्षुर्व्यापारो रूपादिलक्षणलिङ्गप्रतीतावेवाऽन्यथासिद्धः । प्रभादिप्रतीतिस्तु लिङ्गजन्यैवेति ।

किं [११]चैतदेव त्वं किमिति नाङ्गीकुरुषे यद्[१२] द्रव्यसाक्षात्कारविषयत्वमात्रावच्छेदकमेव उद्भूतरूपवत्त्वे सति महत्त्वम् । अलं बहिरिन्द्रियजत्व[१३]विशेषणग्रहणेन । एवं सत्यात्मा प्रत्यक्षो न स्यादिति चेत् । मा भवतु[१४] । सोऽपि ज्ञानादिनाऽनुमीयताम् । तस्मात् स्वीकुरु वायोः प्रत्यक्षत्वम् । परिहर वा आत्मनः प्रत्यक्षत्वमिति दुस्तरा प्रतिबन्दितरङ्गिणी । न च द्रव्यग्रहणयोग्यताव्यापकयोग्यतानां संख्यपरिमाणादीनां प्रत्यक्षताप्रसङ्गो बाधक इति वाच्यम् । करपुटधृतवायोः संख्यादीनां[१५] प्रत्यक्षत्वनेष्टापत्तेः ।

---

१. $M_1$ reads परेषाम् । २. P reads सकलजनानुभवसिद्धा, I.O. read ०जनप्रसिद्धा । ३ $M_1$ drops अपि । ४. $M_2$ drops ०प्रभव० । ५. P read धूमादिप्रतीतौ । ६. P+I.O.+$M_2$ read (अ)नुपपत्तेः । ७. $M_2$ reads प्रत्यक्षत्वापत्तिः ८. $M_2$ drops दोषाय । ९. P drops चैवम् । १०. P drops ०द्रव्य०, I.O reads साक्षात्कारत्वानुपपत्तिः । ११. P reads चैवमेव । १२ P drops यद् । १३ P+I.O. read बहिरिन्द्रियजन्यविशेषण० ।१४. P reads मा भूत् । १५. P reads संख्यापरिमाणादीनाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं तत्प्रत्यक्षतासाधकमनुमानमप्युच्यते । वायुः प्रत्यक्षः महत्त्वे सत्युद्भूतस्पर्शवत्त्वात् घटवत् । न चोष्मादिना व्यभिचारः । तत्र साध्यविरहस्यासिद्धेः । न च रूपवत्त्वमुपाधिः । रूपादावेव साध्याव्यापकत्वात् । न च द्रव्यत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकमिदमेवोपाधिः । आत्मनि साध्याव्यापकत्वादिति ।

अत्रोच्यते । बहिरिन्द्रियजद्रव्यसाक्षात्कारविषयता तावदवश्यं किञ्चिन्नियम्या अन्यथा द्रव्यमात्रस्य तथा[1]साक्षात्कारविषयतापत्तेः । न च यथा[2] द्रव्यसाक्षात्कारविषयतागुणसाक्षात्कारविषयतादीनां नानुगतं नियामकम्, तथाऽत्रापि क्वचिदुद्भूतरूपवत्त्वे सति महत्त्वं क्वचिदुद्भूतस्पर्शवत्त्वे सति महत्त्वमेव भविष्यति इति वाच्यम् । यतो [3]विनिगमनाविरहादुभयोरपि प्रयोजकत्वे [4]वायोः प्रत्यक्षता न सिध्यति योग्यानेकविशेषगुणवत्त्वं द्रव्यसाक्षात्कारमात्रे प्रयोजकमिति[4] कश्चित्[5] तच्चिन्त्यम् । किञ्चान्यत्रानुगतनियामकाभावात् तथात्वम्, अत्र पुनरनुगतस्य रूपविशेषवत्त्वे सति महत्त्वस्य द्रव्यचाक्षुषसाक्षात्कारे योग्यतावच्छेदकत्वमवश्यं स्वीकार्यम्[6] । तस्यैव च बहिरिन्द्रियजद्रव्यसाक्षात्कारयोग्यतावच्छेदकत्वसम्भवात्[7] कथं बाधकं विना तत्परित्यागः ।

यत् पुनरुक्तं त्वगिन्द्रियजद्रव्यसाक्षात्कारे यदेव योग्यतावच्छेदकं क्लृप्तम् तदेव बहिरिन्द्रियजद्रव्यसाक्षात्कारे उद्भूतस्पर्शवत्त्वे सति महत्त्वमेव नियामकमस्तु, प्रभादिप्रतीतिस्तु लिङ्गजन्यैव भविष्यतीति तदसङ्गतम् । तथाहि रूपविशेषात् प्रभाप्रतीतिसम्भवेऽपि [8]तद्धर्मसंयोगादिप्रतीतिरुन्मीलितनयनस्य[9] केन लिङ्गेन स्यात् । प्रभादीनामप्रत्यक्षत्वे तद्गतधर्मग्रहे न कोऽप्युपायः । न च संयोगादिगोचरतथाभूतसाक्षात्कारनियामकं रूपविशेषवत्त्वे सति महत्त्वम् आश्रयस्य[10] द्रव्यगोचरे तु तथाभूतसाक्षात्कारे स्पर्शवत्त्वे सति महत्त्वमेव नियामकमिति वाच्यम् । गौरवप्रसङ्गात् । तस्मादुद्भूतरूपवत्त्वे[11] सति महत्त्वमेव तस्मिन्[12] नियामकमिति कथं तद्रहितस्य वायोः प्रत्यक्षत्वसम्भावनापि ।

---

१. P drops तथा । २. $M_1$ drops यथा । ३. P reads अविनिगमनात् । ४–४. This portion is missing in $M_1$ । ५. P inserts प्रभायामव्याप्तेः । ६. P reads स्वीकर्त्तव्यम् । ७ I.O. reads बहिरिन्द्रियजन्यद्रव्यसाक्षात्कारे योग्यतावच्छेदकत्वस्य संभवः । ८. $M_1$ reads तद्वर्ण० instead of तद्धर्म० । ९. P+I.O. read ०नेत्रस्य । १०. $M_1$ misses आश्रयस्य । ११. P reads (उ)द्भूतस्पर्शवत्त्वे । १२. P+$M_2$ drop तस्मिन् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिबन्दितरङ्गिणीसन्तरणोपायस्तु प्रत्यभिज्ञानविशेषतरिरेवं[१]। तथा ह्यात्मनो ज्ञानादिलिङ्गानुमेयत्वे योऽहं चक्षुषा घटमद्राक्षं सोऽहन्त्वचा स्पृशामीति[२] प्रत्यभिज्ञानं केन लिङ्गेन स्यात्। न च वायोरतीन्द्रियत्वे य एव वातः प्राचीनः शीतः आसीत् स एवेदानीमुष्णो वातोति प्रत्यभिज्ञानं केन समाधेयमिति वाच्यम्। प्रत्यभिज्ञानस्य पूर्वदिक्प्रभवत्वाद्युपाधेरेवान्यथासिद्धेः। उपाधिग्रहव्यतिरेकेण तथाप्रत्यभिज्ञानस्यासिद्धेः। तस्मात्तत्तद्दिक्प्रभवत्वमेवैको धर्मः प्रत्यभिज्ञानेन विषयीक्रियत इति। अतो धर्म्यंश एव प्रत्यभिज्ञानं न स्यात् अन्यथासिद्धेः[३]। वायोस्त्वगिन्द्रियाग्राह्यत्वे शीतो वायुरिति त्वगिन्द्रियजो भ्रमः कथं स्यात्। विशेषयोग्यतामादायैवेन्द्रियाणां प्रवृत्तिरिति चेत् न[४], प्रमां प्रति विशेष्ययोग्यतापेक्षणात्। भ्रमस्य ज्ञानान्तरोपनीते विशेष्ये दर्शनात्। मानसोऽयं भ्रमं[५] इत्यन्ये। स्पर्शविशेष्यक इत्यपरे। एवं बाधात् प्रत्यक्षतासाधकानुमानमपि[६] नावतरति। वायुरतीन्द्रियः आत्मभिन्नत्वे सति नीरूपद्रव्यत्वात्। आकाशवदिति।[७] वायुः पृथिव्यादिभिन्नतया प्रत्यक्षो न सिध्येत्, तदा तद्भिन्नतया न सिध्येदेवेति चेत्। न। वायोः प्रत्यक्षत्वेऽपि इतरभेदांशे प्रत्यक्षस्योदासीनत्वादिति सङ्क्षेपः[८] ॥१३॥

---

१. I. O. reads तरीरेव। २. P reads (अ)भ्युपस्पृशामि। ३. P+$M_2$ read प्रत्यभिज्ञानस्यान्यथासिद्धिः। ४. P reads नैवम्। ५. P reads भ्रमः स्पर्शाविशेष्यक इत्येके। ६. P reads ०साधकमनुमानमपि। ७. P reads यदि वायुः। ८. P adds इति वायुप्रत्यक्षतावादः, I. O. reads इति वादस्त्रयोदशः।

# (१४) निर्विकल्पकवादः ।

निर्विकल्पके तावद्विप्रतिपत्तिः । ज्ञानत्वं निष्प्रकारकवृत्ति न वा । यद्वा ज्ञानत्वं निष्प्रकारकत्वसमानाधिकरणं न वा । एवं सति निर्विकल्पके प्रमाणमाहुः । जागराद्यसविकल्पकं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् । दण्डी पुरुष इति ज्ञानवदिति । अत्र पक्षधर्मताबलात् अप्रकारकं विशेषणविषयकं जागराद्यज्ञानाव्यवहितपूर्वसमयवर्त्तिज्ञानं[1] सिध्यति । सप्रकारकत्वे विशेषणान्यविषयत्वे च पक्षधर्मताविरोधात् । सप्रकारत्वे हि तदेव जागराद्यसविकल्पकं स्यात् । न तु पक्षीकृतं ज्ञानमिति पक्षतावच्छेदकधर्मविरोध इति ।

ननु सुषुप्तिप्राक्कालीनसविकल्पकेनैव विशेषणविषयकेण संस्कारद्वारासिद्धसाधनम् । संस्कारद्वाराऽपि विशेषणज्ञानस्य विशिष्टज्ञानजनकत्वं इष्टमेवं[2] । यथा व्यवहितस्यानुभवस्य स्मरणं प्रति । न च जागराद्यनुभवस्य पक्षत्वमनुभवस्य चाव्यवहितपूर्ववर्ति[3]विशेषणज्ञानजन्यत्वनियमान्न सिद्धसाधनमिति वाच्यम् । अप्रयोजकत्वात् । अनुभवत्वं वा जागराद्यज्ञानस्यासिद्धम्[4] । स्मरणमेव जागराद्यज्ञानं तच्च व्यवहितेनापि विशेषणज्ञानेन जन्यत इति [5]किमिति निर्विकल्पककल्पनम् ।

न च प्रत्यग्रोत्पन्नविशेषणविशिष्टघटसविकल्पकं पक्षीकृत्य निर्विकल्पकसाधनमिति युक्तम् । प्रत्यग्रोत्पन्नविशेषणं[6] रूपादिकमेव । तदपि च रूपत्वादिना पूर्वं सामान्यतो ज्ञातमेव[7] । ननु व्यवहारस्तावदयं सकलजानसाधारणः । यत् ममात्र सविकल्पकं न वृत्तं किन्तु निर्विकल्पकमेव । तथा चैतद्व्यवहारानुरोधेनावश्यं निर्विकल्पकं स्वीकर्तव्यमिति[8] । मैवम् । मम तत्र निर्विकल्पकं वृत्तमिति व्यवहारस्य संमुग्धसविकल्पकगोचरत्वात् । निर्विकल्पस्यातीन्द्रियत्वाऽभ्युपगमत्वाच्च । न च ज्ञानत्वं निष्प्रकारकत्वसमानाधिकरणं सकलज्ञाने[9]वृत्तित्वात् सत्तावदिति वाच्यम् । ज्ञानातिरिक्तवृत्तित्वस्योपाधित्वात्[10] ।

---

१. P reads जागराद्यसविकल्पकज्ञानाव्य०, $M_2$ reads ०पूर्ववर्त्ति० । २. P+I. O. read इष्टमेव । ३. P reads पूर्वसमयवर्त्ति० । ४. P adds एव here. । ५. P reads न, But Pn reads किमिति । ६. P+I. O. read प्रत्यग्रोत्पन्नमपि विशेषणम् । ७. I. O. reads सामान्यतो दृष्टमेव, P reads सामान्यतो ज्ञानमेव । ८. P reads (अ)वश्यं स्वीकरणीयम् । ९. $M_2$ reads सविकल्पकज्ञान० । १०. $M_2$ reads (उ)पाधेः सत्त्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्रयोजकत्वाच्च । न च चक्षुश्चाक्षुषसविकल्पकातिरिक्तज्ञानजनकम्, ज्ञानजनकत्वात्, घ्राणवदिति निर्विकल्पकसिद्धिरिति वाच्यम् । अतीन्द्रियतेजोभिन्नत्वस्योपाधित्वात् । एवंविधानुमानानामपि अतिप्रसक्ततया[1] उपेक्षणीयत्वाच्चेति पूर्वपक्षसङ्क्षेपः ।

अत्रोच्यते[2] । जागराद्यज्ञानं स्मरणरूपमनुभवरूपमेव वाऽस्तु । उभयथाऽपि निर्विकल्पकसिद्धिः । तथाहि । स्मरणपक्षे तज्जनकसंस्कारस्योद्बोधः सहकारी । स च ज्ञानरूप एवेति जागराद्यस्मरणाव्यवहितप्राक्कालीनं निर्विकल्पकमायातम् । अनुभवत्व[3]पक्षे तु सुषुप्तिप्राक्कालीनविशेषणज्ञानस्य संस्कारद्वारा जनकत्वेऽपि संस्कारोद्बोधरूपत्वेन[4] निर्विकल्पकमवश्यं वाच्यं, तथा च लाघवात् तदेव विशेषणविषयतया विशिष्टज्ञानजनकमङ्गीक्रियतामलं संस्कारद्वाराऽव्यवहितज्ञानस्य[5] जनकत्वकल्पनया । किञ्च विशिष्टानुभवत्वम् अव्यवहितविशेषणज्ञानजन्यतानियतमिति व्याप्तिरपि रक्षिता स्यात् ।

यद्वा प्रत्यग्रोत्पन्नविशेषणविशिष्टविषयकसविकल्पकं पक्षीकृत्य निर्विकल्पकसाधनं युक्तम् । न च सामान्यलक्षणया प्रत्यासत्त्या रूपादिसविकल्पकेनैव सिद्धसाधनमिति वाच्यम् । अनेन हि रूपवान् घट इति प्रतीतिः स्यात् । न त्वेतद्रूपवानिति । सविकल्पकरूपं हि विशेषणज्ञानं येन रूपेण विशेषणमुल्लिखति तेनैव रूपेण विशिष्टज्ञाने विशेषणस्य भानमिति नियमः । अन्यथा प्रमेयत्वेन रूपज्ञानाद्रूपवान् घटः इति प्रतीतिप्रसङ्गात् । न च निर्विकल्पकेऽप्येवं प्रसङ्ग इति वाच्यम् । तस्य तदर्थमेव कल्पनायां धर्मिग्राहकप्रमाणविरोधात् । एवं सामग्रीवशात् स्थानान्तरेऽपि[6] निर्विकल्पकमूहनीयमिति किमनुपपन्नम्[7] ? ।

ननु तथापि समवायाभावयोः कथं सविकल्पकैकवेद्यता[8] । तथाहि । रूपसमवायवान् घट इत्यादौ सविकल्पके समवायस्यापि विशेषणत्वात्, अघटं भूतलमित्यादौ अभावस्यापि विशेषणत्वात्, विशेषणज्ञानत्वेन च निर्विकल्पककल्पनात् । एवं विशेषणत्वाविशेषेऽपि रूपत्वादिकं निर्विकल्पकविषयो, न तु समवायाभावाविति न कश्चिन्नियामकम्[9] । वैपरीत्यस्यापि सुवचत्वात् ।

१. P reads अतिप्रसञ्जकतया । २. $M_2$ repeats the text beginning from अत्रोच्यते to सुवर्णपदेन किं पक्षत्वेन अभिमतम् । ३. P reads अनुभवपक्षे । ४. $M_1$ reads ०रूपजनकत्वेन । ५. $M_1$ reads (अ)व्यवहितज्ञानकल्पनया । ६. P reads तत्तत्स्थानविशेषेऽपि । ७. P reads न किञ्चिदनुपपन्नम् । ८. P+I.O. read ०वेद्यतानियमः । ९. P+$M_2$ read किं नियामकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च रूपसमवायवान्[1] घट इत्यत्र समवायो विशेषणम् , समवाये च रूपम् , तथा च रूपमेव[2] निर्विकल्पकेन विषयीक्रियते, अनन्तरं रूपविशेषणक[3]समवायविशेष्यकं सविकल्पकमनन्तरं रूपसमवायवान् घट इति प्रतीतिरित्येतावतैवोपपत्तौ समवायादेर्निर्विकल्पकविषयतया कल्पनायां[4] कल्पनागौरवम् इति वाच्यम् । एवं हि रूपमपि निर्विकल्पकविषयो न स्यात् । तत्रापि रूपत्वं विशेषणमेव,[5] तदेव निर्विकल्पकेन विषयीक्रियत इत्यस्यै[6] सुवचत्वात् । न च जातिभानं[7] व्यक्तिविषयतानियतमिति कृत्वा तत्र व्यक्तिर्भासत[8] इति वाच्यम् । एवं निर्विकल्पके समवायस्यापि भानप्रसङ्गात् । रूपज्ञानस्य समवायविषयतानियतत्वात् । न ह्येतादृशं ज्ञानं यत्र समवायो न भासते । एवं प्रयोगः—समवायाभावौ निर्विकल्पकविषयौ अस्मदादिसाक्षात्कारविषयत्वात् । रूपादिवत् । न तावदवच्छेदकग्रहध्रौव्यात् सविकल्पकैकवेद्यता [9]ज्ञानेच्छासंयोगादीनामपि सविकल्पकैकवेद्यताप्रसङ्गात् । अत्रापि विषयसंयोगिनोरवच्छेदकयोर्ग्रहध्रौव्यस्य विद्यमानत्वादिति ।

मैवम् । विशिष्टसाक्षात्कारान्यथानुपपत्त्या हि विशेषणज्ञानत्वेन निर्विकल्पककल्पनं, समवायाभावयोरन्यथोपपत्तिदर्शनात्[10] किमिति तद्विषयत्वमपि निर्विकल्पकस्य स्वीकर्त्तव्यम् । तथाहि । जात्यादिकं तावन्निर्विकल्पकेन विषयीक्रियते । अनन्तरं तद्विशेषितसमवायविशेष्यकज्ञानोदयः । अनन्तरं तेन समवायिविशेष्यकेन 'इदं[11] रूपम्' 'अयं घटः' 'रूपवान् घटः' इत्यादयः प्रत्यया जायन्ते । एवमभावेऽपि प्रथममभावविशेष्यक एव प्रत्ययो जायते अनन्तरं तेन तद्विशेषणकप्रत्ययो जन्यते इति । संयोगज्ञानादौ पुनरवच्छेदकग्रहध्रौव्येपि संयोगत्वज्ञानत्व[12]निर्विकल्पकविलम्बेन[13] तद्विशिष्टप्रत्ययविलम्बः । तथा च न तस्य सविकल्पकैकवेद्यता ।

अन्ये तु संयोगज्ञानादेरपि सविकल्पकैकवेद्यतैव । नच संयोगत्वादिनिर्विकल्पकापेक्षाविलम्बः[14] । यावद्विशेषणज्ञानस्य गौरवभयेन विशिष्टप्रत्यय-

१. $M_1$ reads रूपवान् instead of रूपसमवायवान् in all three places. २. P reads तथा चारूपमेव । ३. P drops रूपविशेषणक । ४. P reads ०विषयताकल्पनायाम् । ५. P drops एव । ६. P adds अपि here. ७. P reads जातिज्ञानम् । ८. P reads व्यक्तेर्भानम् । ९. P reads ज्ञानेच्छादीनामपि । १०. $M_1$ reads समवाये च, P reads समवाये चान्यथोपपत्तेर्दर्शितत्वात् । ११. $M_2$ reads समवायविशेष्यकप्रत्ययेन, I. O. reads समवायायविशेष्येन प्रत्ययेन । १२. I. O. adds ०इच्छात्व० here । १३. P reads निर्विकल्पके विलम्बेन । १४. P reads (अ)पेक्षया विलम्बः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जनकत्वानभ्युपगमादित्याहुः । अपरे "अथौर्व्ये सिद्धसाधनात्[1]" इत्यत्रैव भरं कुर्वाणाः[2] समवायादेरपि निर्विकल्पकविषयत्वमाहुः । अत एव निर्विकल्पकविषयत्वमेवार्थस्य लक्षणं स्वीचक्रिरे ।

ननु असङ्गतमेतत् । विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वे[3] प्रमाणाभावात् । तथाहि । दण्डी पुरुष इत्यत्र प्रथमं दण्डज्ञानमनन्तरं तद्विशिष्टपुरुषज्ञानमित्यत्र न किञ्चित् प्रमाणम् । न च कारणीभूतज्ञानविषयत्वे सति कार्यीभूतज्ञानविषयत्वं विशेषणत्वमिति वाच्यं, वैपरीत्यस्यापि सुवचत्वादिति । न चानुमितौ व्याप्यव्यापकत्वादिविशेषणज्ञानस्य जनकत्वदर्शनादन्यत्रापि विशिष्टभाने[4] विशेषणज्ञानस्य जनकत्वं कल्पनीयमिति वाच्यम् । तद् दृष्टान्तेनैव विशेष्यज्ञानस्यापि विशिष्टज्ञानजनकताकल्पनाप्रसङ्गात् । पर्वतादिकं हि पक्षीकृतमनुमितौ विशेष्यं तज्ज्ञानं च तत्र[5] जनकमेवेति ।

मैवम् । अगृहीतदण्डस्य हि दण्डी पुरुष इति प्रत्ययानुदयदर्शनेन अन्वयव्यतिरेकाभ्यामेव विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वावधारणादिति संक्षेपः[6] ॥१४॥

---

१. See न्यायकुसुमाञ्जलि, ३.२२ । २. P reads भरङ् कुर्वाण, and adds a question mark here '?' । ३. $M_2$ reads विशेषणज्ञानस्य विशिष्टज्ञानजनकत्वे । ४. P reads विशिष्टज्ञाने, Pn reads विशिष्टभाने । ५. P drops तत्र, I.O. reads तज्जनकमेव । ६. P reads इति निर्विकल्पकवादः, I. O. reads इति चतुर्दशो वादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१५) सुवर्णतैजसवादः ।

सुवर्णस्य तैजसत्वे किं मानम् । सुवर्णं तैजसम् , अत्यन्तानलसंयोगे सति अनुच्छिद्यमानरूपाधिकरणत्वात् सौरालोकवदित्यनुमानमत्रेति चेत्, न । सुवर्णपदेन किं[1] पक्षत्वेनाभिमतम्[2], अत्यन्तानलसंयोगे सति अनुच्छिद्यमानरूपाधिकरणमिति चेत् , न । तस्यापि सौरालोकादिव्यावृत्तस्यासिद्धेः । तत्र च सिद्धसाधनात् । उपष्टम्भकसाधारण्येन तत्र बाधात् । उपष्टम्भकसौरालोकादिव्यतिरिक्तपक्षतावच्छेदकस्याभावात्[3] ।

किं चाऽनुच्छिद्यमानरूपाधिकरणत्वं विवक्षितम् । अत्यन्तानलसंयोगाविनाश्यरूपाधिकरणत्वं वा, तस्मिन् सति अपरावर्त्तमानरूपाधिकरणत्वं वा । नाद्यः । स्वरूपासिद्धत्वात् । तथाहि । मूषानिक्षिप्तसुवर्णस्य[4] तथाविधानलसंयोगे सति स्वरूपमेव नानुवर्त्तते किं पुना रूपम् । न द्वितीयः । जलेन व्यभिचारात् । उपष्टम्भकाभिमते गतत्वाच्च । नैमित्तिकद्रवत्वाधिकरणत्वमिति हेतुरिति चेत् । न । अन्वयित्वे सहचाराभावात् । व्यतिरेकित्वे च घृतेन विरोधात् । तेजो वै घृतमित्यागमबलात् घृतं तैजसमेवेति न विरोधः–इति चेत् , न । तथा सति व्यतिरेकित्वाभात् तत्तैजसत्वस्य च निराकरिष्यमाणत्वात् । लाक्षादिना व्यभिचारस्य दुष्परिहरत्वात् । तथाविधानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वं हेतुरिति चेत् , न । तैजसत्वे साध्ये पूर्वदोषानतिवृत्तेः । अनेन हेतुना पृथिवीव्यतिरेकं जलादिव्यतिरेकं च शीतस्पर्शाद्यनधिकरणत्वेन प्रसाध्यैतदुभयभिन्नत्वे सति रूपवत्त्वात्तैजसत्वसाधनमिति चेत् , न । उपष्टम्भकेन व्यभिचारात् । पृथिवीत्वव्यतिरेकस्य[5] साधयितुमशक्यत्वात् । न च जलव्यतिरेकसाधनं युक्तं, हेतोरसिद्धत्वात् । योग्यानुपलब्ध्या शीतस्पर्शव्यतिरेकस्य[6] सिद्धिरिति यदि, तदानयैवोष्णस्पर्शादिव्यतिरेकसिद्धेः[7] को वारयिता । तथा च तैजसत्वमपि न स्यात् । नैमित्तिकद्रवत्वाधिकरणत्वान्न जलमिति चेत् , न । तत एव तेजोव्यतिरेकसिद्धिसम्भवात् । अन्ततः पृथिवीत्वमेवानेन साधयितुं शक्यते ।

---

१. P adds हि here । २. P reads अनुमतम् । ३. P reads उपष्टम्भकस्यैवालोकव्यतिरिक्तस्य पक्षता० । ४. P reads मूषानिक्षिप्तस्य सुवर्णस्य । ५. P reads पृथिवीव्यतिरेकस्य । ६. P reads व्यतिरेकसिद्धिः । ७. Pn+I O. read ०सिद्धि को वारयिता ।

वागीश्वरस्तु[1] सुवर्णमपार्थिवम्[2] तथाविधानलसंयोगे सति भस्मानारम्भकत्वादित्याह । तदपि तुच्छम् । घटेन व्यभिचारात् । द्रुतत्वेन[3] विशेषणीयमिति चेत्, न, लाक्षादिना व्यभिचारात् । न ह्येतेनात्यन्तानलसंयोगेन[4] भस्मारभ्यते, किन्तु तद्विनाशे सति द्व्यणुकादिप्रक्रमेण तत्र भस्मोत्पद्यते । अन्यथा भस्मनि जतुत्वोपपत्तेः[5] उपष्टम्भकेन तद्व्यभिचाराच्च ।

नन्वतिचिरानलसंयोगे पीतिमगुरुत्वविशिष्टमुपष्टम्भकाभिमतं पार्थिवं द्रवीभावेऽप्यभस्मीभूतमनुभूयते । अतस्तत्रापार्थिवं द्रवत्वाधिकरणं दाहप्रतिपक्षमनुमीयते[6] । क्षीरादेरतितरां क्वथ्यमानस्य जलनिक्षिप्तस्य[7] दाहप्रतिबन्धदर्शनात् । तथा च यदेवापरावर्त्तमानरूपं द्रवीभूतं[8] मूषोदरवर्त्ति प्रतीयते तदेवापार्थिवं कल्प्यताम् । पार्थिवत्वे च दाहप्रतिपक्षताविरोधात् । तच्च स्नेहादिविरहिततया जलं न भवति । वायुत्वादिकं तु तस्य रूपवत्त्वादेवानुपपन्नं, तथा च परिशेषादेव तस्य[9] तैजसत्वमिति ।

अस्तु तावदापातरम्यमेतत् । तथापि येन रूपेण दाहप्रतिबन्धकता दृष्टा तद् रूपं विशिष्टमेव कल्पयितुमुचितम् । सा च नापार्थिवत्वे सति द्रवत्वेन किन्तु जलत्वेनैव लाघवात् । जलत्वव्यवस्थापकबाधाद् बाध इति यदि ब्रूषे तदपि मन्दम्[10] । अभास्वरापाकजरूपस्य तद्व्यवस्थापकस्य प्रत्यक्षसिद्धत्वात् । किञ्च किमत्र तेजस्त्वव्यवस्थापकमुपलब्धवान्[11], येन तेजस्त्वं कल्पयितुमुद्यतोऽसि । व्यवस्थापकमपि कल्पनीयमिति चेत् । नूनमतिप्रज्ञोऽसि यस्त्वं क्लृप्तव्यवस्थापकं जलत्वं परिहरसि, कल्पनीयव्यवस्थापकं तेजस्त्वं न परिहरसि । अभास्वरत्वं सुवर्णरूपस्यासिद्धमिति चेत्, न । किं महान्धकारस्थेन सुवर्णेन घटादिकं प्रकाश्यत इत्यपि वक्तुमध्यवसितोऽसि । नैमित्तिकद्रवत्वं जलत्वबाधकमिति चेत्, न, तत् किमेतदेव[12] तत्तैजसत्वबाधकं येन लज्जामपहाय पुनः पुनरभिधत्से[13] । स्नेहशीतस्पर्शविरहात् जलत्वविरह इति चेत्, न । तयोरनुद्भूतत्वेनाप्युपपत्तेरिति ।

---

१. P reads गदिवागीश्वरस्तु । २. P reads सुवर्णं न पार्थिवम् । ३. P reads द्रवत्वेन, I.O. reads घटरहितत्वेन । ४. P reads (अ)नेन । ५. P reads जतुत्वापत्तेः । ६. $M_2$ reads दाहप्रतिपक्षभूतमनुमेयम्, P reads दाहप्रतिपक्षोऽनुमीयते । ७. P reads निक्षिप्तजलस्य । ८. P drops द्रवीभूतम् । ९. P reads अस्य । १०. $M_2$+P read तद्बाध इति चेत् न । ११. P adds भवान् here । १२. P adds a redundant न here. । १३. P reads एवमभिधत्से ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रोच्यते । यत् तावदुक्तम्–पृथिवीतरद्रवत्वाश्रयत्वेन न दाहविरोधित्वम्, किन्तु जलत्वेनैव लाघवात्, तदनुपपन्नम् । शिलातलसम्बद्धस्यापि जलस्य [1]दाहप्रतिपक्षत्वप्रसंगात् । तथापि प्रत्यक्षसांसिद्धिकद्रवत्वाश्रयत्वेनैव दाहप्रतिबन्धकत्वमास्तामिति चेत् । न । प्रकृतेऽपि सांसिद्धिकद्रवत्वाश्रयस्य[3] बाधात् । तर्हि जलव्यतिरिक्तस्य सांसिद्धिकद्रवत्वाश्रयस्य[4] दाहप्रतिपक्षत्वाभावात्, जलस्य च बाधात् दाहप्रतिपक्ष एव न सिध्येदिति चेत्, न । तथा सति उपष्टम्भकस्य[5] दाहप्रसङ्गात् । दाहप्रसङ्गभयेन करकावदुपष्टम्भकाभिमतपीतिमगुरुत्वाश्रयेण प्रतिबद्धसांसिद्धिक[6]द्रवत्वम् जलमेव तर्हि सिध्यतु । उपष्टम्भकस्यैव वा तथा स्वभावः कल्प्यताम् येन तथा पार्थिवत्वेऽपि न दाह इति चेत्, न । प्रथमे कल्पनागौरवात् । तथाहि । तैजसत्वपक्षे नैमित्तिकद्रवत्वम्, अनुद्भूतस्पर्शवत्त्वं, [7]परप्रकाशकताविरोध्युपष्टम्भकसम्बन्धश्चेति त्रयमेव कल्पनीयम् । जलत्वे अनुद्भूतस्पर्शवत्त्वम् अनुद्भूतस्नेहवत्त्वं सांसिद्धिकद्रवत्वग्रहविरोध्युपष्टम्भकसम्बन्धः[7] । उद्भूतरूपवत्त्वे सति जलस्यानुद्भूतस्पर्शवत्त्वम् अनुद्भूतस्नेहवत्त्वं चेत्याद्यूह्यम् । तैजसत्वे तु नादृष्टचरकल्पना उद्भूतरूपानुद्भूतस्पर्शवत्त्वस्य प्रभादेः क्लृप्तत्वात्[8] ।

'वह्नेरपत्यं प्रथमं हिरण्यम्' इत्यागमसंवादोऽपि तैजसत्वे, न चैवं 'तेजो वै घृतम्' इत्यागमवाक्यात् घृतस्यापि तैजसत्वप्रसङ्गः । अक्ताः शर्करा उपदधातीत्यत्र[9] अक्तत्वस्य द्रवद्रव्यमात्रसाध्यत्वात् द्रवद्रव्यमात्रेण अक्तत्वे प्रसक्तेरन्यद्रव्यव्यावृत्त्यर्थं सर्पिः स्तूयते तेजोवत् पवित्रं घृतं, न तु तैजसत्वे तात्पर्यं तद्व्यवस्थापकबाधेन प्रथमं बाधितत्वात् । बाधिते च विषये[10] श्रुतेस्तात्पर्यकल्पनायामप्रामाण्यप्रसङ्गात् ।

स्मृतौ माषकादिव्यवहारस्तु सुवर्णोपष्टम्भकगुरुत्वेनान्यथासिद्धः । भस्मानारम्भकत्वं तु यथा काचादिमूलपरमाणूनां भस्मद्व्यणुकारम्भकत्वम्, न तथैतन्मूलपरमाणूनां भस्मद्व्यणुकारम्भकत्वं विवक्षितम् । न च पार्थिवविशेष एव भस्मानारम्भकः[11] कल्पनीय इति द्वितीयपक्षो युक्तः । द्रवत्वा-

१.–१. This is missing in $M_1$ । २. I. O. reads दाहप्रतिपक्षत्वम् । ३. P reads ०द्रवत्वस्य । ४. P reads द्रवत्वानाश्रयस्य । ५. I.O. reads उपष्टम्भकानाम्, P omits this । ६. $M_1$ omits ०सांसिद्धिक० । ७-७. This is missing in $M_1$ । ८. P reads दृष्टत्वात् । ९. $M_2$ reads जुहोति । १०. P reads बाधितेऽर्थे । ११. P reads तथा instead of भस्मानारम्भकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धिकरणस्य पार्थिवस्य तथाऽनलसंयोगे सति भस्मारम्भकत्वनियमात् । तत्र च बाधकाभावेन सङ्कोचस्यान्याय्यत्वात् । पृथ्वीत्वनियतस्य[1] नैमित्तिकद्रवत्वाश्रयत्वस्य भस्मारम्भकत्वव्याप्यत्वावच्छेदकत्वाच्च पृथिवीत्वस्येव गन्धवत्त्वे[2] ।

किञ्च । पार्थिवत्वकल्पनायां रूपमपि अपरावर्तमानमनुपपन्नम्, रूपपरावृत्तौ पृथिवीत्वस्यैव तन्त्रत्वात् । ननु नैमित्तिकद्रवत्वस्य पृथिवीत्वनियतस्य कथमपृथिव्यामुत्पत्तिः । तथात्वे वा वाय्वादावप्युत्पत्तिप्रसङ्गः। रूपवत्त्वं नियामकमिति चेत् । तर्हि जले तदुत्पत्तिप्रसङ्गः । स्वाभाविकद्रवत्वविरहस्तथेति चेत् । तर्हि आलोकेऽपि तदुत्पत्तिप्रसङ्गः । आलोकादौ तदुत्पत्तिप्रयोजकाभावान्नोत्पद्यते इति चेत् । तदेव पृथिवीव्यतिरिक्ते[3] नास्तीति ब्रूमः । तथाच नैमित्तिकद्रवत्वमेव तैजसत्वबाधकमिति । मैवम् । न हि पृथिवीत्वमेव तावन्नैमित्तिकद्रवत्वसमवायिकारणतावच्छेदकं पृथिवीमात्रे तदुत्पत्तिप्रसङ्गात् । नापि घृतत्वादिकम्, परस्परव्यभिचारात् । तस्माद् दृष्टमेव मृदुत्वमदृष्टमेव वा तत्र नियामकं वक्तव्यम् । तच्च पृथिव्यामिवान्यत्रापि न दण्डवारितमिति न पृथिवीत्वव्याप्तनैमित्तिकद्रवत्वमिति[4] न सत्प्रतिपक्षत्वमपि ।

नन्वस्तु घृतत्वादिव्यापकः सामान्यविशेष एव नैमित्तिकद्रवत्वाश्रयतावच्छेदकः । न च तथाविधसामान्यमप्रामाणिकमिति वाच्यम् । नैमित्तिकद्रवत्वाश्रयत्वस्यैव तत्र तद्व्यवस्थापकत्वात् । गन्धाश्रयत्वस्येव[5] पृथिवीत्वे पृथिवीत्वावान्तरसामान्यस्य परमाणुषु असत्त्वात् तेषु नैमित्तिकद्रवत्वानुत्पत्तिप्रसङ्ग इति चेत् । नोत्पद्यताम्[6] । न हि परमाणुद्रवत्वेन पार्थिवे अवयविनि द्रवत्वमुत्पद्यत[7] इति क्वचित् सिद्धं वर्तते । तस्माद् द्व्यणुकादावेव नैमित्तिकद्रवत्वं वर्तते[8] । तथा च[9] घृतत्वादिव्यापकपृथिवीत्वव्याप्यसामान्यविशेष एव नियामक इति कथं न पृथिवीत्वेन व्याप्तिरिति । मैवम् । नैमित्तिकद्रवत्वं न तज्जातिव्यवस्थापकमत्यन्तायोगव्यवच्छेदेन यथा गन्धः पृथिवीत्वे ।

१. P+I.O. drop पृथिवीत्वनियतस्य । २. P reads पृथिवीत्वस्यैव and drops गन्धवत्त्वे । ३. P reads पृथिव्यादिव्यतिरिक्ते । ४. P reads पृथिवीत्वव्याप्यं नैमित्तिकद्रवत्वम् । ५. $M_1$ reads गन्धत्वस्यैव । ६. P reads मोत्पद्यताम् । ७. P reads (उ)त्पाद्यते । ८. P reads अस्ति । ९. P reads तत्र च ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च काचादिषु सर्वत्र नैमित्तिकद्रवत्वमुत्पद्यते । अद्रवाणामपि काचादीनां विनाशदर्शनात् । तथा च काचत्वादिनैव परापरभावानुपपत्तिभिया न नैमित्तिकद्रवत्वव्यवस्थापकजातिसिद्धिरिति । तस्माद्यथा द्रवत्वं पृथिव्यामेवेति न नियमः तथा नैमित्तिकद्रवत्वमपि । किन्तु मृदुत्वादिसहकारिसम्भवादन्यत्रापि न तदुत्पत्तिसम्भावना दण्डवारिता । न सत्प्रतिपक्षताऽपि । अस्य च परमाणावपि सम्भवात् तत्रापि नैमित्तिकद्रवत्वोत्पत्तिर्न विरुद्धेति सङ्क्षेपः । इति सुवर्णप्रकरणम् ।।छ।। १५ ।। श्री[1]

1. I. O. adds इति पंचदशो वादः, P reads इति सुवर्णतैजसवादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१६) योगरूढिवादः ।

पङ्कजादिपदानां योग एवेत्येके । रूढिरित्यपरे[१] । योगरूढिरिति गौतमीयाः । तत्र केवलयोगवादिनामिदमाकूतम् । किमर्थं समुदायशक्तिकल्पनम्[२] । पद्मत्वप्रतीत्यर्थं वा कुमुदाद्यप्रतीत्यर्थं वा । नाद्यः । संस्कारादेव तदुपस्थितेः । न च शाब्दी ह्याकाङ्क्षा शब्देनैव परिपूर्यत[३] इति न्यायेन प्रकारान्तरोपस्थितस्य न शाब्दानुभवेऽवभासः[४] । अन्यथा किं[५] पचतीत्युक्ते प्रत्यक्षोपस्थितं कलायमादाय कलायं पचतीत्यन्वयबोधप्रसङ्गात् । अत एव पिधेहीत्यत्र द्वारादिपदमध्याहृत्यान्वयबोधो नार्थमिति[६] स्वीकुर्वन्तीति वाच्यम् । पुरुषान्तरेण कलायमित्यभिधाने स्वयं वा स्मर्यमाणे समानत्वात् ।

न च तत्र तथातात्पर्याग्रहादन्वयानवबोधं[७] इति वाच्यं प्रत्यक्षोपस्थितेऽपि कलाये समानत्वात् । अत एव पिधेहीत्यत्रार्थाध्याहार एव युक्तो लाघवात्, पदाध्याहारेऽपि तदर्थान्वयं[८]तात्पर्यकत्वस्योपजीव्यत्वात् । अत एव शाब्देऽन्वयबोधे[९] सर्वेषां पदार्थानां पदोपस्थापितत्वं तन्त्रमिति न युक्तिमत् । गौरवप्रसङ्गात् । न च शक्तिं विना [१०]संस्कारादुपस्थितं शाब्दे बोधे नियमेन न भासत इति संप्राप्तम् । आकाशपदादशक्यस्यैं संस्कारादुपस्थितस्याकाशत्वस्याकाशं द्रव्यमिति शाब्दे बोधेऽन्वयभानाङ्गीकारात् । अन्यथा आकाशादिपदान्निर्विकल्पकोदयप्रसङ्गात् । नापि द्वितीयः । तत्राशक्तेरेव तदप्रतिपत्तेः । न हि घटपदादावपि पटाद्यप्रतीत्यर्थं शक्तिकल्पनम् । न च योगस्य कुमुदादिसाधारणत्वात् तत्रापि प्रयोगप्रसङ्ग इति वाच्यम् । योगपुरस्कारेणेष्टत्वात् । न हि पङ्कजं शैवालमानय, पङ्कजं कुमुदमानयेति प्रयोगं कश्चिदपि बाध्यतया व्यवहरति । अस्तु वा अवयवशक्तावेव पद्मत्वमशक्यमेव प्रयोगोपाधिः । यथाहि हतिहरिपदे पशुत्वं यथा वा धेनुपदे गोत्वं शक्त्युपाधिः । तत्र समुदायशक्तेरिव पद्मत्वस्मरणस्य वा कुमुदादिषु प्रयोगप्रति-

---

१. P drops रूढिरित्यपरे. शेषानन्त explains अपरे as भाट्टाः । २. P reads समुदायकल्पना । ३. $M_2$+P read शाम्यति । ४. P reads शाब्देऽनुभवेऽनवभासः । ५. P+1. O. drop किं । ६. P reads (अ)ध्याहार्यान्वयबोधो नार्थमिति । ७. P reads तात्पर्यग्रहादन्वयबोधः । ८. Pn reads पदार्थान्वय० । ९. P reads (अ)नुभवे । १०–१० $M_1$ misses this portion ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बन्धकत्वम् पङ्कपदोत्तरजशब्दस्यैव[1] वा । न च पङ्कपदोत्तरजशब्देनैव[2] प्रतिबन्धात् पद्मत्वोपस्थितिस्तत्रापि[3] न स्यादिति वाच्यम् । कार्यदर्शनेन कुमुदादावेव प्रतिबन्धकत्वकल्पनात् । एवमप्युपपत्तौ शक्तिकल्पने गौरवात्[4] । अवयवशक्तावेव वा कौञ्यं[5] कल्प्यताम् । न च घटपटादावपि घटत्वादेः प्रयोगोपाधित्वप्रसक्तौ प्रकारे क्वचिदपि शक्तिर्न स्यादिति वाच्यम् । घटपदा[6]न्निर्विकल्पकोदयप्रसङ्गात् ।

ननु घटमानयेत्युत्तमवृद्धवाक्यात्[7] प्रयोज्यप्रवृत्तिमुपलभमानो बालस्तस्य घटकर्मकानयनानुभवमनुमिनोति । तत्र चावापोद्वापक्रमेण घटत्वप्रकारकघटान्वयानुभवजनकत्वं घटपदस्यावधारयति । एवमानयपदेऽपि । तथा पङ्कजमानयेति वृद्धवाक्यादपि[8] प्रयोज्यवृद्धस्य पद्मे प्रवृत्त्युपलम्भात् पद्मत्वप्रकारकपद्मान्वयबोधजनकत्वं पङ्कजपदस्यावधारयति । न च तत्प्रकारकपद्मान्वयानु[9]भवजनकत्वात् तत्प्रकारकतया वा तत्स्मरणजनकत्वादन्यत्पदस्य शक्तत्वं नामेति । मैवम् । न हि यद्विषयानुभवो येन पदेन जन्यते तत्र तस्यावश्यं शक्तिकल्पनं, संसर्गांशेऽपि शक्तिकल्पनप्रसङ्गात् । न चान्विताऽभिधानवादिनोऽत्रेष्टापत्तिः । अनन्यलभ्यशब्दार्थस्य व्यवस्थाप्यत्वात् ।

न च तत्प्रकारकतद्विषयकानुभवजनकत्वम् एवम्भूतस्मरणजनकत्वं वा शक्तत्वं गङ्गापदादेस्तीरत्वादिप्रकारकतीराद्यनुभवे[10]जनकत्वेन तत्र शक्तिप्रसक्तौ लक्षणामात्रोच्छेदप्रसङ्गात् । तत्प्रकारके[11]तद्विषयकज्ञानजनकत्वाप्रतिसन्धानेऽपि देवदत्तादिपदादसौ बोद्धव्यः इत्यभिप्रायप्रतिसन्धानादप्यर्थोपस्थितेर्दर्शनात् । सर्वत्र तु तत्तदर्थविशेषेऽभिप्रायविशेषविषयत्वमेव वाचकत्वं[12] तत्तत्पदानां शक्तत्वम् । न च पदानुपस्थितस्यापि शाब्दसंसर्गावगमविषयत्वे लक्षणोच्छेद[13] इति वाच्यम् । प्रकारस्यान्यथोपस्थितस्यापि भानाङ्गीकारात् ।

१. P reads ०जपदस्यैव । २. P+I.O. drop पङ्कपदोत्तरजशब्देनैव । ३. P reads अपि तदा न स्यात् । ४. P reads गौरवप्रसङ्गात् । ५. P reads कौब्यं, शेषानन्त explains कौब्यं संकोचः । ६. P reads घटपदादेः । ७. P+$M_2$ यथा घटमानयेति वृद्धवाक्यात् । ८. P reads वाक्यादपि । ९. P+I.O. read तत्प्रकारकतदन्वय० । १०. P reads तीरादिविषयक० । ११. P misses तत्प्रकारक० १२. P drops वाचकत्वं । १३. P+I. O. read (उ,च्छेदप्रसङ्गः ।

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

कथमन्यथा जलाहरणप्रस्तावे घटमानयेत्युक्ते[1] छिद्रेतरघटत्वेनान्वयबोधः। छिद्रेतरत्वस्याशक्यत्वात्। न चात्र लक्षणा युगपद्वृत्तिद्वयविरोधात्। न चाजहत्स्वार्था सा शक्याशक्योपग्राहकस्य रूपस्यानुपस्थितेः[2]।

न च शब्दसम्बन्धमनपेक्ष्य संस्कारमात्रोपस्थितस्य पङ्कजमानयेत्यत्रान्वये पद्मत्वव्यापकानां द्रव्यत्वादीनामन्वयः स्यादिति वाच्यम्। शब्दसम्बन्धोपगमेऽपि संस्कारप्राकट्यस्यावश्योपजीव्यत्वात् तदेवास्तु नियामकम्, कृतं शब्दसम्बन्धकल्पनया। न च गङ्गायां घोष इत्यत्रापि संस्कारादेव तीरविशेषप्रतीत्युपपत्तौ न वृत्त्यन्तरकल्पना ज्यायसीति वाच्यम्। गङ्गापदोपादानवैयर्थ्यात्। अशक्यतात्पर्यकत्वस्यैव तत्त्वात्[3]। तस्य च पुरुषेच्छाधीनस्याशक्यनियमत्वात्[4] यद्वा पङ्कजादीनां सामान्यशब्दानां तत्र तत्र विशेषे[5] तात्पर्यसहायानामेव विशेषबोधकत्वमस्तु कृतं समुदायशक्तिकल्पनया[6]। कथमन्यथा कदाचिद् कुमुदेऽपि प्रयोगो लक्षणयेति तवँ[7], मम तु मुख्यतयेति महान् विशेषः[8]।

अत्रोच्यते। पङ्कजमानयेति वाक्यश्रवणानन्तरं पद्मानयनं कुर्वतः प्रयोज्यस्य[9] पद्मानयनानुभवो निश्चीयते। तत्र संस्कारमात्रवशात् पद्मत्वभाने नियमतः कल्प्यमानेऽव्युत्पन्नस्यापि तथाभानप्रसक्तौ किं नियामकमध्यवसितमायुष्मता। दृश्यते चात्र व्युत्पत्तिग्रहापेक्षा। कथमन्यथा प्रत्येकं व्युत्पन्नस्य पुंसः पङ्कजमानयेति श्रुतवतोऽपि न पद्मानयनानुभवो यथा समुदाये व्युत्पन्नस्य[10]। कथमन्यथा पद्मादिपदेन पङ्कजपदस्य पर्यायताकीर्त्तनं कोशकाराणां प्रत्येकाव्युत्पन्नस्य वा कथं पङ्कजपदात्[11] पद्मत्वप्रतीतिः। न चान्वयप्रतियोगिप्रतियोगितावच्छेदकयोः शब्दानुपस्थितयोः संस्कारप्राबल्यात् शब्दानुभवविषयभावो नियमेन युज्यते। घटविषय[12]प्रबलसंस्कारवशादासादितघटस्मरणस्य घटाव्युत्पन्नस्य घटमानयेति वाक्यश्रवणानन्तरं घटानयनबुद्धिप्रसङ्गात्। न चाकाशादिप्रतिबन्दिग्रहो युक्तः, नियमेन तत्र शब्दसमवायित्वस्यास्फुरणात्[13]। तत्र हि कदाचिदष्टद्रव्य-

१. P reads इत्यत्र। २. $M_1$ reads एकरूपस्य। ३. $M_2$ reads तथात्वात्। ४. I. O. reads ०नियमनत्वात्। ५. P drops विशेषे। ६. P drops ०शक्ति०। ७. P+I. O. read चेत्। ८. I. O. adds इति पूर्वपक्षसंक्षेपः। ९. P reads प्रयोज्यवृद्धस्य। १०. P reads समुदायव्युत्पन्नस्य। ११. P+I. O. read ०शब्दात् १२. $M_2$+P read घटगोचर०। १३. P reads शब्दसमवायिकारणत्वस्य स्मरणात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]भिन्नत्वं कदाचिच्छब्दसमवायित्वं संस्कारवशाद् भासते, अत्र तु व्युत्पन्नस्य पद्मत्वं नियमेन भासत इति महान् विशेषः ।

शक्तिरेव तत्रापीति केचित् । न च पशुत्वगोत्वयोः प्रयोगोपाधित्वं शक्त्युपाधित्वं वा । घटपटादिपदे[2] घटत्वादेरपि तथाभावप्रसङ्गात् । न च तत्र तत्पदात्[3] निर्विकल्पकोदयभिया तथा नाङ्गीक्रियत इति वाच्यम्, उपाधिभूतेन घटपटत्वादिना[4] संस्कारोपस्थितेन प्रकारेण निर्विकल्पकोदयनिरासस्य शक्यभाषणत्वात् । तस्मात् परिभाषैवैषा प्रयोगोपाधिः शक्त्युपाधिर्वेति । न च कुमुदादौ प्रयोगवारणार्थं पद्मत्वस्मरणस्य प्रतिबन्धकत्वं पङ्कोत्तरजपदस्य वा शक्तिकौच्यं वा कल्प्यताम्[5] । अव्युत्पन्नस्य पङ्कजपदात् पङ्कजनिकर्तृत्वेन रूपेण कुमुदादिबोधदर्शनात् । अत एवाव्युत्पन्नः पङ्कजमानयेति वाक्यश्रवणानन्तरं कुमुदानयने दोलायते ।

न च सामान्यशब्दत्वादमीषां विशेषतात्पर्यवशाद् विशेषबोधजनकत्वमिति वाच्यं, वस्तुगत्या यो विशेषस्तद्बोधकत्वं[7] वा विशेषप्रकारेण वा । नाद्यः । पद्मत्वाननुभवापातात्[8] । नेतरः । स हि विशेषः शक्तिगोचरो न वा । नाद्यः । विवादपर्यवसानात् । नेतरः । लक्षणापातात् । न चात्रेष्टापत्तिः । मुख्यार्थविशेषितस्यैव पद्मत्वस्य भानात् ।

वाक्ये न लक्षणेत्यप्याहुः । तात्पर्याप्रतिसन्धानेऽपि पङ्कजमानयेति[9] वाक्यार्थबोधात् पद्मानयनबोधावधारणाच्च । अन्यथा घटपटादिशब्दानामपि सामान्यशब्दत्वमेवास्तु । तत्तद्विशेषतात्पर्यवशात् तत्तद्विशेषबोध उत्पत्स्यत इति ब्रुवाणं को वा वारयिता[10] स्यात् । न च पङ्कजं कुमुदमानयेत्यत्र पङ्कजपदे लक्षणा, किन्तु पद्मत्वमुपस्थितमप्यन्वयायोग्यतया नान्वेति । अवयवार्थ एव परमन्वेतीति न किञ्चिदनुपपन्नम् ।

यत्तूक्तम् प्रत्यक्षोपस्थितेनापि कलायेन तात्पर्यग्रहं सहकारिणमासाद्य कलायं पचतीत्यत्राऽन्वयबोध इति तत् तदा शोभेत यदि तात्पर्यग्रहस्य

१. P reads दृष्टद्रव्याभिन्नत्वं । २. P reads घटादिपदे । ३. $M_1$, $M_2$ drop तत्र तत्पदात्, P reads तस्मात् । ४. Pn+$M_1$ read घटत्वादिना । ५. Pn+I. O. read कौट्यं वा कल्पनीयम् । ६. P adds विशेषबोधकत्वं । ७. P reads ०वाचकत्वं । ८. P reads पद्मत्वानुभवापातात् । ९. I. O. adds वाक्यश्रवणानन्तरं । १०. I. O. reads निवारयिता ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाक्यार्थप्रतिपत्तावङ्गत्वमीक्षामहे । तदेव तु नास्ति प्रमाणाभावात् । प्रत्युत तात्पर्यमस्य न ज्ञायते अस्माद्वाक्यादयमर्थस्तावदवगम्यत एवेति[1] विचिन्त्य परावृत्त्य कुत्राऽस्य तात्पर्यमिति पृच्छति प्रयोज्यवृद्ध इति । न च लक्षणास्थले तात्पर्यग्रहस्य कारणत्वावधारणात् अन्यत्रापि तत्कारणत्वकल्पनमिति[2] वाच्यम् । तत्र हि पदार्थोपस्थित्यनुकूलत्वं तात्पर्यज्ञानस्य तावता विना तत्र पदार्थोपस्थितिरेव न भवति, न तु वाक्यार्थप्रतिपत्त्यनुकूलत्वम् । अत एव तत्र तात्पर्यं[3] पदार्थमात्रे न तु वाक्यार्थे । तथा च पुरुषान्तरोदीरितकलायपदेन स्वयं स्मृतेन वा पचतीत्यस्य समभिव्याहारप्रतिसन्धाने भवत्येव शाब्दबोधः[4] । यथा हि नानापुरुषेण खण्डशः क्रियमाणे[5] श्लोके इति युक्तमुत्पश्यामः ।

किञ्च द्वारं पिधेहीत्यत्र शब्दद्वारान्वयबोधस्य[6] तदुपस्थापकपदजन्यत्वदर्शनादन्यत्रापि तथा कल्प्यते लाघवात् । अपि च । विभक्तिविशेषसमभिव्याहारविशेषमासाद्यैव परं पदानामनुभावकत्वम् । तथैवाकांक्षादिदर्शनात् अन्यथा गामानयेत्यत्रैव गौः कर्मत्वमानयनं कृतिरित्यत्राप्यन्वयबोधप्रसङ्गात् । एवं सर्वपदार्थानामेव पदोपस्थापितत्वं तन्त्रम्[7]। प्रमाणवतो गौरवस्यापि न्याय्यत्वादिति न्यायात् । यद्वा पदोपस्थापितपदार्थत्वमेव तन्त्रम् । न तु सर्वत्वं तन्त्रं, किन्तु सङ्कोचकाभावात् पदार्थमात्रमादायैव विश्राम्यतीत्यलमतिपीडया । तस्मात् पदाध्याहार एव युक्तो नार्थाध्याहार इति ।

तस्मात् पङ्कजशब्दः पद्मत्वे शक्तः वृत्त्यन्तरविरहे सति व्युत्पन्नं प्रति नियमतः पद्मत्वावच्छिन्नप्रतियोगिकान्वयबोधजनकशब्दत्वात् । पद्मशब्दवदिति । गृहविवादस्तु पङ्कजमानयेत्यत्र पङ्कजशब्देन वाक्यार्थज्ञानानुकूलं कीदृक् पदार्थज्ञानं जन्यते । पद्मः[8] पङ्कजनिकर्तेत्याकारमिति चेत् । एतत् किम् अनुभवरूपं स्मरणरूपं वा । नाद्यः । सामग्रीविरोधात् । पङ्कजनि[9]कर्तृत्वांशे ह्यनुभवसामग्री पद्मत्वांशे स्मरणसामग्री, ते च मिलित्वा कथं

१. P reads तावद् गम्यत इति । २. P reads तत्कारणत्वमिति । ३. $M_1$ reads पदार्थमात्रप्रत्यये । ४. P+$M_2$, I. O. read अन्वयबोधः । ५. I. O. reads पठ्यमाने । ६. P reads शब्दादन्वयबोधस्य । ७. P adds इति युक्तिमत् । ८. The masculine gender in पद्मः is explained in a marginal note of $M_2$ as अर्द्धर्चादिपाठात् पुंस्त्वम् , शेषानन्त supports the same । ९. P adds तथाहि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कार्यं जनयेताम् । न द्वितीयः । प्रत्येकसमुदायसङ्केतप्रतिसन्धानजस्मरणानामेकदाऽसत्त्वात् । न चैकमेव पङ्कजनिकर्तृत्वपद्मत्वानां स्मरणं तत्र कार्यदर्शनात् कल्प्यत इति युक्तम् । एवमपि हि पङ्कजनिकर्तृपद्मानयनान्वयः[1] प्रत्येकं स्यात् । न तु विशिष्टवैशिष्ट्येन ।

किञ्च प्रत्येकान्वये वाक्यभेदप्रसङ्गः केन वारणीयः । कथं वा न गवादिपदेऽपि योगरूढिः । को हि गमेर्डो सप्तम्यां जनेर्ड इत्यनयोर्विशेषो येनैकत्र रूढिमात्रमपरत्र योगरूढिरिति ।

अत्राभिधीयते[2] । पङ्कजमानयेति वाक्यात् तावत् पङ्कजनिकर्त्तारं पद्ममानयेति प्रतीतिर्जायत इत्यनुभवसिद्धम् । तत्र पङ्कजपदेन प्रत्येकसमुदायशक्तिप्रतिसन्धानसहकारिवशान्मिलितगोचरमेकमेव स्मरणं जन्यते तत्रासत्तिवशेन[3] पङ्कपदार्थस्याधारत्वेन जनिपदार्थस्याधेयत्वेन तत्क्रियाकर्तृत्वेन प्रत्ययार्थस्यान्तरङ्गतया[4] पद्मत्वस्य[5] द्वितयविशिष्टे आनयनस्यैकदैवान्वयः प्रतीयते, न तु पद्मत्वविशिष्टे पङ्कजनिकर्तृत्वं तद्विशिष्टे चानयनमिति प्रतीतिः । यद्वा पङ्कजनिकर्तृत्वानां प्रत्येकपदोपस्थितानां[6] प्रथमतस्तावदन्वयबोधस्तदनन्तरं तेन समं पद्मत्वस्यानन्तरमानयनेनान्वय इत्याद्यूह्यम् ।

न च पङ्कजपदस्यैकत्वात् कथमेकस्यैवान्वयबोधकत्वमिति वाच्यम् । समुदायापेक्षया हि[8] पङ्कजशब्दस्य पदत्वमवयवापेक्षया तु[8] वाक्यत्वमेव । न च गवादिपदेऽपि योगरूढिः । डोप्रत्ययशक्त्यवधारकन्यायाभावात्[9] । गमेर्डोः इति वचनं यथाकथञ्चिद्व्युत्पत्तिपरं न तु धेन्वादिपदेऽप्येवं स्यात्[10] । जानुदानुभानुशब्दादावावापोद्वापक्रमेण शक्तेः कल्पनात् । यत्र योगार्थान्वितरूढ्यर्थावबोधस्तत्र सर्वत्र योगरूढिरित्येवंपरत्वाद्वा नन्वस्तु रूढिरेव, न, योगार्थानन्वयप्रसङ्गात् । यौगिकार्थबुद्धिरूपसहकारिलाभाद्विशिष्टार्थोपस्थापकत्वं रूढेः योगरूढत्वम्, न तु योगार्थेऽपि समुदाये [11]शक्तिरिति सर्वमवदातम् ॥छ॥ १६॥[12]

१. P reads ०कर्तृत्वपद्मानामानयनान्वयः । २. P reads अत्र ब्रूमः । ३. P reads (आ)कांक्षादिवशेन । ४. P+I. O. read तत्रैवान्तरंगतया । ५. P reads एतद्द्वितय० । ६. P misses प्रत्येकपदोपस्थितानाम् । ७. P+$M_2$ drop एकस्यैव । ८. P drops हि ond तु । ९. P+I. O. read डोप्रत्ययस्य । १०. P reads ननु धेन्वादिपदेऽप्येवं स्यात् । न स्यात् । ११. P+I. O. read समुदायशक्तिः । १२. I. O. reads इति षोडशो वादः, P reads इति योगरूढिवादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१७) लिङ्गपरामर्शवादः ।

इहानुमितौ लिङ्गस्य पक्षधर्मताप्रकारकं ज्ञानं कारणमित्युभयवादिसिद्धम् । तस्य ज्ञानस्य व्याप्तिप्रकारकत्वेनानुमितिकारणत्वं न वा, व्याप्तिविशिष्टपक्षधर्मताविशिष्टज्ञानमनुमितिकारणं न वेति विप्रतिपत्तिसङ्क्षेपः । तत्र परेषामयमाशयः । विशिष्टज्ञानस्य किमन्वयव्यतिरेकाभ्यामनुमितिकारणत्वमन्यथा[3] वा । न तावदाद्यः । अनुमितिपूर्वसमये व्याप्तिज्ञानपक्षधर्मताज्ञानव्यतिरिक्तस्य विशिष्टज्ञानस्यैवासिद्धेः । नन्वस्तु द्वितीयः । तथाहि व्याप्तिस्मरणानन्तरं किञ्चित्त्वादिना रूपेण पक्षधर्मधूमज्ञानेऽपि[5] न तावद् वह्न्यनुमितिरुत्पद्यते तथा चानुमित्युत्पत्तिपूर्वकाले रूपान्तरेण पक्षधर्मधूमज्ञानं कारणं वक्तव्यं, तच्च प्रकारान्तरं पारिशेष्याद्[6] व्याप्यत्वमेवेति सिद्धं विशिष्टज्ञानमिति चेत् , न, किञ्चित्त्वादिव्यतिरिक्तस्य धूमत्वादेरेव सम्भवे पारिशेष्यस्योपक्षीणत्वात् । तथाहि–प्रथमं व्याप्तेः स्मरणमनुभवो वा अनन्तरं व्याप्यत्वावच्छेदकधूमत्वादिधर्मप्रकारकपक्षनिष्ठधूमज्ञानम् । अनन्तरमव्यवहितसमये एवानुमितिरप्रत्यूहमुत्पद्यत एवेति । एवमप्युपपत्तौ अन्तरा विशिष्टज्ञानकल्पने तत्कारणत्वे च गौरवमेव बाधकम् । न च विशिष्टज्ञानसामग्रीबलात् तत्कल्पनं युक्तं, कार्यासिद्धौ सामग्र्या अप्यसिद्धेः । सिद्धौ वाऽनुमितिसामग्र्या बाधितत्वात् । न चानुमितिसामग्र्यपेक्षया प्रत्यक्षसामग्री बलवतीति वाच्यम् । तृतीयलिङ्गपरामर्शधारावहनप्रसङ्गात् , तदनुव्यवसायप्रसङ्गाच्च[8] । न चानुमितिसामग्र्या बलवत्त्वेनानुमितिधारावहनप्रसङ्गेनानुमिनोमीत्यनुव्यवसायो न स्यादिति वाच्यं, पूर्वसामग्र्या दत्तफलत्वादपरसामग्र्याः सिद्धसाधनेनानुदयात् । अत एव धूमविशिष्टं पर्वतमुपलभ्य समयान्तरेऽपि व्याप्तिं स्मरतो[10] वह्न्यनुमितिरुत्पद्यते[10] । न हि तत्र तृतीयलिङ्गपरामर्शसम्भावनाऽपि कारणाभावात् । न हि तत्रेन्द्रियं कारणमसन्निकर्षात् । न च ज्ञानान्तरोपनीते धूमे मानस एव परामर्श इति वाच्यम् । बहि-

---

१. P reads पक्षधर्मताज्ञानम् कारणम् । २. $M_2$+I. O. read पक्षधर्मताज्ञान–मनुमितिकारणम् । ३. $M_2$+I. O. read अन्यथानुपपत्त्या । ४. $M_2$ adds पक्षः here । ५. P misses अपि । ६. P reads परिशेषात् and परिशेषस्य । ७. P reads व्यवहितसमये । ८. P omits तदनुव्यवसायप्रसङ्गाच्च । ९. Pn reads बलवत्त्वात् । १०. P adds अपि and इति, Pn reads व्याप्तिस्मरणवतोऽपि.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्विशेष्यके ज्ञाने मनसः सर्वथाऽसामर्थ्यात् । नापि संस्कारः पूर्वं वह्निव्याप्यधूमवत्त्वेनाऽननुभवात् । नाप्यानुमानिक एवं परामर्शोऽनवस्थापातात् ।

किञ्च केवलव्यतिरेक्यनुमानवादिना भवता कथं तत्र [2]तृतीयलिङ्गपरामर्शः समर्थनीयः । इतरभेदव्याप्यत्वस्य पृथिवीत्वेऽग्रहात् , ग्रहे वा साध्यहेतुनियतसामानाधिकरण्यस्य पृथिव्यां व्याप्तिग्राहकेणैव परिच्छिन्नत्वात् किमधिकमनुमेयं स्यात् । व्यतिरेकव्याप्तिग्रहेणैव त्वद्दर्शने इतरभेदानुमितेः स्वीकृतत्वाच्च[3] ।

ननु तृतीयलिङ्गपरामर्शमस्वीकुर्वता त्वया अनुमितित्वावच्छिन्नं कार्यं प्रति किमनुगतं कारणं वाच्यम् , न तावद्धूमवत्त्वादिविशिष्टपक्षपरामर्शोऽननुगमात् । नापि व्याप्यत्वावच्छेदकप्रकारकतद्विशिष्टपरामर्शः, उपजीव्यत्वेन व्याप्यत्वस्यैव तथात्वेनाङ्गीकारार्हत्वादिति । मैवम् । अनुमितित्वावच्छिन्नं प्रति व्याप्तिज्ञानस्यैव कारणत्वात् । धूमादिविशिष्टपक्षज्ञानस्य अनुमितिविशेष एव प्रयोजकत्वात् । यद्वा यद् वस्तुगत्या व्याप्यं तद्विशिष्टज्ञानस्यैवानुमितिमात्रं प्रति प्रयोजकत्वात् । न च यद्वस्तुगत्या व्याप्यं तस्य किंचित्त्वादिना रूपेण ज्ञानादनुमितिः स्यादिति वाच्यम् । तथाहि–किंरूपानुमितिस्तत्रापाद्यते । किं धूमादिलिङ्गविशेषोपहिता लिङ्गसामान्योपहिता वा । नाद्यः । धूमत्वादिप्रकारकज्ञानादेव तदुपपत्तेः । न द्वितीयः। तथाभूताया अनुमितेरेवासिद्धेः ।

किञ्च यद्व्यतिरेकात् तृतीयलिङ्गपरामर्शः तत्र नोत्पद्यते तद्व्यतिरेकादेवानुमितिव्यतिरेकोपपत्तेः । नन्वनुपपन्नमेतत् । यद्वस्तुगत्या वह्निव्याप्यं तद्विशिष्टज्ञानात्[11] अनुमितिर्भविष्यतीति । तथाहि–यद्वस्तुगत्या वह्निव्याप्यं नास्ति धूलिपटलादिकं तद्विशिष्टज्ञानादप्यनुमितिदर्शनादिति । मैवम् । मया तत्रानुमितेरेवानङ्गीकारात् । अङ्गीकारे वा यद्वस्तुगत्या वह्निव्याप्यं तज्ज्ञानादेवानुमित्युत्पत्तेः। तस्मात् सर्वथानुपपन्नो लिङ्गपरामर्शस्य चरमकारणताभिमानो नैयायिकानामिति ॥छ॥

---

१. P reads स । २. $M_1$ drops तृतीय । ३. Pn reads स्वीकाराच्च । ४. P reads धूमत्वादि० । ५. P reads पक्षधर्मपरामर्शः, $M_2$ reads विशिष्टपरामर्शः । ६. $M_2$ adds अनुगतस्य । ७. P reads धूमत्वादिविशिष्टपक्षधर्मज्ञानस्य, Pn reads विशिष्टपक्षज्ञानस्य । ८. P reads वस्तुतः in both places । ९. P reads तथाभूतानुमितेः । १०. P reads नोत्पद्यते तद्व्यतिरेकस्योपपत्त, I. O. reads अनुमितिव्यतिरेकस्योपपत्तेः । ११. P reads ०विशिष्टपक्षज्ञानात् ।

एवं प्राप्तेऽभिधीयते[1]। व्याप्तिस्मरणानन्तरं किञ्चित्त्वादिना रूपेण धूमविशिष्टपर्वतज्ञानात् वह्निर्नानुमीयत इत्यविवादम्। तत्र किं धूमत्वप्रकारकत्वव्यतिरेकाद् वा कार्यव्यतिरेकः कल्प्यताम्, तद्व्याप्यत्वप्रकारकत्वव्यतिरेकाद्वा। तत्र प्रथमस्य गौरवकरत्वात्, द्वितीयस्य व्याप्तिज्ञाने स्वीकारात् लघुत्वाच्च द्वितीय एव ज्यायान्। एतदेवानुसन्धायाचार्यैरिदमुक्तम्—

"तत्र लिङ्गत्वोल्लेखि तृतीयं ज्ञानमेषितव्यम्"[2] इति।

न च धूमाद्युपहितानुमितौ धूमत्वादिप्रकारकज्ञानस्य पूर्वमुपजीव्यत्वेन धूमत्वादिप्रकारककल्पनैव युक्तेति वक्तव्यम्[3]। तस्य ह्यनुमितिविशेषं प्रति प्रयोजकत्वं न तु सामान्यं प्रति। प्रकृतेऽनुमितिमात्रं प्रति कारणतावच्छेदकः[4] प्रकारो विचार्यते। न च तथा धूमत्वादि। व्यभिचारात्। किंच तत्तदुपहितवह्न्यनुमितित्वं न धूमत्वादिप्रकारकज्ञानप्रयोज्यम्। किन्तु तत्तद्व्याप्यत्वप्रकारकज्ञानप्रयोज्यमेव। धूमत्वादिप्रकारकज्ञानप्रयोज्यं तु धूमत्वादिविशिष्टज्ञानत्वमेव[5]। यत् पुनर्विकल्प्यापादनदूषणं कृतं तदापादनमात्रोच्छेदकत्वादुपेक्षणीयम्[6]। तथाहि—सामान्यप्रसिद्धिमादाय आपादनं प्रवर्त्तते न विशेषप्रसिद्धिं, तथैव सर्वत्र दर्शनात्। यत् पुनरुक्तं ज्ञानद्वयानन्तरं तृतीयं ज्ञानमुत्पद्यत इत्यसिद्धम्, अनुमितिसामग्र्याः प्रतिबन्धकत्वादिति, तदपि मन्दम्। उक्तन्यायेन तत्कारणत्वव्यवस्थितौ तद्विरहेऽनुमितिसामग्र्याः एवासिद्धेः।

केचित्तु ज्ञानद्वयानन्तरमेव तृतीयं[7] विशिष्टज्ञानमुत्पद्यत इति न ब्रूमः, किन्तु व्याप्तिरूपविशेषणज्ञानसम्भवात् तद् द्वितीयज्ञानावसर एव वह्निव्याप्यधूमवानयमिति ज्ञानस्य सम्भवादित्यप्याहुः। न च व्याप्यत्वाज्ञानेऽपि [8]धूमत्वाद्यवच्छेदकग्रहस्योपजीव्यत्वात् स एवानुमितौ कारणमस्तु इति वाच्यम्। अवच्छेदकज्ञानं हि व्याप्यत्वसाक्षात्कारे कारणं, न तु व्याप्यत्वज्ञानमात्रे अवच्छेदकग्रहं[9] विनापि वह्निव्याप्यवानयमिति वाक्याद् व्याप्यत्वज्ञानदर्शनात्। किञ्चैवमवच्छेदकज्ञानस्यापि कारणता न स्यात्, तत्रापि यदुपजीव्यं तदेव कारणमास्तामित्यस्यापि सुवचत्वात्। एतेन

---

१. $M_2$ –अत्रोच्यते, P–ब्रूमः। २. किरणावलीग्रन्थे तूक्तम् (G. O. S.) "तस्माल्लिङ्गत्वोल्लेखि तृतीयलिङ्गदर्शनमास्थेयम्' इति। P.198। ३. P+$M_2$ read वाच्यम् ४. I. O.+$M_1$ read (अ)नुमितिमात्रकारणतावच्छेदकः। ५. P reads धूमादिविशिष्ट०। ६. P reads (उ)च्छेदकत्वेन। ७. P+$M_1$ drop तृतीयम्। ८. P reads धूमत्वावच्छिन्नग्रहस्य। ९. P reads अवच्छेदकज्ञानं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याप्तिस्मरणेऽपि किञ्चित्त्वेन रूपेण पक्षधर्मधूमग्रहे सति यद्व्यतिरेकेण तृतीयलिङ्गपरामर्शव्यतिरेकः तद्व्यतिरेकेण ममाप्यनुमितिव्यतिरेक इति निरस्तम् ।

यदुक्तं–असन्निकृष्टे धूमे विशिष्टज्ञानासम्भव इति तदपि मन्दम् । तथाहि-परेणाऽपि तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानमुत्पद्यते इति स्वीकर्त्तव्यम् । अन्यथा स धूमो वह्निव्याप्य[3] इति व्यवहारो न स्यादिति । तस्मादुभयवादिसमाधेयमेतत् किं निष्टङ्कनेन । तथापि सुहृद्भावेन किं तत्र कारणमिति[4] ब्रूषे तदा शृणु–ज्ञानान्तरोपनीते धूमे संयुक्तसमवेतलक्षणया प्रत्यासत्त्या ज्ञानरूपया [5]मन एव तत्र कारणम् । न च बहिर्विशेष्यके प्रत्यये मनसो न [6]स्वातन्त्र्यमतिप्रसङ्गादिति वाच्यम् । ज्ञानान्तरोपनयस्यैव नियामकत्वात् । न च विशेषणतया[7] प्रत्यासत्त्या विशेषणमेव भासते इति वाच्यम् । इह भूतले घटाभाव इत्यत्राभावविशेष्यकस्य प्रत्ययस्य दर्शनात् । जम्बीरस्य रूपरसाविति सर्वसाधारणप्रत्ययाच्च ।

न चैवमनुमित्युच्छेदः सर्वत्र ज्ञानान्तरोपनीतस्य वह्नेर्भानसम्भवादिति वाच्यम् । न हि ज्ञानान्तरोपनीते भानेऽनुमितिव्यवहारोऽ[8]तिप्रसङ्गात् । न हि मनोजन्यतामात्रेण मानसत्वं किन्तु असाधारणकारणान्तरनिरपेक्ष-[9] मनोजन्यत्वेन । न चानुमित्यादौ तथा । परामर्शादेरसाधारणस्य कारणस्यापेक्षानियमात्[10] । यद्वाऽनुमानादेव तत्र परामर्श उत्पद्यते, न चानवस्थादोषः, क्वचित् स्मृतावेव विश्रान्तेः ।

अन्ये तु परामर्शे पक्षविशेष्यकत्वमतन्त्रमेव । किन्तु पक्षवृत्तेर्विशेष्यस्य व्याप्यत्वं गृह्यते यत्र तत्रानुमितिरुत्पद्यते । एवम्भूतश्च तत्र[11] परामर्शः, पक्षवृत्तिर्वह्निव्याप्य[12] इति । अयमप्यनुमितिरूप एव । अत्र धूमत्वमेव लिङ्गं धूमत्वस्य वह्निव्याप्यव्याप्यत्वं[13] व्यक्त्यन्तरसन्निकर्षात् गृह्यते[14] । असन्निकृष्टपर्वतवृत्तिधूमसम्बन्धितापि प्रत्यक्षेणैव गृह्यते । तस्मात् प्रत्यक्षरूपादेव परामर्शात्पर्वतवृत्तिः स धूमो वह्निव्याप्य इति अनुमितिरूपः परामर्शो जायते । तस्मात् परामर्शात् पर्वतो वह्निमानित्यनुमितिरुत्पद्यते

---

१. $M_2$ reads ०परामर्शस्य व्यतिरेकः । २. P drops पक्षधर्मता । ३. P reads वह्निव्याप्तः स धूम इति । ४. P adds यदि here । ५. P adds वा here । ६. P reads मनसोऽस्वातन्त्र्यम् । ७. P reads विशेषणलक्षणया प्रत्यासत्त्या । ८. P reads ज्ञानान्तरोपनीतभानेऽनुमितिव्यवहारे । ९. Pn+I. O. read कारणनिरपेक्ष– । १०. $M_2$ reads अपेक्षितत्वात् । ११. Pn drops तत्र । १२. P adds धूम here । १३. P reads वह्निव्याप्यत्वं । १४. P+I. O. read गृहीतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति न किञ्चिदनुपपन्नमित्याहुः ।

यत्तु केवलव्यतिरेकानुपपत्तिरुक्ता तदपि मन्दम्[१] । तथाहि—तत्र व्यतिरेकद्वयसहचारेणान्वयव्याप्तिरेव गृह्यते इति । तद्विशिष्टं च पृथिवीत्वं पक्षे गृह्यते । व्याप्तिश्च न साध्यसामानाधिकरण्यान्तर्भावेन येन फलाभावः । सर्वं चैतद्व्यतिरेकिस्थले स्फुटं भविष्यति ।

अन्ये तु तद्विशिष्टपरामर्शस्यानुमितिकारणत्वे विनिगमनामाहुः, इयं धूमव्यक्तिर्वह्निव्याप्या न वेति संशये विपर्यये च तावदनुमितिर्नोत्पद्यत इत्यविवादम् । तथा च इयं वह्निव्याप्येति ज्ञानेऽनुमितिरुत्पद्यत इति वक्तव्यम् । न च किमर्थं वक्तव्यं, संशयविपर्ययाभाव[२] एव तत्र कारणमास्तामिति वाच्यम् । तावदभावापेक्षया विशिष्टपरामर्शस्य कारणत्वे लाघवात् । विनिगमनाभावेन उभयोः कारणतासम्भवात् । न च सर्वोपसंहारेण व्याप्तिग्रहानन्तरमियं धूमव्यक्तिर्वह्निव्याप्या न वा, न व्याप्येति संशयविपर्ययासम्भवः इति वाच्यम् । सामान्यनिश्चयस्य सामान्यसंशयविपर्ययप्रतिबन्धकत्वात्[४] । विशेषसंशयविपर्यययोर्विशेषनिश्चयनिवर्त्तनीयत्वात् । किञ्च यत्संशयो यत्प्रतिबन्धको भवति तन्निश्चयस्तस्य कारणं भवतीति[५] सामान्यतः सिद्धम् । अत्रापि पक्षधर्मस्य व्याप्यत्वसन्देहादनुमितिर्नोत्पद्यते[६] इत्यवश्यं तत्र पक्षधर्मस्य व्याप्यत्वप्रकारकनिश्चयः कारणं वक्तव्यमिति ।

किं च पर्वतो वह्निव्याप्यवानयमिति शब्दज्ञानानन्तरं वह्न्यनुमितिरुत्पद्यते इत्यविवादम् । न च तत्र व्याप्यत्वावच्छेदकः प्रकारो भासत इति अवश्यं पक्षधर्मस्य व्याप्यत्वज्ञानमनुसरणीयम् । न च तत्र व्याप्यस्य व्याप्यत्वमेवावच्छेदकः[७] प्रकारो भासत इति वाच्यम् । यद् वह्निव्याप्यवद् भवति तद्वह्निमद् भवतीत्यवश्यमवच्छेदकरूपाया अपरव्याप्तेर्भाने प्रमाणाभावात् । किन्तु तत्रावच्छेद्यरूपैव धूमे वह्निव्याप्तिर्भासत इति । किञ्च तज्ज्ञाने वाऽवच्छेदकं व्याप्यत्वमेव भाति तदा सर्वत्र तदेवास्त्विति तृतीयलिङ्गपरामर्शप्रकरणं समाप्तम्[८] ॥१७॥ ॥छ॥

१. P+$M_2$ read व्यतिरेकिण्यनुपपत्तिरुक्ता तदपि न भद्रम् । २. P reads संशये विपर्ययाभावः । ३. P+$M_2$ read व्याप्यत्वग्रहा० । ४. P reads ०प्रतिरोधकत्वात् । ५. $M_2$ reads वक्तव्यमिति । ६. Pn reads नोपपद्यते । ७. P reads व्याप्यत्वस्य व्याप्तिर्व्याप्यत्वावच्छेदकः प्रकारः, I. O. reads व्याप्यत्वं व्याप्यत्वमेवावच्छेदकः प्रकारः । ८. P adds इति लिङ्गपरामर्शवादः, I. O. reads इति तृतीयलिङ्गपरामर्शः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१८) व्याप्तिवादः ।

ननु केयं व्याप्तिः । अनौपाधिकत्वं वा स्वाभाविकत्वं वा अव्यभिचारित्वं वा कार्त्स्न्येन सम्बन्धो वा, साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यं वा, विशिष्टवैशिष्ट्यं[1] वा, तादात्म्यं वा, कार्यकारणभावो वा, अविनाभावो वा, निमित्तनैमित्तिकत्वं वा, अन्योन्याभावविशेषो वा, यावत्साध्यव्यापकव्याप्यत्वं वा, साध्यव्यापकव्याप्यत्वं[2] वा, साधनात्यन्ताभावसामानाधिकरण्यव्याप्यात्यन्ताभावै[3]प्रतियोगिसाध्यसामानाधिकरण्यं वा, साध्याभावव्यापकाभावप्रतियोगिसाधनसामानाधिकरण्यं वा[4], सम्बन्धमात्रं वाऽन्यद्वा ।

न तावदाद्यः । किं तदनौपाधिकत्वम् । उपाध्यजन्यत्वं वा उपाधिरहितत्वं वा । नाद्यः । धूमे साध्ये वह्नेरपि गमकत्वप्रसङ्गात् । न हि तयोः सम्बन्ध उपाधिना जन्यते । न द्वितीयः । उपाधिरहितत्वं हि तदुपाधिरहितत्वं वा अन्योपाधिरहितत्वं वा । नाद्यः असम्भवात् । वह्नौ साध्ये धूमस्यापि अगमकत्वप्रसङ्गात्, तदुपाधिरहितत्वस्य तत्र प्रत्येतुमशक्यत्वात् । तदुपाधिप्रतीतौ च सोपाधित्वापत्तेः[5] । न द्वितीयः । धूमस्यापि क्वचिदुपाधित्वेन तद्विरहासम्भवात्[6] । उपाधिनिर्वचनेऽन्योन्याश्रयप्रसङ्गात् ।

नापि द्वितीयः । स्वाभाविकत्वं हि स्वभावजन्यत्वं वा स्वभाव एव वा । स्वभावोऽपि स्वरूपं वा स्वधर्मो वा । नाद्योऽसम्भवात् । न हि कश्चित् स्वात्मना स्वधर्मेण वा जन्यते । नेतरो व्यभिचारिसाधारण्यात् । तत्स्वभावस्यापि स्वभावत्वात्[7] ।

नापि तृतीयः । अव्यभिचारित्वं हि व्यभिचारशून्यत्वं विवक्षितम् । व्यभिचारश्च साध्यात्यन्ताभावसामानाधिकरण्यमेव । तच्च केवलान्वयिनि

---

१. P+I. O. read विशिष्टे वैशिष्ट्यं वा । २. P reads साध्यव्याप्यत्वं वा । ३. I. O.+$M_2$ read साधनात्यन्ताभावसमानाधिकरणव्याप्य० । ४. P wrongly inserts here : साधनाभावव्यापकाभावप्रतियोगित्वं वा, I. O. reads साधनाभावव्यापकाभावप्रतियोगिसामानाधिकरण्यं वा, शेषानन्त however supports the reading accepted in the text above । ५ P reads सोपाधिकतापत्तेः । ६. P reads तद्विरहस्यासम्भवात् । ७. P drops तत्स्वभावस्यापि स्वभावत्वात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

न सम्भवति । तत्र साध्यात्यन्ताभावाप्रसिद्धेः[1] । संयोगाद्यव्याप्यवृत्तौ च साध्ये साध्यात्यन्ताभावसामानाधिकरण्येऽपि द्रव्यत्वस्य[2] व्याप्तेरिष्यमाणत्वात् । किञ्च व्यभिचारस्य साध्यनिर्वचनाधीननिर्वचनत्वेन साध्यस्य च व्यापकत्वेनान्योन्याश्रयात् ।

नापि चतुर्थः । कात्स्न्र्येन हि सामस्त्येन प्रकारेण सम्बन्धो विवक्षितः । न च सामस्त्यं सम्बन्धघटकः प्रकारः । समस्तव्यक्तिगर्भस्य सम्बन्धस्याभावात् । प्रत्येकं तथात्वे सामस्त्याभावात् । व्यभिचारिसाधारण्यात् पक्षान्तरप्रवेशात् ।

नापि पञ्चमः । साधनसमानाधिकरणयावद्धर्मसामानाधिकरण्यं हि किञ्चित्साध्यव्यक्तेर्वाऽभिधित्सितं सकलसाधनसमानाधिकरणयावद्धर्मसामानाधिकरण्यं सकलसाध्यव्यक्तेर्वा अभिप्रेतं यत्किञ्चित्साधनव्यक्तिसमानाधिकरणयावद्धर्मसामानाधिकरण्यं सकलसाध्यव्यक्तेर्वा विवक्षितं, साधनत्वावच्छेदकधर्मवद् यत्किञ्चिद्व्यक्तिसमानाधिकरणयावद्धर्मसमानाधिकरणमात्रवृत्तिसाध्यत्वावच्छेदकधर्मवद्व्यक्तिसामानाधिकरण्यं वा, यावत्साधनसमानाधिकरणयावद्धर्मसमानाधिकरणयत्किञ्चित्साध्यव्यक्तिसामान्या(ना)धिकरण्यं[3] वा। नाद्यो रासभसाधारण्यात्[4] । न द्वितीयः असम्भवात् । न हि सकलसाधनसमानाधिकरणैः धर्मैः[5] सर्वाः साध्यव्यक्तयः समानाधिकरणाः । अत एव न तृतीयः । न चतुर्थः । अधिकवृत्तिसाध्ये तदभावात् । न पञ्चमः । एकव्यक्तिके यावदर्थाभावाद् । व्याप्तिग्रहे सिद्धसाधनप्रसङ्गाच्च ।

नापि षष्ठः । उक्तरीत्या दूषितत्वात् । यथाकथञ्चित् सम्भवे एतावदज्ञायमानेऽप्यनुमितेर्जायमानत्वात् गौरवकरत्वाच्च । अन्यथोपपत्तेर्वक्ष्यमाणत्वाच्च ।

नापि सप्तमः । अव्यापकत्वात् । अभेदेन गम्यगमकभावानुपपत्तेश्च ।

नाप्यष्टमः । अकार्यकारणभूतयोरपि[6] व्याप्यव्यापकभावात् ।

नापि नवमः । अविनाभावो हि साध्यं विना हेत्वभावो विवक्षितः । तथा च केवलान्वयिन्यप्रसिद्धेः ।

---

१. P+I. O. read (अ)सिद्धेः । २. P drops द्रव्यत्वस्य । ३. P+$M_1$ drop समानाधिकरणयत्किञ्चित्साध्यव्यक्ति० । ४. P reads रासभादिसाधारण्यात् । ५. $M_1$ + I. O. read ०समानाधिकरणे धर्मे । ६. P+I. O. read अकार्यकारणयोरपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नापि दशमः । निमित्तनैमित्तिकत्वं हि कार्यकारणभावो वा समानावच्छेदकत्वं वा । नाद्यः । कार्यकारणभावप्रवेशात्, न द्वितीयः अवच्छेदकत्वं हि सामानाधिकरण्यमात्रं वा नियतसामानाधिकरण्यं वा । नाद्यो व्यभिचारिसाधारण्यात्, न द्वितीयोऽन्योन्याश्रयात् । यथाकथञ्चिदवच्छेदकत्वनिर्वचनेऽपि अवच्छेदकत्वान्तर्भावेन व्यापकत्वव्याप्यत्वे स्यातां तथा च केवलधूमस्य व्याप्यत्वं केवलस्य वह्नेर्व्यापकत्वं च न स्यात् ।

नाप्येकादशः । तथाविधान्योन्याभावे प्रमाणाभावात् । अव्यभिचारादेव तद्बोधकत्वेऽव्यभिचारस्योपजीव्यत्वे वा तस्यैव व्याप्तित्वस्वीकारस्योचितत्वात् । तदेवास्त्विति चेद्, न, तद्दूषितत्वात् ।

नापि द्वादशः । आत्माश्रयात् । साध्यव्यापकपदेन साध्यसमनियतविवक्षायां शेषवैयर्थ्यात् । न च तदेवास्तु इति वाच्यं, साध्यव्याप्यस्यैव तथात्वे शेषवैयर्थ्यात् ।

नापि त्रयोदशः । आत्माश्रयात् । शेषवैयर्थ्याच्च ।

नापि चतुर्दशः । अव्याप्यवृत्तौ साध्ये केवलान्वयिनि चाभावात् । अत एव नापि पञ्चदशः ।

नापि षोडशः । सम्बन्धमात्रज्ञानस्यानुमित्यजनकत्वात् । व्याप्तिज्ञानस्य येन रूपेणानुमितिकारणत्वं तस्येह निरूप्यमाणत्वात् । नापि सम्बन्धत्वं संयोगत्वाद्यनुगतमस्ति ।

नापि सप्तदशः । तदनिर्वचनात् । अखण्ड एव व्याप्तिपदार्थ इति चेन्न, नियामकाभावात् । नियामकसद्भावे तेनैवान्यथासिद्धेः । अन्यथोपपत्तेर्वक्ष्यमाणत्वाच्च ।

नन्वविनाभाव एव व्याप्तिः । न च केवलान्वयिन्यव्याप्तिः साधनसमानाधिकरणव्याप्यवृत्त्यत्यन्ताभावाप्रतियोगिसाध्यकत्वस्य तदर्थत्वात् । अन्योन्याभावेन वा तन्निर्वचनं, तथाहि साधनसमानाधिकरणान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं वा, साधनत्वाभिमतसामानाधिकरण्यान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्कत्वं वा तदर्थ इति । तदपि न । व्याप्तिमन्तरेण प्रतियोगित्वस्यैव निर्वक्तुमशक्यत्वात् । साधनत्वाभिमतसाध्यत्वाभिमतयोरपि व्याप्तिपदार्थत्वप्रसङ्गात् । कथं वा व्यर्थविशेषणे नातिप्रसङ्गः ।

१. P reads नान्त्यः । २. $M_1+M_2$ drop व्याप्यवृत्ति here । ३. $M_1$ drops एव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र व्याप्तेरनभ्युपगमात् । अत्यन्ताभावाऽन्योन्याभावाभ्यां निरुक्तयोर्मध्ये का वा[1] व्याप्तिः । न तावद् द्वितयमपि । अननुगमात् । उभयसाधारणस्याभावात्[2] । तस्मादविचारितसुन्दर एवं[3] व्याप्तिपदार्थ इति ॥छ॥

अत्रोच्यते । प्रतियोगित्वं तावदभावविरहत्वमेवं[4] । अभावत्वं सत्तानधिकरणत्वमेव । यद्वा विरोधित्वमेव प्रतियोगित्वं, विरोधित्वं च यद् येन रूपेण न प्रमीयते तत्तेन सह विरुद्धं, नचाभावे साध्ये अतिव्याप्तिः । अत्रापि[5] विरोधित्वस्य विद्यमानत्वात् । न चाननुगमः । लाघवेनान्योन्याभावान्तर्भावेन व्याप्तेरिष्यमाणत्वात् । तृणारणिमणिन्यायेन अत्र समाधानमित्यप्याहुः ।

न चाभिमतपदान्तर्भावेन व्याप्तिप्रसङ्गे यत् यत्समानाधिकरणान्योऽन्याभावप्रतियोगितावच्छेदकं[6] न भवति तत् तद्व्यापकम्, यत्समानाधिकरणाऽन्योन्याभावप्रतियोगिता येन नावच्छिद्यते तत्तस्य व्याप्यम् । न चाऽत्र सर्वनामखण्डनावतारः । तस्य सकललोकव्यवहारोच्छेदकत्वेनोपेक्षणीयत्वात् । न च व्यर्थविशेषणेऽतिप्रसङ्गः, अत्र व्याप्तेरिष्यमाणत्वात् । न हि तत्र व्याप्तिरेव न वर्त्तते इति व्यर्थविशेषणार्थः, अपि तु तेन विशेषणेन व्याप्तिर्नावच्छिद्यत इति ।

केचित् तु साध्यात्यन्ताभावासामानाधिकरण्यं व्याप्तिः । न चाकाशादीनामवृत्तीनामपि[7] वह्निव्याप्यत्वाश्रयत्वप्रसङ्ग[8] इति वाच्यं, तेषां व्याप्यत्वेऽपि दोषाभावात् । ततोऽपि वह्न्यनुमितिः स्यादिति चेन्न तेषामपक्षधर्मत्वात् । न च केवलान्वयिन्यव्याप्तिः । तत्र केवलान्वयित्वस्यैव व्याप्तित्वात् । तृणारणिमणिन्यायेन कार्यविशेषस्य कल्पनादित्याहुः ।

अपरे तु साधनव्यापकधर्मावच्छिन्नसाध्यसम्बन्धो व्याप्तिः । एतद्भङ्गश्चावच्छेदकाभावात् । अवच्छेदकस्य साधनव्यापकताविरहात्[9] । सम्बन्धस्वरूपविरहात् सम्बन्धिविरहात् । अवच्छेदकः समनियत एव । एतदभिप्रायेणोच्यते समनियत एवोपाधिरिति । एवम्भूतोपाधिना सोपाधि-

---

१. P drops वा । २. P+$M_2$ read ०रणस्यैकस्याभावात् । ३. P reads एवायम् । ४. P reads अभावविरोधित्वमेव, Pn. reads अभावरहितत्वमेव । ५. P reads तत्रापि । ६. P reads (अ)त्यन्ताभावप्रतियोगि न भवति । ७. P+$M_2$ drop अवृत्तीनाम् । ८. P reads व्याप्याश्रयत्वप्रसङ्गः । ९. P reads व्यापकताविरोधात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याप्यत्वासिद्धावेन्तर्भवति । व्यभिचारोन्नायकतोक्तिस्तु तद्योग्यतामात्रेण । विषमव्याप्तिकोपाधिस्तु न दूषणं, व्यभिचारनियमाप्रतिसंधाने उपाधिज्ञानेपि अनुमितेर्दर्शनात् । अन्यथा हेत्वाभासाधिक्यप्रसंगात् । व्यभिचारोन्नयनदशायां तु अन्यत्र क्लृप्तसामर्थ्यो व्यभिचार एव दूषणमित्याहुः ॥छ।

१. P reads व्याप्यत्वासिद्धे एव । २. P reads च । ३. P reads (अ)नुमिति-दर्शनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (१९) व्याप्तिग्रहवादः ।

सा च व्याप्तिर्भूयः सहचारदर्शनव्यभिचारादर्शनानौपाधिकत्वग्रह-विपक्षबाधकतर्कैर्गृह्यते । ननु सकृद्दर्शनेनैव व्याप्तिर्गृह्यते न तु भूयोदर्शनेन, भूयो दर्शनस्य शतशो व्यभिचारित्वात् । तत्र सहकारिविशेष-स्वीकारे प्रथमदर्शन एवं तुल्यत्वात् । अत एव य एव सम्बन्धो मया गृहीतः पुरा स एव पश्चादपि गृह्यते इति सकलजनसिद्धः[2] व्यवहार इति । मैवं, सकृत्सहचारदर्शने उभयकोटयुपस्थितौ [3]साध्यव्यभिचारसंशयो भवत्येव भूयोदर्शने तु उभयकोटयुपस्थितौ कदाचिद् व्यभिचारसंशयो न भवत्यपि । अतो भूयोदर्शनस्य व्याप्तिग्रहकारणत्वस्वीकारात् ।

किञ्च सकृद्दर्शनेन व्याप्तिर्गृह्यते इत्यस्य कोऽर्थः । किं प्रथमदर्शन-स्यैव व्याप्तिविषयकत्वं व्याप्तिविषयकज्ञानजनकत्वं वा ।

नाद्यः । प्रथमदर्शनस्य व्याप्तिविषयकत्वे अनन्तरं संशयो न स्यात् । निश्चिते संशयायोगात् । न च भूयोदर्शनेऽपि समानमेतदिति वाच्यं, न हि भूयोदर्शनेन व्याप्तिर्गृह्यत एवं । किन्तु यदा गृह्यते तदा तर्कादि-सहकारिणा भूयोदर्शनेनैव । अत एवोच्यते न दर्शनानां बहुत्वसंख्या-नियम इति ।

ननु ममापि समानमेतत् । न हि सकृद्दर्शनेन व्याप्तिर्गृह्यत इति[4] । किन्तु यदा गृह्यते तदा तर्कादिसहकारिणा सकृद्दर्शनेनैवेति मत्पक्ष इति चेत्[7], न । प्रथमदर्शने तर्कादेरेवानवतारात्[8] । सर्वत्र संशयोपस्थापितकोटिवि-षयस्तर्को भवति । अत्र तु सहचारदर्शनस्य संशायकत्वे तदनन्तरं संश-येन भवितव्यमिति सहचारदर्शनमुपजीव्यैव परं तर्कावतारात् । निर्विषय-कस्य तर्कस्याभावात् । यद्ययं धूमो वह्निव्यतिरेकेण स्यादकारणकः स्यादि-त्येवमाकारस्य तर्कस्य प्रथमदर्शनपूर्वसमये असम्भवात् । एतेन य एव सम्ब-न्धो मया गृहीतः स एवेदानीं गृह्यते इति निरस्तम् । सम्बन्धमात्रस्या-व्याप्तित्वात्[10] व्याप्तिग्रहस्य च निरूप्यमाणत्वात् ।

---

१. P reads अपि । २. P+$M_1$ drop सकलजनसिद्धः । ३. P drops साध्य, I. O. reads only संशयः । ४. P adds इत्युच्यते । ५. P reads एव । ६. P adds व्याप्तिः here । ७. P+I.O. drop चेत् । ८. P reads तर्कादीनामनवतारात् । ९. P reads च । १०. P missed अव्याप्तित्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च सकृद्दर्शनेन वह्निधूमयोः कस्य स्वाभाविकः सम्बन्धः कस्य सोपाधिकः सम्बन्ध इति न निश्चेतुं शक्यते व्यभिचारिसाधारण्यात् । योग्यायोग्योपाधिनिरासस्याशक्यत्वात् । यद्वा सर्वोपसंहारेण सामान्यलक्षणया प्रत्यासत्त्या व्याप्तिर्ग्राह्या । सामान्यत्वं न सकृद्दर्शनगम्यम् । अतो भूयोदर्शनोपयोगः ।

ननु सर्वोपसंहारेण व्याप्तिर्गृह्यते[2] इत्यसिद्धम् । गृहीततावद्व्यक्ति[3]व्यतिरिक्तातीतानागतव्यक्तिभाने प्रमाणाभावात् । भावे वा षोढा प्रत्यासत्तिबहिर्भावप्रसङ्गात् । न च पक्षनिष्ठधूमगतव्याप्तिग्रहस्या[2]नुमितिकारणत्वे तस्य चानुमानस्य पक्षनिष्ठधूमव्याप्यत्वग्रहजन्यत्वेन तद्व्याप्यत्वग्रहस्य[4] तद्व्यापकग्रहाधीनत्वेन सामान्यलक्षणाप्रत्यासत्तिः कल्पनीयेति वाच्यं, तत्र मया व्याप्तिग्रहस्यानङ्गीकारात् । व्याप्यजातीयग्रहस्य पक्षेऽनुमितिकारणत्वादिति । मैवं, वह्निप्रतियोगिकव्याप्तिविशिष्टयावद्धर्मग्रहस्य[5] मानसप्रत्यक्षसिद्धत्वात् । तदनुरोधेन सामान्यलक्षणायाः प्रत्यासत्तेः कल्पनात्[6] । न चातिरिक्तप्रत्यासत्तिकल्पनापत्तिर्विशेषणतायामेवान्तर्भावात् ।

यद्वा कतिपयव्यक्तिसन्निकर्षमासाद्यासन्निहितातीतानागतव्यक्तिविषयकं ज्ञानं चक्षुरादिनैव जन्यते । न च चक्षुरादिना असन्निकृष्टज्ञानजनने[7]ऽतिप्रसङ्गः । योगजादृष्टवत् सामान्यवत्त्वस्य नियामकत्वात् । धूमत्वस्य[8] सामान्यत्वग्रहे सर्वा एवातीतानागतव्यक्तयोऽवभासन्ते । यावद्विशेषसंनिकर्षस्य गौरवकरत्वात् साक्षात्काराकारणत्वात्[9] । यद्वा सामान्यलक्षणया प्रत्यासत्त्या असन्निकृष्टातीतानागतव्यक्त्यभाने कथं प्रागप्रतीतवह्निविशेषणकपर्वतविशेष्यकमनुमितिज्ञानं, विशेषणज्ञानस्य विशिष्टज्ञानं प्रति कारणत्वात्[10] । न च तदनुरोधेन व्यापक एव [11]तथाऽऽस्तामिति वाच्यम् । व्याप्येऽपि प्रत्यासत्तेरविशेषात् । धूमस्यापि क्वचिद् व्यापकत्वात् ।

नापि द्वितीयः । इष्टत्वात् । न ह्यस्माकं दर्शनानां भूयस्त्वं तन्त्रं किन्तु सकृद्दर्शनेन चक्षुरादिना व्याप्तिर्गृह्यते शब्दादिना सकृद्दर्शनेनापि गृह्यते इति न तन्निषिध्यते ।

---

१. P misses न and adds च । २–२ This portion is missing in $M_1$ । ३. P misses व्यक्ति– । ४. P+$M_1$ read तद्व्याप्यत्वस्य । ५. P+I. O. read ०धूमग्रहस्य । ६. P reads कथ्यमानत्वात् । ७. $M_2$ reads असन्निकृष्टातीतादिज्ञानजनने । ८. P reads सामान्यस्य । ९–९ This portion is missing in $M_1$ । १०. P reads विशिष्टज्ञानकारणत्वात् । ११. P reads तदास्ताम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु भूयोदर्शनमित्यत्र[1] दर्शनानां भूयस्त्वं वा विवक्षितं भूयसां दर्शनं वा[2]। न तावद् द्वितीयः। एकव्यक्तिमात्रदृष्टान्तके तदभावात्[3]। नाद्यः। तावतां दर्शनानाम् एकदाऽसम्भवेन चक्षुरादिसहकारित्वायोगात्। न च संस्कारद्वारा तेषाम् चक्षुरादिसहकारित्वं, संस्कारस्य स्मृतिमात्रकारणतया कल्पनादिति। मैवं, संस्कारस्यानुभवेऽपि कारणत्वदर्शनात्। प्रत्यभिज्ञानस्मरणयोस्तुल्यवत् संस्कारकल्पकत्वात्। भूयोदर्शनजनिततावत्संस्कारप्रभवैकस्मरणस्य चक्षुरादिसहकारित्वमित्यपि कश्चित्।

नन्वनौपाधिकत्वग्रहस्य व्याप्तिग्रहकारणत्वे न प्रमाणं किन्तूपाधिग्रहाभावस्य कारणत्वं प्रामाणिकम्। न चानौपाधिकत्वग्रहोपि शक्यः, योग्यायोग्योपाधिसाधारणोपाधिव्यतिरेकस्य दुर्ग्रहत्वात्। किंचानौपाधिकत्वं विकल्प्य यत् दूषणं कृतं, तत् किं ग्राहकतापक्षे नास्ति। नास्ति चेत् अनौपाधिकत्वस्य व्याप्तित्वपक्षेऽपि न भविष्यतीति। मैवम्। अनौपाधिकत्वग्रहोपाधिग्रहाभावयोस्तुल्ययोगक्षेमत्वेनोभयोरपि कारणत्वात्। किञ्च, यावति[4] सति संशयो जायते न तावतैव निर्णय इत्यविवादम्। न च सहचारदर्शनव्यभिचारादर्शनोपाध्यनुपलम्भैर्व्याप्तिनिर्णयो जायत इति युक्तम्। तेषु सत्सु संशयस्यैव दर्शनात्। तस्मादतिरिक्तं किञ्चिदपेक्षणीयम्। तच्च विचार्यमाणमनौपाधिकत्वप्रतिसन्धानं तर्को वेति। न च कोट्यनुपस्थितावेष्वेव सत्सु व्याप्तिनिर्णयो भवतीति वाच्यम्। कोट्यनुपस्थितावपि दूरादूर्ध्वतामात्रदर्शने स्थाणुपुरुषान्यतरनिर्णयादर्शनात्।

यदुक्तमनौपाधिकत्वग्रहोऽशक्य इति तदपि न साधीयः[5]। योग्यानां योग्यानुपलम्भादेवायोग्यानां तु साध्याव्याप्तिसाधनव्याप्त्यन्यतरसाधनादेवाभावग्रहस्य सुग्रहत्वात्। न च कश्चिदुपाधिरत्र भविष्यतीति शङ्का व्याप्तिग्रहविरोधिनी[6]। तस्यां जातायामपि व्याप्तिग्रहस्य जायमानत्वात्। न चैवमुपाधिशङ्का दूषिकैवं न स्यादिति वाच्यम्। विशिष्टोपस्थितस्यैवोपाधेः शङ्कायां दूषणत्वावधारणात्।

यत्तु[7] विकल्प्य दूषणं कृतं तददूषणमेव। यावत् साध्यव्यापकव्याप्यत्वस्यैवानौपाधिकतार्थत्वात्। न चैवमनौपाधिकत्वमेव व्याप्तिरस्त्विति वाच्यम्।

१ P drops भूयोदर्शनमित्यत्र। २ I. O adds भूयस्सु दर्शनं वा। ३. I. O. adds न तृतीयः। तथाहि—यत्र पृथिवीत्वं तत्र लोहलेख्यत्वमिति व्याप्तौ हीरकादौ व्यभिचारात्। ४. P reads यावता। ५. I. O. reads तदपि मन्दम्। ६. P reads व्याप्तिविरोधिनी। ७. P reads ०शङ्कादूषणमेव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र गौरवपराहतेरुक्तत्वात् । नन्वव्यभिचारस्यैवानौपाधिकत्वोपग्राहकमस्तु,[1] लाघवात् । न हि व्याप्तेरेव लाघवमनुकूलं न तु ग्राहक इति । मैवम्, नियतस्य हि ग्राहकत्वं, यथा वाऽव्यभिचारनियतमनौपाधिकत्वम्, एवमनौपाधिकत्वनियतोऽव्यभिचारोऽपि । अनयोः समनियतत्वेन प्रामाणिकत्वात् । एवमुभयोः ग्राह्यग्राहकभावे समानेऽपि तृतीयलिङ्गपरामर्शस्यानयोर्मध्ये किंविषयतयाऽनुमितिकारणत्वमस्त्विति विचारे लाघवादेवाऽव्यभिचारविषयतयैव तत्कारणत्वं कल्प्यते । न त्वनौपाधिकत्वविषयतया यत्प्रकारकतया परामर्शस्यानुमितिकारणत्वं स एवेह व्याप्तिपदार्थः । अनौपाधिकत्वादौ यदि स्वपरामर्शेण कोऽपि व्याप्तिपदं प्रयुङ्क्ते तन्न निवारयामः—इति सर्वं चतुरस्रमिति ॥छ॥[2] १९ ॥

---

१. $M_2$ reads नन्वनौपाधिकत्वग्रहस्यैवाव्यभिचारोपग्राहकतास्तु । २. I. O. adds समाप्तोयं व्याप्तिकलहः ॥ P reads इति व्याप्तिग्राहकतावादः । $M_1+M_2$ read छ ॥१८॥ Which means the two sections on व्याप्ति are treated as one chapter ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## २० विधिवादः ।

प्रवृत्तिपरवाक्यश्रवणानन्तरं प्रयोज्यस्य तत्तदर्थसम्बन्धव्यापारानुकूलां चेष्टां[1] पश्यन् तटस्थः स्वचेष्टायां कृतेः कृतौ च चिकीर्षायाश्चिकीर्षायां समानाधिकरणसमानविषयक ज्ञानस्यैवावधृतकारणभावः-इति प्रयोज्यस्यापि तत्कारणीभूतं ज्ञानमनुमाय तस्य ज्ञानस्य वाक्यजन्यताप्रवृत्तौ जनयितव्यायां शब्दव्यापारत्वं चावधारयति । तस्य[2] ज्ञानस्य प्रवृत्तिं प्रति जनकत्वम् ज्ञानत्वाद्यनवच्छेद्यं यद्विषयप्रकारावच्छेद्यतामादाय विश्राम्यति स प्रकारो विधीयते[3] ज्ञाप्यतेऽनेनेत्यनया व्युत्पत्त्या ज्ञानं कर्मविधिरुत्पाद्यते ।

तदुक्तं कुसुमाञ्जलौ–

"प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा ।
तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥" [5.7]

स प्रकारः किं प्रवृत्तिपरशब्दत्वं वा तद्व्यापारोऽभिधा वा भावना वा सैव नियोज्यप्रयोजनफलिका[4] वा इष्टत्वं वा संकल्पो वा वक्त्रभिप्रायो[5] वा कार्यता वा इष्टहेतुत्वं वा । एवं विप्रतिपत्तौ चरमः पक्षो गौतमीयानां, स एव युक्त इतरेषामप्रवर्त्तकत्वात् ।

तथाहि न तावदाद्यः । अश्रुतवाक्यस्य बधिरस्याव्युत्पन्नस्य च प्रवृत्तिदर्शनात् । अग्निष्टोमादिवाक्यजानां प्रवर्त्तकज्ञानानां प्रवृत्तिपरशब्दत्वाप्रकारत्वाच्च । नापि द्वितीयः । अभिधायाः पदार्थस्मृतिहेतुभूतपदतदर्थसम्बन्धात् सङ्केतरूपाद् भिन्नाया[6] असिद्धेः । नापि तृतीयः । भावनाज्ञानस्याप्रवर्त्तकत्वात्, तस्याश्च सर्वलकारवाच्यत्वात् असाधारण्येन लिङाद्यर्थत्वानुपपत्तेश्च । न च करोतीत्यादौ कृतेः स्वगोचरताविरोधेन सजातीयारम्भकत्वनिषेधेन[7] च संख्यैवाख्यातार्थ इति वाच्यम् । आख्यातोपस्थाप्यकृतेरनन्वयेऽपि तदुपस्थाप्यानुकूलत्वांशमादाय धात्वर्थकृतेरन्वयसम्भवात्[8] । न च सर्वलकारैः[9] कृतिरभिधीयत इत्यसिद्धमिति वाच्यम् । भिन्नसमयानुशिष्टानां लडादीनाम् अर्थस्य कृत्यैव व्याकारात् । न च फलानुकूलव्यापार एषामर्थो[10], न कृतिः, कृतिरप्यनेनोपाधिनेति वाच्यं, नियमतः

---

१. P reads स्वचेष्टां । २. P adds च here । ३. P reads अभिधीयते । ४. P reads ०प्रयोजनिका । ५. P+I. O. read वक्तुरभिप्रायो वा । ६. $M_1$ reads सङ्केतभिन्नायाः । ७. P reads ०विरोधेन । ८. P+I. O. read अनन्वयप्रसङ्गाभावात् । ९. P reads सर्वलकारेण । १०. P reads एवायमर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृत्यैव तेषामर्थस्य व्याकारात् । गृहकन्दरादौ कृताकृतबुद्धिविषयनैयत्याच्च । न च कथं चेतनाचेतनसाधारणः कर्तृव्यवहारो रथो गच्छतीत्यादौ समर्थयितव्य[१] इति वाच्यम् । काकेभ्यो दधि रक्ष्यतामित्यत्र दध्युपघातकतात्पर्यककाकपदवदत्रापि लडादिपदस्य कृतिशक्तत्वेऽप्यनुकूलव्यापारतात्पर्यकत्वात्[२] ।

न चानुकूलत्वं लडादिवाच्यम् । अनुकूलत्वेनाक्षेपात् कृतेरिति[३] वाच्यम् । अनुकूलत्वं व्यापारान्तरस्यापि सम्भवतीति तदनाक्षेपकत्वात् । न च लडादीनां फलवाचकता धातोस्तु[४]तदनुकूलव्यापारवाचकताऽस्त्विति वाच्यं, विकल्पासहत्वात् । तथाहि—लडादीनां फलसामान्याभिधायित्वं वा फलविशेषाभिधायित्वं वा । नाद्यः । फलसामान्यज्ञानस्या[५]प्रवर्त्तकत्वात् पचतीत्युक्ते फलविशेषान्वयबोधानुपपत्तेः[६] । न द्वितीयः । यागादिफलविशेषाभिधायित्वे पाकादिफलविशेषालाभात् । धातोस्तु फलमात्रानुकूलव्यापाराभिधायित्वं वा फलविशेषानुकूलव्यापाराभिधायित्वं वा । नोभौ । अवश्योपजीव्यत्वेन विशेषणांश एव फले शक्तिकल्प[७]नस्योचितत्वात् । यथा काष्ठेन पचति तथा पाकेन पचतीत्यादिप्रयोगप्रसङ्गाच्च ।

अस्तु तर्हि नियोज्यप्रयोजनफलिका भावनेति पक्षः । तथाहि—नियोज्यप्रयोजनं निसर्गसुन्दरतया स्वर्ग एव, 'स्वर्गकामो यजेत'इत्यादिवाक्यादवगम्यते । लिङभिहितभावनायां[८] फलापेक्षणात् । समभिव्याहारविशेषात्[९] स्वर्गस्यैव भावनान्वयः । न चान्तरङ्गतया यज्यर्थेनैव लिङर्थस्य साध्यसाधनभावेनैवान्वये याग एव भाव्यतया प्रतीयते बहिरङ्गतया तु न स्वर्ग इति वाच्यम् । ग्रामं गच्छतीत्यादौ भाव्यमाने गमने ग्रामसंयोगस्येव भाव्यमाने यागे स्वर्गस्य फलत्वेनाविरोधात्[१०] । तथा च । स्वर्गफला यागजनिका भावनेति वाक्यार्थनिष्पत्तौ भवति तज्ज्ञानाद्यागे[११]स्वर्गकामस्य प्रवृत्तिरिति मतम् ।

एतदपि न मन्यामहे । भावनाज्ञानस्य भावनायामजनकत्वात् इत्युक्तप्रायत्वात्[१२] स्वर्गफलो याग इति [१३]प्रवृत्त्युपपत्तेरधिकस्यानिवेशनाच्च ।

१ P reads समर्थनाय । २. P reads only दध्युपघातकतात्पर्यकत्वात् । ३. I. O.+$M_2$ add लाभः here । ४. P adds तु here । ५. P reads फलसामान्यस्य । ६. P reads बोधानापत्तेः । ७. P reads फलकल्पनस्य । ८. P reads लिङ्विहितभावनायाः । ९. P reads समभिव्याहारदर्शनात् । १०. P reads 'स्वर्गफलकत्वेन । ११ P drops यागे । १२. P reads इत्युक्ताभिप्रायत्वात् । १३ $M_1$ adds ज्ञानात् here ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमङ्गीकारे प्रतिज्ञान्तरापातात् हितोपायताविधिप्रवेशाच्च ।

नापि पञ्चमः । इष्टत्वं हि इच्छाविषयत्वं तदिच्छाज्ञानस्याप्रवर्त्तकत्वात्[1] ।

किं च इच्छा किं विषये विशेषणम् वा उपलक्षणं वा । नाद्यः । इच्छायामपि प्रवृत्तिप्रसङ्गात् । न द्वितीयः । विकल्पासहत्वात् । तथाहि उपलक्ष्यं सुखादिकं[2] वा चिकीर्षाजनकज्ञानविषयत्वं वा अन्यद् वा । नाद्यः । स्वर्गादिज्ञानेऽपि यागादिनियतविषयप्रवृत्त्यनुपपत्तेः[3] फलस्य चाप्रसिद्धस्य प्रवृत्त्यगोचरतया व्युत्पाद्यत्वात् । अनुगमाच्च । न द्वितीयः । चिकीर्षाजनकज्ञानविषयतावच्छेदकप्रकारस्य[4] निरूप्यमाणत्वात् । नापि तृतीयः । तद्निर्वचनात्[5] । इष्टत्वज्ञाने प्रवृत्तौ सागरमणावपि प्रवृत्तिप्रसङ्गात् । साध्यत्वेन विशेषणीयमिति चेन्न[6] । साध्यताज्ञाने साधनविषयतानियमात् हितसाधनताविधिप्रवेशात् ।

किञ्च किमिष्टत्वम् । इच्छामात्रविषयत्वं वा । तद्विशेषचिकीर्षाविषयत्वं वा । साऽपीच्छा फलस्य धात्वर्थस्य वा, सापि किं वक्तुर्वा प्रतिपाद्यस्य वा यस्य कस्यापि वा । नाद्यः । वक्तुः फलेच्छाया ज्ञानस्य प्रतिपाद्यप्रवृत्तौ आज्ञाध्येषणातिरिक्तायाँ[7] अजनकत्वात् । न द्वितीयः । प्रतिपाद्यगतफलेच्छायाः सत्याः प्रत्यक्षत्वेन तद्बोधकशब्दस्य निष्प्रयोजकत्वात् । असत्याश्च प्रतिपाद्येच्छायाः स्वज्ञानेन प्रवृत्तावजनकत्वात् । नापि धात्वर्थगोचरत्वं द्वितीयः पक्षः । धात्वर्थस्य साधनत्वापरिचये विद्यमाने प्रयोज्येच्छाविषयत्वज्ञानेऽप्यप्रवृत्तेः प्रतिपादकेच्छाया धात्वर्थगोचरायाः प्रतिपाद्यं प्रत्यप्रवर्त्तकत्वमित्यस्योक्तप्रायत्वात्[8] । न तृतीयः । अतिप्रसङ्गात् । द्वितीयोऽपि न तद्विशेषचिकीर्षेति पक्षः, उक्तोत्तरत्वात् ।

अथास्तु सङ्कल्पः षष्ठः पक्षः[9] । तथाहि स्वप्रवृत्तौ यद्धेतुत्वेनावगतं तदेव परप्रवृत्तावपि अनुमिनुयादिति स्वप्रवृत्तौ च कार्यमिष्टोपायः, अतः कुर्यामिति सङ्कल्पस्य हेतुत्वमेवधारितम्[10] । सङ्कल्पं विना हितोपायताऽनुसन्धानेऽपि[11]

१. P adds च here । २. $M_2$ reads उपलक्ष्यतावच्छेदकं सुखत्वादिकं वा । ३. P reads ०निवृत्त्युपपत्तेः । ४. P reads ०जनकज्ञाने विषयतावच्छेदकप्रकारस्य । ५. $M_2$ adds किंच here । ६. P+$M_2$ drop न । ७. P reads ०(अ)तिरिक्तायां जनकत्वात्. But शेषानन्त reads (अ)तिरिक्तस्य । ८. P reads प्रतिपाद्यं प्रति प्रवर्त्तकत्वम् इत्याद्युक्तप्रायत्वात् । ९. P reads तथाप्यस्तु षष्ठः पक्षः । १०. P reads अवधारयति । ११. P reads हितोपायतानुधावने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तेरभावादावश्यकत्वात् शब्दजायामपि प्रवृत्तौ सङ्कल्पस्य ज्ञानमेव हेतुतयानुमिनोति । तथा च स एव लिङाद्यर्थः । तन्न । सङ्कल्पस्य चिकीर्षारूपत्वे-नोक्तदोषानुकूलत्वात् । अतिरिक्तत्वे मानाभावात्

किञ्चेदमत्राऽऽलोचनीयं किं यस्मिन् जाते प्रवृत्तिरथ यस्मिन् ज्ञाते प्रवृत्तिः,[1] स लिङाद्यर्थः । आद्ये ज्ञानादेरपि[2] प्रवर्त्तकज्ञानविषयभावकल्पनप्रसङ्गः । द्वितीये तु सङ्कल्पस्य स्वरूपसत एव प्रवर्तकत्वात् कथमसौ ज्ञाप्यः ।

सप्तमस्तु वक्तुरभिप्रायो ज्ञानं वा इच्छा वा । आद्ये[3] अग्निकामस्य दारु-मथनभावना वक्तुर्ज्ञातेति[4] ज्ञानमुत्पाद्यम् । न चैतावता प्रयोज्यस्य प्रवृत्तिः, न चेष्टोपायतामनेनानुमाय प्रवर्त्तते[5] इति वाच्यम् । अनिष्टहेतोरप्याप्तेनै[6] वक्त्रा ज्ञायमानत्वात् । द्वितीये तु सा वक्त्रा विशेषिता अविशेषिता वा । न उभय-थाऽपि तज्ज्ञानादप्रवृत्तिः । अपि च सहप्रयोगप्रश्नोत्तरहेतुहेतुमद्भावानुपपत्ति-भीतैरत्रभवद्भिर्नेष्टोपायत्वादिर्लिङाद्यर्थोऽभ्युपेयते । [7]नूनं वक्त्रभिप्रायार्थत्वे-ऽपि ममेदं त्वया क्रियमाणमिष्टमतः कुरु किमित्येवं कर्त्तव्यं यतः स्वत्कृतिरत्र ममेप्सिता इत्यादेर्भयहेतोरत्रापि सत्त्वादिदमपि नाङ्गीकारमर्हति । न चेच्छा-र्थत्वमाज्ञादौ[8] क्लृप्तमिति तदनुरोधेनात्रापि तथा कल्पनम्[9] । सह प्रयोगा-नुपपत्तेरेव ।

नाप्यष्टमः । तथाहि—किं तत्कार्यत्वं कृतिसाध्यतामात्रं वा स्वकृति-साध्यतामात्रं वा स्वकृतिसाध्यत्वे सत्युद्देश्यता वा । नाद्यः । कृतिसाध्ये वि-षभक्षणादौ प्रवृत्तिप्रसङ्गात् । स्वकृत्यसाध्येऽप्यन्यैःकृतिसाध्यतामादाय प्रवृत्ति-प्रसङ्गाच्च । न द्वितीयः । विषभक्षणादौ[11] अनिष्टेऽपि स्वकृतिसाध्ये प्रवृत्ति-प्रसङ्गाच्च । न तृतीयः । उद्देश्यत्वस्यैव निर्वक्तुमशक्यत्वात् ।

तथाहि—किमुद्देश्यत्वं इच्छामात्रविषयत्वं[12] वा इच्छामात्रविषयत्वावच्छे-दकरूपवत्त्वं वा चिकीर्षाविषयत्वं वा चिकीर्षाविषयतावच्छेदकरूपवत्त्वं वा

---

१. P+I. O. drop प्रवृत्तिः । २. P reads प्रवर्त्तकज्ञानस्यापि प्रवृत्तज्ञानविषय० । ३ I. O. adds अग्निकामो दारुणी मथ्नीयादित्यत्र । ४. P reads ०वक्तृज्ञानेति । ५. P reads प्रवर्त्तताम् । ६. P reads (अ)व्याप्तेन । ७. P reads ननु । ८. P reads इच्छात्वम् । ९. P reads स्यात् । इदमपि नाङ्ग तथा कल्पनम् । १०. P reads परकृति० । ११. P+I. O. drop विषभक्षणादौ । १२. There are in all 10 विकल्पs here. I.O. misses one of them (the first). P misses two of them (the fifth and the sixth). Both P and $M_1$ add one more विकल्प given within brackets [.......] above. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इच्छामात्रकारणीभूतज्ञानविषयत्वं वा चिकीर्षाकारणीभूतज्ञानविषयत्वं [वा इच्छामात्रकारणीभूतज्ञानविषयतावच्छेदकरूपवत्त्वं वा पाठः] चिकीर्षाकारणीभूतज्ञानविषयतावच्छेदकरूपवत्त्वं वा कृतिसाध्यत्वे सति स्वरूपमेव वा चिकीर्षाजन्यकृतिसाध्यत्वं वा अन्यद्वा । नाद्यः स्वानिष्टे परेच्छागोचरे प्रवृत्तिप्रसङ्गात् । न द्वितीयः । सुखे दुःखाभावे भोगे च प्रवृत्तिप्रसङ्गात् । यागादावुपायत्वातिरिक्तस्यावच्छेदकस्य निर्वक्तुमशक्यत्वात् । न चेष्टत्वमेव तदवच्छेदकमात्माश्रयप्रसङ्गात् । न तृतीयः । चिकीर्षाज्ञा[1]नस्यापि प्रवर्त्तकत्वप्रसङ्गात् । अन्योन्याश्रयप्रसङ्गाच्च । चिकीर्षायां[2] सत्यां तद्बोधो यागादौ चिकीर्षा च तस्मिन् सतीति । नापि चतुर्थः । अननुगमात् । अनुगतस्य[3] निर्वक्तुमशक्यत्वात् । शक्यत्वे वा उपजीव्यत्वे तज्ज्ञानस्य प्रवर्त्तकस्यौचित्यात् । न पञ्चमः । परेच्छाकारणीभूतज्ञानविषयेऽपि प्रवृत्तिप्रसङ्गात् । स्वीयविशेषणेऽपि ज्ञानज्ञानस्यापि प्रवर्त्तकत्वापत्तेः[4] । अत एव न षष्ठः । नापि सप्तमः । तस्यैव ज्ञानस्य निरूपयितुमशक्यत्वात् । नाष्टमः । स्वरूपमात्रज्ञानस्याप्रवर्त्तकत्वात् । स्व[5]रूपविशेषाभिधानेऽपि तस्यैव निर्वक्तव्यत्वापातात् । नोपान्त्यः । श्रमस्यापि[6] चिकीर्षाजन्यकृतिसाध्यत्वेन तत्रापि प्रवृत्तिप्रसङ्गात् । चि[7]कीर्षाज्ञानस्यापि प्रवर्त्तकत्वापाताच्च[7] । नान्त्योऽनिर्वचनात् ।

नन्वस्तु चरमः पक्षः । तथाहि—मत्कृतिसाध्ययागसाध्यः स्वर्ग[8] इत्येतदेवाभिसंधाय यागे प्रवर्त्तते । इदमेव परेषां कार्यतापदेन विवक्षितम् । स्वप्रवृत्ताविदमेव ज्ञातं सत् कारणं बालस्यापि स्तनपानादिप्रवृत्तौ संस्कारवशादुन्नेयम् । न च साधनतया समं[9] समानसंवित्संवेद्यतया विनिगमनाविरह इति वाच्यम् । समानसंवित्संवेद्यत्वस्यैवासिद्धत्वात् । तथाहि यागसाध्यस्वर्ग इत्यत्र यागनिरूपितनियतोत्तरभावः स्वर्गे प्रतीयते न तु स्वर्गनिरूपितनियतपूर्वसत्त्वं यागे । ननु यत्र घटसाधनं दण्ड इति वा[10]क्यात् प्रथमत एव साधनता प्रतीयते तत्र किं तज्ज्ञानान्न प्रवर्त्तते । आपाततस्तावदेवं[11] किन्तु साधनताज्ञानानन्तरं दण्डसाध्यो[11] घट इत्यनुमाय प्रवर्त्तते । तत्र किं विनिगमकमिति चेत् शृणु । तत्रापि तावत् कृतिसाध्यत्वमवश्यमुपजीव्यं तत्र विशेषणान्तरमव-

१. $M_1$ reads चिकीर्षाज्ञानज्ञानस्यापि । २. P reads सच्चिकीर्षायाम् । ३. P reads अननुगतस्य । ४. $M_2$ reads प्रवर्त्तकत्वात् । ५. P adds तथाहि । ६. P reads भ्रमस्यापि । ७–७ This is missing in P । ८ P reads ०साध्याः स्वर्गजाः । ९. P misses साधनया समम् । १०. P reads वाक्याप्रथमत । ११–११ This portion is missing from P ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्यं कल्पनीयं, तत् किं क्लृप्तसाध्यत्वं कल्पतामुत तद्विजातीयं साधनत्वमेव वा। तत्र द्वितीये पक्षे गौरवात् प्रथम एव ज्यायान्। इदमेव चोच्यते। "परेषामणुरपि विशेषोऽध्यवसायकर" इति।

न च फलविशेष्यकेण प्रत्ययेन कथं साधने प्रवृत्तिरिति वाच्यम्। साधनस्यापि प्रकारतया तद्विषयत्वात्। विशेष्यत्वस्यै[3] प्रवृत्तावतन्त्रत्वाद्। कृतिसाध्यो यागः स्वर्गसाधक इति यागविशेष्यकस्यापि ज्ञानस्य सम्भवादिति। मैवम्। यथा साजात्यं तव विनिगमकं तथा ममापि क्लृप्तकृतिसाध्यत्वप्रकारस्य साधनत्वसामान्याधिकरण्यं[4] विनिगमकम्। तथा च साध्यसाधनताज्ञानस्यैव प्रवर्त्तकत्वं नतु साध्यप्रयोजनज्ञानस्य। किञ्च कृतिसाध्यत्वमुपजीव्यमेव नेष्यते अपि तु कृतिसाधनको यागः स्वर्गसाधनमिति ज्ञात्वा प्रवर्त्तते। तथा च "अणुरपि विशेषोऽध्यवसायकर" इति उभयत्र दत्तपदं नैकत्र पक्षपातमालम्बते। तत्रापि विनिगमनाविरहेऽपि न काचित् क्षतिरिति ध्येयम्।

नन्वेवमिष्टसाधनताज्ञानस्यापि न प्रवर्त्तकत्वम्। असाध्येऽपीष्टसाधने प्रवृत्तिप्रसङ्गात्। कृतिसाध्यत्वेन विशेषणान्नैवमिति चेन्न। अन्यक्रियमाणे कारीर्यादावपि प्रवृत्तिप्रसङ्गात्। स्वकृतिसाध्यत्वेन विशेषणान्नैवमिति चेन्न। स्वकृतिसाध्ये अन्येष्टसाधने स्वानिष्टसाधने[7] प्रवृत्तिप्रसङ्गात्। इष्टत्वमपि स्वीयत्वेन विशेषणीयमिति चेन्न। तथाभूतेऽतीतभोजने प्रवृत्तिप्रसङ्गात्। साध्यत्वसाधनत्वयोर्विरोधाच्च। न हि यदेवोत्तरभावि तदेव पूर्वभावि सम्भवति। निरूपकभेदेनाविरोधे पूर्वदोषापरिहारात्। स्वकृतिव्यतिरेकेण यन्न सिध्यति स्वेष्टसाधनं चेति ज्ञानान्नैतद्दोषः इति चेत् न। अल्पेष्टसाधने प्रवृत्तिप्रसङ्गात्। किं च यत् प्रति साधनत्वं तदिष्टं किं विवक्षितम्। वर्त्तमानेच्छाविषयत्वं इति चेन्न। इच्छाज्ञानस्यापि प्रवर्त्तकत्वप्रसङ्गात्। इच्छाविषयतावच्छेदकरूपवत्प्रतिसन्धानेनैमिति चेन्न। तत्त्वादेव। इच्छोपलक्षणं, न विशेषणमिति[13] चेन्न। स्वर्गापवर्गगतस्यैकस्योपलक्षणस्याभावेनाऽननुगमात्।

१. P reads तद्विजातीयसाधनम् only। २. P reads परेषां मनुरपि। ३. P
·eads विशेष्यस्य। ४. P reads साध्यताप्रकारकस्य सामानाधिकरण्यम्। ५. P reads
ाध्यसाधकभावस्य प्रवर्त्तकत्वं न तु साध्यप्रयोजनतेति। शेषानन्त supports the reading
ın P। ६. P reads पक्षायतम्। ७. P drops स्वानिष्टसाधने। ८. P drops न।
९. P reads रूपभेदेन। १०. P reads नैवम्। ११. $M_2$ adds बह्वनिष्टसाधने च।
१२. $M_2$+P read ०रूपवत्त्वमिति प्रतिसन्धानम्। १३. P misses न विशेषणम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च इष्टोपायताज्ञानमिच्छाद्वारा कारणं तच्चेच्छाजनकत्वे सति सिध्यति। इच्छाजनकत्वं चेष्टसाधनताज्ञानस्य न सम्भवति व्यभिचारात्। तथाहि—किं तस्येच्छामात्रं वा जन्यम् इच्छाविशेषः चिकीर्षा वा। न तावदाद्यः। उपायताज्ञानं विनापि स्वर्गे भोगे चेच्छादर्शनात्। न द्वितीयः स्वर्गादावपि चिकीर्षादर्शनात्।। कृत्या साधयितुमिच्छा हि चिकीर्षा सा स्वर्गादौ न दण्डवारिता।

किं चेष्टसाधनत्वस्य न विधित्वम्, अहरहः सन्ध्यामुपासीतेत्यादौ इष्टाभावेन तदुपायत्वासम्भवात्[1]। न कलञ्जं भक्षयेदित्यादौ चोपायताविधिपक्षे किं निषेध्यम्?। इष्टोपायत्वमिति चेन्न। बाधात्। न हि कलञ्जभक्षणं न किञ्चिदिष्टं प्रति साधनम्[2]। पर्युदासवृत्त्याऽनिष्टसाधनत्वं विधीयत इति चेन्न, नञोऽसमस्तत्वात्[3] क्रियानुविधायित्वाच्च। न च बलवदनिष्टाननुबन्धो निषिध्यते इति। भवेदेवम्। यदि बलवदनिष्टाननुबन्धीष्टसाधनत्वं विधिः स्यात्। नत्वेवं, किन्तु बलवदनिष्टानुबन्धित्वप्रतिसन्धानस्य[4] प्रतिबन्धकत्वमिति। नन्वेतावतापि कार्यत्वं विधिरिति न निर्व्यूढम्। एतावदेव प्रकृते साध्यमिति चेन्न। कार्यताविधिवादिनोऽभिप्रायापरिज्ञानात्[5]। तथाहि—चिकीर्षाजन्यकृतिसाध्यत्वमेव तावत् कार्यत्वम्। न च चिकीर्षाज्ञानस्यापि प्रवर्त्तकत्वप्रसङ्गः[6]। तस्याः[7] कृतिविशेषोपलक्षकत्वात्। तस्य च कृतिविशेषस्य[8] गुणजात्यनङ्गीकारवादिनामपि चिकीर्षाकारणत्वनिर्वाहार्थं स्वीकर्त्तव्यत्वात्। अन्यथा कीदृशं प्रयत्नं प्रति चिकीर्षा कारणं स्यात्। प्रयत्नमात्रे[9] व्यभिचारात्। गुणगतजातिवादिनां तु चरणप्रसारिकार्यां अप्यसम्भवात्। तथाच कृतिविशेषसाध्यत्वमेव विधिः कृतिसाध्येष्टसाधनत्वापेक्षया तस्य[11] लघुत्वात्। स्वर्गापवर्गादीन् प्रति साधारणत्वाच्च।

न च श्रमेऽपि प्रवृत्तिप्रसङ्गः। श्रमस्य चिकीर्षाजन्यकृतित्वेन कृत्यसाध्यत्वात्[12]। द्वेषयोनिप्रयत्नादपि श्रमदर्शनात्। न च चिकीर्षाजन्यकृतिसाध्यत्वेनातीतभोजनादौ प्रवृत्तिप्रसङ्गः। सामान्यत इष्टापादानात् समय-

---

१. P reads (अ)सद्भावात्। २. P reads अनिष्टसाधनम्। ३. P reads नञोऽसम्भवात्। ४. P reads प्रति साधनस्य। ५. P reads (अ)नभिज्ञानात्। ६. I. O. reads प्रवृत्तिप्रसङ्गः। ७. I. O. reads तथास्याः। ८. P reads कृतिसाध्य-विशेषस्य। ९. P reads ०मात्रं प्रति। १०. P reads करया अप्यनुपपत्तेः। ११ P drops तस्य। १२. P कृत्या साध्यत्वात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषप्रवृत्त्यापादने त्वतीतत्वात्। साध्यत्वाभावेनापादकत्वाभावात्। नन्वेवं स्वर्गार्थी स्वचिकीर्षाजन्यकृतिसाध्यताज्ञानात् प्रवर्त्तते, स्वर्गार्थिचिकीर्षाजन्य-कृतिसाध्यत्वं तु दण्डादिसाधारणमतस्तत्रापि प्रवृत्तिप्रसङ्ग इति। मैवम्। स्वर्गेष्टसाधनतालिङ्गकचिकीर्षाजन्यकृतिसाध्यताज्ञानस्य प्रवृत्तिं प्रति जनकत्वात्। न च तद्धेतोरेवास्तु, तेन किमिति न्यायेनेष्टसाधनताज्ञानमेव प्रवर्त्तकमस्त्विति वाच्यम्। इष्टसाधनताज्ञानेऽपि अस्य ज्ञानस्य[२] तुल्यत्वात्। न च दण्डादौ तथाभूतं ज्ञानम्। यदा तु तथाभूतो भ्रमो भवति तदा प्रवर्त्तत एव। स्वर्गार्थिचिकीर्षाजन्यकृतित्वेन रूपेण यत् कृतिसाध्यं तत् ज्ञानस्य वा प्रवर्त्तकत्वमिति।

अत्रोच्यते। तदर्थिचिकीर्षाजन्यकृतित्वेन रूपेण साध्यत्वं तत्साधनेऽपि नास्ति अन्यथा भ्रमात् प्रवृत्तस्य घटपटादिचिकीर्षाजन्यकृतितो दण्डाद्युत्पत्तिर्न स्यात्। न चात्रेष्टापत्तिः, तथाभूतकृतेरपि दण्डाद्युत्पत्तिदर्शनात्। किञ्चानुपाये उपायार्थी प्रवर्त्तमानो यदि[३] कृतिविशेषसाध्यताज्ञानात् प्रवर्त्तते इति स्वीकर्त्तव्यम्, तदानुपायताप्रतिसन्धानदशायामपि चिकीर्षाजन्यकृतिसाध्यताज्ञानसम्भवात् तत्रापि प्रवृत्तिप्रसङ्गः[४]। न च तत्रानुपायताप्रतिसन्धानमेव निवर्त्तकम्[५], एवं सत्यनुपायताप्रतिसन्धानाभावः कारणम् इति वाच्यम्। तथा चोपायताज्ञानमेव स्वीकर्तुं युक्तम्, लाघवात्।

एवं मण्डलीकरणादावपि स्वर्गकामचिकीर्षाजन्यकृतिसाध्यताज्ञानात् प्रवर्तेत इति वाच्यम्। तथा च तत्र तस्य सत्त्वात् तद्बोधकस्य वाक्यस्य[६] प्रमाणत्वापत्तिः। न च तत्र स्वर्गसाधनताबाधाच्चिकीर्षाजन्यकृतिविशेषसाध्यताबाधः–इति युक्तमसाधनेऽपि[७] तथाभूतचिकीर्षासम्भवस्य पूर्वमुक्तत्वात्। न चेष्टसाधनतालिङ्गककार्यताज्ञानस्यापि प्रवर्त्तकत्वमिति वाच्यम्। व्यभिचारेण लिङ्गत्वायोगात्। न चेष्टसाधनतालिङ्गककार्यताज्ञानं यागादौ संभवत्यपि, कार्यताविधिपक्षे[८] इष्टसाधनत्वस्यैवालाभात्[९]। यथाकथञ्चिद् लाभे वा तत्प्रवर्त्तकत्वमस्तु, कार्यताज्ञानेऽपि तस्यैवोपजीव्यत्वात्। न हि कार्य-

१. P reads स्वर्गचिकीर्षाजन्य०। २. P reads पक्षस्य, I. O. reads न्यायस्य। ३. P drops यदि and reads ज्ञप्तिकृति०। ४. P reads अतिप्रसङ्गः। ५. $M_1$ repeats here several lines। ६. P reads बोधकवाक्यस्य। ७. P reads अवसानेऽपि। ८. P reads कार्यतापक्षे। ९. $M_1$ reads अभावात्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताज्ञानमात्रं प्रवर्त्तकमित्युक्तं प्राक् । इष्टसाधनतारूपलिङ्गधीपूर्वककृतिविशेष-साध्यताज्ञानापेक्षया कृतिसाध्येष्टसाधनताज्ञानस्य लघुत्वात् । तव तु त्रयं मम तु द्वयमिति[1] विपरीतमापतितम् । अत एवानाप्तोक्ते मण्डलीकरणादौ साधनताभ्रमात् प्रवृत्तोऽपि विशेषदर्शनानन्तरं कृतिविशेषसाध्यताप्रतिसन्धानेऽपि न प्रवर्त्तते । तस्मात् सतोऽसुन्दरे विषये यावत् कृतिसाध्येष्टसाधनता न प्रतिसन्धीयते तावदेवोपायार्थी चिकीर्षतीति मनोरथमात्रमेव परेषां, तदुपजीवने तु तदेव युक्तमुत्पश्यामः ।

न च [2]साधनताविधिपक्षे 'तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजते' इत्यनेनैव[2] साधनतालाभात् नानेन साधनताप्रतिपादकविध्यनुमानमिति वाच्यम् । अविनाभावबलेन हि विधिकल्पनं व्यापकबाधेन व्याप्यबाधशङ्कोद्धारणार्थं[3] वा न तु साधनतालाभार्थम् ।

नन्विच्छात्वावच्छिन्नकार्यताप्रतियोगिककारणतावच्छेदकं किं ज्ञाननिष्ठमिति वक्तव्यमनुगतम् । न किञ्चिदिति ब्रूमः । तर्हि ज्ञानस्येच्छायां कथं कारणत्वम्, स्वर्गे सुखत्वप्रकारकज्ञानात् दुःखाभावे च तत्प्रकारकज्ञानात् तदुपाये साध्ये तदुपायताज्ञानादिति गोमयादिप्रभवैर्वृश्चिकवदित्यवधातव्यम्[4] । अन्यथा कार्यताविधिवादिनापि[5] किमत्र वक्तव्यम् । तथाहि—चिकीर्षाजन्यकृतिविशेषसाध्यताज्ञानं न[6] सर्वत्रेच्छाकारणं, असाध्येऽपि तक्षकचूडारत्नादाविच्छादर्शनात् कृतिविशेषसाध्यत्वाप्रतिसन्धानेऽपि स्वर्गादौ[7]विच्छादर्शनादित्यलमतिपीडया ॥

ननु हितोपायताविधिवादिनां[8] 'न कलञ्जं भक्षयेत्'इत्यादौ किं निषेध्यम्? न तावत् कलञ्जभक्षणस्य हितोपायत्वं, बाधादित्युक्तत्वात्[9] । नापि बलवदनिष्टाननुबन्धः । तज्ज्ञानस्याप्रवर्त्तकत्वेन तस्य विधिप्रत्ययानुपस्थाप्यत्वात्[10] तदुपस्थितेनैव निषेधान्वयात्[11] । न च बलवदनिष्टानुबन्धित्वप्रतिसन्धानेऽपि[12] प्रवृत्त्यापत्तिः, तत्प्रतिबन्धकत्वस्य प्रागेवावेदितत्वात्[13] । न च क्रियान्वये-

१. $M_2$ adds गौरवमिति here । २–२. This portion is missing in P । ३. P reads शङ्कावारणार्थम् । ४. P+$M_1$ read गोमयादिवृश्चिकवत् । ५. P reads कार्यविधिवादिना । ६. न is missing in P । ७. P+I. O. read सुखादौ । ८. P reads हितोपायताविवादिना । ९. P reads हितोपायताबाधात् । १०. P reads (उ)पस्थाप्यत्वाभावात् । ११. P reads निषेधान्वयः । १२. P reads बलवदनिष्टाननुसन्धानेऽपि । १३. P reads प्रागेवोदितत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽपि निषेधस्य "यजतिषु ये यजामहं कुर्वन्ति नानुयाजेषु"इति यथानुयाजेतरस्य यजतिष्विति पर्युदासेनार्थो लभ्यते तथात्राप्यनिष्टसाधनमित्यर्थः पर्यवस्यतीति वाच्यं, वाक्यभेदभयाद् गत्यन्तराभावात् तत्र तथाकल्पनात् । अत्र तु तदभावादिति । मैवम्[1] । बलवदनिष्टानुबन्धिज्ञानस्य हि प्रवृत्तिप्रतिबन्धकत्वे तदभावस्य कारणता वाच्या । तदा विनिगमनाभावात् तदभाववबलवदनिष्टाननुबन्धित्वज्ञानयोरपि कारणत्वम्[2] ।

एवं बलवदनिष्टाननुबन्धीष्टसाधनताविधिरिति[3] । स एव लिङादिप्रत्ययवाच्यः । तथा च बलवदनिष्टाननुबन्धेन विधिप्रत्ययोपस्थाप्येन विशेषणेन नञोऽन्वय इत्यनिच्छयाऽपि स्वीकरणीयम् । अन्यथा कार्यताविधिवादिनाऽपि किं वक्तव्यम्[4] । न हि तस्यापि चिकीर्षाजन्यकृतिसाध्यत्वं कलञ्जभक्षणस्य निषेध्यं, बाधात् । नाऽपि कलञ्जभक्षणनिवृत्तिनियोगो[5] वाच्यः । फलाभावेन[6] तथाभूते नियोगे प्रमाणाभावात् । नापि कलञ्जभक्षणप्रागभावः[7] साध्यः । तस्यानादित्वेनासाध्यत्वात् । न च योगवत् क्षेमस्यापि पुरुषार्थत्वात् प्रागभावपरिपालनमेव वाच्यम् । न, प्रागभावस्योत्तरावधित्वनियमेन तत्परिपालनस्याशक्यत्वात्[8], तदन्यस्य तत्र निषेधस्यासम्भवादिति ।

नन्वहरहः सन्ध्यामुपासीतेत्यत्र किमिष्टं यत् प्रति साधनत्वं बोध्यम् । न तावत् प्रत्यवायपरिहारः, प्राक्प्रत्यवाये[10] प्रमाणाभावात् । नापि रात्रिकृतपापाभावः सर्वत्र तदभावात् नित्यताविरोधाच्च । अहरहः स्नायादित्यत्र तदभावात् । न चानुपासनं प्रत्यवायहेतुरतस्तदभाव एवोपासनं साध्यते[11] इति वाच्यम् । उपासनस्य फलत्वे साधनत्वेनान्वयानुपपत्तेः । न चोपासनं प्रयोजनं सम्भवति । तद्धि मुख्यं वा गौणं वा । नाद्यः । सुखदुःखाभावयोरेव तथात्वात् । नेतरः । प्रयोजनोपायस्यैव तत्त्वात्[12] । न च सैन्ध्योपासनेन किञ्चित् प्रयोजनं जन्यते । यत्तु कैश्चिदुक्तं प्रत्यवायविरोध्येवाऽपूर्वं सन्ध्यो-

१. P drops मैवम् । २. P reads कारणत्वात् । ३. P reads (इ)ष्टसाधनं विधिः । ४. P reads वाच्यं । ५. $M_1$ reads भक्षणे निषेधनियोगः । ६. P reads फलाभावे च । ७. P reads ०भक्षणस्य प्रागभावः । ८. P reads कर्तुमशक्यत्वात् । ९. P+$M_1$ read प्रतिसन्धानेन । १०. P reads प्रागप्रत्यवाये । ११. P+I. O. read तदभावश्चोपासनं साध्यम् । १२. P reads तथात्वात् । १३. P drops सन्ध्या- ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पासनेन जन्यते । तच्च प्रत्यवायविरोधित्वेन काम्यं न त्वपूर्वत्वेनेति नापूर्वत्वक्षतिरिति[1] । तत् पूर्वोक्तेनैव विकल्पेन दूषितम् । तथाभूतेऽपूर्वे प्रमाणाभावाच्च । अन्यथाऽनुपपत्त्या कल्पनीयमिति चेन्न[2] । अन्यथोपपत्तेर्वक्ष्यमाणत्वात् । तस्मान्नित्यस्थले काम्याभावादिष्ट[3]साधनताविधिरिति मनोरथमात्रम् । मैवम् । यत् तावदुक्तं सन्ध्योपासनं प्रयोजनं न सम्भवति मुख्यगौणविकल्पगिलित[4]त्वात् तदयुक्तम् । मुख्य एव प्रयोजनेऽन्तर्भावात् । समानाधिकरणेच्छाजन्येच्छाविषयत्वस्य प्रयोजनाजनकप्रयोजनत्वस्य वा मुख्यप्रयोजनलक्षणत्वात् । एतदेव निरुपाधीच्छाविषयत्वमिति गीयते । न चैतल्लक्षणद्वयं[5]मुपासनेऽसिद्धम् । तथाहि[6] उपासनस्य दुःखहेत्वभावत्वेन काम्यत्वम् ।

न च दुःखहेत्वभावः किञ्चिदर्थानुकूलतया काम्यते किन्तु स्वरूपत एव, सर्पकण्टकादिपरिहारे[7] तथावधारणात् ।

न चैवं मुख्यं द्विविधं सुखं दुःखाभावश्चेति विभागानुपपत्तिः, दुःखाभाव इत्यत्र दुःखपदेनैकविंशतिप्रभेदभिन्नस्य दुःखस्य विवक्षितत्वात् । यद्वा गौणमेवेदं[8] प्रयोजनम् । ननु कथं गौणत्वं, किञ्चित्प्रयोजनकं हि गौणं भवति[9] । न चानेन किञ्चित् प्रयोजनं जन्यते । एतदपि न । साधनता[10]ज्ञानजन्येच्छाविषयत्वस्यैव गौणलक्षणत्वात् । एतदसिद्धमिति चेन्न । यद्यपि हि न सन्ध्योपासनस्य स्वतः किञ्चित् प्रयोजनं प्रति साधनता[11] तथाऽप्यनुपासनस्य प्रत्यवायप्रतियोगिकसाधनताज्ञानजन्येच्छाविषयत्वम्[12] । तदभावत्वेन सन्ध्योपासनस्य सम्भवत्येव सर्पोपसर्पणस्य दुःखहेतुत्वज्ञानजन्येच्छाविषयत्वं तदभावस्वरूपत्वेनापसर्पणस्येतिवत् । एवं सन्ध्योपासनस्य प्रयोजनत्वे व्यवस्थिते तद्भावनाया एव इष्टोपायत्वेनान्वयः[13] । यद्वा लिङ्पदेनोपस्थिताऽपीष्टसाधनता इष्टाभावात् सन्ध्योपासने नान्वीयते[14] । न चैतावता इष्टसाधनताक्षतिः लिङादेरिष्टसाधनतायामेव शक्तेरवधारणात् ।

१. $M_1$ reads ०रित्यपि पूर्वोक्तेनैव । २. P drops न । ३. P reads काम्यादिष्टसाधनं । ४. P reads ०गलितत्वात्, I. O. reads विकल्पेन पीडितत्वात् । ५. P drops द्वयम् । ६. P drops तथाहि । ७. $M_2$ reads सर्वत्र कण्टकादिपरिहारे । ८. $M_2$ drops इदम् । ९. P reads सम्भवति । १०. P reads साध्यताज्ञान० । ११. P reads साधनम् । १२ P reads दुःखहेतुज्ञानजनितेच्छाविषयत्वम् । १३. P reads अंशोपायत्वेनान्वयः । १४. P reads नानुमीयते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्वेवं कथं सन्ध्योपासने प्रवृत्तिरिष्टोपायताया अभावादिति चेत्। आपाततस्तावदेवम्। उपासनस्य वेदबोधितत्वेन कर्त्तव्यतयाऽनुमा[1]यानन्तरम् "अकुर्वन् विहितं कर्म" इत्यादिवाक्यानुसन्धानादनुपासनस्य प्रत्यवायहेतुत्वेऽवगते तद्व्यतिरेकरूपस्योपासनस्य[2] काम्यत्वमवधार्य तदुपाये प्रवर्त्तते। न तूपासन एव। उपासनस्यायोग्यत्वात्। प्रकरणाद्युपस्थापितोपासनोपायेनैव साधनतान्वय इत्यपि कश्चित्।

नन्विष्टसाधनताविधिपक्षे[3]ऽपीच्छाज्ञानं प्रवर्त्तकं स्यात्। इच्छाविषयितावच्छेदकप्रकारवत् प्रतियोगिकसाधनताज्ञानं[4] प्रवर्त्तकमित्यपि न समीचीनम्। अत्रापि हीच्छा विशेषणं उपलक्षणं वा। आद्ये तद्भानस्यापि[5] प्रवर्त्तकत्वापत्तिः। द्वितीयेऽनुगतस्यैक[6]स्योपलक्ष्यस्याभावात् अननुगमापत्तिः। न चेच्छान्तर्भावेन शक्तिकल्पना युक्ता। इच्छाया स्वरूपसत्या एव प्रवर्त्तकत्वात्। न चेष्टत्वमुप[7]लक्षणीकृत्य स्वर्गोपायत्वादावेव विधिप्रत्ययस्य शक्तिः। अनेकार्थत्वप्रसङ्गात्। न च साधनतामात्रं शक्यम्। तन्मात्रज्ञानस्याप्रवर्त्तकत्वात्। सिद्धान्तव्याकोपाच्चेति।

मैवम्। साधनतामात्रमेव विधिप्रत्ययशक्यम्। न चैतावता लकारान्तरसाम्यापत्तिः। विधिप्रत्ययस्येतरलकारसाधारण्येनानुकूलप्रयत्नोपस्थापकत्वेऽप्यसाधारण्येन साधनताया अप्युपस्थापकत्वात्। स्वर्गसाधनत्वादिकं तु समभिव्याहारलभ्यम्। इष्टसाधनता शक्येतिपक्षेऽपि स्वर्गादिविशेषोपायतालाभार्थं[8] समभिव्याहारविशेषालम्बनप्रवर्त्तकतर्कस्योपजीव्यत्वात्[9]। इष्टसाधनता शक्येति व्यवहारस्तु वाक्यार्थत्वाभिप्रायेण न तु पदार्थाभिप्रायेणेति[10] न सिद्धान्तव्याकोपोऽपि। किञ्च फलेच्छा यद्यपि स्वरूपसत्येव प्रवर्त्तिका तथापि इष्टत्वे लिङादिशक्तिरङ्गीकार्या। अन्यथा स्वर्गोपायत्वादेरलाभात्। न च समभिव्याहारबलेन स्वर्गादिसाधनत्वलाभः, समभिव्याहारादपि तदेवाम्वेति यद्विनाऽन्वयापर्यवसानम्। न हि "स्वर्गकामो यजेत"इत्यत्र स्वर्गेण समं साध-

१. P misses अनुमायानन्तरम्। २. P misses (उ)पासनस्य। ३. P reads (इ)ष्टसाधनतापक्षे। ४. P reads प्रतियोगिसाधनताज्ञानम्। ५. P reads तज्ज्ञानस्य। ६. $M_1+M_2$ drop एकस्य। ७. P reads चेच्छामुपलक्षणीकृत्य। ८. P reads विशेषलाभार्थम्। ९. P reads ०विशेषालम्बनेन प्रवर्त्तकस्योपजीव्यत्वात्। १०. P misses न तु पदार्थाभिप्रायेणेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नतानन्वये तदपर्यवसानम् । साधनत्वं हि साध्यान्वयं विना न पर्यवस्यति[1] । तथा च याग एव साध्यत्वेनान्वेति न तु लब्धपुरुषान्वयो निराकाङ्क्षः स्वर्गः । पचतीत्यत्र पाक इव यागोऽपि लब्धाऽन्वय इति चेत् । एवं हि तुल्यत्वेऽपि सन्निहिततया यागस्यैव[2] तथात्वमस्तु, इष्टोपायताविधाने[3] तु यदिच्छाविषयत्वेनोपस्थितं तदेवान्वययोग्यमतस्तदभिधानमेव युक्तम् । अत एव "विश्वजिता यजेत"इत्यत्र तावन्नान्वयो यावन्नेष्टत्वेन स्वर्गोपस्थितिः ।

कश्चित् पुनराह । इष्टसाधनत्वमित्यत्र निरुपाधीच्छाविषयत्वमात्रमिष्टत्वम्, न पुनरिच्छाविषयत्वमात्रं, तथा च स्वर्गेणैवान्वयो न यागेनेति । तन्न । तथात्वे हि'अग्निकामो दारुणी मथ्नीयात्' इत्यत्र साध्यत्वेन अग्नेरन्वयो न स्यात् । तस्माद् बलवदनिष्टाननुबन्धिस्वकृतिसाध्येष्टसाधनत्वमेव निष्फलानिष्टफलाभ्यां व्यावर्त्तमानं विधिरित्येव युक्तम् । 'श्येनेनाभिचरन् यजेत'इत्यत्र प्रायश्चित्तबलेन बलवदनिष्टानुबन्धान्न[4] तदन्तर्भावेन विधिरिति चेन्न । तत्र योग्यतया साध्येष्टोपायत्वस्यैवान्वयात् । अपि च विहितम्लेच्छजनपदाभिचारमुद्दिश्य वेदे [5]श्येनयागाभिधानं युक्तम् , अन्यथा वेदप्रणेतुः आप्तत्वं भज्येत । अत एव समस्तस्यैव विधेरन्वयो योग्यः, लोभादिवशात् अविहितब्राह्मणाभिचारमुद्दिश्या[5]नुष्ठिते श्येने प्रायश्चित्तविधेरपि साफल्यमिति किमधिकेन ।

नन्वेवं जीवनयोनिप्रयत्नसाध्येऽभीष्टोपाये[6] च प्राणादिपञ्चके अपि किमिति न प्रवर्त्तते । मैवम् । प्राणादिपञ्चकं हि जीवनयोनिप्रयत्नसाध्यं, तत्क्रिया वा । नाद्यः । प्रमाणाभावात् । द्वितीये तु प्रवृत्तिः स्यात् इत्यत्र प्रवृत्तिपदेन किमभिमतम्[8] । प्रयत्नमात्रं वा तद्विशेषः कृतिर्वा । नाद्यः । इष्टापादनात् भवत्येव जीवनयोनिप्रयत्नो यतः । नापरः[7] । प्राणादिपञ्चकक्रियायाः कृत्यसाध्यत्वात् । जीवनयोनिप्रयत्नसाध्या हि सा । न चासौ कृतिः चिकीर्षायोनिप्रयत्नस्यात्र कृतित्वेनाभिमतत्वात् । अन्यथेष्ट-

१. P reads साधनतासामान्यं हि साध्यसामान्यान्वयमादाय पर्यवस्यति । २. P misses यागस्यैव । ३. P reads ०विधित्वे । ४. P reads (अ)नुबन्धानुसन्धानात् । ५-५. This is missing in $M_1$ । ६. P reads अपीष्टोपाये । ७-७. This is missing from P । ८. $M_2$ reads अभिप्रेतम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधनताल्लिङ्गककार्यतानुमानात् तत्रापि तत्र प्रवृत्तिप्रसङ्गः समान इति स्थूलः प्रमादः । किञ्च कृतिसाध्येष्टसाधनताज्ञानं चेद्भवति एतावता प्रवर्त्तेत एवेति नेष्यते । अपि त्वेतावतैव प्रवर्त्तते । यत्र त्वन्यथासिद्ध्यादिकं प्रतिबन्धकमापतति तत्राप्रवृत्तावपि न कारणताक्षतिरिति किं वारंवारं मर्मोद्घाटनेनेति ।

यत्तु कैश्चिदुक्तं फलेच्छा ज्ञातैवोपयुज्यते । तदहृदयवचनमित्युपेक्षितव्यमेव तथात्वे प्रमाणाभावात् इति आस्तां विस्तरः ॥छ॥१९[1]॥

१. I. O. and $M_1$ do not separate व्याप्तिवादः from व्याप्तिग्रहवादः. Hence the counting here is 19. P adds इति विधिप्रकरणम्, $M_2$ reads श्रीविधिवादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु सर्गोपायत्वेन कार्यत्वेन वा रूपेण क्रियाया अन्वय इति न युक्तम् । तत्र नियोज्यकर्त्तव्यत्वावगमाभावात् । कामी हि काम्यादन्यत् काम्याव्यवहितसाधनमेव कर्त्तव्यतयाऽवैति । न च सस्यार्थिनः कर्षकस्य व्यवहितोपाये कर्षणेऽपि प्रवृत्तिदर्शनान्नायं नियम इति वाच्यम् । तत्रापि हि व्यापारपरम्परामन्तर्भाव्यैव तथावगमो नान्यथा । तथात्वे मानाभावात् साक्षात् साधनतारूपविशेषबाधे परम्परामादायैव सामान्यप्रत्ययाच्च । अत एव सच्छिद्रघटबाधे छिद्रेतरत्वेन रूपेण घटेन जलमाहरेदित्यादौ घट-प्रतिपत्तिः ।

ननु विधिप्रत्ययस्यापूर्वे[1] केन रूपेण शक्तिः किं कार्यत्वेन वा क्रिया-तिरिक्तकार्यत्वेन वा स्थिरकार्यत्वेन वाऽपूर्वत्वेन वाऽन्यथैव वा । नाद्यः । क्रियासाधारण्यात् शक्याऽशक्यसाधारणस्य शक्यत्वानवच्छेदकत्वात् । अन्यथा प्रमेयत्वेनैव सर्वत्र शक्तिः स्यात् । नेतरः । घटादिसाधारण्यात् । नापरः । तत्त्वादेव । नोपान्त्योपि । पूर्वमनुपस्थितेः । उपस्थितावपूर्वत्वव्याघाताच्च । न चरमोऽनिर्वचनात् ।

मैवम् । स्थिरकार्यत्वमेव कार्यत्वमेव वोपलक्षणीकृत्यापूर्वे प्रवर्त्तमानं लिङ्पदं तर्कसंपादनया अपूर्वमवगमयति । न चैवं नित्यनिषेधापूर्वयोरलाभ-प्रसङ्गो दोषः । एकत्र निर्णीतेनाऽन्यत्रापि तथाकल्पनात् । न चैवं 'पुष्टि-कामो घृतं पिबेत्'इत्यादावपूर्वावगमप्रसङ्गः, वैदिकलिङ्त्वेन[2] नियमात् । यद्वा लोके क्रियामात्रस्य तद्व्यापारस्य[3] वा धातुसाम्यादेरेव लिङर्थत्वात् । न च नानार्थत्वापत्तिः लोके लक्षणयैवोपपत्तिरिति ।

अत्रोच्यते । साधनत्वस्य क्रियायामन्वययोग्यतया व्यापारे शक्ति-रित्यभिमतं परस्य । एतच्चानुपपन्नम् । तथाहि का सा योग्यता या क्रियायां नास्ति । न तावत् सजातीये अन्वयदर्शनं, केन केन हि प्रकारेण साजात्यमभिमतमायुष्मता, न तावद्येन केनापि, 'अग्निना सिंचेत्'इत्यादावपि योग्यतापत्तेः । नापि पदार्थतावच्छेदकेन प्रकारेण[5] साजात्यम् । अद्यजातो

१–१ This is missing from $M_1$ । २. P reads वैदिकलिङ्गेन । ३. P reads क्रियास्वतद्व्यापारस्य । ४. P reads only केन रूपेण । ५. P reads पदार्थतावच्छेदकरूपेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गौः पयः पिबतीत्यादौ तदभावात् । नाप्यन्या[१] काचिद्योग्यताऽशक्यनिर्वचनात् । तस्मात् बाधकप्रमाणाभाव[२] एव योग्यता, सा चात्र साधनत्वेन प्रकारेण विद्यते एव । न हि साधनत्वेन रूपेणाऽन्वयबाधः केनापि प्रमाणेन[३] । न च नियमतो व्यापारपरंपरामादायैवान्वयबोधः । प्रमाणाभावात् । न च साक्षात् साधनताबाधे परम्परासाधनता प्रतीयत इति एतावतैव क्रियाव्यापारे शक्तिरिति युक्तम् । छिद्रेतरत्वेऽपि शक्तिकल्पनापत्तेः । न चात्र नियमतः परम्परासाधनताप्रतीतिः । साक्षात्साधनत्वबाधाप्रतिसन्धानदशायां चरणप्रसारस्याप्यभावात्[४] ।

किञ्च साक्षात्साधनताबाधेऽपि न कारणतामात्रान्वयबाधः । कारणत्वं हि सामान्यम् । तत्र च साक्षात्वपरम्परात्वे विशेषणे । तथा च साक्षात्विशेषणबाधात्[५] तस्यान्वयो मा भवतु सामान्यान्वयस्तु केन वारणीयः, दण्डबाधे पुरुषान्वयवत् । एवं छिद्रबाधे छिद्रान्वयो मा भवतु[६] घटत्वेनान्वयस्तु तत्राप्यविरुद्ध एव । घटत्वस्य छिद्रसाधारण्यादन्वयानुपपत्तिरिति चेन्न । तथात्वेऽपि योग्यतया छिद्रेतरत्वस्यैवान्वयात् । न तु छिद्रेतरत्वेन[७], युगपद्वृत्तिद्वयविरोधात् ।

न चोपलक्षणेन शक्तिग्रहः, उपलक्ष्यस्याभावात् । न चाऽपूर्वत्वमेव उपलक्ष्यम्, उपलक्षणेन समं तस्य सम्बन्धाप्रतिसन्धानात् । प्रतिसन्धाने वाऽपूर्वत्वक्षतेः । न च कार्यत्वेन रूपेण लिङादेः शक्तिरन्यत्र प्रयोगवारणार्थं पङ्कजपदे पद्मत्ववदपूर्वत्वं प्रयोगोपाधिरिति वाच्यम् । अप्रतीतस्य प्रयोगोपाधित्वासम्भवात् । प्रयोगोपाधित्वस्यापि योगरूढिस्थले निरस्तत्वात् । न चैकत्र निर्णीतेन शास्त्रार्थेन नित्यनिषेधापूर्वयोर्लाभः, लोके क्रियायामेव शक्तेः । न चात्र लक्षणा प्रमाणाभावात् वैपरीत्यस्यापि सुवचत्वाच्च । अन्यथोपपत्तेर्दर्शितत्वाच्च ।

ब्रह्महत्यादिक्रियायाः नरकविशेषसाधनत्वग्रहोऽप्येवं न स्यात् । तत्र च परेण दुरदृष्टस्य कल्प्यत्वाऽभ्युपगमात् । अनुभवस्य स्मरणं प्रति संस्कार-

१. P reads नान्यथा । २. P reads प्रमाणविरहः । ३. P reads अन्वयनिश्चयः केनापि प्रमाणेन बाध्यते । ४. P reads अशक्यत्वात् । ५. P reads विशेषणे बाधात् । ६. I. O. reads छिद्रस्यान्वयो मा भूत्, $M_2$ reads छिद्रान्वयबोधो मा भवतु । ७. P adds here घटत्वस्य ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वाराग्रहे[1] कथं कारणता निश्चीयते । तत्रापि परोक्तदूषणगणस्यावकाशात् । तत्र द्वाराग्रहेऽपि साधनताग्रहे किमपराद्धं यागादिसाधनतया । तस्माद्-पूर्व एवायमपूर्वे वाच्यत्वाभिमानः परस्येत्युपरम्यते ।

ननु कल्पनाऽप्यपूर्वे न सम्भवति । अन्यथोपपत्तेः । तथा हि याग-ध्वंस एवापूर्वस्थानेऽभिषिच्यताम् । ध्वंसस्यानन्तत्वादनन्तफलप्रवाहापत्त्या-ऽनिर्मोक्षापत्तिरिति चेन्न । तावत्[2]समयफलजनकत्वस्वाभाव्यस्यै[3]पूर्व इव ध्वंसेऽपि कल्पनात् । धर्मिकल्पनातो धर्मकल्पना लघीयसीतिन्यायस्यात्र जागरूकत्वात् ।

"धर्मः क्षरति कीर्त्तनाद्"इत्यनेनैव धर्मस्य ध्वंसप्रतियोगित्वमवगम्यते । तत्तु ध्वंसस्य न सम्भवतीति विरोधात् । प्रायश्चित्तविधिवैफल्यप्रसङ्गात् । याग-प्रतिबन्धकताभयाँ[4]च्चात्रैवमिति चेत्, अस्तु तावदेवं तथापि साक्षादेव यागेन शरीरविशेष एव जन्यते तेन च समयान्तरे स्वर्गो जन्यते । यद्वा कालपरम्परैव व्यापारोऽस्तु क्रियाया एवं स्थैर्यं कल्प्यतामिति । मैवम् । न तावच्छरी-रस्य व्यापारत्वम् । प्रलये तच्छरीरबाधेऽपि प्रलयानन्तरं स्वर्गादिरूपफलस्य प्रा-माणिकत्वात् । प्रलये तच्छरीरं[5] न पततीति चेन्न । धर्मिग्राहकेण प्रमाणेन प्रलयस्य सकलकार्यद्रव्यानाधारसमयत्वेन सिद्धत्वात् ।

किञ्च शरीरं प्रति न तावद्यागस्य साक्षाज्जनकत्वं सम्भवति । अतः परमाणुक्रियाद्वारा तद् वक्तव्यं तस्याश्च न यागजन्यत्वं, व्यभिचारात् । न च परमाणुक्रियैव काचिद्विशेषरूपा यागजन्या, सा च यागं न व्यभिचरतीति वाच्यम् । तद्विशेषकल्पनायां[6] कल्पनागौरवात् । अक्लृप्तकारणे विशेषकल्पनेन कारणान्तरप्रत्याख्याने[7]ऽतिप्रसङ्गात् । अत एव समयकलापरम्परापि न याग-व्यापारः । किञ्चानुभवेऽप्येवंविधव्यापारेणान्यथासिद्ध्या संस्कारोऽपि न सि-ध्येत् । ननु व्यापारं विनापि यागः स्वर्गं प्रति कारणमस्तु । न च चिरध्व-स्तस्य[8] व्यापारद्वारा कारणत्वदर्शनाद् व्यापारं विना कारणत्वानुपपत्तिरिति वाच्यम् । व्याप्तौ प्रमाणाभावात् । न चाऽत्राकारणनिरन्वयध्वस्तयोर्विशेषा-पत्तिः, कारणत्वस्यैव विशेषत्वादिति । एतदपि नास्ति कारणत्वस्य कार्या-व्यवहितपूर्वसमयवर्त्तित्व - तत्पूर्वसमयवर्त्तिव्यापारवत्त्वान्यतररूपनियतत्वादिति[9] सङ्क्षेपः १९[10] ॥ श्रीः ॥

---

१. P reads only द्वाराग्रहे । २. P reads मा तावत् । ३. P reads ०जनकत्वभावस्य । ४. P drops –भयात् । ५. P reads शरीरं नश्यतीति । ६. P reads तद्विशेषकल्पनागौरवात् । ७. P reads क्लृप्तकारणान्तरप्रत्याख्याने. I. O. reads क्लृप्तकारणविशेषकल्पनेन. But गुणरत्न reads अक्लृप्त० । ८. P reads कारणत्वचिर-ध्वस्तयोः । ९. P reads कार्याव्यवहितपूर्वसमयवर्त्तित्व–तद्वर्त्तिव्यापारवत्त्वान्यतर० । १०. $M_2$ reads curiously number 21 here. I.O. reads 20. P adds इत्यपूर्वप्रकरणम् ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

## (२२) अन्यथाख्यातिवादः ।

अन्यथाख्यातौ तावत् सम्प्रदायसिद्धा विप्रतिपत्तयः[1]। अरजतं रजतत्वप्रकारकज्ञानविषयो न वा । रजतज्ञानम् रजतविषयं न वा । अरजतं रजतत्वप्रकारविषयताश्रयो न वा । रजतत्वप्रकारिका विषयता अरजतनिष्ठा न वा । ज्ञानं स्वविषयताव्यधिकरणप्रकारकं न वा । इदं ज्ञानं व्यधिकरणप्रकारावच्छिन्नविषयताकं न वा । ज्ञानं विशिष्टज्ञानत्वेन प्रवृत्तिजनकं न वा ।

नाद्योऽर्थान्तरत्वात् समूहालम्बनरूपतयाऽप्युपपत्तेः । नापि द्वितीयोऽत एव । नापि तृतीयः, अन्यथाख्यातिवादिनां नेति कोटेरप्रसिद्धेः । तैः रजतत्वप्रकारविषयत्वस्य केवलान्वयित्वाङ्गीकारात् । नापि चतुर्थः । साधारण्याभावात् । नापि पञ्चमः । सामान्यतोऽप्रसिद्धेः । नापि षष्ठः । परं प्रत्यसिद्धेः । व्यक्तिविशेषविवक्षायाम् असाधारण्यात् । किञ्चेदं ज्ञानमिति सत्यरजतज्ञानं[2] वा विवक्षितं शुक्तिगोचरं वा । नाद्यः, तत्र व्यधिकरणप्रकारावच्छिन्नत्वे साध्ये बाधात् । नेतरः । परं प्रत्यसिद्धेर्बाधाच्च । नापि सप्तमः[3] । तथाहि तत्रायमर्थो रजतार्थिनः प्रवृत्तिं प्रति कारणत्वे प्रवृत्तिसमानविषयरजतत्वप्रकारावच्छिन्नविषयता प्रतियोगिज्ञानत्वेनावच्छिद्यते न वा । इयं च [4]विप्रतिपत्तिर्नान्यथाख्यातौ, अपि तु तद्व्याप्ये विप्रतिपत्तेः स्वविषयसंशयजननद्वारा विचारनुकूलत्वमनया च [4]विप्रतिपत्त्या समानविषयकश्च संशयः कर्त्तव्यः, तेन च समानविषयक एव विचारः प्रवर्त्तयितव्यः । तद्विषयश्च नान्यथाख्यातिरूपः, अपि तु तद्व्याप्यरूपः[5] । न च व्यापकसिद्ध्यर्थं कथायां व्याप्यसाधनं युज्यते अप्राप्तकालत्वात् । न च वैशिष्ट्यस्य कारणतावच्छेदकतानिषेधेन अन्यथाख्यातिर्निषिद्धा भवतीति महान् प्रमाद इति ।

मैवम् । रजतत्वावच्छिन्नकार्यज्ञानविषयता अरजतनिष्ठात्यन्ताभावप्रतियोगिनी न वेत्येव विप्रतिपत्तिः, रजतत्वप्रकारिका विषयिताऽरजतनिष्ठा न वेति वा । न चासाधारण्यं दोषः । एतावताऽप्यन्यथाख्यातिविचारानुकूलत्वानपायात् । यद्वा ज्ञानत्वं यथार्थत्वव्याप्यं न वा । यद्वा ज्ञानविषयत्वं स्वप्रकार-

---

१. P reads °सिद्धा विप्रतिपत्तिः । २. P reads सत्यं ज्ञानं । ३. $M_2$ reads तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, obviously as adjectives of विप्रतिपत्ति. But other mss do not agree. । ४-४. This Portion is missing in P । ५. P reads तद्व्यापाररूपः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याप्यवृत्त्यत्यन्ताभावसमानाधिकरणं न वा । एवं विप्रतिपत्तिव्यवस्थितौ विचारसम्भवे[2] प्राभाकराणामयमाशयः । रजततया शुक्तिज्ञानं तत्र रजतव्यवहारान्यथानुपपत्त्या स्वीकर्त्तव्यम् । तयोश्च रजतत्वप्रकारकज्ञानसाध्यत्वं तच्च स्मरणरूपं वृत्तमेव न तु व्यवहर्त्तव्यविशेष्यकरजतत्वप्रकारकज्ञानजन्यता व्याहारव्यवहारयोर्गौरवात्[4] । न च यत्र कचिद्रजतज्ञाने सर्वत्र व्याहारव्यवहारप्रसङ्गः दोषः[5] । अभेदव्यवहारे भेदाग्रहस्य संसर्गव्यवहारेऽसंसर्गाग्रहस्य च नियामकत्वात् । अस्य च भ्रमवादिनाऽपि नियमार्थमङ्गीकार्यत्वाच्च[6] । सत्यरजतस्थलेऽपि भेदाग्रहादेव तदुपपत्तौ[7] वैशिष्ट्यस्याप्रयोजकत्वात् ।

ननु ज्ञानं [8]व्यवहारादिना कल्पनीयमिति नाङ्गीकुर्मः । किन्तु मानसप्रत्यक्षसिद्धम् तत् । तस्य चान्वयव्यतिरेकाभ्यामेव व्यवहारादिकारणत्वं मानसप्रत्यक्षसिद्धम् । यथा सत्यरजतज्ञाने भवति तथा विपरीतरजतबोधेऽपि[9], कथमन्यथा शुक्तौ रजततया मया ज्ञायतेति[10] व्यवहारो बाधावतारेऽपि । तदिदमुक्तमाचार्यैः-

"संसर्गः क्वापि न सिध्येद्"इति ।

एतदपि नास्ति शुक्तौ रजतसाक्षात्कारस्य कारणबाधेन बाधात्, शुक्ती रूप्यतया ज्ञातेति व्यवहारस्य प्राचीनभेदाग्रहनिबन्धनत्वात् । तथा हि रजतसाक्षात्कारे रजतेन्द्रियसन्निकर्षः कारणं तद्व्यतिरेकेण शुक्तौ कथं तदुत्पत्तिसम्भावनापि । न च साक्षात्कारमात्रे विशेष्येन्द्रियसन्निकर्षः कारणं, तद्विशेषे च रजतसाक्षात्कारे तद्विशेष्येन्द्रियसन्निकर्षस्यैव कारणत्वं विशेषे विशेष्यविशेषेन्द्रियसन्निकर्षस्यैव कारणत्वेनाङ्गीकारात् इति वाच्यम् । क्वचिद्विशेष्यासन्निधाने हि[11] साक्षात्कारभ्रमस्य त्वयाङ्गीकारात् । तथाहि साक्षादूर्ध्वं वस्तु दृष्ट्वानन्तरमन्यत्र[12] गत्वा चिन्तयतो भवति 'स स्थाणुः स्यात् पुरुषो वा'इति संशयः । न च ज्ञानधर्मिक एव संशयस्तत्रेति वाच्यं, ज्ञानाभावेऽपि तथा संशयात् । एवं विपर्ययोऽप्यूहनीयः ।

---

१. P+ $M_1$ drop –व्याप्यवृत्ति । २. P reads विचारविषये · ३. I O. reads त्रिपुटप्रत्यक्षवादिनाम् । ४. P reads °ज्ञानजन्यं व्याहारव्यवहारयोः गौरवात् । ५. I. O. reads °व्यवहारादिप्रसङ्गो दोषः । ६. $M_1$+$M_2$ read आरोपनियमार्थम् । ७. P reads तदुपपत्तेः । ८. P reads व्यवहारादि कल्पनीयम् । ९. P reads °रजतविज्ञानेऽपि । १०. P reads ज्ञातेति । ११. P reads अपि । १२. P drops अनन्तरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च तत्र दोषस्यैव सन्निकर्षत्वं, प्रोढाप्रत्यासत्तिरबहिर्भावेन तस्यासन्निकर्षत्वात्[1] । न च तत्र ज्ञानान्तरोपनीते मन एव करणं युक्तम् । बहिर्विशेष्यके मनसोऽस्वातन्त्र्यात् ज्ञानान्तरोपनयस्य तद्विशेषणकसाक्षात्कारे[2] प्रयोजकत्वात् । परमाणुमहं जानामीत्यत्र तथा दर्शनात् । अन्यथाऽनुमित्यादेरुच्छेदापातात् । अग्रहपक्षे[3] त्वस्य दोषस्यासम्भवात्[4] ।

ननु भेदाग्रहात् प्रवृत्तिरनुपपन्ना । तथाहि यथोपस्थितेष्टभेदाग्रहस्य प्रवर्त्तकत्वं तथोपस्थितानिष्टभेदाग्रहस्य[5] निवर्त्तकत्वं वाच्यम् । न त्विष्टभेदाग्रहस्य । तथात्वे सत्यरजतस्थले[6] नेदं रजतमिति कृत्वा न निवर्त्तेत तत्रेष्टभेदग्रहस्याभावात् । भावे वा विपरीतख्यात्यापत्तेः । तथा च शुक्ताविदं रजतमेव न शुक्तिरिति ज्ञानादुपस्थितेष्टानिष्टाभेदाग्रहसहितात् प्रवृत्तिनिवृत्तियौगपद्यापत्तिः[7] । न च तत्रानिष्टभेदग्रह एवेति वाच्यम् । अन्यथाख्यातिस्वीकारापत्तेः । न च स्वातन्त्र्योपस्थितानिष्टभेदाग्रहस्य निवर्त्तकत्वमिति[8] वाच्यम् । स्वातन्त्र्यस्य निर्वक्तुमशक्यत्वात् ।

एतदपि न साधीयः । अभावविशेषणतयोपस्थितानिष्टभेदाग्रहस्य निवर्त्तकत्वात् । प्रवर्त्तकत्वमप्यभावाविशेषणतयोपस्थितेष्टभेदाग्रहस्यैव, तेन सत्यरजते नेदं रजतमिति कृत्वा न प्रवृत्त्यापत्तिः । तस्य च प्रकृतेऽभावात् । यद्वा आरोपनियमार्थमवश्यं भेदाग्रहे विशेषः स्वीकर्त्तव्यः । स च विशेषः प्रवृत्तिप्रयोजक एवास्तु । न च प्रकृते तथा विशेषः, अन्यथोभयभेदाग्रहात् संशय एव स्यात् । न त्विदं रजतमेवेति विपर्ययः ।

ननु स्थाणौ स्थाणुर्वा पुरुषो वेति संशयानन्तरं[9] पुरुष एवेति व्यवहारस्तावद् दृश्यते । तत्र च न भेदाग्रहस्य निमित्तत्वं स्थाणौ पुरुषभेदाग्रहवत् स्थाणुभेदाग्रहस्यापि विद्यमानत्वात् एककोटिकव्यवहारानुपपत्तेः संशयतादवस्थ्यं स्यात् । एकस्मिन्[10] परस्परविरुद्धभेदाग्रहस्य[11] तव संशयत्वात् । न च तत्र स्थाणुभेदग्रह एव । विपरीतख्यातिप्रसङ्गात् । तस्मादनन्यगत्या[12] विपरीतख्यातिः स्वीकर्त्तव्येति ।

---

१. P reads प्रौढप्रत्यासत्ति० । २. P reads तद्विशेषणक एव साक्षात्कारे । ३. P reads भेदाग्रहपक्षे । ४. P reads अभावात् । ५. P misses प्रवर्त्तकत्वं तथोपस्थितानिष्टभेदाग्रहस्य । ६. P reads सत्यरजते । ७. P+ I. O. read °प्रवृत्त्योर्यौगपद्यापत्तिः । ८. P misses निवर्त्तकत्वम् । ९. P+ $M_1$ read स्थाणुपुरुषसंशयानन्तरम् । १०. P adds धर्मिणि । ११. P+ $M_2$ read परस्परविरुद्धे भेदाग्रहस्य । १२. P reads अगत्या ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मैवम् । संशयानन्तरं [1]स्थाणौ पुरुष एवायमिति व्यवहारोऽपि पुरुषभेदाग्रहादेवोपपद्यते । न च संशयतादवस्थ्यं स्वतन्त्रोपस्थितपरस्परविरुद्धोभयकोटिभेदाग्रहस्य संशयत्वात् । पुरुष एवायमित्यत्राभावविशेषणतया स्थाणोरुपस्थितत्वात् । अन्यथा तावतापि[2] पुरुष एवायमित्यत्र संशयोत्पत्तिप्रसङ्गः ।

नन्वसंसर्गाग्रहाच्चेत् प्रवृत्तिः सर्वत्र तदा वह्न्यर्थिप्रवृत्तौ धूलीपटले धूमप्रतिसन्धानापेक्षा न स्यात् । उपस्थितवह्न्यसंसर्गाग्रहार्थं सेति चेन्न[3] पूर्वमपि वह्न्युपस्थितिसम्भवात् । तस्माद् धूमग्रहापेक्षायां[4] नियमेन वह्न्यर्थिप्रवृत्तौ निर्वह्नौ वह्न्यनुमितिरुत्पद्यत इत्यवश्यं स्वीकर्त्तव्यम् ।

किञ्च कथमत्रानुमिनोमीति व्यवहारस्त्वत्पक्षे स्यात् । प्रत्यक्षोपस्थिते च विशेष्येऽसंसर्गाग्रहेण पीतः शङ्ख इत्यादौ साक्षात्करोमीति व्यवहारस्य त्वयेष्यमाणत्वादिति । एतदपि न साधु । पूर्वं वह्न्यसंसर्गाग्रहसत्त्वेऽपि निर्वह्नित्वासंसर्गाग्रहस्यापि विद्यमानत्वादिति । ततः कथं धूमप्रतिसन्धानात् प्राक् निष्कम्पं वह्न्यर्थी प्रवर्त्तेत । बाष्पपूरे[5] धूमप्रतिसन्धानानन्तरं नियमतो वह्न्युपस्थितौ तदसंसर्गाग्रहाद् वह्न्यर्थी निष्कम्पं[6]प्रवर्त्तते । अनुमिनोमीति व्यवहारस्यापि लिङ्गोपस्थापितव्यापकासंसर्गाग्रह एव निबन्धनं तस्मादेतावतापि नान्यथाख्यातिसिद्धिः ।

किञ्चान्यथाख्यातिपक्षे इदं रजतमिति ज्ञानस्य को विषयः । शुक्तिरजते वाऽनयोस्तादात्म्यं वा, शुक्तित्वरजतत्वयोः सामानाधिकरण्यं वा, रजतत्वेन प्रकारेण शुक्तिर्वा । नाद्यः । समूहालम्बनेनाऽप्युपपत्तेः । न द्वितीयः । असत्ख्यातिप्रसङ्गात् । अत एव न तृतीयः । नापि चतुर्थः । तृतीयार्था[7]निर्वचनात् ।

किञ्च, दोषाणां प्रकृतकार्यप्रतिबन्धकत्वं दृष्टम् । न तु कार्यविशेषजनकत्वं दृष्टम् । कथमन्यथा दुष्टात् कुटजबीजात् न्यग्रोधाङ्कुरो न जायते ।

---

१. P repeats a previous line here । २. $M_1$ reads तवापि । ३. P reads वह्न्यसंसर्गाग्रहार्थमिति चेन्न । ४. P misses –सम्भवात् । तस्माद् धूमग्रहापेक्षायां । ५. P reads धूलीपटले । ६. P adds नियमतः । ७. P misses नापि चतुर्थः तृतीयार्था and then reads निबन्धनात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु भेदाग्रहपक्षे नेदं रजतमिति ज्ञानेन किं बाध्यम्[1] ? इदमिति ज्ञानं वा रजतमिति ज्ञानं वा । न तावदाद्यः । इदन्त्वस्य[2] तदवस्थत्वात् । नेतरः । रजतस्यापि क्वचित् सत्त्वात्[3] । तस्मात् शुक्तौ रजतत्वज्ञानं निषिध्यते रजताभेदो वा । उभयथाऽपि बाधकबलेनान्यथाख्यातिसिद्धिरिति । मैवम् । भेदाग्रहप्रसञ्जिताभेदव्यवहारस्य बाध्यत्वात् । ननु भेदाग्रहस्य प्रवर्त्तकत्वे संवादासंवादलक्षणप्रवृत्तिवैचित्र्यं न स्यात् । तस्मादभेदग्रहस्य संवादिप्रवृत्तिजनकत्वमवश्यं वाच्यम् । तथा चाननुगमस्तदवस्थ एवेति । मैवम् । [4]रजते रजतभेदाग्रहस्य संवादिप्रवृत्तिजनकत्वाद्विपरीते रजतभेदाग्रहस्य विसंवादिप्रवृत्तिजनकत्वादिति पूर्वपक्षसङ्क्षेपः ।

अत्रोच्यते । रजतत्वप्रकारकज्ञानस्य रजतत्वव्यवहारकारणत्वमिति तावदविवादम् । अत्र व्यवहर्त्तव्य[5]विशेष्यकत्वस्यातन्त्रत्वेऽतिप्रसङ्गवारणार्थं भेदाग्रहोऽपेक्षणीयः । सोऽपि न यस्य कस्यापि किन्तु रजतस्य । न वा यत्र कुत्रापि किंतु पुरोवर्त्तिनि । तथा च रजतप्रतियोगिकभेदग्रहाभावः पुरोवर्त्तिनि रजतव्यवहारे नियामकः इति अभिमतम् । तथा च पुरोवर्त्तिनि रजतभेदविषयकग्रहाभावस्य रजतव्यवहारनियामकत्वमस्तु पुरोवर्त्तिनि रजतत्वग्रहस्य वा । तत्राद्ये गौरवमतो द्वितीय एव ज्यायान् । न चैवमन्यथाख्यातिस्वीकारे गौरवप्रसङ्गः । प्रमाणवतो गौरवस्यापि न्याय्यत्वात् । न चान्यथाख्यातिकारणतया भेदाग्रहस्य स्वीकर्त्तव्यत्वात् तस्यैव व्यवहारकारणत्वमस्तु इति वाच्यम् । अन्यथाख्यातौ क्लृप्तायां तत्राग्रहकारणत्वकल्पनस्योचितत्वात् ।

नन्वेवं व्यवहारे तत्राग्रहकारणतायामेव विवादात् रजतज्ञानस्यावश्योपजीव्यत्वात् तदेवास्तु प्रवर्त्तकं, तथापि प्रवृत्तिसमानविषयकत्वमनुपजीव्यं सत्यरजतस्थले तदैवायातमिति चेन्न । प्रवृत्तिसमानविषयकत्वस्यानुपजीव्यत्वे अतिप्रसङ्गात्[10] । न च तद्वारणार्थमग्रह एवोपासनीयः, अन्तरङ्गन्यायेन प्रवृत्ति[11]समानविषयत्वोपासनाया एवोचितत्वात् । न च सर्वत्रोभयवादिप्रसिद्धत्वादग्रहस्यैव कारणता ग्राह्या[12] विशिष्टज्ञानस्योभयवाद्यसिद्धत्वादिति[13] वाच्यम् । न ह्युभयवादिसिद्धत्वं कारणत्वस्वीकारे प्रयोजकम्, किन्तु प्रमाण-

१. P reads बाध्यते । २. P reads इदन्तास्पदस्य । ३. P reads न युक्तिमत्त्वात् । ४. P reads सत्यरजते । ५. P reads विशेष्यकत्वेऽतिप्रसङ्गनि० । ६ P reads चायम् । ७. P drops रजत- । ८. P reads व्यवहारे कारणत्वमस्तु । ९. P reads तथैवा० । १०. $M_2$ reads अतिप्रसङ्गस्योक्तत्वात् । ११. P drops प्रवृत्ति । १२. P reads न्याय्या । १३. P reads (उ)भयवादिसिद्धत्वात् इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिति[1]। न च प्रमाणमग्रहमेव कारणत्वेन गोचरीकरोति। गौरवपराहतेरुक्तत्वात्।

न च क्वचिद्विशेष्यासन्निकर्षेऽपि बहिर्विशेष्यकभ्रमस्वीकारेण कारणबाधात् तद्बाध इति युक्तम्। ज्ञानान्तरोपनीते[2] बहिर्विशेषणकज्ञानवत्[3] ज्ञातः परमाणुरित्यादौ बहिर्विशेष्यकज्ञानस्यापि[4] सम्भवात् कार्यदर्शनस्योभयत्रापि समानत्वात्। न चानुमित्युच्छेदप्रसङ्गः। अत्र तृतीयलिङ्गपरामर्शस्थले विशेषस्योक्तत्वात्। न च स्वातन्त्र्योपस्थितानिष्टभेदाग्रहस्य निवर्त्तकत्वम्। परस्पराभावविशिष्टे शुक्तिरजते इति ज्ञानाच्छुक्तौ रजतार्थी न [5]निवर्त्तेत।

किञ्च इमे रङ्गरजते इत्यत्र स्वातन्त्र्योपस्थितेष्टानिष्टभेदाग्रहस्य [6]विद्यमानत्वात् किमिति युगपत् प्रवृत्तिनिवृत्ती न स्याताम्। न च यत्र यन्निष्ठेन सादृश्येन यत्स्मारितं तत्र तद्भेदाग्रहस्य नियामकत्वमिति वाच्यम्। अनुभूयमानारोपे सत्यरजतस्थले च तदभावात्। न च तत्रारजते रजतभेदग्रह एव। न चान्यथाख्यातिः रजतभेदासंसर्गाग्रहस्यैवारजतभेदग्रहार्थत्वादिति वाच्यम्। सत्यरजतस्थले रजतभेदासंसर्गाग्रहस्य विद्यमानत्वात् प्रवृत्तिदशायां तत्रापि निवर्त्तेत। शुक्तौ चेदं रजतमिति ज्ञानेऽपि रजतभेदासंसर्गाग्रहात् युगपत् प्रवृत्तिनिवृत्तिप्रसङ्गात्[7]। न च तत्र रजतभेदासंसर्गाग्रहः। अन्यथाख्यात्यापत्तेः[8]। न च तत्र रजतभेदासंसर्गाग्रहानन्तरं न निवृत्तिरिति वाच्यम्। असंसर्गासंसर्गस्य संसर्गाऽतिरिक्तस्याभावात्। अग्रहस्य व्यवहारानुत्पादकत्वाच्च[9]। ननु किं विशेषनिष्टंकनेन यदेव तव भ्रमे नियामकं तदेव प्रवृत्तावस्तु। अन्यथा तव किमिति भेदज्ञानं न जायते इति।

नैवम्। भ्रमनियामकस्य सत्यरजतस्थलेऽभावात् न च तत्र प्रवर्त्तेत। सादृश्यं हि तथा। न च तत्र रजते[10][11]सादृश्यमस्ति रजते रजतसादृश्याभावात् भ्रमनियामकस्य भ्रमनिरूपणीयत्वात्। भ्रमस्य च त्वयाऽनङ्गीकारात्। अङ्गीकारे वा विवादपर्यवसानात्। उपजीव्यप्रमाणविरोधाच्च।

१. P reads प्रमायाम्। २. P reads ज्ञानान्तरेणोपनीते। ३. P reads ज्ञानसम्भवात्। ४. P reads विशेष्यकज्ञानज्ञानस्यापि। ५. M₂ reads प्रवर्त्तेत। ६. P add निवर्त्तकस्य here। ७. P reads प्रवृत्तिप्रसङ्गात्। ८. P reads अन्यथाख्यातिस्वीकारापत्तेः ९. P reads संसर्गाग्रहान्न निवृत्तिः। १०. P reads इत्युक्तत्वात् instead of च ११. P reads रजते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च तृतीयार्थानिर्वचनम् । सप्रकारस्यैव[1] तत्त्वात् । न च प्रकारानिर्वचनाद्[2] दौस्थ्यम् उभयवादिसमाधेयत्वात् । न च दोषस्य प्रकृतकार्यप्रतिबन्धकत्वमात्रम् । दवदग्धे वेत्रबीजादौ[3] कदलीकाण्डजननदर्शनात् । अन्यथा दोषात्[4] तत्रापि कथं विसंवादिनी प्रवृत्तिस्स्यात् । न च ज्ञानस्यायथार्थत्वे समाश्वासाभावः । विसंवादिप्रवृत्तिजनकत्वेऽपि समानत्वेनोभयवादिसमाधेयत्वात्[5] ।

न च भेदाग्रहप्रसञ्जिताभेदव्यवहारस्य बाध्यत्वम्, व्यवहारो हि प्रवृत्तिर्वा शब्दप्रयोगो वा । नाद्यः । न हि नेदं रजतमिति ज्ञानं प्रवृत्तिं बाधते प्रवृत्तेः सर्वत्राभावात्, नापि प्रवृत्तियोग्यताम् अशक्यत्वात् । न द्वितीयः । न हि नेदं रजतमिति ज्ञानस्य पुरोवर्त्तिनि रजतशब्दप्रयोगो नास्तीति विषयः[6], अनुभवविरोधात् । न च रजतभेदाप्रकारकं पुरोवर्तिज्ञानं रजतोपस्थितिसहायं पुरोवर्त्तिनि प्रवर्त्तयति, पुरोवर्त्तिज्ञाने वा ये भेदा भासन्ते तेषु एव रजतत्वप्रतियोगित्वं न गृह्यते इत्येवं वा प्रवर्त्तते, अग्रहपदेन[7] पर्युदासमर्यादया ग्रहविशेषस्यैव विवक्षितत्वात् इति वाच्यम् । सत्यरजते नेदं रजतमिति कृत्वाऽपि प्रवर्त्तेत । न हि तत्र पुरोवर्त्तिज्ञानं रजतभेदप्रकारकम् । न वा तज्ज्ञानविषयो भेदो रजतप्रतियोगित्वेन गृह्यते । अन्यथाख्यातिस्वीकारापातात् ।

किञ्च कोऽसौ भेदो यदग्रहो[8] व्यवहारयति । न तावत्स्वरूपम् । इदं रजतमित्यत्र स्वरूपग्रहस्य विद्यमानत्वात् । नापि वैधर्म्यं, वैधर्म्यस्य किं स्वरूपेणाग्रहो भेदाग्रहो वैधर्म्यत्वेन[9] वा । न तावदाद्यः । वस्तुगत्या यद् वैधर्म्यं तद्ग्रहेऽपि व्यवहारस्य दर्शनात् । नापि द्वितीयः । वैधर्म्यत्वस्यात्यन्ताभावत्वेन निर्वचनात् । अत्यन्ताभावस्य स्वरूपादन्यस्य त्वयानङ्गीकारात् । किञ्च यत्किञ्चिद्वैधर्म्यस्य च सर्वत्र [तद्]ग्रहात्[10] तदीयत्वेन विशेषणेऽननुगमात् । नाप्यन्योन्याभावः, तस्य त्वयाऽनभ्युपगमादिति ।

किञ्च भेदाग्रहस्य प्रवर्त्तकत्वं सत्यरजतस्थले न सम्भवति । तथाहि

---

१. $M_2$ reads प्रकारवत्त्वस्य, P reads प्रकारस्य । २. P reads प्रकारनिर्वचनदौस्थ्यम् । ३. P reads दग्धवेत्रबीजात् । ४. P reads दोषाणां तत्त्वे । ५. P reads ०जनकत्वेनोभयवादिसमाधेयत्वात् । ६. P reads विशेषः । ७. P reads अग्रहशब्देन । ८. P reads यस्याग्रहः । ९. P reads वैधर्म्येण, comm. गुणरत्न reads वैधर्म्यत्वेन । १०. गुणरत्न reads तद्ग्रहात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र पुरोवर्त्तिना रजतभेदस्याग्रहो वाच्यः, येन केनापि वा । नान्त्योऽतिप्रसङ्गात्, अन्यभेदग्रहेऽपि प्रवृत्तेर्दर्शनात्[१] । नाद्यः । अप्रसिद्धेः । नापि पुरोवर्त्तिनि रजतत्वप्रकारकभेदग्रहस्याभावः[२] । सामान्येन रूपेणोपस्थिते[३] रजते रजतत्वप्रकारकभेदग्रहस्याभावेऽपि प्रवृत्तेर्दर्शनात्[४] । न च तत्र रजतत्वेन रूपेण पुरोवर्त्त्युपस्थितिरेव न[५] वृत्तेति वाच्यम् । विशिष्टज्ञानप्रयोजकत्वप्रसङ्गात्[६] । न च चाकचिक्यादिना रजतोपस्थितिः[७] कारणमिति वाच्यम् । 'गेहे रजतम्' इति वाक्यज्ञानादपि प्रवृत्तिदर्शनात् । तत्र चाकचिक्यादेरभावात् । नापि पुरोवर्त्तिनि रजतत्वप्रकारको यो भेदग्रहस्तस्याभाव इति वाच्यम् । अन्यथाख्यातिस्वीकारप्रसङ्गादप्रसिद्धत्वाच्च । तस्माच्छुक्तौ रजतमेवेदं प्रतीयते तेन[८] चेष्टसाधनतामनुमाय रजतार्थी प्रवर्त्तते, न तु रजतभेदाग्रहासादितेष्टसाधनभेदाग्रहेण इति सङ्क्षेपः ॥ इत्यन्यथाख्यातिवादः[९] ॥

१. P reads प्रवृत्तिदर्शनात् । २. P reads पुरोवर्त्तिरजतत्वप्रकारक० । ३. P reads सामान्यरूपेण । ४. P reads दर्शितत्वात् । ५. P reads निवृत्तेति । ६. P reads विशिष्टज्ञानत्वेन प्रयोजकत्वस्वीकारात् । ७. P adds रजतार्थिप्रवृत्तेः । ८. P reads तत्र । ९. P reads इत्यन्यथाख्यातिप्रकरणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इहार्थापत्तिमनुमानातिरिक्तं प्रमाणमिति परे मेनिरे । तत्र तेषामयमाशयः, जीवतो देवदत्तस्य गेहाभावदर्शनेन बहिःसत्त्वं प्रतीयते इति तावत्सर्वानुमतम् । तत्र न गेहाभावः हेतुः, व्यधिकरणत्वात् । न च जीविगृहाभावबहिःसत्त्वयोः व्याप्तिप्रतिसन्धानं[1] सर्वेषां, कथं चेन्द्रियासन्निकृष्टे देवदत्ते हेतोः पक्षधर्मताग्रहः । न च तं[2] विनाऽप्यनुमानमतिप्रसङ्गात् । एवं 'पीनो देवदत्तो दिवा न भुङ्क्ते' इत्यत्रापि तावन्निशाभोजनमनुभूयते । न चात्रापि व्याप्तिग्रहनियमः[3] इति पूर्ववदूहनीयम् ।

ननु बहिःसत्त्वमात्रं विना अनुपपत्तिः, देवदत्तबहिःसत्त्वं विना वा ॥ नाद्यः । एवं बहिःसत्त्वमात्रं कल्पेत, न तु देवदत्तस्य । द्वितीये तदीयं बहिःसत्त्वं प्रतीतमप्रतीतं वा । आद्ये किमर्थापत्त्या परिच्छेद्यं, तदीयबहिःसत्त्वस्य प्रमाणान्तरादेव सिद्धेः । द्वितीये तु कथमप्रतीतेनानुपपत्तिनिरूपणम् । अनिरूपिता[4] वाऽनुपपत्तिः कथं गमिका, अतिप्रसङ्गात् । अनुमानं तु पक्षधर्मताबलाद् विशिष्टबहिःसत्त्वसाधकमिति न तत्रानुपपत्तिरिति । मैवम् । विशकलितेनैव बहिःसत्त्वादिनाऽनुपपत्तिनिरूपणात् । विशिष्टावगमस्त्वर्थापत्तेरेव फलम् । एवं दिवाऽभोजित्वेनैव[5] पीनत्वानुपपत्तिनिरूपणम् । रात्रिभोजनं तु तेन क्वचिदपि न प्रतीतम् । अत एव नानुमानता साध्याप्रसिद्धेः । भोजनं तु पुष्टिकारणतया क्लृप्तं समयान्तरमादाय विश्राम्यति । विरोधप्रतिसन्धानमेव वा कारणं, तदेवार्थापत्तिपदवाच्यम् । फलं पुनरस्य सामान्यप्रवृत्तविशेषप्रवृत्तप्रमाणयोः भिन्नविषयतया अविरोधबुद्धिः ।

अत्र कैश्चिदुक्तं – विरुद्धधर्माध्यासप्रतिसन्धानादेवानयोर्भिन्नविषयत्वं सिद्धमिति किमर्थापत्त्या । न च विरुद्धधर्माध्यासासिद्धिः । अस्तित्वनास्तित्वलक्षणस्य तस्यानुभवसाक्षिकत्वात् , अन्यथा विरोधप्रतिसन्धानानुपपत्तिरिति ।

तदपि न[6] । सामान्यतो भेदावगमेऽपि गृहान्यत्वेन गृहभिन्नतापरिच्छेदस्य[7] क्वचिदस्तीति प्रमाणेऽर्थापत्त्यधीनत्वात् । विरोधसम्भावना प्रामाण्यसम्भावना वा विरुद्धयोः कारणं, तदेवार्थापत्तिस्थाने निवेशनीयम् ।

---

१. P reads सन्धानम् । २. शेषानन्त reads तौ । P reads ताम् । ३. P reads व्याप्त्यादिग्रहनियमः, $M_2$ reads व्याप्तिग्रहे नियमः । ४. P reads न चानिरूपिता । ५. P reads दिवाऽभोजित्वे सति तेनैव । ६. I. O. reads एतदपि न । ७. P reads न गृहभिन्नतापरिच्छेदः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तर्क एव वा बहिःसत्त्वादिकल्पकोऽस्तु । एवं हि सः—यदि देवदत्तो बहिरसन् स्यात् जीवित्वे सति गृहे असन्न स्यात् इति । यद्वा सत्त्वग्राहकं प्रमाणं यद्यभावग्राहकप्रमाणसमानविषयकं स्यात् तदा प्रमाणमेव न स्यात्[1]–इति प्रतिसन्धानमेवात्र कारणं व्यवस्थितमनुमापकम्, अव्यवस्थितं[2] कल्पकमिति वचनादिति ।

अत्रोच्यते । काऽसावनुपपत्तिः यस्याः कारणत्वं व्याप्तिपक्षधर्मत्वावगमं विना । बहिःसत्त्वं विना जीविनो गृहसत्त्वाभावः सेति चेत्[3] । नन्वयमविनाभाव एव, इयमेव च व्याप्तिः, तथा चानुपपत्तिर्व्याप्तिरित्येक एवार्थ[4] इति नाममात्रपरिवर्त्तः । एतेन व्यतिरेकिमानमर्थापत्तिरित्यपि परास्तम्[5] । व्यतिरेकिणोऽपि व्याप्तिपक्षधर्मताधीनतासम्भवात् । तथाच पुनरपि नामान्तरकरणमेव । न च लिङ्गाभावान्नानुमानता । [6]जीविगृहासत्त्वस्यैव लिङ्गत्वात् । न चापक्षधर्मता । गृहनिष्ठाभावप्रतियोगित्वस्यैव तदर्थत्वात् । न चासन्निकृष्टे कथं तद्ग्रह इति वाच्यम् । उभयवादिसमाधेयत्वात् । अर्थापत्तिवादिनाऽपि गृहनिष्ठाभावप्रतियोगित्वग्रहस्याभ्युपेयत्वात् । यथा पुनरसन्निकृष्टेऽपि लिङ्गपरामर्शोदयः तथोक्तं तृतीयलिङ्गपरामर्शस्थले ।

न च क्वचिदस्तीति प्रमाणस्य गृहगोचरतासम्भावनया गृहासत्त्वं संदिग्धं सत्कथं लिङ्गमिति वाच्यम् । गृहासत्त्वस्य सन्दिग्धत्वे हि कथमनुपपत्तिप्रतिसन्धानं परस्यापि । एवं जीवित्वसंशयेऽपि । अन्यथा मरणकल्पनापत्तेः । जीविनो हि गृहासत्त्वं व्यवस्थितं सद् बहिःसत्त्वं[7] विनाऽनुपपन्नं[8] तत्कल्पकमिति तद्दर्शनम् ।

किञ्च क्वचिदस्तीति प्रमाणस्य गृहविषयता सन्दिग्धा[9] । गृहे नास्तीति प्रमाणं गृहाभावनिश्चायकम्[10] । तथा च तेनैव तत्संशयनिरासः, निश्चिते संशयाभावात् । अन्यथा संशयस्यानुच्छेद्यता स्यात् ।

न च विरोधप्रतिसन्धानमर्थापत्तिः । क्वचिदस्ति, गेहे नास्तीति प्रमाणयोर्विरोधाभावात् । तथापि तत्प्रतिसन्धानमस्तीति चेत् । अस्त्वेवमपि नातिरेकः[11] । तथाहि कोऽसौ विरोधः । अस्तित्वनास्तित्वयोः सहानव-

१. P reads तदाऽप्रमाणमेव स्यात् । २. P reads अवस्थितम् । ३. P reads सेति सेत्स्यतीति । ४. P reads पदार्थः । ५. P+I. O. read निरस्तम् । ६ P drops जीवि । ७. P reads व्यवस्थितं हि सत्त्वं विना । ८. P adds न here । ९. I.O. misses गृहविषयता सन्दिग्धा । १०. P+I. O. read गृहासत्त्वनिश्चायकम् । ११. P reads नानुमानातिरेकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थानमिति चेत्। सहावस्थानमेव तयोर्न कुतः। वैपरीत्यनियमादिति यदि, तथाच व्याप्तिप्रतिसन्धानमावश्यकमिति न किञ्चिदेतत्।

अस्तु तर्हि संशयः कारणम्। तथाहि शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतम्। जीवो गृह एवेति व्याप्तिरुपलब्धा, अनन्तरं गेहे देवदत्ताभावम् उपलभ्य सन्दिह्यते। स च संशयः लाघवाख्यं तर्कं सहकारिणमासाद्य बहिःसत्त्वमवधारयति। न च मरणमेव किमिति न कल्प्यते इति वाच्यम्। क्वचिदस्तिताचिरजीवित्वग्राहकप्रमाणद्वयबाधप्रसङ्गात्। बहिःसत्त्वकल्पने च गेहे एवेति नियमग्राहकमेव मानं बाध्यते इत्यस्ति लाघवमिति। मैवम्। संशयस्य कारणत्वे मानाभावात्। अनयोरेकं प्रमाणमस्तीति सामान्यतो दृष्टे कल्प्त एव हि प्रमाणे लाघवं सहकारि भवतु। अन्यथा फलनिःसरणाभावात्। अन्यथा अन्यत्राप्येवंविधचरणप्रसारिकया संशय एव कारणं स्यादिति गतं प्रमाणान्तरवार्त्तया। न च तर्कः कारण विपर्ययपर्यवसानादेव साध्यसिद्धेः[2]। एवं पक्षान्तरमपि शक्यनिरसनमिति सर्वं समञ्जसम्। इति अर्थापत्तिप्रकरणम्[3] ॥श्री॥

१. P adds तर्हि here। २. P reads साध्यसिद्धिः। ३. For the first time $M_1$ marks the end of a chapter by इति अर्थापत्तिप्रकरणम्; P and I. O. read इत्यर्थापत्तिनिरासप्रकरणम्, I. O. numbers 22।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (२४) शब्दानित्यतावादः[1] ।

इह[2] प्राभाकराः शब्दस्य नित्यत्वमिच्छन्तो बहुधा बहुभिर्निषिद्धा एव । तथापि तत्प्रतिषेधार्थं किञ्चिदुच्यते । तत्र प्राभाकराणाम[3]यमाशयः । प्रत्यभिज्ञानं यावत् गकरादिगोचरं तावत्कालावस्थायिगकारादे[4]र्गोचरं यदनुभवसिद्धं, तत्र तेन यद्यपि नित्यता न विषयीक्रियते तथापि तदुपजीवनप्रवृत्तविचारात्[5] नित्यता सिध्यति । तथाहि कारणनाशाद्वा शब्दनाशः विरोधिगुणाद्वा । कारणनाशादपि समवायिकारणनाशाद्वा असमवायिकारणनाशाद्वा निमित्तकारणनाशाद्वा । न तावदाद्यः । समवायिनो नित्यत्वात् । न द्वितीयः, असमवायिकारणनाशानन्तरमपि प्रत्यभिज्ञानदर्शनात्[6] । एवं निमित्तनाशेऽपि । न द्वितीयः, विरोधिगुणसद्भावेऽपि प्रत्यभिज्ञानतादवस्थ्यात् । न च प्रत्यभिज्ञानं भ्रान्तं, बाधकाभावात् । तारत्वादिकविरुद्धधर्मसंसर्गो बाधक इति चेन्न[7] । तारत्वादेः औपाधिकत्वात्[8] स्वाभाविकशब्दधर्मत्वाभावात् । जातित्वे[9] वा कत्वादीनां[10] परापरभावानुपपत्तेः, औपाधिकत्वे तु उपाध्यग्रहे कथम् तद्ग्रह इति चेन्न । सुरभिः समीरण इत्यत्रोपाध्यग्रहेऽपि सौरभग्रहदर्शनात् । उष्णं जलं, शीतं शिलातलमित्यत्रैव वा तारत्वादेर्विरुद्धधर्मत्वमेवासिद्धम् । यस्तार आसीत् स एवेदानीं मन्द्र इति प्रत्ययात् तारान्मन्द्रोऽन्यै[11] इत्यपि क्वचित् प्रतीयत इति चेन्न । एकस्मिन्नेव घटे श्यामोऽयं न लोहित इति प्रत्ययवद्धर्मभेदविषयेऽप्युपपत्तेः । एवमपि वा तारे तारतरे च प्रत्यभिज्ञानमबाधितमेव । न च जातेरैक्यमादाय प्रत्यभिज्ञा चरितार्था, स एवायं गकार इति प्रत्ययात् । अन्यथा सर्वत्र धर्मिणि प्रत्यभिज्ञानमुच्छिद्येत । तथा च स्थैर्यं[12] बहु व्याकुलं भवेत् ।

किञ्चानित्यत्वे शब्दस्य किं प्रमाणं, श्रुतपूर्वो गकारो विनष्ट इति प्रत्यक्षमिति चेन्न । अयोग्याधिकरणाभावस्य[13]ऽतीन्द्रियत्वात् । अन्यथा वायुस्पर्शध्वंसस्याप्रत्यक्षता न स्यात् । न चेदं ज्ञानं लैङ्गिकं प्रत्यभिज्ञानबाधितत्वात् । आकाशमात्रगुणत्वेन[14] सत्प्रतिपक्षत्वाच्च, प्रत्यभिज्ञाने तु न

---

१ P+ I. O. insert अभाववादः here, I have followed $M_1$, $M_2$'s ordering of chapters. । २. P misses इह । ३. P reads परेषाम् । ४. $M_1$ omits गकारादिगोचरं and P reads तावत्कालावस्थायिनां गकारादीनां । ५. P reads ॰प्रवृत्तिविचारात् । ६. $M_1$ misses a line here. । ७. P misses न here । ८. $M_1$ misses औपाधिकत्वात्, P repeats –तारत्वादेः । ९. P+ I. O. read तथात्वे । १० P reads कत्वादिना । ११. P reads तारोऽयं न मन्द्रः । १२. P drops स्थैर्यं । १३. P reads ॰अधिकरणस्य । १४. P reads आकाशैकगुणत्वेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमपि बाधकमतो न किमिति नित्यतासिद्धिः । ननु पूर्वं नासीदिदानीं विद्यते गकार इति प्रत्ययबलात् आदिमत्त्वे सिद्धे तत एव सान्तत्वं सेत्स्यतीति । मैवम् । यथेह भूतले घटो नास्तीति अत्र संयोगो निषिध्यते । तथा पूर्वस्मिन् समये शब्दसम्बन्ध एवाधाराधेयभावलक्षणो निषिध्यते[1] । स चात्यन्ताभाव एव । न च नित्यत्वपक्षे कण्ठताल्वसंयोगादिनैरपेक्ष्यं शब्दस्य स्यादिति वाच्यम् । अभिव्यक्तौ तथाभावात् । न च व्यञ्जकस्य साधारण्येन सर्वशब्दोपलब्धिप्रसङ्गः । कंचिदेव[2] शब्दं प्रति कस्यचित् संयोगस्याभिव्यञ्जकत्वात्[3] । न च समानदेशत्वे सति समानेन्द्रियग्राह्यत्वे च प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमनुपपन्नमिति[4] वाच्यम् । एकत्वैकपृथक्त्वावयव्यवयवबहुत्वबलाकापरिमाणादिभिर्व्यभिचारात्[5] । न चोत्कर्षापकर्षवत्त्वाद्गन्धवत् शब्दानित्यतासाधनमिति युक्तम् । न हि यदेवोत्कर्षसामान्यमपकर्षसामान्यं वा शब्दे तदेव गन्धेऽपि गन्धवत्त्वादिना[6] परापरभावानुपपत्तेः । न चान्यद् गन्धशब्दसाधारणम् उत्कर्षापकर्षवत्त्वमनुगतं शक्यनिर्वचनं तस्मादनन्यथासिद्धप्रत्यभिज्ञानबलान्नित्य एव शब्द इति ।

अत्रोच्यते । उत्पन्नः शब्दो विनष्टः शब्द इति प्रतीतिस्तावत् सकलजनप्रसिद्धा । तत्र नौपाधिकी सा, अन्योत्पत्तिविनाशानाकलनेऽपि जायमानत्वात्[7] । साक्षात्सम्बन्धे बाधकाभावाच्च । किञ्च घटादावुत्पत्तिविनाशप्रतीतिरेवमौपाधिकी किं[8] न कल्प्यते । तत्र तथाभूतोपाध्यभावादिति चेत्[9] । न । किं शब्दे उत्पत्तिविनाशप्रतियोगी कश्चिदुपाधिर्नियतः प्रतीयते येनैषा प्रतीतिरन्यथासिद्धा स्यात् । ननु वायुधर्मो नादो व्यञ्जकः, तदुत्पत्तिविनाशनिबन्धनैवोत्पत्तिविनाशप्रतीतिः ककारादीनामिति[10] । मैवम् । वायुधर्मस्य श्रोत्रेणानाकलनात्[11] आकलने वा नादस्यैव हि ककाराद्युपाधिकोत्पत्तिविनाशावित्येव किमिति नाङ्गीकुरुषे येनैवं लज्जामपहाय पुनः पुनः जल्पसि[12] । एवं कण्ठताल्वादिवाय्वभिघातादीनामुपाधित्वं[13] प्रत्याख्यातम् ।

१. P reads प्रतिषिध्यते । २. P+ I. O. read किञ्चिदेव । ३. P reads व्यञ्जकत्वात् । ४. P reads ०व्यञ्जनव्यङ्ग्यत्वम् । ५. I. O. reads ०बलाकादिरूपपरिमाणादिभिः । ६. P+ I. O. read गन्धत्वादिना । ७. $M_1$ reads ज्ञायमानत्वात् । ८. P reads किमिति । ९. P drops न and reads तत् किम् । १० P+ I. O. read ककारादौ । ११. P reads श्रोत्रेऽनाकलनात् । १२. P reads (अ)पहाय प्रलपसि, I O. reads पुनः पुनः प्रजल्पसि । १३. I. O. reads ०संयोगाभिघातादीनाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननूक्तमत्र श्रुतपूर्वो गकारो विनष्ट इति प्रतीतिः साक्षात्कारिणी न भवत्यधिकरणस्यायोग्यत्वात्, आनुमानिकत्वे तु प्रत्यभिज्ञानं बाधकमेव। एवम्[1]ुत्पत्तिमत्त्वेन शब्दानित्यतासाधनेऽपि बाधकं[2]मूहनीयमिति। मैवम्। शब्दध्वंसः प्रत्यक्षः, प्रत्यक्षप्रतियोगिकाभावत्वात् घटाभाववत्[3]। न च योग्याधिकरणत्वमु[4]पाधिरत्र शरणं शब्देऽपि साध्याव्यापकत्वात्। न च साधनधर्मावच्छिन्नसाध्यव्यापकत्वमेवोपाधेः[5] आश्रयनाशजन्यघटध्वंसे एव साध्याव्यापकत्वात्।

तत्र भूतलादिकमधिकरणं योग्यमेवेति चेत्। तत् किमधिकरणं प्रतियोगिसमवायी न विवक्षितः। एवं चेत् प्रकृतेऽपि गेहादिकमधिकरणमादाय शब्दाभावनिरूपणमपि न दण्डवारितमिति। एवं योग्याधिकरणकाभावत्वेनैवाभावस्य साक्षात्कारयोग्यतावच्छिद्यते इति निरस्तम्, धर्माद्यभावप्रत्यक्षताप्रसङ्गस्य मूले[6] दर्शितत्वात्। यत्किञ्चिदधिकरणमादाय प्रकृतेऽपि तत्सम्भवाच्च। अन्यथा परिमाणादिध्वंसनिरूपणे तु का प्रत्याशा।

नन्वेवं वायुस्पर्शध्वंसोऽपि प्रत्यक्षेणैव गृह्येतेत्युक्तमेवेति चेत्। तत्र केचिदाहुः[7]। आश्रयनाशजन्यस्य तस्य सन्निकर्षाभावादग्रहणमिति। तदयुक्तम्[8]। परिमाणध्वंससाधारण्यात्। सोऽपि न प्रत्यक्ष इति चेत्। तत् किं कपालनाशजन्यघटध्वंसोऽपि न साक्षात्क्रियत इत्यपि वक्तुमध्यवसितोऽसि[9]। न चैवम्। भूतले घटो ध्वस्तः, तथा तत्परिमाणमपि ध्वस्तमिति साक्षात्कारस्यानुभवसिद्धत्वात्। तस्माद्वायुस्पर्शध्वंसे एवं वक्तव्यम्। तत्र किमापाद्यते, वायुस्पर्शध्वंसे साक्षात्कारमात्रं वा ध्वंसत्वेन तत्साक्षात्कारो वा। नाद्यः। इह तथाभूतो वायुस्पर्शो नास्तीति संसर्गाभावत्वेन तत्प्रतीतेरिष्टत्वात्। न द्वितीयः। वायोः सदा गतिमत्त्वात्[10]। अन्यत्र वायुगमनसन्देहस्यैव[11] तत्प्रतिबन्धकत्वात्। तथाहि तत्तद्व्याप्येतरयावत्तद्ग्राहकसमवधाने

१. P drops एवम्। २. P reads बाधनम्। ३. P misses घटाभाववत्। ४. P reads योग्याधिकरणैकत्वम्। ५. P+I.O. read साधनधर्मविशेषितसाध्यव्यापकत्वमस्य। ६. शेषानन्त comments मूले आकरे न्यायकुसुमाञ्जल्यादावित्यर्थः। ७. P reads अत्र केश्चिदुच्यते। ८. P misses अग्रहणमिति। तदयुक्तं। ९. P reads उद्यतोऽसि। १०. P+ $M_1$ miss वायोः सदागतिमत्त्वात्, P then reads वायुगमकस्य। ११. I. O. reads वायुगमनविरहसन्देहस्यैव प्रतीतिप्रति०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सति तदनुपलम्भात् । तदभावत्वेन साक्षात् क्रियेते, नान्यथा । अत्र अन्यत्रगमनादिविरहनिश्चयरूपप्रतिसन्धानसहकारिसमवधाने सति ध्वंसत्वेन, उत्पत्तिनियतकारणप्रतिसन्धानरूपसहकारिसमवधाने सति प्रागभावत्वेन, एवमन्योन्याभावादावप्यूहनीयम् ।

तस्मात् शब्दः अनित्यः । उत्पत्तिमत्त्वात् घटवत् । न चात्र प्रत्यभिज्ञानं बाधकम् । तारत्वादिविरुद्धधर्मसंसर्गेण ज्वालादिसाधारण्यात् । ननु तारत्वादिकं ककारादीनां न स्वाभाविकम् । तथात्वे कत्वादिना परापरभावानुपपत्तिप्रसङ्गादिति उक्तमेवेति । मैवम् । अन्यधर्मत्वे तारत्वादीनां तारो गकार इति भ्रान्ता प्रतीतिः[२] स्यात् ।

अत्राप्यनुभूयमानं [३]तारत्वमारोप्यते स्मर्यमाणं वा । उभयथापि व्यक्त्यस्फुरणात् कथं तारत्वादिजातिस्फुरणं, जातिभाने व्यक्तिभाननैयत्यात् । ननु सामान्येन व्यक्तिभासत एव विशिष्य तु व्यक्तिभाननैयत्यं नास्त्येव । तारत्वादिपदादेव तथाज्ञानदर्शनात् । ननु अनुभवे एवायं नियमो यद् व्यक्तिभाननियतं जातिभानं न तु स्मरणे । तथाच ध्वन्यभानेऽपि[४] तद्धर्मतारत्वादिजातिसमारोपो यदि ककारादिषु भविष्यति तदा को विरोध इति चेत्, मैवम् । तारः ककार इति तावत्प्रतीयते । तत्र कत्वतारत्वयोः व्याप्यव्यापकभावानुपपत्त्या सर्वमेतत् कल्पनीयम् । तद्वरम् तदनुपपत्त्याऽनयोरेकस्य नानात्वमेव कल्प्यताम् । कथं तत्र विनिगमनेति चेत् । मा भवतु । द्वयोरपि कल्प्यतां तथापि न हानिः । वस्तुगत्या विनिगमनामप्यत्र करिष्यामः । एतच्च गन्धादिष्ववश्यं स्वीकर्त्तव्यम् । तथाहि मन्दो गन्ध उत्कृष्टो गन्ध इति प्रतीतिर्गन्धोत्कर्षापकर्षसामानाधिकरण्यमवगाहमानाऽनुभूयते । न च तत्रान्योत्कर्षापकर्षौ समारोप्येते, अन्यस्योत्कर्षापकर्षाश्रयस्य कल्पनाप्रसङ्गात् । न च गुणकर्मातिरिक्तं उत्कर्षापकर्षावाश्रयेते । तस्माद्यथा तत्र गन्धत्वादिना परापरभावानुपपत्त्या नानात्वकल्पनम्, तथाऽत्रापीति न किञ्चिदनुपपन्नम् ।

---

१. P reads ०समवधानं तदभावत्वेन साक्षात्क्रियते । २. P reads प्रतीतिर्न स्यात् । ३. This chapter is incomplete in P. Text beginning from here up to the end of the chapter is missing । ४. I. O. reads व्यक्त्यभानेऽपि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

न च तारमात्रे प्रत्यभिज्ञा निराधारा[1]। तस्मात्तारादयमन्यस्तार इति अस्यापि भेदस्य प्रतीतिः। न च श्यामोऽयं न लोहित इतिवद्धर्मभेदावलम्बनत्वम्। धर्मिभेदावलम्बनत्वे बाधकाभावात्[2]। न च पूर्वं नासीत् ककार इति बुद्धिरत्यन्ताभावावलम्बना, नित्यत्वे तथात्वानुपपत्तेः। न च भूतले घटो नास्तीत्यत्र संयोगाभावो घटाभावत्वेन व्यवह्रियते, भ्रमप्रसङ्गात्। न च घटाभावोऽत्र गृह्यत एव। न. प्रतीतिविरोधात्।

ननु कदाचिद् घटवति भूतले घटापसरणानन्तरं घटो नास्तीति या बुद्धिः सा कथम् घटाभावमालम्बते। न तावदन्योन्याभावं, संसर्गाभावत्वेनोल्लेखात्। न च प्रागभावप्रध्वंसौ प्रतियोगिसमानकालत्वात्[3]। नाऽप्यत्यन्ताभावम्, तस्य प्रतियोग्यसमानदेशत्वात्[4]। अन्यथा प्रागभावप्रध्वंसोच्छेदप्रसङ्गात्। न चैतत्प्रतीतिबलेन पञ्चम एवोत्पत्तिविनाशधर्माभावः स्वीकर्तव्य इति वाच्यम्। अपसिद्धान्तापातात्। तस्मादिह भूतले घटो नास्तीति बुद्ध्या नागृहीतविशेषणान्यायेन घटसंयोग एव निषिध्यत इत्येव युक्तम्। अत एवाहुः "संयोगो ह्यत्र निषिध्यते" इति॥

मैवम्। इह भूतले घटो नास्तीति बुद्धिस्तावदनुभवसिद्धा। तस्या यदि घटसंयोगाभावो विषयः स्यात् तदा घटात्यन्ताभावः क्वचिदपि न स्यात्। संयोगाभावत्वेनैवान्यथासिद्धेः। एवमस्त्विति चेत्। न। घटप्रतियोगित्वेन तस्याभावस्य[5] ग्रहणात्। तस्मादत्यन्ताभाव एव सः। न च प्रतियोगिसमानदेशताव्याघातः। अव्याप्यवृत्तौ संयोगात्यन्ताभावे[6] प्रतियोगिसमानदेशत्वस्य प्रतीतिबलेन स्वीकारात्[7]। न चात्यन्ताभावस्य नित्यत्वाद् घटवत्तादशायामामपि भूतले घटो नास्तीति प्रतीतिप्रसङ्ग इति वाच्यम्। संयोगस्यैव तदानीं प्रतिबन्धकत्वात्। अभावस्य प्रतियोगिनेव प्रकारेणापि सह विरोधावधारणात्। न च प्रागभावप्रध्वंसोच्छेदप्रसङ्गः, भविष्यति-विनष्ट इति प्रतीत्योरत्यन्ताभावेनासमर्थनात्। न च संयोगो ह्यत्र निषिध्यते इत्यनेन विरोधः। भूतले घटो नास्तीत्यनेन प्रत्ययेन संयोगाभावोऽपि विषयीक्रियत इत्येवंपरत्वात्तस्येति सङ्क्षेपः।

---

१. $M_1$ reads निराबाधा। २. I. O. reads बाधकासद्भावात्। ३. I. O. reads ०समानकालीनत्वात्। ४. $M_1$ reads प्रतियोगिसमानदेशत्वाभावात्। ५. $M_1$ drops तस्याभावस्य, $M_2$ reads तद्ग्रहणात्। ६. I. O. reads अव्याप्यवृत्तिसंयोगात्यन्ताभावस्य। ७. I. O. reads प्रतियोगिसादेश्यस्य प्रतीतेरेव तथाङ्गीकारात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्ये तु भूतले घटो नास्तीति बुद्धौ घटसंयोगाभाव एव भासते घटपदं तु विरोधितामात्रसाम्येन[1] संयोगे लाक्षणिकमित्याहुः । भूतले घटाभावो जातो विनष्टश्चेति व्यवहारदर्शनात् । अन्य एवायमुत्पत्तिविनाशप्रतियोगी घटाभाव इति पाश्चात्याः ।

यत् पुनरेकत्वपृथक्त्वादिना व्यभिचारो दर्शितस्तदपि मन्दम् । प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं हि परस्पराव्यञ्जकव्यङ्ग्यत्वं विवक्षितम् । तच्च पृथक्त्वे यद्यप्येकत्वापेक्षयाऽस्ति तथापि पृथक्त्वापेक्षया एकत्वे नास्ति । एवमितरत्रापि बोद्धव्यम् । यद्वा पृथक्त्वव्यावृत्त्यर्थं निरवधित्वेन विशेषणीयम् । बलाकारूपबलाकापरिमाणव्यावृत्त्यर्थं दोषविरहे सतीति विशेषणीयम् । बलाकारूपे नीलत्वारोपो रूपं तु सामान्यतो गृह्यत एवेति कश्चित् ।

अवयविनि गृह्यमाणे यदि तावदवयवबहुत्वमुत्पन्नं तदा गृह्यत एव । नो चेदभावादेव न गृह्यते इति[2] तेनापि सह न व्यभिचारः ।

यत्तु नीरजनीलिमा दीपेन न व्यज्यते नीरजत्वं तु व्यज्यत इति तेन व्यभिचारो दृश्यते तदपि मन्दम् । समानाश्रयत्वेनान्यूनानतिरिक्ताश्रयत्वस्य विवक्षितत्वात् । अत्रापि रूपं गृह्यते नीलत्वं न गृह्यते तत्तु भिन्नाश्रयमिति केचित्[3] ।

उत्कर्षापकर्षवत्त्वेनाप्यनित्यतानुमानं युक्तमेव । तथाहि सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकरूपवत्त्वमुत्कर्षः । सजातीयेन प्रतिबन्धनीयसाक्षात्कारविषयतावच्छेदकरूपवत्त्वमपकर्षः । एतदुभयमपि गन्धसाधारणमेव शब्दे वर्त्तते इति न किञ्चिदनुपपन्नम् । यद्वा सजातीयावधिमतोऽवधिमत्त्वम्[4]उत्कर्षापकर्षत्वम् । गुणत्वसाक्षाद्व्याप्यभूयोजातिमत्त्वं तदिति कश्चित् । तच्चिन्त्यम् । केचिच्च प्रत्यभिज्ञानं कत्वादिसामान्यभेदेनापि शक्यसमर्थनम् । उत्पत्तिविनाशप्रत्ययस्तु न तथेति तद्बलेनैव निष्प्रत्यूहा शब्दानित्यतासिद्धिरित्याहुः । न चाकाशमात्रगुणत्वेन[5] सत्प्रतिपक्षत्वमप्रयोजकत्वात् । साधनधर्मावच्छिन्नसाध्यव्यापकस्यातीन्द्रियाकाशगुणत्वस्योपाधेः सत्त्वाच्च । एवमुपाध्यन्तरमूहनीयम् ॥छ॥ इति शब्दानित्यतावादः[6] ।

---

१. I.O. reads ०मात्रेण सामान्येन । २. I.O. reads इति न किंचिदनुपपन्नम् । ३. I. O. reads कश्चित् । ४. $M_2$ reads सजातीयावध्यवधिमत्त्वम् । ५. I. O. reads आकाशैकगुणत्वेन । ६. I. O. misses इति शब्दानित्यतावादः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (२५) ईश्वरवादः ।

इह ईश्वरे तावत् परविप्रतिपत्त्या संशये विचार आरभ्यते । तत्र परेषामयमाशयः । अनुमानमीश्वरे प्रमाणमाद्रियते । तत् किमवच्छिन्ने पक्षे प्रवर्त्तनीयम् । विवादाध्यासितत्वेन वा १ शरीरानपेक्षोत्पत्तिकत्वेन वा २ क्षित्यादिकत्वेन वा ३ सन्दिग्धकर्तृकत्वेन वा ४ नित्यवर्गप्रसिद्धसकर्तृकभावोभयभिन्नत्वेन वा ५ अन्यथा वा ६ ।

नाद्यः, विवादाध्यासितत्वस्य केवलान्वयितया सर्वत्र सम्भवेन व्यवच्छेदकत्वाभावात् । सकर्तृकत्वाकर्तृकत्वविवादविषयतायामपि तथात्वात् । किञ्च विवादाध्यासितत्वम्[२] विरुद्धप्रकारकज्ञाने विषयत्वम् तत्प्रभवाभिलाषविषयत्वं वा वाच्यं। तथा च तयोरनुमानप्रवर्त्तनकालेऽसम्भवात् कथमवच्छेदकत्वम्। अपि च विवादास्पदत्वं ज्ञातमेवावच्छेदकं तज्ज्ञानं च तदवच्छेदकज्ञानाधीनम् । तथा च तदवच्छेदकमपरमनुगतं वाच्यम् । न च तत् सम्भवति, सम्भवे वा तदेव पक्षतावच्छेदकमास्ताम्[३] । क्षितित्वादिकम् अनुगतं तदवच्छेदकमिति चेन्न । अननुगतं[४] तदवच्छेदकं प्रत्येकं मेलकेन वा । नाद्यः । तस्याशक्यज्ञानत्वेन तदवच्छिन्नविवादास्पदत्वग्रहस्य दूरबाधितत्वात्[५] । नापरः । मेलकस्याशक्यावधारणात् ।

न द्वितीयः । शरीरसमवेतगुणकर्मध्वंसाव्यापनात् । शरीरकर्त्रनपेक्षोत्पत्तिकत्वं विवक्षितमिति चेन्न । शरीरित्वस्यां[६]व्यावर्त्तकतया व्यर्थत्वात् । असिद्धेश्च । शरीरिणोऽप्यदृष्टद्वारा कार्यमात्रकर्तृत्वसम्भवात् ।

न तृतीयः । आदित्वं तत्समानप्रकारकत्वम् अन्यत्वं वा । नाद्यः । क्षितिसमानप्रकारकत्वस्य निर्वक्तुमशक्यत्वात्[७] । नापरः । अशक्यनिर्वचनात् ।

न चतुर्थः । कर्तृसन्देहस्यापि केवलान्वयितया[८] अनुमानप्रवर्त्तनकाले संशयाभावादप्रसिद्धेश्च । न च संशयोपलक्षणत्वम् । उपलक्ष्याभावात् ।

---

१. The beginning of ईश्वरवादः is missing in P । P starts from विवादाध्यासितत्वस्य, I. O. generally counts the विकल्पs But in this case counting is found only in $M_1$ । २. P reads विवादास्पदत्वम् । ३. P reads (आ)प्तम् । ४. P reads अनुगतं हि । ५. P reads ०स्पदत्वस्य पूर्वबोधितत्वात् । ६. P read शरीरवत्त्वस्य । ७. P+ I. O. read निर्वक्तव्यत्वापातात् । ८. P+ I. O. read केवलान्वयित्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न पञ्चमः । उभयभिन्नत्वं हि केन प्रकारेणोपस्थितेऽधिकरणे ग्राह्यम् । न तावदनुगतेन तस्याभावात् । नाननुगतेन तस्यानन्ततया प्रत्येकमशक्यग्रहत्वात् । अप्रसिद्धपदार्थविकल्पानुपपत्तेश्च ।

न चरमः । असम्भवात् ।

किञ्च साध्यमपि निरूप्यते । तथाहि सकर्तृकत्वं वा कर्तृजन्यत्वं वा कर्तृसाक्षाज्जन्यत्वं वा बुद्धिमत्पूर्वकत्वं वा साक्षाद्बुद्धिमत्पूर्वकत्वं[४] वा उपादानगोचरापरोक्षज्ञानचिकीर्षादिमज्जन्यत्वं वा । नाद्यः । घटादिकर्त्रैव साहित्यसम्भवे सिद्धसाधनात् । नापरः, तत्त्वादेव । न तृतीयः । साक्षाज्जन्यत्वं हि तज्जन्याजन्यत्वे सति तज्जन्यत्वम् । तथाच साध्यविकलो दृष्टान्तः । न हि घटादिकं साक्षात्कर्त्रा जन्यते । नापरः, सिद्धसाधनात् दृष्टान्तासिद्धेश्च । नापरो घटाद्युपादानगोचरतादृशज्ञानादिमताऽस्मदादिना एव सिद्धसाधनात् । किं चैवं निरुपादानस्य ध्वंसस्य तव मते कथं सकर्तृकता स्यात् । अतीन्द्रियोपादानयोः वायुशब्दयोर्वा कथं अस्मदादिकर्तृकता स्यात् इति । उपादानपदेनोपायमात्रमेव विवक्षितमिति चेन्न । अस्मदादिना सिद्धसाधनात् । अस्मदादीनामपि सकलकार्यकिंचिदुपायाभिज्ञत्वात् ।

अपि च । नापरोक्षज्ञानादिमज्जन्यत्वं सकर्तृकत्वं यागस्याऽस्मदाद्यकर्तृकत्वापातात् । न हि तत्रापरोक्षज्ञानं चिकीर्षाकृतिजनकं किन्तु शाब्दम्[६] । न च तत्र सकर्तृकत्वमेव नास्ति, व्यवहारविरोधात् । ज्ञानमात्रमेव विवक्षितमिति चेन्न एवं हि ज्ञानमादाय साध्यपर्यवसानं स्यात् । न तावत्प्रत्यक्षं नियामकाभावात् । नापरः तत एव । न च प्रत्यक्षादिजातीयं ज्ञानपञ्चक-[७]मेवेश्वरेऽङ्गीकार्यम् अपसिद्धान्तापातात् । किञ्च प्रत्यक्षत्वादिजातीनां कारणविशेषप्रयोज्यतया कथं नित्ये वृत्तिसम्भावनापि । तथा च यावद्विशेषबाधात् ज्ञानमपि बाधितम्[८] ।

एवमिच्छाप्रयत्नावपि ।

किञ्चात्र किं लिङ्गमपि कार्यत्वमिति यदि तदा किं कार्यत्वम् । कृति-

१. P reads तस्यानन्तरं तयोः । २. P+ I. O. add साध्यं here । ३. I. O. reads तज्जन्यत्वम् । ४. P reads बुद्धिमत्पूर्वकर्तृकत्वं वा साक्षात् बुद्धिमत्पूर्वकर्तृकत्वं वा । ५. P+ I. O. read °ज्ञानादिमज्जन्यत्वं वा । ६. P reads शब्दः । ७. शेषानन्त notes ज्ञानादिपञ्चकमिति । अर्थापत्तेः प्राकृप्रामाण्याभिनिवेशेन गुरोर्वचनमेतत् । ८. P+ I.O. read न सिध्येत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जन्यत्वं वा १ प्रागभावप्रतियोगित्वं वा २ उत्पत्तिमत्त्वं वा ३। नाद्यः। असिद्धेः। नापरः प्रागभावप्रतियोगित्वस्य तत्स्वरूपादन्यस्याभावात्[1]। नान्यः। अनिर्वचनात्। स्वसमानकालीनपदार्थध्वंसानधिकरणसमयसंबन्ध[2] उत्पत्तिरिति चेन्न। चरमध्वंसोत्पत्त्यव्यापनात्। तस्याऽपि चोत्पत्तिमत्तया त्वया सकर्तृकत्वाङ्गीकारात्। पूर्वकालासम्बन्धे सत्युत्तरसमयसम्बन्ध एवोत्पत्तिरिति चेन्न व्यर्थविशेषणत्वात्। कथं वा कर्त्रा सह कार्यत्वस्य व्याप्तिरपि शक्या। कर्त्ता हि कारणविशेषः[3], कार्यत्वं च कार्यमात्रवृत्तिसामान्यं, न च तत्र कारणविशेषापेक्षा किन्तु कारणत्वेन[4]। तथा च कार्यात् कारणमात्रमायाति। न तु तद्विशेषकर्त्ताऽपि। न च सामान्येन रूपेण कर्त्ता सिद्ध इति[5] वाच्यम्। सामान्यस्य यत् किञ्चित् कारणमादायोपपत्तौ कर्तृत्वास्पर्शात्। अत एव कर्त्तरि साध्ये शरीरकार्यत्वमुपाधिमभिदधाति। शरीररूपकर्तृव्यापकबाधात्[6] कर्तृबाधश्च।

अपि च शरीराजन्यत्वेन कथं न सत्प्रतिपक्षत्वम्। व्यर्थविशेषणत्वादिति चेत् न। किं व्यर्थविशेषणत्वं, निष्प्रयोजनत्वं वा व्यभिचारावारकत्वं वा। नाद्यः। असिद्धिवारणार्थत्वात्। नेतरः। तथाभूतस्यापि गमकत्वात्। कथमन्यथा सुरभीन्धनप्रभवधूमरहितोऽयं तथाभूतवह्निरहितत्वात् इत्यप्यनुमानम्। अत्रापि वह्निरहितत्वादित्येव हेतुरिति चेन्न वह्निमत्यपि तथाभूतानुमानदर्शनात्। किं च यथा धूमे नीलत्वं व्यर्थं तथा नात्र व्यर्थता। तत्र धूम एव नीलत्वेन विशिष्यते। अत्र तु नाजन्यत्वं शरीरेण विशिष्यते किन्तु जन्यत्वमेव।

किञ्च जन्यत्वाभावादन्य एव[7] शरीरजन्यत्वाभावः। अन्यथा जन्यं शरीराजन्यं न स्यात्। तथा च कथं[8] व्यर्थता। किञ्च ज्ञानत्वेच्छात्वप्रयत्नत्वानामपि अनित्यवृत्तित्वेनात्मत्वस्याप्यनित्यज्ञानादिमत्समवेतत्वेन[9] कर्तुः शरीरित्वेन नियमावधारणात् कथमनुमानोदयः इति। न च सिद्ध्यसिद्धिव्याघातादुप-

१. P+ I. O. drop प्रागभाव–। २. P drops स्व–। ३. P reads कारणान्वितः। ४. P adds एव here। ५. P reads तावत् सिध्यतीति। ६. P reads °कर्तृव्याप्यव्यापकबाधात्। ७. P reads यथा जन्यत्वाभावात् एवम्। ८. P reads कर्तृव्यर्थत्वम्। ९. P reads ज्ञानेच्छाप्रत्ययानामप्यनित्यत्वेन। १०. P+ I. O. read (अ)नित्यज्ञानादिमत्त्वेन।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संहारानुपपत्तिः, अनुपसंहारेऽपि विरोधिव्याप्तिप्रतिसन्धानस्य एव प्रतिबन्धकत्वात् ।

किञ्चैवं शशशृङ्गमपि पशुत्वात् सिध्येत् । नहीश्वरसाधनशशशृङ्गसाधनयोः कश्चिद्विशेषः । भवतु वा विवादास्पदे कर्त्तुः सिद्धिः[1] । ऐश्वर्यं कुतो ? अनीश्वरस्य कर्तृत्वासम्भवादिति चेत् कुतोऽसम्भवः, सर्गाद्यकालीनकार्यपक्षीकरणात् इति चेत् । तर्हि अस्मदादीनामेव कस्यचित् प्रलयप्राक्कालीनज्ञानचिकीर्षाकृतीनां स्थैर्यमेव तदनुरोधेन कल्प्यतां धर्मिकल्पनातो धर्मकल्पनाया लघुत्वादिति ।

अत्रोच्यते । प्रकृतविचारानुकूलविवादास्पदत्वस्यैव वा पक्षतावच्छेदकत्वम् । विवादास्पदत्वावच्छेदकता तत्तद्द्रव्यत्वगुणत्वकर्मत्वादीनां[2] शक्यावधारणानां अननुगतानामेव । न चानुमानप्रवर्तनकाले विवादविरहात् नावच्छेदकतासम्भवः, तस्य ज्ञानस्यावच्छेदकत्वात् । ज्ञानस्य च तैदपगमकाले विद्यमानत्वात् । एवं शरीरिकर्त्रनपेक्षोत्पत्तिकत्वेनापि पक्षता नानुपपन्ना ।

ननु शरीरिपदवैयर्थ्यादृष्टद्वारा तत्सम्भवेनासिद्ध्या चानुपपन्नमेवेति उक्तम् । न पुनर्युक्तिमत् । तथाहि सुप्रसिद्धशरीरिकर्तृव्यावृत्ते न तावद्व्यर्थता । अन्यथा स्वमतेऽसिद्धं विशेषणं स्यात् । एवमदृष्टद्वारा अस्मदादीनामङ्कुरादिजनकत्वमपि न समीचीनं मानाभावात् । न हि यद्यस्यादृष्टेनारभ्यते[6] स तत्र कर्त्ता नाम । अस्मदाद्यदृष्टारब्धघटस्यास्मदादिकर्तृत्वेन व्यवहाराभावात्[7] । अत एव शरीराजन्यत्वेन सत्प्रतिपक्षत्वं त्वमेव कुरुषे । आदिमत्त्वस्यापि[8] विवादप्रकारोपनायकत्वेन सुवचमेवावच्छेदकत्वम् । यथोक्तपरत्वमेव वा तस्य । यद्यपि कर्तृसन्देहमात्रस्य केवलान्वयित्वं तथापि प्रकृतविचारानुकूलस्य तथात्वं तस्य चानुमानप्रवर्त्तनकालेऽसम्भवेऽपि तदुपलक्ष्ययोग्यतावच्छेदकतानिर्वचनादेव नासम्भवः[9] । एवं भिन्नत्वमपि न दुर्ग्रहम् । तथाहि द्रव्यगुणकर्मणां कियतामेव जन्यत्वम् । तत्रापि कियतां प्रसिद्धक-

१. P reads विवादास्पदकर्त्तृसिद्धिः । २. P reads तत्तद्द्रव्यगुणत्वादीनाम् । ३. P reads तदागमकाले । ४. I. O. reads व्यावर्त्तनात् । ५. P reads स्वतो विशेषणं न स्यात्, $M_1$ reads स्वतोऽसिद्धं विशेषणं स्यात् । ६. P+ I. O. read जन्यते । ७. P+ I. O. read अस्मददृष्टजन्यघटस्यास्मत्कर्तृत्वेनाव्यवहारात् । ८–८. This portion is missing in P. The editor acknowledges it in the footnote there in । ९. P reads निर्विवादेव, I.O. reads तत्संभवः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृकत्वं घटादीनाम् । तत्र येषां न[1] प्रसिद्धकर्तृकत्वं तेषु पक्षीकृतेषु पर्वतत्वाङ्कुरत्वद्व्यणुकत्वादिभिः प्रकारैरुपस्थितेषु नित्यवर्गप्रसिद्धकर्तृकोभयभेदग्रहः सुकर एव । न चानन्त्यादशक्यग्रहत्वं[2] भेदग्रहस्य प्रतिकूलस्यानन्त्यस्यासिद्धेः । अन्यथा उभयभिन्ना केचित् पदार्था इत्यभिलाप एव न स्यात् । प्रसिद्धपदार्थखण्डनं तु न दण्डाय प्रकृतवादिप्रसिद्धेरेव विवक्षितत्वात् । एवं चरमोऽपि न सम्भवी । स्वजनकादृष्टाजनकप्रयत्नाजन्यत्वे सति जन्यत्वस्यैव तत्त्वात् ।

कश्चित्तु विवादास्पदीभूतस्य[3] एकस्यापि पक्षत्वे भगवत्सिद्धिरविरुद्धैवेति । तदनुपपन्नम् । अन्यत्र संदिग्धानैकान्तिकताप्रसङ्गात् । न पक्षसमे सन्दिग्धानैकान्तिकतेति चेन्न । आज्ञामात्रत्वात् । पक्षेऽपि तर्हि तत् स्यादिति चेन्न । तत्र संशयस्य विचाराङ्गत्वात् । अन्यथा तु अनुमानमात्रोच्छेदप्रसङ्गात् । पक्षसमे तु नैवम् ।

किञ्च विषयपरिशोधकतर्केणैव संशयनिवृत्तेः कथं पक्षे सन्दिग्धानैकान्तिकता । न च पक्षसमे तर्कादेरवतारस्[4]तस्याविषयत्वात्[5] । तथात्वे वा न पक्षसमत्वं किन्तु पक्षत्वमेवेति घटकुट्यां प्रभातम् । ननु निश्चितसाध्यविरहे हेतुमत्ता संशयेनैव सन्दिग्धानैकान्तिकता भवति, न[6] तु साध्यसंशये हेतुनिश्चये, पक्षे एव तथात्वावधारणात् तर्कस्य संशयनिवर्त्तकत्वे मानाभावादिति । मैवम् । तर्कस्यापि वैषयिकविरोधेन[6] संशयनिवर्त्तकत्वात् । किञ्च साध्याभावसामानाधिकरण्यनिश्चयो हि हेतोः दूषकताप्रयोजकः । स च साध्यसन्देहेऽपि समानोऽन्यथा विपरीतमेव किमिति न[7] स्यात् । ननूक्तं पक्षेऽपि तथा स्यात् । तत्र संशयस्यानुमानानुकूलत्वं न पक्षसमे तथेति किं नोक्तम् ? । अन्यथा पक्षे सन्दिग्धानैकान्तिकं न दूषणमिति दूषणत्वमेवास्य नास्तीत्यस्यापि वाचाटवचसोऽवकाशप्रसङ्गात् । सर्वज्ञादिसिद्ध्यनुमाने[8] तेषां पक्षत्वमिति तु कश्चित् ।

न साध्यमशक्यनिर्वचनम्[9] । तथाहि सकर्तृकत्वे साध्ये घटादिकर्त्रा यत् सिद्धसाधनमुक्तम् तदयुक्तम् । सकर्तृकत्वं[10] हि कर्तृनिरूपितसम्बन्धो

---

१. P misses न । २. P reads दूषकत्वम् । ३. P reads विवादास्पदस्य कस्यापि । ४. I. O. reads तर्काद्यवतारः । ५. P misses तस्याविषयत्वात् । ६–६. This portion is missing in P । ७. P reads किन्न । ८. I. O. reads सार्वज्ञ्यादिसिद्ध्यर्थमनुमाने । ९. P reads अनिर्वचनीयम् । १०. P reads सर्वं हि कर्तृत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहारसाक्षिको घटादिदृष्टान्तदृष्टो नित्यवर्गव्यावृत्तः साध्यते सहेतुकत्ववत्[1]। स चान्यकर्त्रा नान्यत्र निर्वाह्यते । तथाननुभवात्[2] । अन्यथाऽऽकाशादावपि सकर्तृकत्वसहेतुकत्वव्यवहारः स्यात् । कथमन्यथा शरीराजन्यत्वेन सकर्तृकत्वव्यतिरेकसाधनाय त्वमेव यतसे । एवं बुद्धिमत्पूर्वकत्वे साक्षाद्बुद्धिमत्पूर्वकत्वं यदि साध्यते तदा न काचित् क्षतिः । साक्षात्कृतिजन्यत्वं यदा साध्यते तदा साक्षाज्जन्यत्वं कार्याव्यवहितपूर्वसमयवृत्तिकृ[3]तिजन्यत्वमेव विवक्षितं तच्चेष्टादावपि सिद्धमिति न किञ्चिदनुपपन्नम् ।

अपि च घटादिसमवायिगोचरज्ञानादिमत्ता न सिद्धसाधनं, सम्बन्धिशब्दमहिम्ना तन्निरासात् । उपादानादिगोचरापरोक्षज्ञानादिमत्पूर्वकत्वं यद्यपि वाय्वादावस्मत्कर्तृके नास्ति । तथापि अनेन रूपेण तत्रास्मत्कर्तृकताव्यवहारो मा भवतु । तथापि घटादिस्थलसिद्धव्याप्तिबलात् एतत्साध्यं पक्षेऽपि सिध्यत् केन वारणीयम् । उपादानपदेनोपायमात्रं विवक्षितमिति न चात्र सिद्धसाधनता सर्गाद्यकालीनकार्यस्य पक्षीकरणात् । न चापरोक्षज्ञानान्तर्भावेन सकर्तृकत्वानुपपत्तौ कथमपरोक्षज्ञानसिद्धिरिति वाच्यम् । अनुपपत्तेरभावात् । तथाहि यागादावपि कृतिः साक्षात्कारनियम्यैव । शाब्दं तु तत्र परंपरया ज्ञानमुपयुज्यते । तथा च कृतिनियामके साक्षात्कारसिद्धिं को वारयिता । तथाहि ज्ञानादिमज्जन्यत्वे साधने लाघवादेकमेव ज्ञानं सिध्यत् सकलप्रमाणोपजीव्यं प्रत्यक्षमादाय विश्राम्यति, न त्वनुमानादिकमिति न किञ्चिदनुपपन्नम् ।

यत् पुनरुक्तं यावद्विशेषबाधात् तज्ज्ञानमपि न सिध्येदिति तदयुक्तं, विशेषबाधस्यानुपपत्तेः । न हि जन्यसाक्षात्कारत्वादिकं कारणविशेषप्रयोज्यमित्यजन्येऽपि तथा स्यात् । एवं हि जन्यवृत्तिसामान्यम् जन्येनैव सिध्येत् । ननु ज्ञानादिमज्जन्यत्वं सकर्तृकत्वमित्येव नास्ति, ज्ञानाश्रयस्य घटादिजनकत्वे मानाभावात् । अन्वयव्यतिरेकाभ्यां तदवधारणमिति चेन्न । तस्य नित्यत्वेन व्यतिरेकाभावात् । तथा च ज्ञानादेरेव घटादौ जनकत्वं, न तदाश्रयस्य । मैवम् । [4]एवं ज्ञानाद्याश्रयकर्तृसिद्धेरविरोधात्[5] । किञ्च ज्ञानादीनां यथा अन्वयव्यतिरेकाभ्यां घटादिकारणत्वं तथा तदाश्रयस्यापि,

१. M₁ reads सहेतुकत्वात् । २. I. O. reads तथानुभवाभावात् । ३. P+ I. O. read –पूर्वक्षणवृत्ति– । ४. I. O.+P read एवमपि । ५. P reads ज्ञानाद्याश्रयत्वे कर्तृत्वसिद्धेः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समवधानगर्भौ हि तौ कारणताग्राहकौ तथाभूतौ चात्र सम्भवत एव । अत एव मयेदं कृतमिति व्यवहारः सकलजनसाधारणः । अपि च ज्ञानादौ तावदात्मनः कारणत्वं सिद्धमेव । तत्र च प्रयोजकं मृग्यमाणं न कार्यत्वातिरिक्तं[1] सम्भवतीति कार्यमात्रमेवात्मजन्यमिति न किञ्चिदनुपपन्नम् ।

एवं लिङ्गमपि नानुपपन्नम् । प्रागभावप्रतियोगित्वस्यैव व्यवहारसाक्षिकत्वात् । उत्पत्तिमत्त्वं तु चरमध्वंससाधारणं[2] सामग्र्यव्यवहितोत्तरक्षणसत्त्वसम्बन्धादिकं शक्यनिर्वचनमिति तदपि नानुपपन्नम्[3] । एतेन पूर्वकालासम्बन्धे सति सत्त्वमेव हेतुरिति यद् व्यर्थविशेषणत्वमुक्तं तदपि निरस्तम् ।

यत् पुनरुक्तं कार्यत्वस्य कर्त्रा सह व्याप्तिरनुपपन्ना, तदपि मन्दम् । कारणसामान्येनापि रूपेण व्याप्तिरवधारिता[4] कारणविशेषमादाय पर्यवस्यति । निर्विशेषं न सामान्यमिति न्यायात् । अन्यथा कार्यत्वात् निमित्तकारणमपि न सिध्येत् । किञ्चाचेतनकारणमात्रस्य कर्तृव्यापारवत्त्वावधारणात्[5] कथं न कर्त्रा सह व्याप्तिः । अत एव न शरीरकार्यत्वमेवोपाधिः साध्यव्याप्तौ मानाभावात् । व्यभिचारोन्नयने व्यर्थत्वात् च । ननु व्यर्थत्वं न दूषणमिति चेन्मा त्वरिष्ठाः । अग्रे दूषणत्वस्य व्यवस्थाप्यत्वात् । अत एव शरीरबाधात् न कर्तुर्बाधः । शरीरस्य तदव्यापकत्वात् ज्ञानादिगतकार्यत्वप्रयुक्तत्वात् तस्य[6] । ननूक्तम् शरीराजन्यत्वेन सत्प्रतिपक्षतास्तु व्यर्थविशेषणादनुमितिदर्शनात् न व्यर्थत्वं दूषणमिति चेन्न[7] । येन रूपेणोपस्थित एव हेतौ व्याप्तिरवधार्यते तद्विशिष्ट एव व्याप्तिर्वर्त्तते नीलत्वं पुनर्धूमे न तथास्ति तद्ग्रहेऽपि तत्र व्याप्तेरवधारणात् । तथाच तेन रूपेण व्याप्तिरसिद्धेति व्याप्यत्वासिद्ध एवान्तर्भावः । अत एव नीलधूमवत्त्वात् वह्निमत्त्वावधारणेऽपि[8] नीलधूमप्रयुक्तसाध्यवत्ताप्रत्ययस्तु भ्रान्त[9] एव इत्यवधेयम्[10] ।

किं चोभयथा हि व्याप्तिः क्वचित् प्रत्येकवृत्तिः, क्वचिद् व्यासज्यवृत्तिश्च । तथाच नाऽत्र प्रत्येकवृत्तिर्व्याप्तिः केवलनीलादपि हुताशनानुमा-

---

१. P reads कार्यत्वमतिरिक्तम् । २. P reads तु ध्वंससाधारणम् । ३. I. O. reads न किञ्चिदनुपपन्नम् । ४. I. O. reads अबाधिता, P reads अबाधितं । ५. P reads अचेतनकारणमात्रमकर्तृकत्वव्याप्तिकत्वावधारणात् । ६. P reads ०प्रयुक्तत्वाच्च । ७. P misses न here । ८. P reads नीलधूमवह्निमत्त्वावधारणे । ९. P reads ०प्रत्ययो भ्रान्तिरेव । १०. I. O. reads (अ)वधातव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नापत्तेः, न व्याप्यवृत्तिः केवलधूमे व्याप्तिविरहापत्तेः सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वादौ तथा दर्शनात्।

यत् पुनरुक्तं शरीराजन्यत्वं नाजन्यत्वमेव शरीरविशिष्टं किंत्वभावान्तरम्, एतदपि मन्दम्। अन्वयव्यतिरेकाभ्यां आकाशादावत्र व्याप्तिर्ग्राह्या। तत्र शरीराजन्यत्वोपस्थितावजन्यत्वोपस्थितेरावश्यकत्वात्[1] तत्रैव व्याप्तिर्ग्राह्या, न शरीराजन्यत्वे, गौरवात्। न च अजन्यत्वं विना क्वचिदपि शरीराजन्यत्वाकर्तृकत्वयोः सामानाधिकरण्यसिद्धिर्यतः तथा स्यात्। अत एव सुरभीन्धनप्रभववह्निविरहात् विशिष्टधूमविरहानुमानमुपपन्नम्। तथाहि वह्निमात्रविरहात् यथा जलह्रदे धूमविरहः तथा वह्निमन्ययोगोलके विशिष्टवह्निविरहादपि सिद्ध एव[2]। तथा च विवादास्पदे वह्निमति विशिष्टवह्निविरहात् तथाभूतधूमविरहसिद्धिर्न विरुद्धा। किञ्च [3]व्यापकस्यैव विरहो व्याप्यविरहव्याप्यः[3]। न च शरीरजन्यत्वं सकर्तृकत्वव्यापकमपि तु जन्यत्वमेव, तस्यैव तथावधारणात् शरीरजन्यत्वं शरीरकर्तृकत्वव्यापकमतस्तद्विरहात् तद्विरहः सिध्यत्येव। अपि च जन्यत्वाभावस्तज्जन्यत्वाभावव्यतिरिक्त इत्येव नेष्यते। किन्तु तज्जन्यत्वाभावकूटे एव जन्यत्वाभावसिद्धिः, अधिके मानाभावात्। तथाच जन्यत्वाभावत्वेनैव तत्राभावकूटे व्याप्तिः वर्त्तते. न तु प्रत्येकं, मानाभावात्। यत्राऽनेकमेव व्यापकं तत्र तदभावोऽपि गमक इति दिक्।

ननु ज्ञानादीनामनित्यत्वेन नियमावधारणात् कथमनुमानोदय इति। मैवम्। व्याप्तौ प्रमाणाभावात्, रूपत्वानित्यत्वयोरिव, अन्यथा नित्यं रूपादिकमपि न सिध्येत्। न च शशशृङ्गप्रतिबन्दिरदूषणत्वात्। न च शशशृङ्गासिद्ध्या प्रकृते किञ्चिद्दूषणं भवति। यदेव तत्र दूषणं तदेव प्रकृतेऽपि विवक्षितमिति चेन्न। शशशृङ्गसाधने बाधो व्याप्तिविरहश्च दूषणे, न च तेऽपि प्रकृते बाधाभावाद् व्याप्तिसाधनाच्च। अतीन्द्रियमेव शशशृङ्गं सिध्येदिति चेन्न। तस्य योग्यतानियतत्वात्। इदम् असिद्धमेवेति चेन्न तस्यैव प्रमाणा[4]भावात्। अन्यथा घटादिकमपि तथा न स्यात्। मा भवत्विति

१. P misses अजन्यत्वोपस्थितेः। २. $M_2$ adds विशिष्टधूमविरहः। ३.–३. This portion is missing in P। ४. P runs upto this portion only : last page 652।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेत् तर्हि भावे साध्ये बाधो दूषणमेव न स्यात्, अतीन्द्रियत्वेन साध्यपर्यवसानसम्भावनायाः सर्वत्र सुलभत्वात् । एवमस्त्विति चेत् तर्हि गृहमिदं पर्वतवत् वस्तुत्वादित्यत्रापि बाधो न स्यात् । पर्वतस्यातीन्द्रियसिद्धिसम्भावनायाः दुर्वारत्वात् । किञ्च शृङ्गव्यतिरेकः क्वचित् सिद्धो न वा । प्रथमे तुल्यन्यायतया पक्षेऽपि स्यात् । द्वितीये तु केवलान्वयित्वात् कथं साधकत्वं, त्वयाऽनङ्गीकारात् । कर्तुरपि योग्यतानियतत्वात्कथं [1]सिद्धिरिति चेन्न ज्ञानादिमतः परायोग्यत्वात् । शरीरस्य च व्यर्थतया कर्तृपदार्थबहिर्भावात् । न च ज्ञानादीनामेव स्थैर्यकल्पनं तेषामाशुतरविनाशित्वेन नियतत्वे जन्यज्ञानादीनामेवं[2] प्रयोजकतया विरोधेन तथाऽकल्पनात् ।

स्यादेतत् , सिध्यतु तावद्विवादास्पदं सकर्तृकत्वं परं तु तत्र द्वेषः किमिति न सिध्येत्[3] । तथा च कार्ये ज्ञानचिकीर्षाकृतिमत्पूर्वकत्वं दृष्टम् तथा क्वचिज्ज्ञानद्वेषनिवृत्तिमत्पूर्वकत्वमपि, एवं निवृत्तिरपि सिध्येदिति चेत् न[4] । साऽपि भवतु, तथा च ज्ञानं चिकीर्षाद्वेषौ प्रयत्नद्वयं तत्र भवतु । न च द्वेषप्रयुक्ता निवृत्तिरेव नेष्यते, अपि तु द्वेषात् जिहासा ततो निवृत्तिरिति वाच्यम् । तथा सति द्वेषे मानमेव न स्यात् । जिहासयैवान्यथासिद्धेः । द्वेष्मीत्यनुभवो मानमिति[5] चेन्न, अनिष्टसाधनताज्ञानस्यैव द्वेषपदेन तत्राभिलापात् । तत्रापि हेतुहेतुमद्भावोऽनुभूयत इति चेत् । भवतु, तथापि द्वेषयोनिः प्रयत्न इति भज्येत । जिहासाद्वाराप्रयत्नविशेषस्तज्जन्य इति चेत् । जिहासासाधनमेव द्वेषः तर्हि परमेश्वरे सिध्यतु । द्वेषवतः सांसारित्वप्रसङ्ग इति चेत् , चिकीर्षावतोऽपि प्रसङ्गतौल्यात्[6] । तत्र च धर्मिग्राहकमानबाध इति चेत् । द्वेषवतोऽपि समानम् ।

मैवम् , द्वेषचिकीर्षे समानविषये एव स्वीकर्त्तव्ये भिन्नविषये वा । नाद्यो, विरोधात् । न ह्येकदैकत्रैकस्य द्वेषचिकीर्षे सम्भवतस्तथा सति द्वेषात् तत्तत् कार्यं न कुर्यात्, चिकीर्षातः कुर्यात् इति महद्वैषम्यम् । द्वितीये तु तत् कार्यं न कुर्यादेव, न हि यत्र यस्य द्वेषः तदसौ जनयति, प्रत्युत स्वकार-

१. I. O. reads कर्तृसिद्धिः । २. I. O. reads आशुतरविनाशितानियतजन्यज्ञानादीनामेव । ३. I. O. misses न सिध्येत । ४. $M_1$ misses न here । ५. I. O. reads द्वेष्मीत्यनुमानमिति । ६. I. O. प्रसङ्गस्य तुल्यत्वात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णादुत्पद्यमानं प्रतिबध्नाति । तथा च तस्ये विश्वकर्तृत्वं न स्यात् इति धर्मिग्राहकप्रमाणविरोध[2] एव ।

ननु तथापि भगवतः सार्वज्ञ्यं घटादिकर्तृत्वं च कथं ? पक्षधर्मताबलादिति चेन्न, तस्याः साध्यपक्षसम्बन्धमात्रे सामर्थ्यात् । अन्यथा व्यतिरेकिमात्रविलयात् इति । मैवं, यत्र प्रथमत एव तावदनुपपत्तिप्रतिसन्धानम्, [3]तत्रान्वयिनैव साध्यविशेषः परिच्छिद्यते अन्यथा व्यतिरेकिणेति विषयविभागात् कर्तृत्वेन भगवतः कार्यवत्त्वमेव लाघवात् नियामकम् । तच्च घटादिसाधारणम् अतस्तत्राप्यसौ कर्त्तेति न किञ्चिदनुपपन्नम् । एवं सति घटदृष्टान्तेन कार्यत्वादेव द्विकर्तृकत्वसिद्धिः पक्षेऽपि स्यादिति चेन्न । व्याप्तौ प्रमाणाभावात् । लाघवात् प्रथमत एककर्तृकत्वसिद्धौ अनन्तरं द्विकर्तृकत्वसाधने [4]बाधाच्च ।

तथाऽप्यात्मत्वे तस्य किं मानम् ? ज्ञानवत्त्वमिति चेन्न । सुखवत्त्वस्योपाधित्वात् । धर्मिग्राहकादेरेवेति चेन्न । तस्यात्मत्वे औदासीन्यात्, न ह्यात्मत्वान्तर्भावेन, कर्तृत्ववैयर्थ्यादिति । मैवम् । आत्मत्वं हि जातिः प्रत्यक्षसिद्धा। द्रव्यमात्रवृत्तिजातौ व्यवस्थापकापेक्षा दृष्टेति तत्रापि तद्वक्तव्यं, तच्च धर्माधर्मभावनानामतीन्द्रियत्वे न, जघन्यप्रतीतिकत्वात् । तथा च ज्ञानादिषट्कमवशिष्यते । तत्रापीच्छादिपञ्चकोपजीव्यत्वात् ज्ञानमेव तद्व्यवस्थापकम् । तथा च न सुखित्वमुपाधिरप्रयोजकत्वात् ।

यद्वाहंशब्दस्तावद्भगवता वेदे प्रयुक्त इत्यविवादम् । तत्प्रवृत्तिनिमित्तं चात्मत्वमेव लाघवात् । तथा चानुवादे तावदहंशब्द एवात्मत्वे प्रमाणमिति । यद्वा "द्वे ब्रह्मणी वेदितव्ये" इति श्रुतेः ब्रह्मपदं भगवति प्रयुज्यमानं दृष्टं, ब्रह्मत्वं चात्मत्वमेव परिशेषात् । तथा च तदेवात्मत्वे मानमस्य । ननु तथापि नित्यमेव ज्ञानं परमेश्वरे इति न युक्तिमत् । तथाहि । यथा कर्तृतानिर्वाहकतया नित्यज्ञानमेवं प्रतिष्ठादिना तस्याहङ्कारममकारलक्षणम-

---

१. I.O. reads तथा च सति । २. I. O. reads °प्रमाणबाधः । ३. I. O. reads तत्रान्वयित्वेनैव । ४. I. O. reads प्रमाणबाधाच्च । ५. $M_2$ has some extra readings here which are obviously explanation of the उपाधि । ६. $M_1$ reads सुखित्वेनोपाधिः । ७. I. O. reads चार्थवादे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नित्यं ज्ञानमप्यास्थेयम् । एवं वैषयिकसुखदुःखादिश्रवणाद्धर्माधर्मावपीश्वरेऽङ्गीकर्त्तव्यौ । यद्वाऽभिनिवेशश्रवणादनित्यद्वेषोऽपि । न चैवं संसारित्वप्रसङ्गादनुपपत्तिः । तत्त्वेऽपि नित्यज्ञानादिकमादाय विश्वकर्तृत्वाविरोधात् । न च ईश्वरव्यतिरिक्तमात्मान्तरमेव ब्रह्माविष्णुमहेश्वरादिकम् इति वाच्यं, भगवद्गीताप्रमाणत्वोपदर्शनविरोधात्[२] ।

अत्राहुः—ईश्वरव्यतिरिक्ता एव ब्रह्माविष्णुमहेश्वरादयः । न च भगवद्गीताप्रमाणत्वोपदर्शनविरोधः । न ह्याचार्याः परमेश्वरे गीतामेवं[३] प्रमाणयन्तीति । प्रतिष्ठादिनाऽहङ्कारममकारोत्पत्तेरप्याचार्यैरावेदनात् । किमत्र तत्त्वमिति चेद्, ईश्वराद्भिन्नत्वमेव ब्रह्मादीनां, गीता तत्र प्रमाणत्वेनोपदर्शिता तेषामभेदमभ्युपेत्य । कथमन्यथा ब्रह्मणोऽपवर्गकाल इति भाष्यव्याख्यानं चक्रिरे । तद्यथा–ईश्वर एव ब्रह्मादिशरीरमुपादत्ते । तदा ब्रह्मणोऽपवर्गकाले शरीरापगमकाले, न तु मोक्षकाले तस्य सर्वदा मुक्तत्वात् । अथेश्वरभिन्न एव ब्रह्मा तदा मोक्षकाल इति । नन्वेवं सर्गादिकाले[४] अव्युत्पन्नस्य व्युत्पत्त्यर्थं प्रयोज्यप्रयोजकभावेन भिन्नशरीरमुत्पाद्य घटमानयेत्यादिवाक्यमाकर्ण्य घटमानयति प्रयोज्यप्रयोजकभावापन्न ईश्वरस्तु तदनन्तरं अव्युत्पन्नोऽवधारयति अनेन वाक्येनास्य ज्ञानमुत्पन्नमिति । नन्वेवं तस्माद् भ्रममूलकतया व्युत्पत्तिग्रहोऽसमीचीन एव स्यादिति । मैवम् । आद्यव्युत्पत्तिग्रहे भ्रममूलकत्वेऽप्यग्रे समीचीनत्वोपपत्तेः । अन्ये तु "स तपोऽतप्यत" इति श्रुतेरणिमादिप्रतिपादकश्रुतेश्च धर्माधर्मावनित्यज्ञानादिकमपीश्वरे स्वीकुर्वन्तीति सर्वमवदातम् ।

॥ इतीश्वरवादप्रकरणम् ॥[५]

१. I. O. reads तथात्वेऽपि । २. $M_1$ drops a line here । ३. I.O. reads भगवद्गीतामेव । ४. I O. misses नन्वेवं सर्गादिकाले । ५. I. O. reads instead : इति महामहोपाध्यायशशधरविरचितन्यायरत्नप्रकरणः ॥ श्रीः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## (२६) अभाववादः ।

अभावो[1] भावत्वानधिकरणं प्रमेयान्तरं प्रागभावत्वादिभेदेन चतुर्द्धेति गौतमीयाः, तदेतद् बिलवर्त्तिगोधाविभजनं भावत्वानधिकरणे नञर्थे मानाभावात् । इह कलशो नास्तीति बुद्धिस्तत्र प्रमाणमिति चेन्न । इह हि कलशात्यन्ताभावो वा प्रतीयते उत तत्संयोगात्यन्ताभावो वा तत्समवायात्यन्ताभावो वा । नाद्यः । प्रतियोगिसमानदेश्यत्वस्य तैरस्मिन्ननभ्युपगमात् । नापरौ । भूतले स्वरूपेणैव[2] तदुपपत्तेः । तद्वत्यपि तर्हि प्रसङ्ग इति चेत्, न । भूतले [3]तत्समवायवत्तानभ्युपमात् । अत्यन्ताभावस्थले[4] संयोगाभावस्यापि तथात्वात् । भूतलसंयुक्तं घटमपसार्य प्रत्येति घटो नास्तीति तत्र न भूतल स्वरूपं घटाभावः, तस्य घटवत्यपि सत्त्वात्[5] इति चेन्न । तत्र केवलभूतले तत्प्रतीतिदर्शनात्[6] । न च कैवल्यं दुर्निर्वचनं घटसंयुक्तभूतलान्य[7]भूतलत्वस्यैव तत्त्वात् । अभावसम्बन्धस्वरूपाधिकरणविशेषस्याभाववादिनाऽपि अनुमन्तव्यत्वात् । अन्यथा तदवत्यपि तदभावसम्बन्धः स्यात् ।

किञ्च परस्याप्यभावे घटो नास्तीति प्रतीतेरधिकरणस्वरूपस्य समर्थनीयत्वात् । बुद्धिविशेषाद्वा नास्तीति [8]व्यवहारोऽस्तु । न च विषयवैचित्र्याद् बुद्धेर्विचित्रव्यवहारजनकत्वमयुक्तम् , विषयमात्रापलापप्रसङ्गादिति वाच्यम् । विषयावैचित्र्येऽपि संस्कारजज्ञानस्य तत्ताव्यवहारकत्वस्वीकारात् । अन्यथा साऽपि[9] पदार्थान्तरम् भविष्यति[10] । एवं घटो विनष्टो घटो भविष्यति इति व्यवहारावप्यधिकरणविशेषनिबन्धनौ । तथाहि कारणविशेषसमवहितं कपालमाकलय्य घटे भविष्यत्ता व्यवह्रियते तथाच तत्र तदेव निबन्धनम् । एवं ध्वंसव्यवहारोऽपि मुद्गरप्रहारासादितविशेषाधिकरणाधीन एवेति सामान्यतोविशेषतश्च नास्तिताव्यवहारोऽन्यथोपपन्न इति कस्मात् प्रमेयान्तरमभावः

---

१. The beginning of अभाववादः is missing in P. The editor notes the following : अभाववादे यत्र यत्र मूलं काठिन्येनोपलब्धं तत्र तत्र दास्यते समग्रस्यानुपलम्भात् इति । The text in P starts with "न च विषयवैचित्र्ये बुद्धेः etc. । २. I. O. reads भूतलरूपेणैव । ३. I. O. reads घटसमवायवत्ता० । ४. $M_1$ drops a line here । ५. I. O. reads भावात् । ६. I. O. reads तत्प्रतीतिजननात् । ७. I. O. reads दुर्घटं घटघटितभूतलान्य० । ८. I. O. reads अभावव्यवहारः । ९. P reads सोऽपि । १०. I. O. reads स्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् । भावे वा चतुर्धेत्यनुपपन्नम् ।[२] अत्यन्ताभावभिन्ने तादात्म्याभावे मानाभावात् घटः पटो न भवतीति धीरेव मानमिति चेन्न । अस्यास्तद्धर्मात्यन्ताभावालम्बनत्वात् , अन्यथोपपन्नपाकजरागे घटे नायं श्याम इति धीरन्योन्याभावमालम्बेत । तत्र विशेषणमात्रमेव निषिध्यते यदि तदेतत् प्रकृतेऽपि समानम् । एवं सति धर्मिनिषेधो न क्वचिदपि प्रतीयते इति चेन्नोच्चैर्वक्तव्यम्[३] ।

किञ्चानयोर्वैधर्म्यमपि [४]तादात्म्यप्रतियोगिकाभावत्वसंसर्गप्रतियोगिकनित्याभावत्वे[५]स्त इति चेन्न । तयोरेवात्यन्ताभावान्योन्याभावातिव्यापकत्वात् । तादात्म्यसंसर्गौ प्रतियोगितावच्छेदकौ विवक्षितौ इति चेन्न, तदनिर्वचनात् । किञ्च गृहसंसर्गिघटभिन्नोऽयं घट इत्यत्रात्यन्ताभावलक्षणमतिव्यापकं स्यात् । प्रतियोग्यवृत्तिसदातनाभावत्वमन्योन्याभावस्य, प्रतियोगिवृत्त्यभावत्वमत्यन्ताभावस्य लक्षणे इति चेन्न । घटपटौ नायं घट इति व्यासज्यप्रतियोगिकाऽन्योन्याभावे नित्यत्वात्यन्ताभावे च तयो[६]र्व्यापकत्वात् । स हि नित्यत्वात्यन्ताभावो[७] नित्यत्वे न वर्त्तते । तदाश्रयस्यानित्यतापातात् ।

एवं प्रागभावप्रध्वंसाभावावपि वैधर्म्याभावान्न भिन्नौ । तथाहि किं तत्प्रागभावत्वम् ? प्रतियोगिपूर्वकालमात्रवृत्त्यभावत्वं तदिति चेन्न, अन्योन्याश्रयप्रसङ्गात् । ध्वंसप्रतियोग्यभावत्वं तदिति चेन्न । अभावध्वंसस्यान[८]ङ्गीकारात् । अङ्गीकारे वा ध्वंसस्यापि प्रागभावनिर्वचनाधीननिर्वचनतयाऽन्योन्याश्रयादेव । उत्पत्तिमदभावत्वं ध्वंसत्वमिति चेन्न । काऽसावुत्पत्तिः । आद्यसमयसम्बन्ध इति चेत् किमाद्यत्वम् । समानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयसम्बन्ध इत्युत्पत्तिरिति चेन्न । परस्पराश्रयप्रसङ्गात् । प्रतियोग्यवधिकसामयिकयावदपरत्वाश्रयासमानकालीनाभावत्वम् प्रागभावत्वं तदवधिक-

---

१. P+I. O. drop स्यात् । २.–२. I. O. misses a line here । ३. I. O. reads नोच्चैर्वाच्यम् । P' p. reading is misleading. शेषानन्त reads it correctly and comments उपहसन् प्रकृतम् स्मारयति । ४. P adds प्रतियोगिताविरह– । ५. I. O.+P read सदातनाभावत्वे । ६. P reads अनयोः । ७. I. O. reads न हि नित्यत्वाभावो नित्यत्वे वर्त्तते । ८. I. O. misses अनङ्गीकारात् । अङ्गीकारे वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामयिकयावत्परत्वाश्रयासमानकालीनाभावत्वं ध्वंसत्वमिति चेन्न । गुणकर्मप्रागभावध्वंसातिव्याप्तेः तयोः परत्वाऽपरत्वप्रतियोगिकत्वाभावात्[२] । प्रतियोगिसमानकालीनयावत्पदार्थावधिकत्वेन परत्वाऽपरत्वे विशेषणीये इति चेन्न । प्रलयसमयोत्पन्नविनष्टपरमाणुक्रियाप्रागभावध्वंसाव्यापनात् । तत्रापि ब्रह्माण्डान्तर्गतकार्यद्रव्यावधिकपरत्वाऽपरत्वे स्त इति चेन्न । तदा कार्यद्रव्यमात्रविरहात् । गन्धानाधारसमयानाधाराभावत्वं प्रागभावत्वमिति चेन्न । चरमगन्धनाशोत्तरसमुत्पन्नभोगप्रागभावाव्यापनात् । तत्र प्रमाणाभाव इति चेत्, न । संशयेनापि लक्षणानिर्वाहात् ।

किञ्चाभावपदप्रवृत्तिनिमित्तं भावविरोधित्वमिति चेन्न । किं तत् विरोधित्वं सहानवस्थानमिति चेन्न । अन्योन्याश्रयप्रसङ्गात्[३] । गोत्वाश्वत्वयोरपि परस्पराभावत्वप्रसङ्गात्[४] । अन्योन्याभावस्य भावत्वप्रसङ्गाच्च ।

ननु सत्ताप्रकारकज्ञानाविषयत्वमभावत्वमिति । न ह्यभावे भ्रमरूपमपि सत्ताप्रकारकं ज्ञानमुत्पद्यते । तस्य तद्विरोधितयैवोपस्थितेरिति । मैवं, सामान्येनापि तदुपस्थितेः सम्भवात् । अन्यथाऽन्धकारे भावरूपधर्मारोपो[५] न स्यात् । घटाभाव इति बुद्धेश्चाक्षुषतापत्तेः[६] । सत्तानाश्रयत्वं तदिति चेन्न सामान्यादेरभावत्वापत्तेः । द्रव्यादिषडन्यतमत्वं भावत्वं तद्रहितत्वमभावत्वमिति चेन्न । अन्यतमस्याभावनिरूपणीयत्वात् । तदनाकलनेऽपि भावाभावप्रतीतेरनुभवसिद्धत्वात् सर्वमिदं समाकुलम् ॥ इति[७] ॥

अत्रोच्यते । घटाभाववद् भूतलमिति धीस्तावत् सकलजनप्रसिद्धा । तत्र भूतलमेव यदि घटाभावः स्यात्, न तत्रैव तद्वर्तेत[८] । स्वात्मनि वृत्तिविरोधात् । एवं सति भूतलं घटाभाव इति स्यान्न तु तद्वदिति । किञ्च घटे स्मर्यमाणे यत्र दूराद् भूतलस्वरूपमाकलितम् तत्र किमपरमवशिष्यते यद्ग्रहविलम्बादभावव्यवहारविलम्बः[९] । कैवल्यग्रहविलम्बादिति चेत् किं तत्

१. P reads ०(अ)परत्वासमानकालीन० and ०(अ)परत्वसमानकालीन० । शेषानन्त explains : अपरत्वपदेन स्वाश्रयविवक्षणात् । २. P+I. O. read °विरहात् । ३. P+I. O. read अन्योन्याश्रयात् । ४. P. reads परस्पराभावापातात् अन्योन्याभावप्रसङ्गाच्च । ५. P+I. O. read भावधर्मारोपः । ६. P reads घटाभावबुद्धेः । ७. I. O. adds चेत् । ८. P reads तद्वृत्तेः आत्मनि । ९. $M_2$ reads अभावग्रहो न भवति, P+I. O. read अभावव्यवहारो न भवति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कैवल्यम् । ननूक्तमेव घटवद्भूतलान्यभूतलत्वमिति[1] उक्तं न पुनर्युक्तिमत् । तथाहि तदन्यत्वं तदन्योन्याभावत्वं स्वरूपमेव वा तदवृत्तिधर्मवत्त्वं वा अन्यद्वा । नाद्योऽनङ्गीकारात् । नेतरः, दूरादपि तस्य गृहीतत्वात् । तृतीये तु घटकुट्यां प्रभातम् । न हि सघटभूतलावृत्तिभूतले भावरूपधर्ममीक्षामहे[2] । पृथक्त्वस्याप्येकस्मिन्नभावात् । एतेन सघटभूतलबुद्धेरन्यभूतलबुद्धिरभावस्य व्यवहारिकेति[3] निरस्तम् । अपि चावृत्तघटे भूतले अन्या भूतलबुद्धिर्भवति । न च तत्राभावव्यवहारः । भवत्येव तत्रापीति चेद्, भवतु तथापि घटदर्शनेन बाध्यते तावत् । स[4] च बाधः विषयाविशेषे कथं स्यात् । न च तत्रापि प्रतिबन्दिर्निरस्ता । तत्र हि संस्काररूपकारणविशेषो नियामकः, प्रकृते न कारणविशेषोऽपीत्यलमतिपीडया ।

न च भावाधिकरणताऽवच्छेदकधर्मेणैवाभावखण्डनं गोत्वादिधर्मखण्डनप्रसङ्गात् । तथानुभूयमानत्वेन न खण्डनमिति यदि, तदा एतत् प्रकृतेऽपि समानम् । न चाभावे घटो नास्तीतिबुद्धिवद् भावेऽपि अभावबुद्धिसमर्थनम्, अभावस्य घटविरोधित्वेनैव घटाभावार्थकत्वात् । भूतलादेस्तु घटविरोधित्वाभावात्[6] । अस्तु वाऽभावेऽप्यभावान्तरं[7] न चानवस्था अनुभूयमानत्वात् । एवं प्रागभावव्यवहारोऽपि न कारणविशेषोपरक्ताधिकरणनिबन्धनः । तस्य घटाद्यविरोधित्वात् । एतेन घटध्वंसव्यवहारोऽपि तद्वत्तया प्रत्यभिज्ञायमानाधिकरणगोचर इति तेन नान्यथासिद्धिः । तस्मान्न सामान्यतो विशेषतश्चाभावव्यवहारोऽन्यथासिद्ध इति कथं न मेयान्तरमभावः ।

न च विभागानुपपत्तिः, घटः पटो न भवतीति विलक्षणप्रतीतेरेवान्योन्याभावत्वसिद्धेः । न च तद्धर्मात्यन्ताभावेनान्यथासिद्धिः । तत्रापि धर्मान्तराभावप्रसक्तोऽभावः[8] क्वचिदपि नावतिष्ठेत । किञ्च विपरीतमेव कुतो न भवति । तथाहि अत्यन्ताभावव्यवहार एव अन्योन्याभावेन समर्थनम्[9], अलमत्यन्ताभावेन । नन्वेवं घटे घटाभावव्यवहारो न स्यात् । किमिति न

---

१. I.O. reads घटघटितभूतलान्यभूतलत्वम् । २. P reads भावस्वरूपं धर्मभूतलम् । ३. I.O. reads अभावव्यवहारिकेति । ४. P+I.O. read सा च बाधा । ५. $M_1$ reads न च सत्ताप्रतिबन्दिर्निस्ताराय । ६. Several folios are missing here in P. The editor notes : अतः परं मूलं नोपलब्धम् । ७. I. O. reads अभावप्रतियोगिकम् अभावान्तरम् । ८. $M_1$ reads धर्मान्तरप्रयुक्तोऽभावः । ९. $M_1$ reads समर्थ्यताम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्[1] । तत्र तद्धर्मान्योन्याभावनिबन्धनमस्तु तदधिकरणान्योन्याभावत एव वा तदत्यन्ताभावव्यवहारो विलक्षणबुद्धिसिद्धत्वात् । कथमत्यन्ताभावस्त्यज्यतामिति चेत् । आयातोऽसि मार्गेण । तथाहि [2]इदमिह नास्तीति संसर्गेण प्रतियोगितावच्छिद्यते, इदमिदं न भवति इत्यत्र तादात्म्येन ।

न च तादात्म्यमसिद्धमेव एकवृत्तिधर्मस्यैवं तत्त्वात् । न च एकवृत्तितानिर्वचने[2]ऽन्योन्याश्रयः, समानाधिकरणधर्मविरोधिधर्मासामानाधिकरण्यस्यैव तत्त्वात् । अवच्छेदकत्वं तु निरूपकताविशेष इति नाशक्यनिर्वचनम् । नायं श्याम इत्यत्र तु बाधात् धर्मोपमङ्क्रमः । तथा च एकवृत्तिधर्ममात्रावच्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभावः, संसर्गावच्छिन्नप्रतियोगिताकः सदातनोऽभावः अत्यन्ताभाव इति किमनुपपन्नम् । नित्यत्वे नित्यत्वान्तरमभ्युपगम्यानुपपत्तिर्निरसनीया । प्रमेयत्वे प्रमेयत्वस्येव वा स्ववृत्तितया सा निरसनीया[3] । ननु गृहसंसर्गिघटभिन्नोऽयं घट इत्यत्रान्योन्याभावलक्षणाव्यापकता तदवस्थैव । न ह्येकत्रैकवृत्तिना धर्मेण प्रतियोगिताऽवच्छिद्यते किंतु संसर्गेण इति । मैवम् । एकवृत्तिरेव हि धर्मोऽत्रापि प्रतियोगितावच्छेदकः । कथमन्यथा गृहसंसर्गदशायामप्येतद्घटभिन्नोऽयं घट इति प्रतीयते । तथापि व्यासज्यवृत्तिप्रतियोगिकेऽन्योन्याभावे का गतिरिति चेन्न । तथाभूताऽन्योन्याभावे प्रमाणाभावः[4] । अन्यथा रूपे रूपस्पर्शौ न स्त इति प्रतीतिबलादत्यन्ताभावोऽपि तादृशः स्यात् । सोऽपि भवत्विति चेत् । एवं प्रागभावप्रध्वंसावपि तादृशौ स्याताम् । तावपि भवतामिति चेन्न । व्यासज्यवृत्तिधर्मसमानाधिकरणप्रत्येकपर्यवसितप्रतियोगिताकाभावादेव हि तादृक्प्रतीत्युपपत्तौ किमिति स्याद्वादावलम्बनं भवतः ।

सोऽयं चतुर्विधोऽप्यभावः प्रत्येकप्रतियोगिक एव, न तु मिलितप्रतियोगिकोऽपीति ध्येयम् । ननु वायौ पृथिव्यादिनिष्ठ[5]तत्तद्रूपप्रतियोगिकाभावनिकरनिश्चयेऽपि वायुः रूपवान् न वेति संशय एव पूर्वानिश्चितमिलितप्रतियोगिकरूपाभावे प्रमाणमन्यथा विशेषदर्शने स न स्यादिति । मैवम्[6]।

१. $M_1+M_2$ miss किमिति न स्यात् । २.-२. This is missing in I.O. । ३. $M_1$ misses सा निरसनीया । ४. $M_2$ reads प्रमाणाभावात् । ५. I.O. reads पृथिव्यादित्रिकनिष्ठ० । ६. P resumes Text on p. 594 with मैवम् etc. The Editor does not give any note. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्येकरूपप्रतियोगिकाभावानामेवं सामान्यतस्तन्निरासोपपत्तावतिरिक्तकल्पनस्य निर्बीजत्वात्। कथमन्यथा पृथिव्यादिरूपसमूहः प्रत्येकं मेलकेन च वायौ नास्ति इत्यवधार्य वायौ रूपं नवेति संदिग्धे। किञ्च। सर्वमेव रूपं वायौ नास्तीति शब्दज्ञानाद् वायौ रूपसंशयनिवृत्तिर्न स्यात्। मिलिताभावस्यानिश्चयात्। ततो न निवर्त्तेत एवं संशय इति चेन्न। अनुभवविरोधात्। मिलिताभावोऽप्यग्रे निश्चीयत इति चेन्न। प्रमाणाभावात्। एतावदेव रूपमिति निश्चयस्तत्र प्रतिबन्धक इति चेत्, तदेतत् प्रकृतेऽपि समानमित्यलमतिविस्तरेण।

अन्ये तु संसर्गेण यस्य प्रतियोगितावच्छिद्यते स संसर्गाभावस्तद्विपरीतप्रतियोगिताकस्तादात्म्याभाव इत्याहुः।

यत् पुनरुक्तं प्रलयसमयोत्पन्नविनष्टपरमाणुक्रियाप्रागभावध्वंसाव्यापकत्वं प्रागभावध्वंसलक्षणयोस्तदपि मन्दम्। परत्वापरत्वे प्रति हि समवायिकारणत्वं गुणकर्मणोः नास्ति, तत्र द्रव्यत्वस्य तन्त्रत्वात्। अवधित्वे तु तयोर्न विरोधः।

ननु तथापि किं प्रागभावत्वं प्रध्वंसत्वं वा। ननूक्तमेव प्रतियोग्यवधिकसामयिकपरत्वसमानकालीनाभावत्वम् प्रागभावत्वम्। एवम्भूतपरत्वसमानकालीनाभावत्वं च ध्वंसत्वमिति। मैवम्। प्रथमोत्पन्नपदार्थप्रागभावाव्यापनात्। तदवधिकपरत्वासिद्धेः। प्रतियोगिविनाशोत्तरोत्पन्नपदार्थतदवधिकपरत्वासमानकालीनतया ध्वंसस्याप्युपपत्तेः। अत एव प्रतियोग्यवधिकयावत्परत्वासमानकालाभावत्वं ध्वंसत्वमित्यपि निरस्तम्। प्रागभावस्यापि तादृशत्वात्। प्रतियोगिसमानकालीनसदातनसकलपदार्थावधिकसामयिकपरत्वसमानकालिकासदातनाभावत्वं प्रागभावत्वम्, तद्विपरीतं ध्वंसत्वम् इति चेन्न। साकल्यं पदार्थविशेषणं परत्वविशेषणं वा। नाद्यः, तदवधिकपरत्वासिद्धेः। नेतरः, स्वरूपासिद्धेः।

अत्राप्यभिधीयते। प्रतियोगिसमानकालासदातनकिञ्चित्पदार्थावधिक-

---

१. P reads ०प्रतियोगिकभावनया। २. I. O reads सामान्यतः संशयोपपत्तौ। ३. P misses प्रत्येकं मेलकेन च। ४. $M_1+M_2$ miss नास्तीत्यवधार्य वायौ। ५. P reads शब्दादज्ञानतः। ६. P reads अभावविरोधात्। ७. P drops रूपम्। ८. P reads चरमोत्पन्न०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामयिकपरत्वासमानकालीनत्वशून्यतादृक्पदार्थावधिकापरत्वासमानकालीनासदातनाभावत्वं प्रागभावत्वम्[1] । अदृष्टानाधारकालानाधाराभावत्वं प्रागभावत्वमिति कश्चित् । वैपरीत्येन ध्वंसनिर्वचनमिति सर्वं सुस्थम्[2] ।

अभावपदप्रवृत्तिनिमित्तं चिन्त्यते । भावाभावव्यवहृतिस्तावत्सकलजनप्रसिद्धा । सा च परस्परविलक्षणधर्मनियम्या स च विलक्षणो धर्मो भावाऽभावयोः कल्प्यमानो भावरूपो वाऽभावरूपो वा, क्वचिद्भावरूपः क्वचिदभावरूपः, क्वचिद्भावाभावरूपो वा । तत्राद्ययोर्गौरवापत्तेः तृतीयः परिशिष्यते । सोऽपि भावरूपो नाभावे कल्पते सप्तमभावकल्पनापत्तेः[3] । तथाच भावे भावरूपः अभावे वाऽभावरूप इति वस्तुगतिः । स च धर्मो जातिरूपः परिशेषात् । सैव सत्तेति गीयते[4] । सा च यद्यपि द्रव्यगुणकर्मस्वेव समवेता तथापि स्वरूपसम्बन्धेन सामान्यादिष्वपि वर्त्तते तथैव कल्पनात्[5] । तदत्यन्ताभावस्त्वभावपदप्रवृत्तिनिमित्तम् ।

नन्वेवं सति सत्तातदत्यन्ताभावयोरेव कथं भावाभावपदप्रवृत्तिः[6] । प्रमेयत्ववत् न स्वात्मनि[7] तयोर्वृत्तेः तथैव कल्पनात् । लक्षणान्तरकल्पनेऽप्यस्य दोषस्य[8] समाधेयत्वात् । अथवा यथा गोपदं गोत्वे वर्त्तते तथाऽत्रापीति बोद्धव्यम् । सत्तासम्बन्धित्वं भावत्वं, तदत्यन्ताभावसम्बन्धित्वम्[9] अभावत्वमित्येषा दिक् । सोऽयमतिगहनोऽभावविवेचनपन्था इति अवहितेन[10] भवितव्यमिति । अभावनिरूपणम् ।

सोऽयमभावोऽनुपलब्धिरूपप्रमाणान्तरगम्य इति तौतातिताः । तेषामयमाशयः । अनुपलब्धिस्तावदभावोपलब्धौ कारणमित्युभयवादिसिद्धम् । तथा च चक्षुरादीनामपि तत्र सामर्थ्यकल्पने[11] किं बीजम् । घटादिप्रतीताविवानन्यथासिद्धिरिति चेन्न । अधिकरणग्रहे तदन्यथासिद्धेः अनुमिताविव पक्षोपस्थितौ इतरथा अत्रापीन्द्रियं करणं स्यात्, प्रमाणान्तरोपस्थिते पक्षेऽनुमितिदर्शनात् । नैवमिति चेत्, प्रकृतेऽपि समानम् । तथाहि देवकुला-

१. P reads तत्त्वम् । २. P+I. O. read समञ्जसम् । ३. I.O. misses सप्तमभावकल्पनापत्तेः । ४. I. O. reads इत्यभिधीयते । ५. P reads विकल्पनात् । ६. P reads भावाभाववृत्तिः । ७. P+$M_1$ read सामान्येऽपि । ८. P drops दोषस्य । ९. P misses सम्बन्धित्वम् । १०. P reads हितेन, I. O. reads अवहिततया । ११. $M_1$ reads कारणत्वे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्निर्गतश्चैत्रो मैत्रेण बहिःस्थितेन पृच्छ्यते तत्र विष्णुमित्र आसीत् । स च पूर्वं प्रतियोगिज्ञानाभावात् अनुपलब्धविष्णुमित्राभावः तदा प्रतियोगिज्ञानं सहकार्यासाद्य उपलब्धविष्णुमित्राभावो वदति नासीदिति । तदेतद्देवकुलासन्निकर्षेऽपि[1] तस्याभावावधारणं जायमानं नेन्द्रियकरणकमसन्निकृष्टविशेष्यकत्वात् । नानुमानजं स्वरूपसदनुपलब्धिजन्यत्वात् लिङ्गान्तरस्याभावात् । न स्मरणम् अननुभूतगोचरत्वात् । तथा चानुपलब्धिरेव कारणमिति ।

अत्रोच्यते । [2]अनुपलब्धेरभावप्रतीतौ कारणतैव नास्ति, किं पुनः करणता । तथा ह्यनुपलब्धेः कारणत्वमन्वयव्यतिरेकाभ्यां वाच्यम् । न चानुपलब्धिव्यतिरेकप्रयुक्तोऽभावोपलब्धिविरहः क्वचिदपि सिद्धः । इदं रजतमिति भ्रमस्थले सिद्ध इति चेन्न । दोषस्यैव[2] तत्र प्रतिबन्धकत्वात् । अन्यथा रजतारोपात् पूर्वं शुक्तौ रजतानुपलम्भस्य विद्यमानत्वात् उपलम्भदशायाम[3]-भावोपलम्भ एव स्यात् । तत्रारोपसामग्र्येव प्रतिबन्धिका कार्यादर्शनादिति[4] चेत्, तद्वरं तत्सामग्र्येकदेशस्य दोषस्यैव प्रतिबन्धककल्पना । अन्यथा भावोपलम्भे[5] अभावानुपलब्धिरपि कारणं स्यात् ।

भवतु वा अनुपलब्धिरभावोपलब्धौ कारणं, करणत्वं तु कुतः । करणं हि कारकविशेषः[6], स च व्यापारनिर्वाह्यः । न चानुपलब्धेरभावोपलब्धिजनने व्यापारमुपलभामहे । किंचाधिकरणग्रहोपक्षीणं चेत् हीन्द्रियं[7] तथात्वेनोपस्थिते[8] पीतघटे लोहितरूपाभावः किमिति नोपलभ्यते । प्रतियोगिग्राहकेन्द्रियेणाधिकरणोपस्थितिः कारणमिति चेन्न । तत्र[9] वायौ रूपाभावग्रहप्रसङ्गात् ।

किञ्च [10]अभावोपलब्धौ किं प्रतियोगिग्राहकेन्द्रियजन्याधिकरणोपस्थितिः कारणं प्रतियोगिग्राहकमिन्द्रियं वा इति विमर्शने[11] जायमाने[10] प्रतियोगिग्राहकेन्द्रियस्यैव कारणता युक्ता लाघवात् । अन्यथा दण्डयुक्तस्य चक्रस्य

---

१. I. O. reads देवकुलेऽसन्निकृष्टेऽपि । २.–२. This portion is missing in P । ३. P+I. O. read आरोपदशायाम् । ४. P reads आरोपकार्यादर्शनात् । ५. I. O. misses भावोपलम्भे । ६. I. O.+$M_1$ read कारणविशेषः । ७. P reads (उ)पक्षीणमिन्द्रियम् । ८. P+I.O. read चोपस्थिते । ९. P reads तदा, I O. reads तव । १०.–१०. This portion is missing in P । ११. I.O. reads प्रतियोगिग्राहकमिन्द्रियमभावोपलब्धौ कारणमस्तु तज्जनिताधिकरणोपस्थितिर्वेति विमर्शे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणता भवत्विति [1]दण्डोऽप्यकारणं स्यात् । न च सर्वत्राधिकरणग्रहोपक्षीणमिन्द्रियम् । तथाहि—गेहे आलोको नास्तीत्युन्मीलितनयनस्य भवति तावदभावधीः[1], निमिलितनेत्रस्तत्र संदिग्धे,[2] तत्र न चक्षुरधिकरणग्रहोपक्षीणम्, आलोकविरहे तस्याग्राहकत्वात् । तथा चाऽत्र चरणप्रसारिका न सम्भवति । कथमन्यथा घटाभाववद्भूतलं पश्यामीत्यनुव्यवसायः । अनुमितौ तु वह्निमत्तया पर्वतं पश्यामीति न कस्यापि धीरिति महान् विशेषः ।

एवमवधृतप्रत्यक्षभावस्याभावस्य प्राङ् नास्तितावधारणानुरोधेनापि न प्रमाणान्तरगम्यता । तत्र कथमवधारणमिति चेत् । पूर्वं योग्यानुपलब्धेरेव । तर्हि तत्र सैव प्रमाणं स्यादिति चेद्, भवतु, किं तु न स्वरूपसती अपि तु लिङ्गभावेन ज्ञाता । योग्यानुपलब्धेः कथं ज्ञानमिति चेत् । मनसैव । यदा योग्यानुपलब्धौ सन्देहः तदा वदति न जानामि तत्रासीन्न वेति ।

स्मरणार्हस्य स्मरणेन तत्राभावावधारणमिति अन्ये । योग्यानुपलब्धि सहकारिणीमासाद्य ज्ञानान्तरोपनीते अधिकरणे मनसा एव प्राङ्नास्तितावधारणमित्यपरे । स चायं योग्यप्रतियोगिको गृह्यते इत्यपरे । योग्याधिकरणक इत्यन्ये[3] । उभययोग्यताप्रतियोजिकेतीतरे । अत्र योग्यप्रतियोगिकत्वमात्रं यदि तन्त्रं तदा रूपाभावो मनसि चक्षुषा गृह्येत । अधिकरणमात्रयोग्यताऽपि न प्रयोजिका। घटे धर्माद्यभावस्य प्रत्यक्षताप्रसङ्गात् । न चोभयं प्रयोजकं, स्तम्भे पिशाचाऽन्योन्याभावाग्रहप्रसङ्गात् । न चानुमानिक्येवाभावधीः, घटः पटो न भवति इत्यत्रापि तथाभावप्रसङ्गात् । तस्माद्यस्य यत्र भावो यत्साक्षात्कारविरोधी तत्र तस्याभावः प्रत्यक्षेणैव गृह्यते । एवमन्योन्याभावे अधिकरणयोग्यतैव तन्त्रम् । संसर्गाभावे तु यत्र प्रतियोगिविरहप्रयुक्तप्रतियोग्यनुपलम्भस्तत्र योग्यप्रतियोगिको गृह्यते । अत एव वायौ रूपाभावः, गेहे शब्दाभावश्च प्रत्यक्षः । मनसि तु रूपविरहप्रयुक्तो न रूपानुपलम्भ इति नासौ तत्र योग्यः । अन्ये तु योग्यप्रतियोगिकत्वमेव तन्त्रं सर्वत्र इत्याहुः । इति सर्वं सुन्दरमिति सङ्क्षेपः ॥

[4]इति श्रीमहामहोपाध्यायश्रीशशधरकृतं न्यायरत्नप्रकरणं शशधराख्यं समाप्तम् ॥

---

१.–१. This portion is missing in P । २. I. O. reads सन्दिह्येत । ३. P+I. O. read इत्येके । ४. P reads इति श्रीमहामहोपाध्यायशशधरकृतमभावप्रकरणं समाप्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीगुणरत्नगणिविरचितम्

# न्यायसिद्धान्तदीपटिप्पनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# गुणरत्नगणिविरचितम्

# न्यायसिद्धान्तदीपटिप्पनम् ।

## विधिवादटिप्पनम् ।

आचारस्य मूलं प्रवर्त्तकज्ञानम् । तस्य ज्ञानस्य विषयं निरूपयितुं भूमिमारचयति । ननु व्यभिचारज्ञानाभावसहकृतं सहचारज्ञानं न व्याप्तिग्राहकं यतः सहचारदर्शनाभावेऽपि स्तनपानेष्टसाधनत्वयोर्व्याप्तिग्रहे सति इष्टसाधनत्वानुमित्या बालः स्तनपाने प्रवर्त्तते । न चेष्टसाधनताज्ञानं न प्रवर्त्तकमिति वाच्यम् । भावनादीनामप्रवर्त्तकत्वात् तदेवेष्टसाधनताज्ञानं प्रवर्त्तकमित्युपोद्घातसङ्गत्या **आह—प्रवृत्तीति** (पृ.७४पं.१) । तत्र च विधिज्ञानमेव प्रवर्त्तकम् । तस्य ज्ञानस्य विषयो यो विधिः तं विप्रतिपत्तिमूलकसंशयपूर्वकं निश्चेतुं तावदाह—**सप्रकार**(७४—६) इति । सप्रकारो ज्ञानकर्मविधिः । प्रवर्त्तकज्ञानप्रकार इत्यर्थः । तस्य प्रवर्त्तकज्ञानप्रकारस्यान्वर्थविधिसंज्ञामुपपादयति—**विधीयत**(७४—६) इति । तस्य विधेः प्रवर्त्तकत्वं शक्तिग्रहपूर्वकं निरूपयितुं तावदाह—**शब्दव्यापारत्व**मिति(७४—५) ।

अत्रायं शक्तिग्रहप्रकारः । एकः प्रयोज्यवृद्धो नियोज्यवृद्धः शिष्यादिः । एकः प्रयोजकवृद्धो गुर्वादिः । एकस्तृतीयस्तटस्थः व्युत्पित्सुः । तत्र गुर्वादिना शिष्यं प्रत्युक्ते सति । हे देवदत्त ! भवान् तण्डुलान्[१] पचेत इति गुरुणा शिष्यं प्रत्युक्ते स शिष्यः तण्डुलान् आनयित्वा[२] स्थाल्यां प्रक्षिप्य काष्ठाग्निमधस्तात् कृत्वा पचति । स तटस्थः सर्वां शिष्यस्य क्रियां पश्यति । तदनन्तरं विचारयति । एतावत्कालं गुरुरपि स्थितः शिष्योऽपि स्थितः । शिष्येण इयं पाकादिक्रिया न कृता । इदानीमेव कृता इयं क्रिया कृतिजन्या क्रियात्वात् । मदीयभोजनक्रियावत् । साऽपि कृतिः कस्माज्जाता ? । इच्छात एव । तत्राऽप्यनुमानम्—इयं कृतिः इच्छाजन्या कृतित्वात् । मम भोजनक्रियानुकूलकृतिवत् । मम तृप्तदशायां भोजनानुकूला कृतिर्न जाता । बुभुक्षायां तु जाता इति कृत्वा सा कृतिः इच्छाजन्या । सा पाकानुकूलकृतिजनकेच्छाज्ञानजन्या इच्छात्वात् । मदीयेच्छावत् । तच्च ज्ञानम् एतस्य प्रयोज्यवृद्धस्य जातम् । तच्च चिकीर्षाद्वारा प्रवृत्तिजनकत्वात् प्रवर्त्तकं ज्ञानम् । एतावन्निर्णीतम् । एतस्य प्रयोज्यवृद्धस्य प्रवर्त्तकं ज्ञानं चेदुत्पन्नम्, तदा एतावत्यश्चेष्टाः[३] तण्डुलाद्यानयनपाकादिक्रियारूपाः । तच्च प्रवर्त्तकं ज्ञानं कारणजन्यं कार्यत्वाद् घटवत् । कारणान्तरमन्यत्

१. Ms has तन्दुलान् । २. An example of Jain Sanskrit ? आनीय ।
३. Ms has एतावतः चेष्टाः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किमपि नास्ति, चक्षुरादीनां शब्दप्रयोगात् पूर्वमपि स्थितत्वात् , पचेतेति वाक्यानन्तरमुत्पद्यमानत्वात् तज्ज्ञानं प्रति पचेतेति वाक्यमेव कारणत्वेनावधारयति । तर्कसहकृतान्वयव्यतिरेकाभ्यां तद्वाक्यं किं पचेतेति ? इदमेव कारणं प्रवर्त्तकज्ञानं प्रति । अयं शक्तिग्रहप्रकारः ।

अक्षरयोजना तु **प्रवृत्तिपरवाक्येति**(७४–१) । पचेतेति वाक्यश्रवणानन्तरं प्रयोज्यस्य शिष्यस्य तत्तदर्थास्तण्डुलादयस्तैः सम्बद्धो यो व्यापारः तत्तत्पदार्थसंयोगस्तदनुकूला या क्रिया चेष्टा तां चेष्टाम् उपलभ्य तटस्थः तस्यां चेष्टायां कृतेः कारणत्वमवधारयति । तत्र दृष्टान्तमाह —**स्वचेष्टायामिति**(७४–२) । इयं चेष्टारूपा क्रिया कृतिजन्या क्रियात्वात् स्वचेष्टावत् । कृतावपि चिकीर्षाजन्यत्वमाह-**कृता**विति-(७४–२) ।

चिकीर्षायां ज्ञानजन्यत्वमाह. दृष्टान्तस्तु स्वचिकीर्षावत् । तच्च ज्ञानं कीदृशमित्याह—**समानाधिकरणे**ति(७४–२) । व्यधिकरणस्य भिन्नविषयकज्ञानस्य इच्छां प्रत्यजनकत्वात् । अवधृतकारणभाव इति तटस्थस्य विशेषणं स्वज्ञानकृतिचेष्टास्थले इति यावत् । स्वदृष्टान्तेन प्रयोज्येऽपि आनयति । ज्ञानमनुमिनोति **प्रयोज्यस्यापी**ति (७४–३) । ततः किमित्याह । **तस्य चे**ति(७४–४) । प्रवर्त्तकज्ञानस्य वाक्यजन्यताम् अवधारयति वाक्येन साक्षात्प्रवृत्तिर्न क्रियते इति कृत्वा व्यापारमाह—**शब्दव्यापारत्व**मिति(७४–४) । तदा चायमर्थः । इयं प्रयोज्यस्य या प्रवृत्तिः सा अनेन वाक्येन ज्ञानद्वारा कृता । तस्य वाक्यजन्यज्ञानस्य या जनकता सा विषयप्रकारावच्छेद्या, ज्ञाने कश्चन प्रकारो वक्तव्य इति निर्विकल्पकज्ञानस्य प्रवृत्तावजनकत्वात् इति तर्कबलमाह—**विश्राम्यती**ति(७४–६) । एतावता ज्ञानत्वमात्रं प्रवृत्तिजनकतावच्छेदकं न भवति किन्तु विषयप्रकारावच्छिन्नज्ञानत्वमेवेत्यर्थः । तस्य प्रवर्त्तकज्ञानस्य प्रवृत्तिजनकतावच्छेदको यो विषयः स एव ज्ञानकर्मविधिरिति पर्यवसितम् ।

प्रवृत्तिजनकज्ञाने जनकतावच्छेदको यो विषयः स एव विधिरित्यत्र सम्मतिमाह—**तदुक्तमि**ति(७४–८) । **से**ति(७४–९) कृतिरित्यर्थः । **यतश्च से**ति(७४–९) । सा चिकीर्षेत्यर्थः । यच्छब्दार्थमाह — **तद् ज्ञानमि**ति(७४–१०) । चिकीर्षाजनकज्ञानमित्यर्थः । तस्य ज्ञानस्य प्रवृत्तिजनकतावच्छेदको यो विषयः स विधिरित्यर्थः । अविषयरूपस्यापि विधित्वमाह—**तद्ज्ञापके**ति(७४–१०) । तथाच तादृशविषयज्ञापकः सोऽपि वा विधिः लिङ्शक्त्यादिरूपः स विधिः ।

विधिस्वरूपं विप्रतिपत्त्या विवेचयति । **प्रवृत्ती**ति(७४–११) । प्रवृत्तिपरः शब्दः पचेतेत्यादिरूपः । **तदि**ति(७४–११) प्रवृत्तिपरशब्द इत्यर्थः । तस्याऽभिधा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शब्दशक्तिरित्यर्थः । **भावनेति**(७४–११) कृतिरित्यर्थः । **सैवेति**(७४–१२) । सा भावना भाव्यफलावच्छिन्ना प्रवर्त्तिका इत्यर्थः । नियोज्यस्य यत् प्रयोजनं तदेव फलं भाव्यं यस्याः सेत्यक्षरार्थः । **इष्टत्वमिति**(७४–१२) । इच्छाविषयत्वं संकल्प इति । अहं पाकं कुर्यामिति निश्चयः । **वक्त्रिति**(७४–१२) । वक्तुराप्तस्याभिप्रायः । **कार्यतेति**(७४–१३) । मम कार्यमिदमिति । **इष्टेति**(७४–१३) । ममेदं इष्टसाधनमिति । **अश्नुतेति** (७४–१५) । यत्र वाक्यं नास्ति । तत्रापि कामिनीसम्भोगादौ स्वेष्टसाधनताज्ञानात् प्रवर्त्तते । किञ्च प्रवृत्तिपरशब्दत्वमेतस्यार्थः । कः प्रवृत्तिपरशब्दः किं स्वज्ञानद्वारा प्रवर्त्तयति वा किंवा प्रवृत्तिपरशब्दत्वप्रकारकं ज्ञानं वा प्रवर्त्तकम् । आद्ये बधिरस्यापि प्रवृत्तेः । अन्त्ये त्वाह **अग्निष्टोमादीति**(७४–१६) । अग्निष्टोमवाक्यजन्ये ज्ञाने प्रवृत्तिपरशब्दत्वं प्रकारो नास्ति । त्वया प्रवर्तितव्यम् [इति] अयं प्रवृत्तिपरः शब्दः प्रकारः अग्निष्टोमवाक्यजन्ये ज्ञाने नास्ति । **अभिधायाः** (७४–१७) इति । अभिधा वाच्यवाचकभावातिरिक्तादर्थान्तरं लिङ्शक्तिः अथवा वाच्यवाचकभावरूपा । नान्त्यः । तस्या वाच्यवाचकाभावरूपाया अभिधायाः पदार्थस्मृतिमात्रहेतुत्वात् । नाद्य इत्याह–**भिन्नेति**(७४–१८) वाच्यवाचकभावरूपैव अभिधा वर्त्तते तदतिरिक्ता नास्ति । **भावनेति**(७४–१९) । भावना कृतिः । कृतिज्ञानं चेत् प्रवर्त्तकम् तदा पचतीत्यादावपि प्रवृत्तिः स्यात् । लडादावपि आख्यातार्थः कृतिरेव । एतदेवं मनसिकृत्य दूषणान्तरमाह–**तस्याः**(७४–१९) इति । तस्याः कृतेः सर्वलकारवाच्यत्वात् । एवं च इतरलकारार्थापेक्षया लिङर्थस्य वैलक्षण्यं न स्यादित्यर्थः ।

अत्राऽऽशङ्कते । **न चेति**(७४–२०) कृतिराख्यातार्थो न भवति किन्तु संख्या एकत्वादिरूपा । स आख्यातार्थः । अन्यथा करोतीत्युक्ते कृञ् धातोरर्थः तिबर्थोऽपि कृतिः, न च कृतिविषया कृतिरिति तथा चानन्वय एव स्यादित्यर्थः । ननु कृतिगोचराऽपि कृतिरस्तीत्यत आह–**सजातीयेति**(७४–२०) । प्रयत्नादिविशेषगुणानां स्वसमानजातीयस्यानारम्भकत्वस्योक्तत्वात् तथाच कृतिगोचरा कृतिर्नास्ति । तथाच आख्यातार्थः संख्यैव । एवं सति कृत्याश्रय एक इति अन्वयो भविष्यति । दूषयति **आख्यातेति**(७४–२१) । करोतीत्युक्ते धातोरर्थः कृतिः आख्यातार्थः संख्या । एवं च सति कृतिगता संख्या न बोध्यते किन्तु कृत्यनुकूलगता कृत्याश्रयगता वा संख्या बोध्यते । एवं सति अनुकूलत्वमाश्रयत्वम् आख्यातस्य लाक्षणिकोऽर्थोऽस्तु, संख्या तु वचनस्यैवार्थोऽस्त्वित्यर्थः । तथाच एवं सति कृञ्धातुना कृतिरुक्ता तिपाऽनुकूलत्वं तथाच कृत्यनुकूलवान् [इति] अयमन्वयः सुकर एव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राशङ्कते । **न चेति**(७४–२३) । तथा च सर्वेषां लकाराणां व्यापारादिकमेवार्थोऽस्तु कृतिस्तु लिङर्थ एव । एवं च सत्यसाधारणं स्यादित्यर्थः । समाधत्ते **भिन्नेति**(७४–२३) । तथाच यदि आख्यातार्थः कृतिर्न भवति तदा पचतीत्युक्ते पाकं करोति । अपाचीत्युक्ते पाकं कृतवान् इति आख्यातार्थस्य कृतिरूपेण विवरणं न स्यात् । ननु पाककाल एव सर्वलकारार्थोऽस्तु इत्यत आह–**भिन्नसमयेति**(७४–२३) । तथाच सर्वेषां लकाराणां न एकः कालोऽर्थः किन्तु लडादयो भिन्नभिन्नकाल एवानुशिष्टाः इतिकृत्वा आख्यातार्थः कृतिरेव ।

अत्राशङ्कते **न चेति**(७४ २४) । तथा च सर्वलकारार्थो व्यापारः कृतिस्तु लिङर्थ इति सिद्धमसाधारण्यं व्यापारमात्रं जलाहरणादिकमपि भवति तत्रापि पचतीति प्रयोगः स्यादित्यत आह–**फलानुकूलेति**(७४–२४) । तथाच जलाहरणं तु विक्लित्तिरूपफलानुकूलो व्यापारो न भवतीति नातिप्रसङ्गः । नन्वेवं सति पचतीत्यादौ कृतिबोधो न स्यादित्यत आह–**कृतिरपीति**(७४–२५) । तथाच [कृत्याश्रय-]रूपेणैवाख्यातार्थः नतु कृतित्वेन । दूषयति **नियमत**(७४–२५) इति । तथाच पचतीत्युक्ते पाकानुकूलव्यापारवानित्येव व्याकारो विवरणं स्यात् । न तु पाकानुकूलकृतिमानिति । कृतित्वेन व्याकारो न स्यादित्यर्थः ।

दूषणान्तरमाह–**गृहकन्दरेति**(७५–१) । तथा च गृहं कृतं कन्दरा अकृता इति व्यवहारो न स्यात् । अनुकूलव्यापारविषयत्वस्योभयत्राविशिष्टत्वात् । अत्राशङ्कते–**न चेति**(७५–२) । यदि आख्यातार्थः कृतिस्तदा रथो गच्छतीत्यादौ गमनानुकूला कृतिः रथे रथो गच्छतीत्यादावनन्वयः स्यात् । व्यापारस्याख्यातार्थत्वं रथो गच्छतीत्यादौ गमनानुकूलव्यापारत्वं वर्त्तत एवेत्यर्थः । दूषयति । **काकेभ्य**(७५–३) इति । तथाच काकपदं लक्षणया उपघातपरम् एवं रथो गच्छतीत्यादौ कृतिरूपोऽर्थो यत्र न सम्भवति तत्र व्यापार एवार्थः लक्षणयाऽन्यत्र पचतीत्यादौ कृतिरूपः शक्य एवार्थः ।

अत्राशङ्कते **न चेति**(७५–६) । तथा चाख्यातार्थः अनुकूलत्वम् । यत्र पचतीत्यादौ कृतिर्बुध्यते तत्रानुकूलेन कृतिरनुमीयते अत एव कृतिरूपेण व्याकारो विवरणमुपपद्यते । **लडेति**(७५–६) लकारार्थः । दूषयति **अनुकूलेति**(७५–६) । यदि व्यापारमात्रं लडर्थः तर्हि पचतीत्यादौ कृतिबोधो न स्यात् । अनुकूलेन कृतिरनुमातुं न शक्यते । अनुकूलत्वस्य यत्र कृतिर्नास्ति रथादौ तत्र सत्त्वेन कृतिव्यभिचारित्वादित्यर्थः । अत्राशङ्कते **न चेति**(७५–७) । एवं सति लिङर्थः कृतिः सर्वलकारार्थस्तु फलम् एवं सति लिङर्थः कृतिरित्यसाधारण्यं स्यादित्यर्थः ।

ननु फलं धात्वर्थः । स चेल्लकारार्थस्तदा धातोरनन्वय एव स्यात्तदा धातुयोगो व्यर्थ इत्यत आह–**धातोरिति**(७५–८) । तदिति फलानुकूलेत्यर्थः । एवं सति फलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लकारार्थः । फलानुकूलो व्यापारो धात्वर्थ इति धातुयोगः सार्थक एव । दूषयति **विकल्पे**ति(७५-८) । न **द्वितीय**(७५-११) इति । यदि सर्वलकारार्थः पाकादि-फलविशेषस्तर्हि यजते इत्युक्ते यागादिफलविशेषस्य लाभो न स्यात् । कुतः । सर्व-लकाराणां पाकादिफलविशेषवाचकत्वात् । प्रत्ययार्थं विकल्प्य धात्वर्थमपि विकल्पयति । **धातो**स्त्विति(७५-१२) । फलमात्रं फलसामान्यं दूषयति । **नोभावि**ति(७५-१३) तथाच फलानुकूलो व्यापार इत्यत्र फलस्यावश्यं प्रवेशात् उपजीव्यत्वेन फले एव धातोः शक्तिरस्तु नतु फलानुकूलव्यापारः । दूषणान्तरमाह—**यथे**ति(७५-१४) । यदि फलानुकूलव्यापारो धात्वर्थस्तर्हि काष्ठेन पचतीत्यत्र पाकफलानुकूलं यथा काष्ठं तथा पाकोऽपि भवतीति कृत्वा पाकेन पचतीत्यपि प्रयोगः स्यात् ।

चतुर्थं पक्षं दूषयति । **अस्त्वि**ति(७५-१६) । **नियोज्ये**ति(७५-१६) नियोज्यस्य यागकर्तुः प्रयोजनं फलं लिङभिहित इति । एवं सति अर्थभावनायाः भाव्येन सहान्वयः, भाव्यं तु स्वर्गादिकमेव प्रयोजनं एवं सति स्वर्गकामपदसमभि-व्याहारात् यागेन स्वर्गं भावयेदिति भाव्यसमन्वितभावनाज्ञानमेव प्रवर्त्तकमित्यर्थः । अत्राशङ्कते । **न चे**ति(७५-१९) । यजेतेत्यत्र यजिपदार्थो यागः लिङर्थो भावना । सा भावना प्रकृत्यर्द्ध(र्थे) एवान्तरङ्गतयाऽन्वेति । का अन्तरङ्गता नाम प्रत्ययानां, प्रत्ययं प्रकृत्युपरि वर्त्तते, न तु स्वर्गपदोपरि इति कृत्वा प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् । एवं सति यागस्य भावनाविषयत्वात् स्वर्गस्य बहिरङ्गत्वात् भावनाविषयत्वं नास्ती-त्यर्थः । **साध्ये**ति(७५-१९) । साध्यं यागः साधनं भावना, प्रकृत्यर्थ एवान्तरङ्गः, स्वर्गस्तु बहिरङ्गः, कुतः ? अप्रकृत्यर्थत्वात् ।

इष्टापत्त्या परिहरति । **ग्राममि**ति(७५-२१) । ग्रामं गच्छतीत्यादौ अन्तरङ्ग-तया गमनस्य भाव्यत्वे यथा ग्रामसंयोगस्य फलत्वम् तथाच ग्रामसंयोगफलिका गमनभावना । एवं अन्तरङ्गतया यागस्य भाव्यत्वे स्वर्गस्यैव फलत्वं स्वर्गफलत्वेन विना यागस्य भाव्यत्वानुपपत्तेरिति स्वर्गफलिका यागभावना तज्ज्ञानमेव प्रवर्त्तकमिति समुदायार्थः । **तथाचे**ति(७५-२२) । स्वर्गः फलं यस्य एवम्भूतो यो यागः तज्ज-निका या यागभावना तद्ज्ञानमेव यागे प्रवर्त्तकम् । **वाक्यार्थे**ति(७५-२३) । यजेत इत्यत्र स्वर्गपदसमभिव्याहारात् स्वर्गफलिका यागभावनेत्यर्थः । **भवती**ति(७५-२३) । स्वर्गकामस्य यागे प्रवृत्तिर्भवतीत्यर्थः ।

दूषयति **भावने**ति(७५-२४) । भावना किं आत्मविशेषगुणः कृतिस्तद्रूपा अथवा किं केन कथमिति अंशत्रयवती प्रेरणारूपा पदार्थान्तरं वा । नान्त्यः वक्ष्य-माणेष्टसाधनताज्ञानस्यैव प्रवर्त्तकत्वे तादृशांशत्रयवती या भावना तद्ज्ञानस्य प्रवर्त्तकत्वे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मानाभावात् इत्यन्यत्र विस्तरः । नाद्य इत्याह **भावने**ति(७५–२४) । भावना कृतिरूपा कृतिज्ञानं कृतावजनकम् । वक्ष्यमाणेष्टसाधनताज्ञानं प्रवर्त्तकमिति । विवृणोति **स्वर्गे**ति(७५–२५) । **अधिकस्ये**ति(७५–२५) । अंशत्रयवती भावना या इत्यर्थः । ननु इष्टसाधनताविशिष्टा या भावना तज्ज्ञानं प्रवर्त्तकमस्तु लिङ्प्रत्ययस्य इष्टसाधनत्वेऽप्यौपसन्दा(न्धा)निकी शक्तिरित्यत आह–**एवमि**ति(७६–१) । आख्यातार्थो भावना तद्ज्ञानं प्रवर्त्तकमिति पूर्वं प्रतिज्ञातम् .इदानीं तदन्यथात्वे इष्टसाधनताविशेषितभावनाज्ञानस्य प्रवर्त्तकत्वे । **प्रतिज्ञान्तरापातो**(७६–१) नाम निग्रहस्थानमित्यर्थः । सिद्धं नः समीहितमित्याह–**हिते**ति (७६–१) । इष्टसाधनत्वमित्यर्थः । **इष्टसाधनत्वमेव** विध्यर्थ इति न्यायमतम् । **इच्छे**ति(७६–२) इच्छा स्वरूपसती प्रवृत्तिजनिका न तु तद्ज्ञानं ।

ननु वस्तुत इच्छा विषयस्तद्ज्ञानं प्रवर्त्तकं न तु इच्छाज्ञानमित्यरुचेराह–**किञ्चे**ति(७६–३) । इष्टत्वं नाम इच्छाविषयत्वम् तत्र विकल्प्य दूषयति **इच्छे**ति-(७६–३) । इच्छाविषये स्वर्गादौ इच्छा विशेषणमुपलक्षणं वेत्यर्थः । तत्र विद्यमानं विशेषणम्, अविद्यमानमुपलक्षणम् । **इच्छायाम**पीति(७६–३) । प्रवृत्तिस्तु इच्छाविषये जायते । एवं सति इच्छाविषयत्वम् इच्छाविशिष्टे विषये प्रवर्त्तकं । विशिष्टं च विषयः इच्छा च । एवं सति इच्छा इच्छायां प्रवर्त्तिका स्यादित्यर्थः । यथा दण्डस्य करणता घटजनककाष्ठत्वेन, घटजनककाष्ठत्वे दण्डस्य घटकारणत्वे घटस्य घटे कारणत्वं स्यात् । तद्वत् इच्छाविशिष्टम् इच्छाविशिष्टे प्रवर्त्तकमित्युक्ते विशेषणस्येच्छारूपत्वात् इच्छा इच्छायां प्रवर्त्तिकेत्यापन्नम् । उपलक्षणपक्षं निराकरोति–**न द्वितीय**(७६–४) इति । **उपलक्ष्ये**ति(७६–४) । इच्छा उपलक्षणम् । इच्छाविषयः उपलक्ष्यं तस्मिन्नुपलक्ष्ये किमवच्छेदकमित्याह–**सुखत्वादी**ति[1](७६–५) । उपलक्ष्यं तु द्विविधम् । एकं स्वर्गादिकमपरं चिकीर्षाजनकज्ञानविषयं यागादिकम् । आद्ये त्वाह **स्वर्गादी**ति-(७६–५) । उपलक्ष्यतावच्छेदकं तद्विशिष्टज्ञानं चेत् प्रवर्त्तकं तदा सुखत्वरूपं यत् स्वर्गत्वं तद्विशिष्टज्ञानस्य प्रवर्त्तकत्वमित्यागतम् । एवं च सति स्वर्गासाधनं याग इति भ्रमवतः स्वर्गत्वविशिष्टे स्वर्गज्ञानेऽपि यागे न प्रवर्त्तते । एतावता स्वर्गज्ञानं प्रवर्त्तकं न भवति किन्तु स्वर्गसाधनज्ञानं प्रवर्त्तकम् । किञ्च स्वर्गज्ञानं यागे वा प्रवर्त्तकं स्वर्गे वा प्रवर्त्तकं, नाद्यः, भिन्नविषयत्वात् स्वर्गविषयकं ज्ञानं यागे कथं प्रवर्त्तकम् । नान्त्यः इत्याह **फलस्ये**ति(७६–६) । सिद्धविषयणी कृतिरसिद्धमुत्पादयति फलस्य

---

१. Here it seems that Guṇaratna follows the $M_2$ reading see, note no 2, p. 76

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चासिद्धतया कृतिविषयत्वाभावादित्यर्थः । फलं स्वर्गः स चासिद्धस्तस्य कृतिविषयत्वं नास्ति, व्युत्पाद्यत्वादिति इदं सर्वम् अग्रे निरूपणीयमस्ति ।

किञ्च स्वर्गत्वविशिष्टं स्वर्गसामान्यज्ञानं वा प्रवर्तकं स्वर्गत्वविशिष्टस्वर्गविशेषज्ञानं वा । आद्ये स्वर्गादिज्ञानेऽपीत्यनेनोक्तोत्तरत्वात् । न हि स्वर्गत्वविशिष्टस्वर्गसामान्यज्ञाने स्वर्गविशेषजनके यागादौ नियमेन प्रवर्त्तते । नान्त्य इत्याह-**अननुगमा**दिति(७६—७) । तथाच विध्यर्थः अननुगत एव स्यात् । कुत्रचिदुपलक्ष्यताऽवच्छेदकः कश्चित् स्वर्गविशेषः कुत्रचिदन्यः स्वर्गविशेष इतिकृत्वा स्वर्गविशेष उपलक्ष्यतावच्छेदको न भवति । उपलक्ष्यं चेत् यागादिकम् तत्र उपलक्ष्यतावच्छेदकं यत् चिकीर्षाजनकज्ञानविषयत्वं तदभिप्रायेणाह—**न द्वितीय**(७६—७) इति । यथा कारणतावच्छेदकज्ञानं विना कारणता गृहीतुं न शक्यते एवं चिकीर्षाजनकज्ञानविषयतावच्छेदकग्रहं विना चिकीर्षाजनकज्ञानविषयता निरूपयितुं न शक्यते । तच्च चिकीर्षाजनकज्ञानविषयतावच्छेदकं यदीष्टसाधनत्वादिकं तदा तदेव प्रवर्त्तकमास्तां निरूप्यमाणत्वादिति । स चिकीर्षाजनकज्ञानविषयतावच्छेदको धर्मोऽवश्यं निरूपणीय इत्यर्थः । स च नास्त्येवेति भावः । ननु इष्टत्वज्ञानं चिकीर्षाद्वारा प्रवर्त्तकम् । चिकीर्षायां तु इष्टसाधनताज्ञानम्, उपादानप्रत्यक्षं च कारणम् । एवं सति न कोऽपि दोष इत्यरुचेराह—**इष्टत्वे**ति(७६—९) ।

अत्र शङ्कते **साध्यत्वे**ति(७६—९) । एवं च कृतिसाध्यत्वे सति इच्छाविषयत्वं ज्ञानं प्रवर्त्तकं, सागरमणिग्रहणं तु कृतिसाध्यं न भवतीति कृत्वा कृतिसाध्यत्वविशिष्टेच्छाविषयत्वं सागरमणौ नास्तीति कृत्वा न प्रवृत्तिरित्यर्थः । दूषयति-**साध्यते**ति(७६—१०) । तदेव कृतिसाध्यं यदिष्टसाधनमिति कृत्वा यदि साध्यताज्ञानमपेक्षितम् तदा इष्टसाधनताज्ञानमपेक्षितमेव । ततः किमित्यत आह——**हिते**ति(७६—१०) । हितम् इष्टं तत्साधनताज्ञानमेव प्रवर्त्तकमित्यर्थः ।

ननु कृतिसाध्यताज्ञाने इष्टसाधनताज्ञानं नापेक्षितं तेन[1] विनाऽपि विषभक्षणादौ कृतिसाध्यताज्ञानादित्यरुचेराह—**किञ्चे**ति(७६—१२) । तद्विशेषः इच्छाविशेषः । **साऽपी**ति(७६—१३) । इष्टत्वे उपलक्षणभूता या इच्छेत्यर्थः । सा इच्छा **फलस्य** स्वर्गादेः **धात्वर्थस्य** यागादेः । **साऽपी**ति फलविषयिणीत्यर्थः । **वक्तुरि**ति (७६—१३) । प्रतिपाद्यस्य स्वप्रवृत्तौ वक्तुर्या फलेच्छा तज्ज्ञानं चेत् कारणं तदा प्रतिपाद्यस्य वक्तृफलेच्छाज्ञानव्यतिरेकेणापि आज्ञामात्रेण अध्येषणामात्रेण च यत्र प्रवृत्तिः तत्र तस्य वक्तृफलेच्छाज्ञानस्य व्यभिचारेण वक्तृफलेच्छाविषयत्वज्ञानस्याप्रवर्त्तकत्वात् । तदेवाह—**आज्ञे**ति(७६—१४) । **आज्ञाऽध्येषणातिरिक्ताया** इति तन्मात्रया इत्यर्थः । एवं च सति कुत्रचित् आज्ञामात्रेण प्रतिपाद्यस्य

१. इष्टसाधनताज्ञानेन विना ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवृत्तिः, कुत्रचित् अध्येषणामात्रेण, यत्र गुर्वादीनामाज्ञाऽपि नास्ति अध्येषणाऽपि नास्ति तत्र प्रतिपाद्यस्य शिष्यस्य गुरोरेतत्फलविषयिणी इच्छा वर्त्तते तत्र वक्तृफलेच्छाज्ञानस्य सत्त्वेऽपि न तत्[1] प्रवर्त्तकम्—इति व्यभिचारात् आज्ञाऽपि अप्रवर्त्तिका, अध्येषणाऽप्यप्रवर्तिका वक्तृफलेच्छाविषयत्वज्ञानमप्यप्रवर्त्तकम् इति नियमो नास्ति—इतिकृत्वाऽनुगतं प्रवर्त्तकं किञ्चिद् वक्तव्यम् । तच्च नास्ति । **प्रतिपाद्येति**(७६—१५) प्रतिपाद्यस्य शिष्यस्य ये विशेषणगुणा बुद्ध्यादयः ते मनसा गृह्यन्ते इतिकृत्वा प्रतिपाद्यस्य या फलेच्छा सा मनसः प्रत्यक्षा इतिकृत्वा स्वफलेच्छाबोधार्थं वक्तृशब्दानपेक्षणादित्यर्थः । **तद्बोधकेति**(७६—१६) । प्रतिपाद्यफलेच्छाबोधकशब्दस्येत्यर्थः ।

दूषणान्तरमाह—**असत्याश्चेति**(७६—१६) । आदौ ज्ञानं तदनन्तरं प्रतिपाद्यस्य इच्छा तदनन्तरं प्रवृत्तिः एवं सति ज्ञानात् इच्छति प्रयतते । न च ज्ञानात् पूर्वम् इच्छास्ति इतिकृत्वा स्वज्ञानेन यत्र प्रवृत्तिर्जायते तत्र प्रतिपाद्यफलेच्छा नास्ति, यः प्रवर्त्तते स प्रतिपाद्य एव न भवति, स्वज्ञानमात्रादेव कामिनीसम्भोगादौ प्रवर्त्तते—इतिकृत्वा कामिनीसम्भोगकर्त्तुः प्रतिपाद्यत्वमेव नास्ति । तथा च प्रतिपाद्यफलेच्छाविषयत्वं न प्रवर्त्तकम् ।

फलविषयिणी या इच्छा तद्विषयत्वज्ञानस्य प्रवर्त्तकत्वं निरस्य धात्वर्थविषयिणी या इच्छा तद्विषयत्वज्ञानस्य प्रवर्त्तकत्वं निरस्यति **नाऽपीति**(७६—१७) । धात्वर्थविषयिणी या इच्छा तद्गोचरत्वं यागादेरित्यर्थः । प्रतिपाद्याऽभिप्रायेणाह—**धात्वर्थस्येति**(७६—१७) । तथाच यागस्य स्वर्गसाधनत्वाज्ञाने प्रतिपाद्यस्येच्छाविषयत्वज्ञाने विद्यमानेऽपि न प्रतिपाद्यो यागादौ प्रवर्त्तते । प्रयोज्येति प्रतिपाद्यस्य नाम । प्रतिपादकेच्छाऽभिप्रायेणाह—**प्रतिपादकेति**(७६—१८) । यत्र प्रतिपादकस्य यागविषयिणी इच्छा वर्त्तते नियोज्यस्य नास्ति तत्र नियोज्यस्य यागे प्रतिपादकेच्छाविषयत्वज्ञाने विद्यमानेऽपि नियोज्यो न प्रवर्त्तते । **न तृतीय**(७६—२०) इति । यस्य कस्येति पक्ष इत्यर्थः । **अतिप्रसङ्गादिति**(७६—२०) आत्मघातकस्य विषभक्षणादौ इच्छाविषयत्वज्ञाने विद्यमाने अनात्मघातकस्यापि विषभक्षणादौ प्रवृत्त्यापत्तेः । एतावता इच्छामात्रविषयत्वमिति प्रथमपक्षं निराकृत्य तद्विशेषचिकीर्षाविषयत्वपक्षं निराकरोति । **द्वितीयोऽपि नेति** (७६ २०) इच्छाविशेषचिकीर्षेति यो द्वितीयः पक्षः सोऽपि नेत्यर्थः ।

दूषणमाह—**उक्तेति**(७६—२०) । अत्रापि । प्रतिपाद्यस्य वा प्रतिपादकस्य वा यस्य कस्याऽपि वेत्यादिना दूषणानामुक्तप्रायत्वादित्यर्थः । **संकल्प**(७६—२२) इति । मानसो निश्चयः । संकल्पस्य प्रवर्त्तकत्वे साधकमाह—**स्वप्रवृत्ताविति**(७६—२२) ।

१. वक्तृफलेच्छाज्ञानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र कामिनीसम्भोगादौ परोपदेष्टा नास्ति तत्र या प्रवृत्तिः सा स्वप्रवृत्तिस्तस्यां यद्धेतुत्वेनावगतमहं कामिन्या सह भोगं कुर्यामिति मानसनिश्चयरूपं ज्ञानं तत्कामिनीसम्भोगादौ प्रवृत्तिहेतुत्वेन निश्चितमतः परप्रवृत्तौ परकीयशब्दात् स्वस्य पाकादिप्रवृत्तौ तदेव संकल्परूपमेव प्रवृत्तिहेतुत्वेनाऽनुमिनुयादिति वस्तुगत्यभिप्रायेण ।

ननु तदनुमानं प्रवर्त्तकमनुमानं यथा परशब्दात् या प्रवृत्तिः सा सङ्कल्पजन्या प्रवृत्तित्वात् शब्दानपेक्षस्वारसिकसम्भोगादिप्रवृत्तिवदिति । अथवा संकल्पज्ञानस्य प्रवर्त्तकत्वे संकल्पानुमानरूपं तज्ज्ञानं परप्रवृत्तौ प्रवर्त्तकमस्तीत्यर्थः ।एतदेव विवृणोति । **स्वप्रवृत्ताविति**(७६–२२)। कामिनीभोगादौ प्रवृत्तौ इष्टोपायलक्षणं कामिनीसंसर्गादिकं कुर्यामिति संकल्पस्य हेतुत्वं निश्चितम्। ननु संकल्पश्चेत् हितोपायताविषयकस्तर्हि हितोपायताज्ञानमेव प्रवर्त्तकमास्तामित्यत आह–**संकल्पमिति**(७६–२४) । यत्र कृतिसाध्यतासन्देहो नदीतरणादावस्ति तत्र हितोपायताऽनुसन्धाने इष्टोपायतानुसन्धाने विद्यमानेऽपि अहं बाहुभ्यां नदीतरणं कुर्यामिति निश्चयाभावात् नदीतरणादौ न प्रवृत्तिरतः संकल्प एव प्रवर्त्तक इत्यर्थः । **आवश्यकत्वादि**ति(७७–१)। पूर्वोक्तयुक्तेरिति भावः । बाहुभ्यां नदीतरणे इष्टोपायत्वज्ञाने विद्यमानेऽपि संकल्पं विना प्रवृत्तेरभावात् संकल्पस्यावश्यकत्वादित्यर्थः । एवं सति किमित्यत आह–**शब्दजायामि**ति(७७–१) । गुर्वादिशब्देन यत्र स्वस्य प्रवृत्तिर्जायते तत्रापि संकल्पज्ञानस्य हेतुत्वम् । **अनुमिनोती**ति(७७–१)। अनुमिनुयादित्यत्र व्याख्यातम्। **स एवे**ति(७७–२) संकल्प इत्यर्थः। **तन्ने**ति(७७–२) । अहं कुर्यामिति कृतिसाध्यत्वनिश्चयो वा कृत्या साधयामि इति, चिकीर्षारूपो वा, अन्यद्वा । नाद्यः, कृतिसाध्यत्वनिश्चय एव प्रवर्त्तक इति प्राभाकरमतनिराकरणेनैव अग्रेऽत्र वादे निराकरणात् । न द्वितीय इत्याह–**संकल्पस्येति**(७७–२) तद्विशेषचिकीर्षाविषयत्वज्ञानं प्रवर्त्तकमित्यत्र यो दोषस्तद्दोषाकुलत्वादित्यर्थः । नान्त्य इत्याह–**अतिरिक्त**(७७–३) इति संकल्पः इच्छाव्यतिरिक्तः पदार्थो नास्ति ।

ननु यद्विषयकज्ञाने यागादौ प्रवृत्तिः यस्मिंश्चासति न प्रवृत्तिः तादृशज्ञानविषय एव लिङाद्यर्थ इत्यत आह–**किञ्चेदमि**ति(७७–४) । **यस्मिन्नि**ति(७७–४) **यस्मिन् जात**(७७–४) इति स्वरूपसत् विवक्षितं तदा च स्वरूपसति यस्मिन् विद्यमाने प्रवृत्तिरित्यर्थः। यथा आलोकः चाक्षुषबोधे स्वरूपसन्नेव कारणं न तु ज्ञातः एवं स्वरूपसन्नेव संकल्पः प्रवर्त्तकः न ज्ञातः । **यस्मिन् ज्ञात**(७७–४) इति । यद्विषयके ज्ञाने जाते प्रवृत्तिः तद्ज्ञानविषये वा लिङाद्यर्थः। दूषयति **आद्ये**(७७–५) इति। एवं सति जानाति इच्छति प्रयतते । ज्ञानेन विना इच्छा नास्ति । इच्छां विना प्रवृत्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नास्ति—इतिकृत्वा स्वरूपसत्येव ज्ञाने विद्यमाने इच्छानन्तरं प्रवृत्त्या ज्ञानमपि लिङा-द्यर्थः स्यात् । यतो यस्मिन् जाते प्रवृत्तिः स एव लिङाद्यर्थः तर्हि स्वरूपसति ज्ञाने जाते इच्छानन्तरं प्रवृत्त्या ज्ञानमपि लिङाद्यर्थः स्यात् ।

ततः किमित्यत आह—**प्रवर्त्तकेति**(७७–५) । तथा च लिङाद्यर्थत्वेन ज्ञानस्य प्रवर्त्तकज्ञानविषयत्वापत्तिः । यो हि लिङाद्यर्थः स एव प्रवर्त्तकज्ञानविषयः । तथा च ज्ञानस्य लिङर्थत्वेन प्रवर्त्तकज्ञानविषयत्वापत्तिः । यस्मिन् ज्ञाते इति द्वितीयपक्षं निराक-रोति **संकल्पस्येति**(७७–६) । संकल्पस्य मानसनिश्चयरूपत्वेन चिकीर्षारूपत्वेन वा स्वरूपसत एव प्रवर्त्तकत्वात् संकल्पज्ञानस्याप्रवर्त्तकत्वेन प्रवर्त्तकज्ञानविषयत्वाभा-वेन कथं संकल्पस्य लिङर्थत्वम् इत्यर्थः । **कथमिति**(७७–६) संकल्पस्य स्वरूपसत एव प्रवृत्तिजनकत्वादिति । तर्हि ज्ञातः कथं प्रवृत्तिजनकः कथं विध्यर्थश्च । **सप्तम-स्त्विति** । **आद्ये**(७७–७) इति । यदि वक्तुरभिप्रायो ज्ञानं तर्हि विधिवाक्येन वक्तृज्ञान-विषयकं श्रोतुः प्रयोज्यस्योत्पादनीयं तत्कीदृशमित्याह—**अग्निकामस्येति**(७७–७) । अग्न्यर्थं दारुमथनं कुर्यादनेन विधिवाक्येन श्रोतुरग्निकामस्य वक्तुर्दारुमथनभावना दारुमथनार्थमुत्साहो मया ज्ञात एतादृशं ज्ञानमुत्पाद्यम् । न चैतादृशं ज्ञानं प्रव-र्त्तकमित्याह—**न चेति** (७७–८) । अग्निकामस्य वक्तुर्दारुमथनं इष्टहेतुः श्रोतुर्ममा-ऽनिष्टहेतुरिति स्वस्य दारुमथनादावनिष्टहेतुत्वज्ञानदशायां तादृशे वक्तृज्ञाने ज्ञातेऽपि न प्रयोज्यस्य प्रवृत्तिः ।

शङ्कते **न चेति**(७७–८) । वक्तुरुत्साहविषयकं दारुमथनं मम श्रोतुः प्रयोज्य-स्येष्टहेतुः आप्तेन वक्त्रा इष्टहेतुत्वेन ज्ञायमानत्वादित्यनुमानेन दारुमथनादौ स्वेष्ट-साधनतामनुमाय ततः श्रोतुः प्रयोज्यस्य प्रवृत्तिरित्यर्थः । **अनेनेति**(७७–९) हेतुनेत्यर्थः । हेतुः कीदृशः ? आप्तेन वक्त्रा इष्टहेतुत्वेन ज्ञायमानत्वादिति । व्यभि-चारिहेतुरित्याह—**अनिष्टेति**(७७–९) । प्रतिपुरुषं प्रकृतिवैचित्र्यान्ममाऽनिष्टहेतु यत् तदपि वक्तुरिष्टहेतुर्भवतीति कृत्वा तदपि आप्तेन वक्त्रा स्वेष्टहेतुत्वेन ज्ञाय-मानं भवति, न च तन्मदिष्टहेतुरिति व्यभिचार इत्यर्थः । तस्मादनेनानुमानेन स्वेष्टसाधनत्वमनुमातुं न शक्यते । वस्तुतस्तु प्रवृत्त्यर्थं स्वेष्टहेतुत्वज्ञानस्यापेक्षणे इष्ट-साधनत्वमेव विध्यर्थः स्यान्न तु आप्ताभिप्राय इति सारम् ।

द्वितीयं इच्छारूपमाप्ताभिप्रायं दूषयति—**सेति**(७७–१०) । विध्यर्थरूपा या आप्ताऽभिप्रायलक्षणेच्छा सा वक्तृविशेषिता वक्तुरिच्छा किंवा अविशेषिता इच्छामात्रं वा । **उभयथाऽपीति**(७७–१०) । न हि कुत्रापि प्रयोज्यस्येष्टहेतुत्वा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञाने वक्तिरिच्छाज्ञानमात्रात् इच्छाज्ञानमात्राद्वा प्रवृत्तिर्दृष्टचरेत्यर्थः । ननु इष्टहेतुत्वं न विध्यर्थः यतः मम पाकादिकमिष्टहेतु अतः पाकादिः कर्त्तव्य इतीष्टहेतुत्वस्य सह प्रयोगो न स्यात् तव्यप्रत्ययेनैवेष्टहेतुत्वस्य बोधितत्वात् । प्रकारान्तरेण पाके इष्टहेतुत्वे ज्ञाते मया पाकः कर्तव्य इति गुरोरभिप्रायाज्ञाने गुरुं प्रति अहं पाकं कुर्यामिति प्रश्नो न स्यात् । तदनन्तरं च भो देवदत्त ! त्वया पाकः कर्त्तव्य इति उत्तरमपि न स्यात् । इष्टहेतुत्वस्य पूर्वमेव ज्ञातत्वात् । किं च यागादौ विलम्बेन इष्टसाधनत्वस्य बोधयितुमशक्यत्वात् यागस्याशुविनाशित्वात् तस्मात् आप्ताभिप्राय एव विध्यर्थ इत्यत आह–**अपि चेति** (७७–११)। **भवद्भिरिति**(७७–१२)। विध्यर्थमाप्ताभिप्रायं वदद्भिरित्यर्थः । आप्ताभिप्रायस्य विध्यर्थत्वेऽपि दूषणमस्तीत्याह–**नूनमिति** (७७–१२) । वक्तुरभिप्रायज्ञाने स्वस्यानिष्टहेतुत्वज्ञानदशायां प्रयोज्यो न प्रवर्त्तते एतदेव प्रश्नोत्तररूपेणाह–**ममेदमिति** (७७–१३) । त्वया क्रियमाणं पाकादिकं ममेष्टम् इति शब्दात् तादृशाभिप्रायज्ञानेऽपि न प्रयोज्यः प्रवर्त्तते, किन्तु प्रश्नं करोति, त्वयैव कुतः पाको न क्रियते इति प्रश्नं करोति किमित्येवमिति । मया पाकः किमर्थं कर्त्तव्यः त्वयैव कुतो न क्रियते इतिप्रश्ने प्रयोजकस्योत्तरं यतस्तव प्रयोज्यस्य कृतिः ममेप्सिता इत्यनेन वक्तुरभिप्रायविशेषज्ञानेऽपि प्रयोज्यो न प्रवर्त्तते यत एतद्वाक्यविषयस्य स्वस्य [1]भयहेतुत्वे सम्भाव्यमानत्वात् प्रयोज्येन ।

**अत्रापीति** (७७–१४) । ममेप्सितेति अभिप्रायविशेषप्रतिपादके वाक्येऽपीत्यर्थः । वक्तुरभिप्रायो न विध्यर्थ इत्युपसंहरति–**इदमपीति** (७७–४४) । इदं इच्छारूपमित्यर्थः । अत्र शङ्कते–**न चेति** (७७–१४)। आज्ञादौ इच्छार्थत्वं क्लृप्तमिति कृत्वा पचेत इति लिङ्स्थलेऽपि इच्छैव लिङर्थः । **तदनुरोधेनेति** । (७७–१५) इच्छानुरोधेन । **अत्रापीति** (७७–१५) लिङ्स्थलेऽपि **तथेति** (७७–१५) । लिङर्थकल्पनमित्यर्थः ।

दूषणमाह–**सहेति** (७७–१५) । यदीच्छा लिङर्थः तदा तव पाककृतिर्ममेप्सितेति त्वया पाकः कर्त्तव्य इति सह प्रयोगो न स्यात् । तव्यप्रत्ययेनेच्छोक्ता ईप्सिता इत्यनेनापि पदेन इच्छोक्तेति सह प्रयोगो न स्यात् । **उद्देश्यतेति**–(७७–१८) । इच्छाविषयत्वमित्यर्थः । **इच्छामात्रेति**(७७–२२) इच्छासामान्यम् । **इच्छेति**–(७७–२२) । इच्छामात्रविषयत्वावच्छेदकं रूपं सुखत्वादिकं । **चिकीर्षेति** (७७–२३) । चिकीर्षाविषयः पाकः । चिकीर्षेति अवच्छेदकरूपं पाकत्वादिकं तद्वत्वं वर्त्तते

---

१. पाके क्रियमाणे मम दक्षिणा गमिष्यतीति भयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पाके। इच्छेति (७८–१) । सुखादौ इच्छा जायते तत्कारणीभूतं ज्ञानं सुखज्ञानं तद्विषयत्वं सुखादौ तिष्ठति । **चिकीर्षेति** (७८–१) । सुखादौ चिकीर्षा नास्तीति चिकीर्षापदं पाकं कृत्या साधयामीति चिकीर्षा, तत्कारणीभूतं ज्ञानं पाको मत्कृतिसाध्य इति ज्ञानं तद्विषयत्वं पाकादौ वर्तते इत्यर्थः । **चिकोर्षेति** (७८–२) । चिकीर्षायाः कारणीभूतं पाको मत्कृतिसाध्य इति ज्ञानं तस्या विषयता पाकादौ वर्तते, तस्या विषयताया अवच्छेदकं पाकत्वादिकं चिकीर्षेति कृतिजन्यत्वे सति स्वरूपं यत् पाकादिकं तज्ज्ञानमेव प्रवर्तकम् । **चिकोर्षेति** (७८–४) । चिकीर्षाजन्या या कृतिः तज्जन्यत्वम् उद्देश्यत्वम् । **स्वेति**(७८–४) । यो विषं न भक्षयति तस्य विषभक्षणमनिष्टं भवति । यो विषं भक्षयति तस्य विषभक्षणमिष्टं भवति इतिकृत्वा विषभक्षकेच्छाविषयीभूते विषभक्षणे विषाभक्षकस्यानिष्टसाधनीभूते विषाभक्षकस्य विषभक्षणे प्रवृत्तिः स्यात् यथाकथञ्चिदिच्छामात्रविषयत्वं विषभक्षणेऽपि वर्तते । **सुखेति** (७८–५)। इच्छामात्रविषयता त्रिषु वर्तते तस्या विषयताया अवच्छेदकं सुखत्वम् दुःखाभावत्वं भोगत्वं तद्रूपवत्त्वं सुखादौ वर्तते इतिकृत्वा सुखादौ प्रवृत्तिः स्यात् सुखादीनां फलरूपत्वेन प्रवृत्तिविषयत्वाभावात् । **यागेति** (७८–६) । यागादावपि इच्छामात्रविषयतावच्छेदकरूपं उपायत्वं वा पाकत्वादिकं वाऽन्यद्वा । नाद्यः उपायत्वज्ञानमात्रान्न प्रवृत्तिः । अत एव न द्वितीयोऽपि पाकत्वज्ञानमात्रान्न कोऽपि प्रवर्ततेऽननुगमाच्च । कीदृशोऽननुगमः । पाकत्वस्य यागेऽभावात् । यागत्वस्य पाकेऽभावात् । अन्त्ये त्वाह–**निर्वक्तुमशक्यत्वादि**ति (७८–६) । यागपाकादावनुगतम् उपायत्वातिरिक्तम् इच्छामात्रविषयताऽवच्छेदकं रूपं नास्तीत्यर्थः ।

अत्र शङ्कते **न चेति**–(७८–६) इष्टत्वं नाम इच्छाविषयत्वम् उद्देश्यत्वमिति यावत् । **तदवच्छेदकमि**ति (७८–६) । इच्छामात्रविषयताया या उद्देश्यता तदवच्छेदकमित्यर्थः । **दूषणमाह–आत्मेति** (७८–७) । इच्छामात्रविषयताया या उद्देश्यता तदवच्छेदकम् उद्देश्यत्वम् । एवं च सति उद्देश्यताया अवच्छेदकम् उद्देश्यत्वमेव । **चिकीर्षेति** (७८–७) । चिकीर्षा विषय[क]त्व ज्ञानं चेत् प्रवर्तकं तदा चिकीर्षाद्वारा चिकीर्षाज्ञानमेव प्रवर्तकमित्यागतं, न च तत् सम्भवति, चिकीर्षाविषयस्य यद् ज्ञानं तत् चिकीर्षाद्वारा प्रवर्तकं न तु चिकीर्षाविषयत्वेन, चिकीर्षाविषयस्य ज्ञानं प्रवृत्तिजनकं ज्ञानचिकीर्षाकृतीनां समानप्रकारत्वेन कार्यकारणभावः, न च चिकीर्षा विषयत्वप्रकारिका किन्तु पाकत्वप्रकारिका येन चिकीर्षाविषयत्व[कं] ज्ञानं चिकीर्षाद्वारा प्रवृत्तिजनकं स्यादित्यर्थः ।

---

१. उद्देश्यत्वं पाकयागादौ अस्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथापि चिकीर्षाविषयत्व[क]ज्ञानस्य प्रवर्त्तकत्वे दूषणान्तरमाह—**अन्योन्येति** (७८—८) । **तमेव** विवृणोति । यदि चिकीर्षा विद्यते तदा चिकीर्षाविषयत्व[क]ज्ञानं चिकीर्षाविषयत्व[क]ज्ञाने सति चिकीर्षा इत्यर्थः । **तद्बोध**(७८—८) । इति चिकीर्षाविषयत्व[क]बोधः । **तस्मिन्निति**(७८—९) । चिकीर्षाविषयत्व[क]बोधे सतीत्यर्थः । **अननुगमादिति** (७८—९) । चिकीर्षाविषयतावच्छेदकानां यागत्वपाकत्वादीनां अननुगतत्वादित्यर्थः । भवतु कश्चन पाकत्वाद्यतिरिक्तः यागपाकादावनुगतोऽतिरिक्ते(क्तो) धर्म एवेत्यत आह **अनुगतस्येति** । अनुगतो धर्मो निर्वक्तुमशक्य इत्यर्थः । ननु यागपाकादावनुगतं इष्टसाधनत्वमेव धर्मो निर्वक्तुं शक्यते इत्यत आह—**शक्यत्वे** वेति (७८—१०) । चिकीर्षाविषयतावच्छेदकं रूपं यागपाकादावनुगतं यदीष्टसाधनत्वं तदा इष्टसाधनत्वज्ञानमेव प्रवर्त्तकमस्तु किमर्थं प्रवर्त्तकज्ञानमध्ये चिकीर्षाविषयत्वस्य प्रवेशः । चिकीर्षाविषयतावच्छेदकत्वेन इष्टसाधनत्वस्योपजीव्यत्वात् इष्टसाधनत्वज्ञानमेव प्रवर्त्तकमस्तु । इष्टसाधनत्वज्ञानेन विषयतावच्छेदकरूपत्वज्ञानमेव न सम्भवतीत्युपजीव्यत्वमित्यर्थः । **तदिति**(७८—१०) । इष्टसाधनाज्ञानस्येत्यर्थः । **परेच्छेति** (७८—११) । विषाभक्षकस्य विषभक्षकेच्छाकारणीभूतज्ञानविषये विषभक्षणादौ प्रवृत्तिप्रसङ्गादित्यर्थः । न च स्वेतिविशेषणं तथा च विषाभक्षकस्य विषभक्षकस्य विषभक्षणेच्छैव नास्ति स्वेच्छामात्रकारणीभूतज्ञानविषयत्वं विषभक्षणादौ नास्तीति नातिप्रसङ्ग इत्यत आह—**स्वीयेति** (७८—११) । तथा च सति इच्छामात्रकारणीभूतं यद् ज्ञानं तदेव स्वरूपसत् इच्छाद्वारा प्रवृत्तिजनकं न तु ज्ञानविषयत्व[कं] ज्ञानमपि प्रवृत्तिजनकं यतो ज्ञानज्ञानस्यापि प्रवर्त्तकत्वापत्तेः । यथा रजतज्ञानं रजते प्रवर्त्तकं न तु रजतज्ञानस्यापि ज्ञानं तद्वदत्र इच्छामात्रकारणीभूतं यत् पाकादिज्ञानं तदेव स्वरूपसत् प्रवृत्तिजनकम् । न तु पाकादिज्ञानस्य तद्विषयत्वज्ञानस्य च प्रवृत्तिजनकत्वम् । **अत**(७८—१२) इति । चिकीर्षाकारणीभूतं यद् ज्ञानं तत्स्वरूपसदेव प्रवृत्तिजनकं न तु तद्ज्ञानस्यापि ज्ञानं तद्विषयत्वस्य वा ज्ञानं प्रवृत्तिजनकमित्यर्थः । **तस्यैवेति** (७८—१२) । तादृशावच्छेदकरूपस्यैव यद् ज्ञानं तन्निरूपयितुमारब्धं तच्च चिकीर्षाकारणीभूतज्ञानविषयतावच्छेदकं रूपं च नास्त्येव । यदीष्टसाधनत्वादिकं तदवच्छेदकरूपं स्यात्तदा तज्ज्ञानमेव प्रवर्त्तकमास्तामिति पूर्वोक्तमेवेति भावः । **स्वरूपेति**(७८—१३) । न हि पाकस्वरूपमात्रज्ञानात् पाके प्रवर्तते कृत्यमाध्ये समुद्रतरणादौ अनिष्टसाधने विषभक्षणादौ वा स्वरूपज्ञानात् प्रवृत्तिः स्यादित्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु येन विशेषप्रकारेण पाकादौ चिकीर्षा जायते तेन विशेषप्रकारेण पाकादिस्वरूपज्ञानं यद्वर्त्तते तदेव पाकादौ प्रवर्त्तकमित्यत आह **स्वरूपेति** (७८–१४)। **तस्यैवेति** (७८–१४)। विशेषप्रकारस्येत्यर्थः। **नोपान्त्य** (७८–१४) इति। श्रमे पाकादिचिकीर्षाजन्यकृतिसाध्यत्वं वर्त्तते पूर्वं पाके कृतिसाध्यत्वज्ञानात् पाके चिकीर्षा जायते तया चिकीर्षया पाकानुकूला कृतिरुत्पद्यते। तया च कृत्या पाक उत्पद्यते। तया च कृत्या मध्ये श्रमोऽपि उत्पद्यते इति श्रमेऽपि प्रवृत्तिः स्यादित्यर्थः। श्रमस्य दुःखरूपत्वेनाऽनिष्टफलरूपत्वेन च प्रवृत्तिविषयत्वाभावादित्यर्थः।

दूषणान्तरमाह—**चिकीर्षेति** (७८–१५)। चिकीर्षा स्वरूपसती प्रवृत्तिजनिका न तु तस्याः ज्ञानं, चिकीर्षाजन्यकृतिसाध्यत्वज्ञानस्य प्रवृत्तिजनकत्वे चिकीर्षाज्ञानमपि प्रवृत्तिजनकमित्यागतमित्यर्थः। यथा रजतत्वविशिष्टरजतज्ञानस्य प्रवर्त्तकत्वे रजतत्वस्य विशेषणतया रजतत्वज्ञानमपि प्रवर्त्तकं तद्वदत्रापीत्यर्थः। चिकीर्षाविषयत्वज्ञानस्य प्रवर्त्तकत्वे चिकीर्षाया विषयत्वे चिकीर्षाया विशेषणत्वेन चिकीर्षाज्ञानस्यापि प्रवर्त्तकत्वं स्यादित्यर्थः। **मत्कृतीति** (७८–१७)। मत्कृतिसाध्यो यो यागस्तेन साध्यः स्वर्ग इति ज्ञात्वा यजमानस्य यागे प्रवृत्तिः। **इदमिति**(७८–२८) कृतिसाध्यत्वमेव। **परेषामिति** (७८–१८) प्राभाकराणाम्। कार्यतापदेन कृतिसाध्यत्वमुच्यते प्राभाकरैः। **स्वप्रवृत्ताविति** (७८–१८) स्वस्य कामिनीसम्भोगादौ। **इदमेवेति** (७८–१९)। इदं कृतिसाध्यत्वम्।

ननु कृतिसाध्यत्वज्ञानस्य प्रवर्त्तकत्वे बालस्य स्तनपाने प्रवृत्तिर्न स्यात् तदानीमुत्पन्नस्य बालस्य स्तनपानप्रवृत्तेः पूर्वं कृतिसाध्यत्वज्ञानाभावात् इत्यत आह—**बालस्यापीति** (७८–१९)। एवं च सति कार्यात् कारणानुमानम्। **पूर्वोक्त**-युक्त्या कृतिसाध्यत्वज्ञानस्य कारणत्वे सिद्धे इयमपि बालस्य स्तनपाने प्रवृत्तिः कृतिसाध्यत्वज्ञानरूपकारणजन्या प्रवृत्तित्वात्, मत्प्रवृत्तिवत् इति बालस्य कृतिसाध्यत्वज्ञानमुन्नीयते। तच्च यद्यप्यनुभवरूपं नास्ति तथापि जीवनान्यथाऽनुपपत्त्या संस्कारवशात् स्मृतिरूपमुन्नीयते इत्यर्थः।

शङ्कते **नचेति**–(७८–२०)। यथा दण्डसाध्यघटसाध्यजलाहरणम् अत्र जलाहरणे घटसाध्यत्वे बोधिते जलाहरणसाधनत्वमपि घटे बोध्यते। एवं घटे दण्डसाध्यत्वे बोधिते दण्डेऽपि घटसाधनत्वम्। तद्वत् स्वर्गे यागसाध्यत्वे बोधिते यागेऽपि स्वर्गसाधन[त्व]म् बोध्यते इत्यर्थः। युक्तिमाह—**समानेति** (७८–२०)। यथा घटाभाव इत्यत्र घटस्य प्रतियोगित्वे लब्धे अभावेऽप्यनुयोगित्वम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समानसंवित्संवेद्यतया, तद्वदत्र यागे समानसंवित्संवेद्यतया स्वर्गसाधनत्वं बुध्यते । बुध्यतां स्वर्गसाधनत्वं तथापि मत्कृतिसाध्यस्वर्ग इत्येव ज्ञानं प्रवर्त्तकमित्यत आह-**विनिगमने**ति--(७८–२०) । यागसाध्यत्वस्वर्गसाधनत्वयोर्ज्ञानस्याविशेषे याग-साध्यत्वज्ञानमेव कारणमित्यत्र नियामकाभावः ।

दूषयति **समाने**ति–(७८–२१) । घटाभाव इत्यत्र घटस्य प्रतियोगित्वे बुद्धे अभावेऽप्यनुयोगित्वं बुध्यते । प्रतियोगित्वानुयोगित्वयोः परस्परनिरूप्यत्वेन तद्भाने तद्भानस्यावश्यकत्वात् समानसंवित्संवेद्यत्वम्, न च यागसाध्यस्वर्ग इत्यत्र स्वर्गे साध्य-त्वे लब्धे यागे स्वर्गसाधनत्वं लभ्यते किन्तु यागसाध्यो यः स्वर्गस्तत्प्रतियोगित्वं यागे लभ्यते न तु स्वर्गजनकत्वम् । जन्यत्वजनकत्वयोः परस्परं निरूप्यत्वभावात् । प्रतियोगित्वानुयोगित्वयोः परस्परं निरूप्यत्वं वर्त्तते इतिकृत्वा तद्भाने तद्भानादि-त्यावश्यकत्वात् । एतदेव विवृणोति–**याग** (७८–२१) इति । **नत्वि**ति–(७८–२२) यागसाध्यस्वर्ग इत्यत्र यागनिष्ठस्वर्गनिरूपितनियतपूर्ववृत्तित्वबोधकसामग्र्यभावात् किन्तु स्वर्गनिष्ठनियतोत्तरभावप्रतियोगित्वमित्यर्थः । अत्र शङ्कते **नन्वि**ति (८७–२३) । यदि यागसाध्यः स्वर्ग इत्यत्र स्वर्गसाधनत्वं यागे स्वर्गसाधनं याग इत्यत्र यागसाध्यत्वं स्वर्गे चेन्न बुध्यते तर्हि घटसाधनं दण्ड इति वाक्यात् प्रथमत एव दण्डे घटसाधन-त्वज्ञानाद् घटार्थी दण्डे प्रवर्त्तते एवं स्वर्गसाधनं याग इति प्रथमत एव यत्र ज्ञानं तत्र स्वर्गसाधनत्वज्ञानादेव स्वर्गार्थी यागे प्रवर्त्तते इतिकृत्वा यागसाध्यत्वज्ञानव्यतिरेकेणापि स्वर्गसाधनत्वज्ञानात् यागे प्रवृत्तेः यागसाध्यत्वज्ञानं व्यभिचारि तत्र स्वर्गसाधनं याग इत्यत्र यागे स्वर्गसाधनत्वे लब्धे यागसाध्यत्वमपि स्वर्गे लभ्यते समानसंवित्संवेद्य-त्वात् । तर्हि यागसाध्यः स्वर्ग इत्यत्रापि स्वर्गे यागसाध्यत्वे लब्धे यागे स्वर्गसा-धनत्वं समानसंवित्संवेद्यतया लब्धुं शक्यते इति स्वर्गसाधनत्वज्ञानमपि प्रवर्त्तकं स्यादिति भावः । ननु घटसाधनं दण्ड इति वाक्यात् घटार्थिनो दण्डे प्रवृत्तिर्ना-स्त्येव इत्यत आह–**तत्रे**ति । घटसाधनं दण्ड इति ज्ञानात् घटार्थिनो दण्डे या प्रवृत्तिरनुभवसिद्धा सा न स्यात् । **किमि**ति (७८–२४) । किं शब्दः कटाक्षे । तद्ज्ञानादिति । घटसाधनं दण्डः स्वर्गसाधनं याग इति ज्ञानादित्यर्थः । दूषयति **आपातत** (७८–२४) इति । प्रथमतः घटसाधनं दण्ड इति ज्ञानमात्रादेव घटा-र्थिनो दण्डे प्रवृत्तिर्नास्त्येव किं तर्हीत्यत आह—**किन्त्वि**ति (७८–२४) । घटे साधनं दण्ड इति ज्ञानानन्तरं दण्डसाध्यो घट इति ज्ञानमवश्यमुत्पद्यते तेन च



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवर्त्तते इत्यर्थः । अत्र शङ्कते—तत्रेति (७८—२५)। घटसाधनं दण्ड इति ज्ञानं जायते यत्र तत्र तद्ज्ञानानन्तरं दण्डसाध्यो घट इति ज्ञानमवश्यं जायते अत्र किं नियामकमित्यर्थः । समाधत्ते शृण्विति (७८—२६) । तवापि नैयायिकस्यापि कृतिजन्यत्वं कृत्यजन्ये प्रवृत्तिर्न भवतीत्युपजीव्यं भवति, एवं च प्रवृत्त्यर्थकृतिसाध्यत्वज्ञाने उभयोर्वादिनोरावश्यके सति दुःखसाधने प्रवृत्तेरभावात् यागसाध्यः स्वर्ग इति यागसाध्यत्वमेव विषयतावच्छेदकं न तु स्वर्गसाधनत्वम् उभयसिद्धं यत् कृतिसाध्यत्वं तदपेक्षया साधनत्वस्य विजातीयत्वात् । साध्यत्वस्य समानजातीयत्वात् साध्यत्वमेवावच्छेदकं न तु साधनत्वम् । कृतिसाध्यत्वमित्यत्र साध्यत्वापेक्षया साधनत्वस्य विजातीयत्वादित्यर्थः । तत्रेति (७८—२५) कृतिसाध्यत्वे । अनिष्टसाधने प्रवृत्तिप्रसङ्गवारणार्थं विशेषणान्तरमिति । इष्टसाधनत्वं स्वसाध्येष्टकत्वं वा । विशेषणान्तरयोजना यथा कृतिसाध्येनेष्टं साध्यं अथवा कृतिसाध्यम् इष्टसाधनम् इति विशेषणान्तरं कल्पनीयमित्यर्थः । तत्रेति (७८—२६) । विशेषणान्तरकल्पने आवश्यके साध्यत्वमेव विशेषणमवश्यं कल्पनीयमित्यत्र युक्तिमाह—क्लृप्तमिति (७९-१)। गौरवादिति (७९—२)। कृतिसाध्यत्वमित्यत्र साध्यत्वापेक्षया साधनत्वस्य विजातीयत्वेन गौरवादित्यर्थः । प्रथम (७९—२) इति । साध्यत्वमेवेत्यर्थः । ननु सजातीयत्वमात्रं साध्यत्वविशेषणप्रक्षेपे न नियामकमित्यत आह—इदमिति (७९—२) परेषामिति (७९—३) प्राभाकराणाम् । अणुरिति (७९—३) । सजातीयत्वमात्रम् । अध्यवसाय (७९—३) इति । कृतिसाध्यत्वे विशेषणप्रक्षेपकरम् । तस्मात् कृतिसाध्यत्वे साध्यत्वमेव विशेषणं देयम् । न तु साधनत्वं, तस्य विजातीयत्वात् ।

अत्र शङ्कते—न चेति ((७९—४) । ज्ञानेच्छाकृतीनां समानविशेष्यकत्वात् यद्विशेष्यकं ज्ञानं तद्विशेष्यका इच्छा तद्विशेष्यिकैव कृतिः यथा कपालं घटसाधनम् इति कपालविशेष्यकं ज्ञानं तदनन्तरं कपालं घटवत्तया कृत्या साधयामि [इति] कपालविशेष्यका चिकीर्षा तदनन्तरं कपालविशेष्यका कृतिः कृतिसाध्येन साध्यं फलम् इष्टम् इति फलविशेष्यकज्ञानात् कथं साधनविशेष्यका प्रवृत्तिरित्यर्थः । किन्तु फलविशेष्यकैव प्रवृत्तिः स्यादित्यर्थः । साधनस्येति (७९—४) । ज्ञानेच्छाकृतीनां न समानविशेष्यत्वेन कार्यकारणभावः किन्तु समानविषयत्वेन । एवं च सति कृतिसाध्ययागरूपसाधनसाध्यः स्वर्ग इति ज्ञानात् प्रवर्त्तते । एतस्मिन् ज्ञाने तु साध्ये साधनस्य प्रकारतया विषयत्वेन फलविशेष्यकमपि ज्ञानं साधनविषयकं भवत्येव तेन फलविशेष्यकेन साधनविषयकेन साधनविशेष्यका प्रवृत्तिर्भवत्येवेत्यर्थः । तद्विषयत्वादिति (७९—५) । साधन[illegible]दित्यर्थः । विशेष्यत्वस्येति (७९--५) प्रवृत्तौ समानविषयत्वं ज्ञाने-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छयोस्तत्र न तु समानविशेष्यत्वं गौरवादित्यर्थः । तुष्यतु दुर्जन इतिन्यायेन समानविशेष्यत्वेन ज्ञानेच्छाकृतीनां भवतु कार्यकारणभावस्तथापि नानुपपत्तिरित्याह—**कृतीति** (७९—५) । **स्वर्गेति** (७९—६) । स्वर्गः साध्यं यस्य अत्र साधनविशेष्यकमेव ज्ञानं साधनविशेष्यकैव प्रवृत्तिरिति समानविशेष्यकत्वमपि ज्ञानप्रवृत्त्योः सुलभम् इतिकृत्वा ज्ञानप्रवृत्त्योः समानविशेष्यकत्वेन कार्यकारणभावः । समानविशेष्यकत्वम् एकविशेष्यकत्वमिति यावत् , यदेव ज्ञाने विशेष्यं तदेव प्रवृत्तौ विशेष्यं यदेव प्रवृत्तौ विशेष्यं तदेव ज्ञाने । कृतिसाध्यो यागः स्वर्गसाधक एतस्मिन् ज्ञाने यागे विशेष्ये कृतिसाध्यत्वं स्वर्गसाध्यत्वं च विशेषणद्वयम् ।

प्रवर्त्तकज्ञानखण्डनवादी दूषयति । **यथेति** (७९—७) । कृतिसाध्यो याग इत्यत्र साध्यत्वस्य समानजातीयतया स्वर्गनिष्ठयागसाध्यत्वमेवातिप्रसङ्गवारणार्थं प्रवेश्यते न तु स्वर्गसाधनत्वम्, साध्यत्वापेक्षया विजातीयत्वात् , इति तव प्राभाकरस्य साध्यत्वप्रवेशे साजात्यं साधकं तथा ममापि नैयायिकस्य कृतिसाध्यो याग इत्यत्र यागे कृतिसाध्यत्वं विशेषणं तेन कृतिसाध्यत्वेन विशेषणेन सह समानाधिकरणमेव [इति] अतिप्रसङ्गवारणार्थं स्वर्गसाधनत्वरूपं विशेषणं प्रवेशनीयम् । न तु स्वर्गनिष्ठयागसाध्यत्वं, यागनिष्ठेन कृतिसाध्यत्वेन स्वर्गनिष्ठयागसाध्यत्वस्य व्यधिकरणत्वात् । **कृतीति** (७९-७) । यागनिष्ठा या कृतिसाध्यता तद्रूपस्य प्रकारस्येत्यर्थः । **साधनत्वेति** (७९—८) । यागनिष्ठस्वर्गसाधनत्वमिति भावः ।

उपसंहरति—**तथा चेति** (७९—८) । साध्यसाधनज्ञानस्येति कोऽर्थः । कृतिसाध्यो यागः स्वर्गसाधनम् इति ज्ञानस्येत्यर्थः । **नत्विति** (७९—९) । मत्कृतिसाध्यस्य यागस्य स्वर्गः साध्य इति ज्ञानस्येत्यर्थः ।

ननु प्राभाकरो वदति—मम यागनिष्ठकृतिसाध्यत्वेन सजातीयं स्वर्गनिष्ठसाध्यत्वं व्यधिकरणमप्यतिप्रसङ्गभङ्गार्थं प्रवेशनीयमिति मम साजात्यं नियामकम् । तव यागनिष्ठेन कृतिसाध्यत्वेन समानाधिकरणं स्वर्गसाधनत्वं साध्यत्वेन विजातीयमपि अतिप्रसङ्गभङ्गार्थं प्रवेशनीयं साधनत्वप्रवेशे सामानाधिकरण्यं नियामकं तथाच मम साजात्यं नियामकं तव सामानाधिकरण्यं नियामकम् उभयोः पक्षयोर्नियामकाविशेषात् न तव समीहितसिद्धिरित्यत आह—**किञ्चेति** (७९—९) । यदि कृतिसाध्यत्वं विशेषणमुपजीव्यं ते तदाऽविशेषो भविष्यति । तदेव नाश्रीयते इत्याह—**अपि त्विति** (७९—१०) । कृतिः साधनं यस्येत्यर्थः । शेषाद्वेति कः । तथाच यागनिष्ठकृतिसाधनकत्वं यागनिष्ठं यत् स्वर्गसाधनत्वं तत् समानाधिकरणमपि भवति सजातीयमपि भवति इति मम नैयायिकस्य सामानाधिकरण्यसाजात्याभ्यां तव प्राभाकरस्य साजात्यमात्रात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधनत्वप्रवेशे विशेष इत्याह--**तथा चेति** (७९--११)। **अध्यवसायकर** (७९--११) इति निश्चयकर इति। ननु प्राभाकरो वक्ति ममापि कृतिसाध्यो यागः स्वर्गसाधकः। अत्र यागनिष्ठेन कृतिसाध्यत्वेन यागनिष्ठं स्वर्गसाधकत्वं समानाधिकरणमपि भवति सजातीयमपि भवति इति कृत्वा ममापि साजात्यसामानाधिकरण्याभ्यां च विशेषस्तुल्य इत्यत आह--**उभयत्रेति** (७९--११)। तव साध्यत्वे दत्तपदम्। मम नैयायिकस्य साधनत्वे दत्तपदम्। यथा तव मत्कृतिसाध्यो यागः स्वर्गसाधकः, मम मत्कृतिसाधनको यागः स्वर्गसाधनं, तव उभयत्र साध्यत्वप्रवेशान्मम उभयत्र साधनत्वप्रवेशान्नैकपक्षस्वीकार इत्यर्थः।

ननु प्राभाकरो वक्ति--तव नैयायिकस्य न समीहितसिद्धिरित्यत **आह--अत्र** **त्विति**। पूर्वपक्षिणो विनिगमनाविरहे न कापि क्षतिरित्यर्थः। इष्टसाधनताज्ञानं प्रवर्त्तकमिति नैयायिकमतं खण्डयति। **नन्वेवमिति** (७९--१३)। असाध्ये समुद्रतरणादाविति। **कृतीति** (७९--१४)। कृतिसाध्यत्वे सति इष्टसाधनत्वमित्यर्थः। पूर्वपक्षी वदति **नेति** (७९--१४)। **अन्येति** (७९--१४)। स्वकृत्यसाध्ये अन्यकृतिसाध्ये कारीर्यादौ कृतिसाध्यत्वे सति इष्टसाधनत्वात् कारीरीं कर्तुमसमर्थस्यापि प्रवृत्तिः स्यादित्यर्थः। अत्र शङ्कते **स्वकृतीति** (७९--१५)। तथाच स्वकृतिसाध्यत्वे सति इष्टसाधनत्वम्। कारीरीं कर्तुमसमर्थस्य कारीरी स्वकृतिसाध्यैव। **नेति**(७९--१५)। न कारीर्यामतिप्रसङ्ग इत्यर्थः। दूषयति **स्वकृतीति** (७९--१६)। स्वकृतिसाध्ये विषभक्षणादौ अन्येष्टसाधने स्वाऽनिष्टसाधने प्रवृत्तिप्रसङ्गात् इत्यर्थः। अत्र शङ्कते **इष्टत्वमिति** (७९--१६)। तथाच स्वकृतिसाध्यत्वे सति स्वेष्टसाधनत्वमिति स्वानिष्टसाधनम्, अन्येष्टसाधनं तु न स्वेष्टसाधनमित्यर्थः। दूषयति--**तथाभूतेति** (७९--१७)। तथा वाऽतीतभोजनस्य स्वकृतिसाध्यत्वे सति स्वेष्टसाधनत्वात् तत्र प्रवृत्तिप्रसङ्ग इत्यर्थः।

ननु विद्यमानत्वमपि विशेषणमित्यत आह--**तथाभूतेति** (७९-१७)। स्वर्गसाधनत्वकृतिसाध्यत्वयोरित्यर्थः। साध्यत्वं विद्यमानप्रागभावप्रतियोगित्वं, साधनत्वं विद्यमानप्रागभावाप्रतियोगित्वम्। तयोर्विरोधेनैकत्रावस्थातुमशक्यत्वात् इत्यर्थः। एतदेव विवृणोति--**नहीति** (७९--१८)। **उत्तरभावी**(७९--१८)ति विद्यमानप्रागभावप्रतियोगिपूर्वभावीति विद्यमानप्रागभावाप्रतियोगीत्यर्थः। **निरूपकेति** (७९--१९)। तथाच यत् यस्य साध्यं तत्तस्य साधनं न भवति। यथा घटः कपालस्य साध्यः कपालस्य साधनं च न भवति, एकनिरूप्यत्वेन साध्यत्वसाधनत्वयोर्विरोधात्। कपालस्य साध्यो जलाहरणस्य साधनमिति निरूपकभेदेनाविरोध इत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूषयति पूर्वेति (७९–१९) । निरूपकभेदेनाविरोधेऽपि साध्यतादशाया-मेकस्मिन् साधनत्वम् नास्ति, साधनतादशायां साध्यत्वं नास्तीत्येकस्मिन्नेककाला-वच्छेदेन साध्यत्वसाधनत्वयोर्विरोधात् पूर्वदोषापरिहार इत्यर्थः । साध्यत्वाऽनन्त-र्भावेन शङ्कते–स्वकृतीति(७९–१९) । अत्र ज्ञाने साध्यत्वं न विषय इतिकृत्वा साध्यत्वसाधनत्वयोर्न विरोध इति । **स्वकृतिव्यतिरेकेण यन्न सिध्यति स्वेष्ट-साधनं चेति ज्ञानात्** (७९–२०) प्रवृत्तिः । **नैतदिति** (७९–२०) । विरोधदोषो नास्ति । साध्यत्वसाधनत्वयोर्विरोधलक्षणो दोषो नास्तीत्यर्थः । **अल्प** (७९–२०) इति । मधुविषसंपृक्तान्नभोजनं तृप्तिरूपेष्टसाधनं भवति बह्वनिष्टं यन्मरणं तत्साधनं भोक्तुः कृतिव्यतिरेकेण न सिध्यति, तृप्तिरूपेष्टसाधनं भवति तत्र प्रवृत्तिः स्यादि-त्यर्थः ।

ननु बलवदनिष्टाऽननुबन्धित्वमिष्टे विशेषणं तथा च मधुविषसम्पृक्तान्नभोजन-स्येष्टसाधनत्वेऽपि बलवदनिष्टाननुबन्धीष्टसाधनत्वं नास्ति किन्तु मरणसाधनत्वात् इत्यरुचेराह–**किञ्चेति** (७९–२१) । **यदिति** (७९–२१) । यदिष्टं प्रति साधनं तदिष्टं किं विवक्षितमिति योजना । इष्टत्वमेव निर्वक्तुमशक्यमित्यर्थः । अत्र शङ्कते **वर्त्तमान** (७९–२१) इति । तथाच वर्त्तमानेच्छाविषयत्वम् असिद्धस्य वस्तुनः, न तु सिद्धस्य तेन असिद्धं यत् फलम् इष्टं तत्साधनताज्ञानात् तत्साधने प्रवृत्तिर्भ-विष्यतीत्यर्थः । दूषयति । **इच्छेति** (७९–२२) । इच्छाविषयम् इष्टं तत्साधनता-ज्ञाने इच्छा १ विषयः २ साधनं ३ त्रयाणाम् इष्टसाधनताज्ञानविषयसाधनयोर्ज्ञानमिव इच्छाज्ञानस्यापि [1]कारणत्वप्रसङ्गात् । कारणीभूतज्ञानविषयत्वस्य त्रिषु तुल्यत्वात् । अत्र गूढाभिसन्धिः शङ्कते । **इच्छेति** (७९–२२) । तथाच इच्छाविषयता सुखादौ वर्त्तते तस्या इच्छाविषयतायाः अवच्छेदकरूपं सुखत्वं तद्वत्त्वं सुखादौ वर्त्तते । प्रतीति-र्ज्ञानं । दूषयति **तत्त्वादिति** (७९–२३) । इच्छाविषयतावच्छेदकरूपवत्त्वमित्यत्र इच्छाया विशेषणत्वेन ज्ञानविषयत्वात् इच्छाज्ञानस्याऽपि कारणत्वं स्यादित्यर्थः । अभिप्रायमुद्घाटयति **इच्छेति** (७९–२३) । इच्छाया उपलक्षणत्वेन ज्ञानविषय-त्वनियमो नास्ति इतिकृत्वा इच्छाज्ञानं प्रवर्त्तकं न, उपलक्षणस्य क्रियान्वयनियमो नास्ति । यथा कुरुक्षेत्रे गतोऽत्र गमनान्वयि क्षेत्रमेव न तु कुरवः कुरूणामविद्य-मानानामपि क्षेत्रान्तराद्व्यावर्त्तकत्वमस्ति । तद्वद्विषये इच्छोपलक्षणम् उपलक्षणत्वादेव ज्ञानविषयत्वनियमो नास्तीति नेच्छाज्ञानं प्रवर्त्तकमित्यर्थः ।

१. यथा विषयसाधनयोर्ज्ञानं प्रवर्त्तकं तद्वदिच्छाज्ञानमपि प्रवर्त्तकं भविष्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूषयति **स्वर्गेति** (७९–२४)। स्वर्गादिको विषयः उपलक्ष्यः। तस्मिन् इच्छोपलक्षणम्। न च स्वर्गादावुपलक्ष्ये स्वर्गापवर्गसाधारणमुपलक्ष्यतावच्छेदकमनुगतमस्तीत्यर्थः। स्वर्गापवर्ग इत्यत्र भावपरो निर्देशस्तेन स्वर्गत्वस्यापवर्गत्वैकस्योपलक्ष्येषु स्वर्गापवर्गादिषु एकस्याभावेन अननुगमादित्यर्थः। **तच्चेति** (८०–१)। इष्टसाधनताज्ञानमित्यर्थः। यतो ज्ञानस्य प्रवृत्तिं प्रति या कारणता सा इच्छाद्वारैव। इष्टसाधनताज्ञानस्य इच्छाजनकत्वे दोषमाह—**व्यभिचारादिति** (८०–२)। व्यभिचारमेव विवृणोति **तथाहीति** (८०–३)। **तस्येति** (८०–३)। इष्टसाधनताज्ञानस्य इच्छामात्रं वा जन्यम् अथवा चिकीर्षा वेत्यर्थः। **जन्येति** (८०–३)। जन्या या इच्छा तस्या विशेषश्चिकीर्षारूपः। **उपायेति** (८०–४)। इष्टसाधनताज्ञानम्। **स्वर्ग** (८०–४) इति। स्वर्गभोगयोः स्वत एवेष्टरूपत्वेन इष्टसाधनत्वाभावात्। द्वितीयेऽपि व्यभिचारमाह—**स्वर्गादाविति** (८०–५)। कृतिसाध्यत्वप्रकारिका या इच्छा सा चिकीर्षा। सा च स्वर्गे भोगे च इष्टसाधनताज्ञानव्यतिरेकेणापि तिष्ठति। ननु कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणी इच्छा सा चिकीर्षा, स्वर्गादौ या कृत्या साधयितुमिच्छा सा यद्यपि कृतिसाध्यत्वप्रकारिका तथापि सा कृतिसाध्यक्रियाविषयिणीच्छा न भवति, कुतः? स्वर्गादीनां क्रियारूपत्वाभावात्। क्रिया हि स्वोपादानगोचरकृतिजन्या। न च स्वर्गाद्युपादानमात्मा, तद्गोचरा कृतिरस्ति व्यापकानां नित्यानां जन्यकृतिविषयत्वाभावादित्यरुचेराह—**किञ्चेति** (८०–७)। **इष्टेति** (८०–७)। नित्यानां सन्ध्यावन्दनादीनां इष्टाभावात्, किन्तु प्रत्यवायनिमित्तमात्रार्थत्वात्।

ननु नित्यादौ प्रत्यवायनिवृत्तिरेवेष्टं फलं तत्साधनत्वं भविष्यति इत्यरुचेराह—**न कलञ्जमिति** (८०–८)। कलञ्जं फलमित्येके। कलञ्जं दग्धमन्नमित्येके। कलञ्जं मांसमित्यपरे। न कलञ्जं भक्षयेदित्यत्र भक्षधातोरुपरि इत्प्रत्ययो लिङ्,तस्यार्थस्तन्मते नैयायिकमते इष्टसाधनत्वम्। अत्र च नञा कस्य निषेधः क्रियते? न कलञ्जभक्षणस्य तस्य सत्त्वात्। कलञ्जभक्षणं नास्तीति निषेधः कर्तुं न शक्यतेऽव्युत्पत्तेश्च प्रकृत्यर्थस्य प्रत्ययार्थान्वितत्वात्। तस्माद् विध्यर्थो यस्तन्मते नैयायिकमते इष्टसाधनत्वं तस्यैव निषेधः कर्त्तव्यः। **उपायतेति** (८०–८) इष्टसाधनत्वविधिपक्षे। अस्तु इष्टसाधनत्वमेव निषेध्यं को दोष इत्याह—**इष्टेति** (८०–९)। बाधं विवृणोति—**न हीति** (८०–९)। तथाच कलञ्जभक्षणस्य तृप्तिरूपेष्टसाधनत्वेन न नञा निषेधः कर्तुं शक्यते इत्यर्थः। **किञ्चिदिति** (८०–१०) कलञ्जभक्षणस्य तृप्तिरूपेष्टसाधनत्वादित्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र शङ्कते । **पर्युदासेति**–(८०–१०) । यथा असुरा अविद्या इत्यत्र पर्युदासनञा सुरविरोधिनो देवाः विद्याविरोधिनी अविद्या यथोपस्थाप्यते तद्वत् अनेनापि पर्युदासनञा न कलञ्जं भक्षयेदित्यादिना इष्टविरोधि अनिष्टं तत्साधनत्वं नरकपातादि बोध्यते इत्यर्थः । न कलञ्जं भक्षयेदिति पर्युदासनञ् एव न भवतीति । दूषयति--**नेति** (८०–११) । अत्र हेतुमाह–**असमस्तत्वादिति** (८०–११) असुरा अविद्येत्यत्र समस्तत्वात् स पर्युदासनञ्, अयं न कलञ्जम् इत्यादिको नञ् न समस्तः । पर्युदासं खण्डयित्वा निषेधरूपत्वे साधकमाह–**क्रियेति** (८०–११) न घटोऽस्तीत्यादिवत् क्रियान्वयित्वात् निषेधरूपः । अत्र शङ्कते–**न चेति** (८०–११) कलञ्जभक्षणस्य नरकसाधनत्वेन बलवदनिष्टाननुबन्धि यदिष्टं तत्साधनत्वं निषिध्यते यतः कलञ्जभक्षणात् तृप्तिरूपं यदिष्टं तद्बलवदनिष्टं यन्नरकरूपं तदनुबन्धि तत्सम्बन्धिजातमतो बलवदनिष्टाननुबन्धीष्टसाधनत्वं निषिध्यते । दूषयति–**भवेदिति** (८०–१२) । एवमर्थं विवृणोति **यदीति** (८०–१२) । इत्प्रत्ययस्य विधेस्त्वन्मते इष्टसाधनत्वमर्थः । न तु बलवदनिष्टाननुबन्धित्वं इत्प्रत्ययार्थः येन बलवदनिष्टाननुबन्धित्वस्य निषेधो भवेत् । मम प्राभाकरस्य कार्यत्वं विधिः, इष्टसाधनत्वं विधिरेव नेति न दोषः ।

ननु यदि नञा बलवदनिष्टाननुबन्धीष्टसाधनत्वस्य निषेधो न बोध्यते तदा कलञ्जभक्षणादेः कार्यत्वविधिपक्षे निरवकाशा प्रवृत्तिः स्यात्, कार्यत्वस्य तत्रापि विद्यमानत्वादित्यत आह–**किन्तु (किञ्चे)**ति (८०–१३) । तथाच कार्यताविधिपक्षे प्राभाकराणां बलवदनिष्टानुबन्धित्वप्रतिसन्धानं वर्त्तते तदेव प्रवृत्तिप्रतिबन्धकं तच्चाग्रे निरूपणीयमिति भावः । अत्र शङ्कते नैयायिकः । **नन्विति** (८०–१४) । एतावता इष्टसाधनत्वस्य विध्यर्थत्वखण्डनेन तव कार्यत्वं विध्यर्थो न सिद्धः । न च प्रतिबन्दी अदूषणमित्यत आह– **एतावदेवेति** (८०–१५) । मम यथा इष्टसाधनत्वं विध्यर्थो न भवति उक्तदोषात् कलञ्जभक्षणे तृप्तिरूपेष्टसाधनत्वस्य विद्यमानत्वात् तथा तव कार्यताविध्यर्थवादिनः कार्यत्वमपि विध्यर्थो न भवति उक्तदोषादित्येव ममापि साध्यं मम प्रतिबन्धेव साध्या । **प्रकृते** (८०–१५) इति । इष्टसाधनत्वविधिपक्षे प्रतिबन्धेव साध्या । अयमर्थः । यथा तव कार्यत्वमात्रं विधिः कलञ्जभक्षणादौ कार्यत्वस्य निषेधः कर्तुं न शक्यते इतिकृत्वा वक्ष्यमाणकार्यत्वविशेषस्य नञा निषेधः, स च विशेषः बलवदनिष्टानुबन्धित्वप्रतिसन्धाने सति तस्य कार्यताविशेषस्य निषेधः कर्तुं शक्यत एव तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ममापि नैयायिकस्य बलवदनिष्टानुबन्धित्वप्रतिसन्धानदशायाम् इष्टसाधनताविशेषस्य निषेधः कर्तुं शक्यत एव इत्यापाततः । प्राभाकरो वदति **कार्यतेति** (८०–१५) । मन्मते वक्ष्यमाणानुमानजन्यप्रवर्त्तकज्ञानविषयीभूतं यत् कार्यत्वं स एव विध्यर्थः । तस्य निषेधः कर्तुं शक्यत एव । त्वन्मते इष्टसाधनत्वमात्रं विध्यर्थः तस्य च निषेधः कर्तुं न शक्यत इति भावः । **अभिप्रायेति** (८०–१५) पूर्वोक्तयुक्तेरिति भावः । **चिकीर्षेति** (८०–१६) । जीवनयोनिप्रयत्नसाध्ये प्राणपञ्चकसञ्चारे कृतिसाध्यत्वलक्षणं कार्यत्वं वर्त्तते इति कृत्वा कार्यत्वज्ञानात् प्राणपञ्चकसञ्चारोद्देशेन प्राणवहनाडीषु प्रवृत्तिः स्यात् इत्यतिप्रसङ्गवारणार्थं चिकीर्षाजन्यत्वं विशेषणमित्यर्थः ।

अत्र शङ्कते । **न चेति** (८०–१७) । तथाच कृतिसाध्यत्वे चिकीर्षाविशेषणं तथाच विशेषणत्वेन कृतिसाध्यत्वरूपविशेष्यज्ञानवत् विशेषणरूपा या चिकीर्षा तद्ज्ञानस्यापि प्रवर्त्तकत्वं स्यादित्यर्थः । समाधत्ते । **तस्या** (८०–१७) इति । **कृतौ** चिकीर्षा न विशेषणं येन तद्ज्ञानस्य प्रवर्त्तकत्वं स्यात् । किन्तु कृतिविशेषे चिकीर्षा उपलक्षणम् । ननु कोऽसौ कृतिविशेष इत्यत आह– **तस्य चेति** (८०–१८) । कृतिविशेषस्य आख्यातुमशक्यत्वेऽपि अवश्यं स्वीकर्त्तव्यत्वात् । युक्तिमाह–**गुणेति** (८०–१८) । तथाच–गुण्यतिरिक्ता गुणा रूपादयो न सन्ति, द्रव्यातिरिक्ता जातिर्नास्ति इति गुणजात्यनङ्गीकारवादिनामपि अन्धेन द्रव्यं गृह्यते । नीलः पीत इति निर्णेतुं न शक्यते । इति भिन्नभिन्नप्रयोजनानुरोधात् नीलादयस्तेषामनुभवसिद्धाः । तथैव कृतिविशेषः सर्वत्र कृतिमात्रे चिकीर्षा न कारणं यत्र कृतिविशेषे चिकीर्षा कारणं सा एव कृतिः चिकीर्षया उपलक्ष्यते इत्यर्थः ।

विपक्षे बाधकमाह–**अन्यथेति** (८०–१९) । ननु प्रयत्नमात्र एव चिकीर्षा कारणमस्तु इत्यत आह–**प्रयत्नमात्र** (८०–२०) इति । जीवनयोनिप्रयत्ने चिकीर्षाया व्यभिचारात् । सुषुप्तौ श्वासानुश्वासप्रयत्ने चिकीर्षाया अभावात् । अयं व्यभिचारः । एवं सति गुणजात्यनङ्गीकारवादिनां चिकीर्षाकारणतया कृतिविशेषोऽनुभवसिद्धः किं पुनर्गुणजातिवादिनां कृतिविशेषोऽनुभवसिद्ध एव । **चरणेति** (८०–२०) युक्तिप्रसार एव नास्ति ।

उपसंहरति **तथा चेति** (८०–२१) । प्राभाकरमते । **तस्येति** (८०–२२) कृतिसाध्यत्वस्य । ननु किं लाघवमित्यत आह–**स्वर्गेति** (८०–२२) ।

---

१. गुणजात्यनङ्गीकारवादिनाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाच कृतिसाध्येष्टसाधनत्वं न स्वर्गापवर्गसाधारणम् । कुतः, स्वर्गादीनाम् इष्टसाधनत्वाभावात् । कृतिविशेषसाध्यत्वं तु स्वर्गापवर्गसाधारणमिति लाघवम् ।

अत्र शङ्कते । **न चेति** (८०—२३) । **श्रमेऽपीति** (८०—२३) । कृतिविशेषसाध्यत्वं श्रमेऽपि वर्त्तते । पाकानुकूलकृतिविशेषेण पाचकस्य श्रमोऽपि जायते न तु श्रमार्थमन्यः कृतिविशेषोऽपेक्ष्यते । समाधत्ते **श्रमस्येति** (८०—२३) । तथा च श्रमो न चिकीर्षाजन्यकृतित्वरूपेण कृतिविशेषसाध्यः । व्यभिचारमाह—**द्वेषेति** (८०—२४) । शत्रौ सर्पे वा । द्वेषप्रभवनिवृत्तिप्रयत्नादपि श्रमोऽपि जायते । अत एव पलायनादौ श्रमजन्यस्य स्वेदलक्षणस्य फलस्यानुभवसिद्धत्वात् । तथा च न श्रमेऽपि प्रवृत्तिप्रसङ्ग इति भावः । अत्र शङ्कते **न चेति** (८०—२४) । **अतीतभोजनादौ** भोजनत्वेन प्रवृत्तिप्रसङ्गः, अतीतभोजनत्वेन वा । आद्ये त्वाह **सामान्यत** (८०—२५) इति । **इष्टापादनादिति** (८०—२५) । अतीतभोजनादौ भोजनत्वेन रूपेण प्रवृत्तिर्वर्त्तत एवेति । अन्त्ये त्वाह—**समयेति** (८०—२५) । अतीतभोजने अतीतभोजनत्वेन न प्रवृत्तिः, अतीतत्वस्य कृतिसाध्यत्वविरोधित्वात् । **साध्यत्वेति** (८१—१) । कृतिसाध्यत्वाभावेनेत्यर्थः । **आपादकेति** (८१—१) । प्रवृत्तिरापाद्या । कृतिसाध्यत्वमापादकं तन्नास्तीत्यर्थः ।

शङ्कते **नन्वेवमिति** (८१—१) । यथा स्वर्गार्थी चिकीर्षाजन्यकृतिसाध्यताज्ञानाद्यागे प्रवर्त्तते एवं स्वर्गार्थिनो दण्डादावपि प्रवृत्तिः स्यात् । स्वर्गार्थिनो यथा यागश्चिकीर्षाजन्यकृतिसाध्य इति ज्ञानम् तथा दण्डोऽपि चिकीर्षाजन्यकृतिसाध्य इति ज्ञानं वर्त्तत एव, तत्रापि प्रवृत्तिः स्यादित्यर्थः । **अत** इति (८१—३) । दण्डे चिकीर्षाजन्यकृतिसाध्यत्वज्ञानमात्रादित्यर्थः । **तत्रेति** (८१—३) । दण्डे । **मैवमिति** (८१—३) । प्राभाकरोक्तिः । समाधत्ते प्राभाकरः । **स्वर्गेति** (८१—४) । तथा यागो मत्कृतिसाध्यः मत्कृतिं विनाऽसत्त्वे सति स्वर्गेष्टसाधनत्वात् इति स्वर्गेष्टसाधनतालिङ्गकम् यत् कृति—साध्यतानुमानं तत् प्रवर्त्तकम् । तदनुमानं दण्डादौ नास्ति, कुतः, दण्डस्य स्वर्गरूपेष्टसाधनत्वाभावात् । न दण्डादौ प्रवृत्तिप्रसङ्गः । शङ्कते **न चेति** (८१—५) । तथा च इष्टसाधनताज्ञानेन कृतिसाध्यत्वज्ञानं तस्मात् प्रवृत्तिः । लाघवात् कृतिसाध्यत्वज्ञानजनकं यदिष्टसाधनताज्ञानं तस्मादेव कुतो न प्रवृत्तिरित्यर्थः । **तद्धेतोरिति** (८१—५) । कृतिसाध्यत्वज्ञानहेतोरिष्टसाधनताज्ञानादेवेत्यर्थः । समाधत्ते **इष्टेति** (८१—५) । प्राभाकरो वक्ति । नैयायिकमते इष्टसाधनताज्ञानमात्रं न प्रवर्त्तकम् । किन्तु स्वान्तर्भावेन अनुमितिरूपम् । तथा च यदिष्टसाधनत्वानुमितिजनकं

ज्ञानं तदेव प्रवर्त्तकमस्तीत्यर्थः । **अस्येति** (८१-६) । **तद्धेतोरेवेति** (८१-५) न्यायस्य । एवं च सति स्वेष्टसाधनतालिङ्गकचिकीर्षाजन्यकृतिसाध्यत्वज्ञानं दण्डादौ नास्तीत्युपसंहरति-**न चेति** (८१-७) । **तथाभूतमिति** (८१-७) प्रमारूपमित्यर्थः ।

ननु भ्रमरूपं दण्डादौ तादृशं स्वर्गेष्टसाधनतालिङ्गकचिकीर्षाजन्यकृतिसाध्यत्वज्ञानं भविष्यतीति प्रवृत्तिप्रसङ्ग इत्यत आह-**यदेति** (८१-७) । प्रकारान्तरमाह **स्वर्गार्थीति** (८१-८) । तादृशं प्रमारूपमेव ज्ञानं संवादिप्रवृत्तौ प्रवर्त्तकमिति । दण्डादौ स्वर्गार्थिनो न संवादिप्रवृत्तिः । प्राभाकरमतं खण्डयति नैयायिकः । **तदर्थीति** (८१-१०) । स्वर्गार्थिचिकीर्षाजन्यकृतित्वेन रूपेण कृतिसाध्यत्वं स्वर्गसाधने यागादावपि नास्ति । यतः स्वर्गादिचिकीर्षायां पटादिचिकीर्षाभ्रमे सति तत्र स्वर्गार्थिचिकीर्षाजन्यकृतित्वेन रूपेण कृतिसाध्यताज्ञानाभावात् तादृशपटादिचिकीर्षाजन्यकृतिसाध्यताज्ञानात् यागे प्रवृत्त्या यागोत्पत्तिर्न स्यात् । ननु अन्यचिकीर्षायां अन्यचिकीर्षाभ्रमे तादृशचिकीर्षाजन्यकृतिसाध्यताज्ञानात् कृत्युत्पत्तिर्नास्त्येवेत्यत आह-**अन्यथेति** (८१-११) । दण्डोत्पत्त्यनुकूला या कृतिस्तज्जनिका या चिकीर्षा तस्यां पटादिचिकीर्षाभ्रमे तादृशपटादिचिकीर्षाकृतिसाध्यताज्ञानात् दण्डाद्युत्पत्तिर्न स्यात् । भ्रमेऽपि सति दण्डाद्युत्पत्तिस्तु जायत एव । शङ्कते **न चेति** (८१-१२) । दण्डादिकृतिजनकचिकीर्षायां पटादिचिकीर्षाभ्रमे सति पटादिचिकीर्षाजन्यकृतिसाध्यताज्ञानात् या दण्डानुकूला कृतिः तया कृत्या दण्डोत्पत्तिर्नास्त्येवेतीष्टापत्तिः ।

समाधत्ते-**तथाभूतेति** (८१-१२) दण्डानुकूलकृतिजनकचिकीर्षायां पटादिचिकीर्षाभ्रमे सति तया कृत्या दण्डोत्पत्तिर्नास्तीत्यनुभवविरुद्धम् । अन्यथा वह्निविशेष्यकवह्नित्वप्रकारके ज्ञाने पटज्ञानत्वभ्रमे जाते सति वह्निज्ञानात् वह्न्यर्थी न प्रवर्त्तेत । स्वर्गार्थिचिकीर्षाजन्यकृतित्वेन रूपेण कृतिसाध्यताज्ञानं चेत् प्रवर्त्तकं तदा स्वर्गार्थिचिकीर्षाजन्यकृतिसाध्यत्वप्रकारकं ज्ञानं यद् वर्त्तते प्रमाभ्रमसाधारणम् उपायानुपायसाधारणं तद्व्यतिरेकेणापि यागानुकूलकृतिजनकचिकीर्षायां पटादिचिकीर्षाभ्रमे स्वर्गार्थिचिकीर्षाजन्यकृतित्वेन रूपेण कृतिसाध्यताज्ञानं नास्ति । तया कृत्या तु यागोत्पत्तिस्तु जायते । तत्र या यागकृतिस्तस्यां तद्ज्ञानस्य व्यभिचारेण कारणत्वमेव नास्तीति पूर्वमुक्तम् । तन्न सम्भवति । अन्यचिकीर्षायाम् अन्यचिकीर्षाभ्रम एव नास्ति । यथा घटत्वेन रूपेण घटचिकीर्षात्वे ज्ञाते पटचिकीर्षात्वभ्रमः किं सम्भवति । अपि तु न, विशेषदर्शनस्य भ्रमविरोधित्वात् , इत्यत आह-**किं चेति**

१. भ्रमावस्थायाम् इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८१-१३)। एवं सति यत् त्वया प्राभाकरेण प्रमाभ्रमसाधारणं तत्तदर्थिचिकीर्षाजन्यकृतित्वेन रूपेण कृतिसाध्यताज्ञानम् उपायानुपायसाधारणं प्रवर्त्तकं यदि तदित्यर्थः। **अनुपायते**ति (८१-१४)। मण्डलीकरणं स्वर्गानुपाय इति मण्डलीकरणे स्वर्गानुपायताप्रतिसन्धानदशायां स्वर्गार्थिचिकीर्षाजन्यकृतित्वरूपेण कृतिसाध्यताज्ञानसम्भवात् तत्रापि मण्डलीकरणे प्रवृत्तिप्रसङ्ग इत्यर्थः। अत्र शङ्कते **न चे**ति (८१-१५)। तथा च प्रवर्त्तकज्ञानसम्भवेऽपि प्रतिबन्धकस्यानुपायताज्ञानस्य सत्त्वात न प्रवृत्तिरित्यर्थः। दूषयति। **एवं सती**ति (८१-१६)।

तथाच प्रतिबन्धकाभावकारणत्वापेक्षया लघुभूतं स्वर्गोपायताज्ञानमेव कारणमस्त्वित्यर्थः। दूषणान्तरमाह—**एवमि**ति (८१-१८)। तथाच मण्डलीकरणं कुर्वीत अत्र इत्प्रत्ययस्यार्थः विध्यर्थः। स्वर्गार्थिचिकीर्षाजन्यकृतित्वेन रूपेण कृतिसाध्यत्वज्ञानात् कृतेर्जायमानत्वात् स्वर्गार्थिचिकीर्षाजन्यकृतिसाध्यत्वं मण्डलीकरणे बाधितं नास्तीति कृत्वा मण्डलीकरणं कुर्वीतेति वाक्यं प्रमाणं स्यादित्यर्थः। **तस्ये**ति (८१-१९)। स्वर्गार्थिचिकीर्षाजन्यकृतिसाध्यत्वस्येत्यर्थः। **तत्रे**ति। (८१-१९)। मण्डलीकरणादौ। **तद्बोधकस्ये**ति (८१-१९)। स्वर्गसाधनताबोधकस्य। शङ्कते—**न चे**ति (८१-२०)। **तत्रे**ति (८१-२०)। मण्डलीकरणादौ दूषयति। **असाधनेऽपी**ति (८१-२१)। यतो**ऽनुपाये**ति। उपाये यादृशी चिकीर्षा तादृशी चिकीर्षा जायत एव। तथाच मण्डलीकरणादावपि स्वर्गार्थिचिकीर्षाजन्यकृतिसाध्यत्वमबाधितमित्यर्थः। न च मण्डलीकरणं स्वर्गस्यानुपाय इति ज्ञाने विद्यमाने या मण्डलीकरणानुकूला कृतिस्तज्जनिका या चिकीर्षा तस्यां स्वर्गार्थिचिकीर्षात्वं नास्तीति विशेषदर्शने विद्यमाने कथमनुपाये तादृशी चिकीर्षा, [1]विशेषदर्शनस्य प्रतिबन्धकत्वादिति वाच्यं, विशेषदर्शनस्यासार्वत्रिकत्वात्। न हि विशेषदर्शनं सर्वत्र वर्त्तते येन भ्रमो न स्यात्।

अत्र शङ्कते। **न चे**ति (८१-२२)। तथाच न केवलं कृतिसाध्यत्वज्ञानमात्रं प्रवर्त्तकम्। किन्तु मत्कृतिं विना असत्त्वे, सत्त्वे सति मम इष्टविशेषसाधनत्वात्। इतीष्टसाधनतालिङ्गकं यदनुमानं कृतिसाध्यत्वविषयकं तत्प्रवर्त्तकम्। मण्डलीकरणादौ अनुपायत्वज्ञानदशायां स्वर्गेष्टसाधनतालिङ्गकं मत्कृतिसाध्यत्वं ज्ञानमेव नास्ति।

दूषयति नैयायिकः। **व्यभिचारेणे**ति (८१-२२)। यागो मत्कृतिसाध्यः मदिष्टसाधनत्वात् इत्यत्र मदिष्टसाधनत्वं, कृत्यसाध्ये समुद्रतरणादौ मदिष्टसाधनत्वं

१. Ms repeats this phrase.

वर्त्तते मत्कृतिसाध्यत्वं नास्तीति व्यभिचारः । न च मत्कृतिं विना असत्त्वे सतीति विशेषणं दातव्यम् । समुद्रतरणं तु मत्कृतिं विनाऽपि दिव्यदेहानामपि सत् । एवं सति पाकादावपि अनुमानं न स्यात् यतो मत्कृतिं विनाऽन्यस्य पाकस्य सत्त्वात् । न च मत्कृतिं विना ममाऽसत्त्वे सतीति विशेषणं तर्हि समुद्रतरणादौ व्यभिचारः तदवस्थ एव । मत्कृतिं विना मम समुद्रतरणमसदेव । न च समुद्रतरणं मत्कृतिं विनाऽसत् किन्तु अयोग्यत्वात् इत्यरुचेराह—**न चेति** (८१–२३)। इदम् इष्टसाधनतालिङ्गकं कार्यतानुमानं यागादौ तदा स्यात् यदीष्टसाधनत्वं यागादौ ज्ञायेत । न च तदिष्टसाधनत्वं लिङ्प्रत्ययस्य वाच्यं येन इष्टसाधनत्वालाभः स्यात् । ननु प्रकारान्तरेण केनचिल्लिङ्गेन इष्टसाधनत्वमनुमाय कार्यतानुमानं सम्भवत्येव यागादावित्यत आह—**यथाकथञ्चिदिति** (८१–२४) । तथा च यदीष्टसाधनत्वं कृतिसाध्यत्वानुमाने लिङ्गं तदा उपजीव्यत्वादिष्टसाधनत्वमेव विध्यर्थोऽस्त्वित्यर्थः । **तदिति** (८१–२५) इष्टसाधनताज्ञानं **तस्येति** (८१–२५) । इष्टसाधनताज्ञानस्य कृतिसाध्यत्वस्यानुमापकत्वेनोपजीव्यत्वात् । ननु कार्यताज्ञानमात्रमेव प्रवर्त्तकमस्तु किमिष्टसाधनतालिङ्गककार्यत्वानुमानेनेत्यत आह—**न हीति** (८१–२५) ।

इष्टसाधनत्वस्य विध्यर्थत्वे लाघवमाह—**इष्टसाधनतेति** (८२–१) । तथाच मत्कृतिं विना असत्त्वे सत्येतस्य अथ च मदिष्टसाधनत्वस्य मत्कृतिसाध्यत्वस्य च एतेषां त्रयाणां ज्ञानं तव प्राभाकरस्यापेक्षितम् । मम नैयायिकस्य मत्कृतिसाध्यत्वस्य मदिष्टसाधनत्वस्येति द्वयोरेव ज्ञानस्य प्रवर्त्तकत्वम् । इष्टसाधनत्वस्य विधित्वपक्षे युक्तिमाह—**अत एवेति** (८२–३) । यदीष्टसाधनत्वं विधिस्तदा अनाप्तोक्त्या मण्डलीकरणादौ स्वर्गसाधनत्वभ्रमानन्तरं प्रवर्त्तमानोऽपि मण्डलीकरणं न स्वर्गसाधनमिति विशेषदर्शनानन्तरं निवर्त्तते । एवं सति यद्ज्ञानात् प्रवर्त्तते यदभावज्ञानान्निवर्त्तते तस्यैव विधित्वमिति भावः । **न प्रवर्त्तते** (८२–५) इति । मण्डलीकरणादौ ।

उपसंहरति **तस्मादिति** (८२–५) । **स्वतोऽसुन्दरो** (८२–५) इति । स्वतः सुन्दरे सुखं दुःखाभावश्च यतो निरुपाधीच्छाविषयत्वात् तद्भिन्नं सुखदुःखाभावभिन्नं यावत् साक्षात् परम्परया वा सुखसाधनं वा दुःखाभावसाधनं वा तत् सर्वं स्वतोऽसुन्दरमेव सोपाधीच्छाविषयत्वात् । सुखेच्छया हि सुखसाधने प्रवर्त्तते । एवं दुःखाभावेच्छया हि दुःखासाधने प्रवर्त्तते । **उपायेति** (८२–६) । उपायार्थी यागकर्त्ता स कृतिसाध्यताज्ञानमात्रात् चिकीर्षतीति प्राभाकराणां मनोरथमात्रमित्यर्थः । यतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इष्टसाधनताभ्रमे सति प्रवर्त्तते, तदभावज्ञाने सति निवर्त्तते इत्यावश्यकत्वात् इष्टसाधनताज्ञाने सत्येव चिकीर्षतीति तदेवेष्टसाधनताज्ञानमेवोपजीव्यमतएवोपजीव्यत्वात् तदेवाह–तदिति (८२–७)। तस्येष्टसाधनताज्ञानस्योपजीवने । तदिति (८२–७) इष्टसाधनत्वज्ञानमेव प्रवर्त्तकमित्यर्थः ।

इष्टसाधनत्वविधिपक्षे शङ्कते । **साधनतेति**(८२–८) इष्टसाधनताविधिपक्षे इत्यर्थः । **साधनतेति**(८२–९) इष्टसाधनतालाभात् । **अनेनेति**(८२–९) । अनेनार्थवादवाक्येन तरतीत्यादिना । यजते, अयं तु न लिङ् किन्तु लट् । अनेन लटा इष्टसाधनत्वं न लभ्यते । किन्तु अर्थवादवाक्येन अनुमानेन इष्टसाधनत्वलाभः । इष्टसाधनत्वानुमानं तु यथा इदम् अर्थवादवाक्यम् इष्टसाधकविध्यैकवाक्यतापन्नम्, अर्थवादवाक्यत्वात् । वायव्यं श्वेत इत्यर्थवादवाक्यवत् । समाधत्ते **अविनेति** (८२–१०) । तथाच तदतिमृत्युमनेन मृत्युतरणरूपेष्टस्य यत्तच्छब्दाभ्यां सिद्धार्थवाक्येन बोधनात् । न च प्रवर्त्तकेष्टसाधनत्वबोधकविधिं विना तरतीत्यादिसिद्धार्थवाक्यात् प्रवृत्तिरिति प्रवृत्त्यर्थं यत्र यत्र अर्थवादवाक्यं तत्र तत्र विधिसमभिव्याहार इति अविनाभावबलेन इष्टसाधनत्वबोधकविध्यनुमानम्, अर्थवादवाक्यस्य विधिव्याप्यत्वात् ।

अत एवाह—**व्यापकबाधेनेति**(८२–१०) । व्यापको विधिश्चेन्नास्ति तदा व्यापकविध्यभावे व्याप्यस्याऽर्थवादवाक्यस्यार्थवादवाक्यरूपत्वमेव न स्यादिति अर्थवादवाक्यव्यापकविधिकल्पनम् । अयमर्थः । नहीष्टसाधनत्वमर्थवादवाक्याल्लब्धं नास्ति इति न हि । किन्तु प्रवृत्त्यर्थं व्याप्तिबलेन विधिकल्पनमित्येकः पक्षः । अथवा कथमेतस्यार्थवादवाक्यस्यार्थवादरूपत्वं यावान् अर्थवादो विधिव्याप्यः । विधिरूपव्यापकाभावे व्याप्यत्वं न स्यादिति व्यापकबाधे व्याप्यबाधशङ्कानिराकरणार्थं तद्विधिकल्पनमिति द्वितीयः पक्षः । **न त्विति** (८२–११) । साधनताशब्देन इष्टसाधनतालाभार्थं विधिकल्पनं नास्ति । किन्तु प्रवृत्त्यर्थं विधिकल्पनम् ।

अत्र प्राभाकरः शङ्कते **नन्विति**(८२–१२) ज्ञाननिष्ठा या इच्छात्वावच्छिन्नकार्यताप्रतियोगिककारणता तस्याः किमवच्छेदकमित्यन्वयः । समाधत्ते **अनुगतमिति** (८२–१३) । कारणतावच्छेदकमनुगतं नास्त्येव । यतः सुखज्ञानादपि इच्छा जायते, दुःखाभावज्ञानादपि इच्छा जायते, इष्टोपायत्वज्ञानादपीच्छा जायते । तत्र ज्ञाननिष्ठमनुगतं कारणत्वं नास्तीत्यर्थः । अत्र शङ्कते प्राभाकरः । **तर्हीति**(८२–१३) अनुगतकारणतावच्छेदकग्रहनियमः । अनुगतं कारणतावच्छेदकं ज्ञाननिष्ठं नास्त्येवेत्यर्थः । समाधत्ते नैयायिकः । **सुख**(८२–१४) इति । अनुगतकारणताग्रहे

१. तरतीत्यादिना इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुगतकारणतावच्छेदकग्रहनियमो नास्ति । यथा वह्नित्वावच्छिन्नकार्यतानिरूपित-कारणताया अनुगतत्वेऽपि अनुगतकारणतावच्छेदकग्रहनियमो नास्ति। यथा तृणे तृणत्वं पर्णे पर्णत्वम् इत्यादि । तद्वदेव इच्छात्वावच्छिन्नकार्यतानिरूपितकारणता सुखज्ञाने तत्र सुखत्वप्रकारकज्ञानत्वम् एवम् इच्छात्वावच्छिन्नकार्यतानिरूपितकार-णता दुःखाभावज्ञानेऽपि तिष्ठति । तत्र च दुःखाभावत्वप्रकारकज्ञानत्वम् । एवं इच्छात्वावच्छिन्नकार्यतानिरूपितकारणता इष्टसाधनताज्ञानेऽपि तिष्ठति । तत्र इष्ट-साधनताज्ञाने इष्टसाधनत्वप्रकारकज्ञानत्वं कारणतावच्छेदकं नैकमनुगतम् । अत्रानु-रूपं दृष्टान्तमाह—**गोमयेति** (८२–१५) । यथा वृश्चिकत्वावच्छिन्नकार्यताप्रति-योगिककारणतावच्छेदकं वृश्चिके गोमये च नैकं यतो वृश्चिकादपि वृश्चिकः गोमयादपि वृश्चिकः । अत एव चक्रमर्दनशाकः वृष्टेरपि जायते बीजादपि च जायते। तत्र नैकं कारणतावच्छेदकमिति तद्वदत्रापि[1] द्रष्टव्यम् । न केवलमिष्टसाधनत्ववादि-मते एवेदं बाधकमपि तु कार्यवादिनोऽप्येतद् बाधकमित्याह—**अन्यथेति** (८२–१६) । इच्छाजनकतावच्छेदकं नैकम् इदं चेन्नोच्यत इत्यर्थः । एतदेव विवृ-णोति । **चिकीर्षेति** (८२–१६) । न हि चिकीर्षाजन्यकृतिविशेषसाध्यताज्ञानत्वेन इच्छात्वावच्छिन्नं प्रति जनकतेत्यर्थः । व्यभिचारमाह—**असाध्येऽपीति** (८२–१७) । यत्र च कृत्यसाध्ये तक्षकचूडारत्नादौ समुद्रतरणे चिकीर्षाजन्यकृतिसाध्यताज्ञानं नास्ति तत्रापीच्छोत्पत्तेः । यत्र च कृतिसाध्यताज्ञानमपि नास्ति तत्रापि केवलं सुख-त्वेन रूपेण सुखज्ञानात् दुःखाभावत्वेन रूपेण दुःखाभावज्ञानात् इच्छोत्पत्तेः स्फुट एव व्यभिचार इत्याह । **कृतीति** (८२–१८) । **अप्रतीति** (८२–१८) । कृति-साध्यताज्ञानाभावेऽपीत्यर्थः ।

अत्र पूर्वपक्षी शङ्कते—**हितेति** (८२–२०) । इष्टसाधनत्वविध्यर्थवादिनो न कलञ्जमित्यत्र प्रतिषेधनञा कलञ्जभक्षणस्य हितोपायत्वम् इष्टसाधनत्वं न निषेध्यते । कुत इत्यत आह—**बाधादिति** (८२–२१) । यतः कलञ्जभक्षणस्य तृप्तिरूपेष्ट-साधनत्वात् तन्निषेधो न सम्भवतीत्युक्तत्वात् । **नापीति** (८२–२१) । न कल-ञ्जं भक्षयेदित्यत्र बलवदनिष्टाननुबन्धित्वं न निषिध्यते यतः इष्टसाधनताज्ञानस्य प्रवर्त्तकत्वेन इष्टसाधनत्वमेव विधिप्रत्ययेनोत्थाप्यम् , न च बलवदनिष्टाननुबन्धित्वज्ञानं प्रवर्त्तकमिति बलवदनिष्टाननुबन्धित्वमपि विधिप्रत्ययानुत्थाप्यम् । **तद्ज्ञानस्येति** (८२–२२) । बलवदनिष्टाननुबन्धित्वज्ञानस्येत्यर्थः । **तस्येति** (८२–२२) बलवद-

१. इच्छात्वावच्छिन्नकार्यतानिरूपितकारणतायाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निष्टानानुबन्धित्वस्य । ननु यथाकथञ्चित् उपस्थितस्य बलवदनिष्टाननुबन्धित्वस्य नञा निषेधोऽस्तु इत्यत आह—**तदिति** । विधिप्रत्ययोपस्थितेनैव निषेधान्वयः ।

अत्र नैयायिकः शङ्कते—**न चेति** (८२–२३) । तथाच परदारगमनादौ बलवदनिष्टानुबन्धित्वज्ञाने विद्यमानेऽपि शिष्टानां प्रवृत्तिर्नास्ति इतिकृत्वा बलवदनिष्टाननुबन्धित्वं ममाप्यनन्यगत्या विध्यर्थः । तेन सह नञा निषेधोऽस्तीत्यर्थः । दूषयति **तत्प्रतीति** (८२–२४) । न बलवदनिष्टाननुबन्धित्वं विध्यर्थः किन्तु इष्टसाधनत्वमात्रम् । परदारगमनादौ इष्टसाधनत्वज्ञाने प्रवर्त्तके विद्यमानेऽपि न प्रवृत्तिः । कुतः । बलवदनिष्टानुबन्धित्वज्ञानस्य प्रतिबन्धकस्य विद्यमानत्वादिति पूर्वमेवोक्तत्वात् । न कलञ्जमित्यत्र नञो निषेधरूपत्वाभावेऽपि पर्युदासत्वं भविष्यतीत्याशङ्कते । **न चेति**(८२–२४) । निषेधस्य क्रियान्वयेऽपि पर्युदासस्य क्रियान्वयो नास्तीति पर्युदासेनाऽनिष्टसाधनत्वरूपोऽर्थो लभ्यत इत्यर्थः ।

अत्रोदाहरणमाह—**यजतिष्विति** (८३–१) । यथा यजतिषु यजामह इति शब्दः कर्त्तव्यः । नानुयाजेष्विति । अनुयाजेषु यजतिभिन्नेषु यागेषु यजामहशब्दो न कर्त्तव्य इति निषेधो न सम्भवति । कुतः वाक्यद्वयं स्यात् ? यथा यजतिषु यजामहशब्दः कर्त्तव्य अयमेको वाक्यार्थः, अनुयाजेषु यजामहशब्दो न कर्त्तव्यः इति द्वितीयो वाक्यार्थः इति वाक्यभेदादथ च यजतिषु यजामहशब्दः प्राप्त एव वर्त्तते विधायकवाक्यात् तथाच प्राप्तानुवादः स्यादित्येकवाक्यत्वरक्षणार्थमनन्यगत्या अयं नञ् पर्युदास उच्यते । तथा चानुयाजव्यतिरिक्तेष्वित्यर्थो लभ्यते । तथा चायं वाक्यार्थः । यजतिषु ये यजामहशब्दं कुर्वन्तीत्यनूद्य अनुयाजव्यतिरिक्तेष्विति विधीयते तथाच सति एकं वाक्यं सम्भवत्येकवाक्यत्वे हि वाक्यभेदो हि दूषणमिति । **नानुयाजेष्विति** (८३–१) अयं पर्युदासनञ् तद्वदयं न कलञ्जं भक्षयेदित्यत्राप्ययं नञ् पर्युदासः । तेन पर्युदासनञा इष्टसाधनत्वविरोधि बलवदनिष्टसाधनत्वं ज्ञाप्यते । एतदेवाह—**तथात्राऽपीति** (८३–२) । दूषयति **वाक्येति** (८३–३) । नानुयाजेष्वित्यत्र वाक्यभेदभयात् क्रियान्वयाभावाच्च नानुयाजेष्वित्यत्र नञः पर्युदासत्वम् । **गत्यन्तरेति** (८३–३) । नञः पर्युदासत्वेन विना अन्या गतिर्नास्ति । **तत्रेति** (८३–३) नानुयाजेष्विति । **अत्रेति** (८३–४) । न कलञ्जं भक्षयेदित्यत्र तदभावादिति । नञो निषेधरूपत्वे वाक्यभेदाभावात् क्रियान्वयित्वाच्च निषेधरूपत्वेनाप्युपपत्तेर्न पर्युदासत्वं, तस्मात् इष्टसाधनत्वविधिपक्षे कलञ्जभक्षणादौ विध्यर्थप्रतिषेधानुपपत्तेः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाधत्ते **बलवदिति** (८३–४)। न कलञ्जं भक्षयेदित्यत्र इष्टसाधनत्वज्ञाने विद्यमानेऽपि प्रवृत्तिर्न जायते। तत्र प्राभाकरमते बलवदनिष्टानुबन्धित्वज्ञानं प्रवृत्तौ प्रतिबन्धकम्। तथाच बलवदनिष्टानुबन्धित्वज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वेऽपि। **तदभावस्येति** (८३–४)। बलवदनिष्टानुबन्धित्वज्ञानाभावस्य कारणत्वं वक्तव्यमेव। एवं सति प्रवृत्तौ बलवदनिष्टानुबन्धित्वज्ञानाभावो वा कारणं किं वा बलवदनिष्टाननुबन्धीष्टसाधनत्वज्ञानं वा प्रवर्त्तकं तत्र क्लृप्तेष्टसाधनत्वज्ञानरूपे कारणे कारणतावच्छेदकं विषयतया बलवदनिष्टाननुबन्धित्वमेव वक्तव्यम्। **तदभावेति** (८३–५)। बलवदनिष्टानुबन्धित्वज्ञानाभावः। तथाच बलवदनिष्टानुबन्धित्वज्ञानाभावबलवदनिष्टाननुबन्धित्वज्ञानयोर्विनिगमनाभावेन उभयोः कारणत्वे प्रसक्ते यस्यैव कारणतायां लाघवं तदेव कारणं क्लृप्तेष्टसाधनत्वज्ञानरूपे कारणे विषयतया बलवदनिष्टाननुबन्धित्वमेव कारणतावच्छेदकं कल्पनीयम्। कारणान्तरकल्पनापेक्षया क्लृप्तकारणतायामवच्छेदककल्पनैव लघीयसी। **एवमिति** (८३–७)। तथाच क्लृप्तेष्टसाधनताज्ञानकारणतायां विषयतया बलवदनिष्टाननुबन्धित्वमेवावच्छेदकमित्यर्थः। तथाच बलवदनिष्टाननुबन्धीष्टसाधनत्वज्ञानस्य प्रवर्त्तकत्वे सिद्धे यदेव प्रवर्त्तकज्ञानविषयीभूतं तदेव विध्यर्थः।

प्रकृतमुपसंहरति। **तथाचेति** (८३–८)। विधिप्रत्ययस्य बलवदनिष्टाननुबन्धीष्टसाधनत्वं वाच्यम्। एवं सति न कलञ्जं भक्षयेदिति लिङ्प्रत्ययेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे उपस्थापिते इष्टसाधनत्वविशेषणीभूतं यद्बलवदनिष्टाननुबन्धित्वं तस्यैव निषेधो नञा बोध्यते। यद्यपि पदार्थः पदार्थेन विशेष्येण सहान्वेति न तु विशेषणेन निराकाङ्क्षत्वात् तथापि अनन्यगत्या क्वचिद्विशेषणेनापि साकाङ्क्षत्वम्। अत एवाह—**अनिच्छयाऽपीति** (८३–९) विशेषणे नञो यद्यप्याकाङ्क्षा नास्ति तथाच यत्र विशेष्ये बाधस्तत्र विशेषणेन सहान्वयः अत एव सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे इति। केवलम् इष्टसाधनत्वविध्यर्थवादिनामेवेदम् इति न हि किन्तु कार्यतावादिनोऽपीत्याह—**अन्यथेति** (८३–९)। कार्यताविध्यर्थवादिना। तामेवानुपपत्तिमाह—**न हीति** (८३–१०)। यथा कलञ्जभक्षणस्य तृप्तिरूपेष्टसाधनत्वात् तन्निषेधो न सम्भवति तथाच कलञ्जभक्षणस्य चिकीर्षाजन्यकृतिसाध्यत्वादपि चिकीर्षाजन्यकृतिसाध्यत्वनिषेधो न सम्भवति। **तस्याऽपीति** (८३–१०)। कार्यताविधिवादिनोऽपि। **बाधादिति** (८३–११)। कलञ्जभक्षणे चिकीर्षाजन्यकृतिसाध्यत्वं वर्त्तते चिकीर्षाजन्यकृतिसाध्यत्वाभावो नास्तीति बाधः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नापीति** (८३-११) । निवृत्तिनियोगो निवृत्त्यपूर्वम् इत्येकम् अथवा यागविषयकं कार्यं प्रवृत्त्यपूर्वम् इति द्वितीयं तथा च कलञ्जभक्षणाभावविषयकं कार्यमिति निवृत्त्यपूर्वं तथाच नञा कलञ्जभक्षणादौ निवृत्त्यपूर्वमेव बोध्यते । दूषयति **फलाभावेनेति** (८३-१२) । निवृत्त्यपूर्वं हि न स्वतः फलरूपं सुखदुःखाभावानात्मकत्वात् । नापि सुखसाधनं वा दुःखाभावसाधनं वा । पैण्डत्वादेव निष्प्रयोजनकेऽपूर्वे प्रमाणाभावात् । **नापीति**(८३-१२) । न कलञ्जं भक्षयेदित्यत्र नञा कलञ्जभक्षणप्रागभाव एव साध्यत्वेन बोध्यते इति नञोऽर्थवत्त्वं दूषयति । **तस्येति** (८३-१३) । कलञ्जभक्षणप्रागभावस्य पूर्वावधिशून्यत्वेनाऽसाध्यत्वात् ।

अत्राशङ्कते **न चेति** (८३-१३) । साध्यता हि द्विधा योगरूपा क्षेमरूपा च । अलब्धस्य लब्धियोगरूपा साध्यता घटादौ । यस्मिन् सति उत्तरक्षणे यस्य सत्त्वम् । यस्मिन्नसति उत्तरक्षणे यस्यासत्त्वम् इयं क्षेमरूपा साध्यता । तत्र प्रथमायाः साध्यताया असम्भवेऽपि द्वितीयस्याः सम्भवात् । कलञ्जभक्षणादौ कलञ्जभक्षणोत्पादनसामग्र्या भावे उत्तरक्षणे कलञ्जभक्षणप्रागभावस्य सत्त्वम् । तदभावे कलञ्जभक्षणसामग्रीसत्त्वे उत्तरक्षणे कलञ्जभक्षणप्रागभावस्यासत्त्वम् । एवं सति यस्मिन् सति यस्य उत्तरक्षणे सत्त्वं तदेव योगक्षेमसाधारणं साध्यत्वं न तु असतः सत्त्वं गौरवात् । एवं सति कलञ्जभक्षणप्रागभावस्य परिपालनरूपमेव साध्यत्वम् । दूषयति—**प्रागभावस्येति** (८३-१४) । नञा कलञ्जभक्षणप्रागभावपरिपालनं बोधयितुं न शक्यते, कुतः ? प्रागभावस्य कार्यजनकत्वनियमेन । **तत्परीति** ( ८३-१५) । प्रागभावपरिपालनस्य । तथा च प्रागभावपरिपालनं कर्तुं न शक्यते । नन्वस्त्वन्य एव निषेध इत्यत आह—**तदन्यस्येति** (८३-१५) । चिकीर्षाजन्यकृतिसाध्यत्वातिरिक्तस्य । **तत्रेति** (८३-१५) । न कलञ्जं भक्षयेदित्यादौ चिकीर्षाजन्यकृतिसाध्यत्वस्य निषेधो नास्ति । तस्माद् न कलञ्जं भक्षयेदित्यत्र बलवदनिष्टाननुबन्धित्वस्यैव निषेधः ।

इष्टसाधनस्य विध्यर्थत्वे शङ्कते । **नन्विति** (८३-१७) । नित्ये सन्ध्योपासनादौ किमिष्टं यं प्रति साधनत्वं सन्ध्योपासनस्य बोधनीयम् । **प्रागिति** (८३-१८) । सन्ध्योपासनाप्राक् । **प्रत्यवाये** ( ८३-१८ ) पापे प्रमाणं नास्तीत्यर्थः । **सर्वत्रेति** (८३-१९) । यो निशि पापाचरणं करोति तस्यैव

१. अस्वरूपत्वात् व्यर्थत्वात् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पापं तं प्रति सन्ध्योपासनस्य सफलता यो निशि पापाचरणं न करोति तं प्रति सन्ध्योपासनस्य सफलता न स्यादित्याह—**नित्यतेति** (८३–१९)। यो निशि पापाचरणं न करोति तं प्रति सन्ध्योपासनमावश्यकं न स्यादिति नित्यत्वविरोधः। दूषणान्तरमाह **अहरहरिति** (८३–१९)। तथा च स्नानादिकं तु दिवसकृत्यमेव तत्र निशिकृतपापस्य प्रसक्तिरेव नास्ति। अहरहःस्नानस्य सफलता न स्यात्। **तदभावादिति** (८३–२०) इष्टाभावादिति। मध्ये शङ्कते **न चेति** (८३–२०)। **तदभाव** (८३–२०) इति। अनुपासनजन्यप्रत्यवायपरिहार एव सन्ध्योपासनफलम्। दूषयति-**उपासनस्येति** (८३–२१) अनुपासनाभावः किं उपासनरूपो वा किमनुपासनजन्यप्रत्यवायाभावः। अन्त्येऽन्योन्याश्रयादिति वक्ष्यति। आद्ये त्वाह—**फलत्व** (८३–२१) इति। एकस्यैव स्वं प्रति फलत्वं साधनत्वं च विरुद्धम्। दूषणान्तरमाह—**न चेति** (८३–२१)। तथाच उपासनं न स्वतः प्रयोजनम्। न वा गौणं प्रयोजनं सम्भवति। तदेव विवृणोति—**सुख** (८३–२२) इति। सुखं वा दुःखाभावो वा स्वतः प्रयोजनं, न चोपासनं सुखं वा दुःखाभावरूपं वा **तत्त्वादिति** (८३–२३)। सुखदुःखाभावयोः स्वतः इच्छाविषयत्वात्। अन्येषाम् इच्छाविषयत्वं सुखसाधनत्वेन, नापि गौणप्रयोजनमित्याह—**नेतर** (८३–२३) इति। सुखसाधनं वा दुःखाभावसाधनं वा गौणं प्रयोजनम्—**तत्त्वादिति** (८३–२३)। गौणप्रयोजनत्वादिति। प्रवर्त्तमानस्य पुरुषस्य मुख्यं प्रयोजनं सुखं दुःखाभावश्च। तत्साधनं च गौणं प्रयोजनम्। गौणप्रयोजनं नास्तीत्याह—**नचेति** (८३–२३)। सन्ध्योपासनेन सुखं वा दुःखाभावरूपं प्रयोजनं न जन्यते।

नैयायिको गुरुमतं दूषयति **यत् त्विति** (८३–२४)। प्रत्यवायविरोधि व्यर्थमपूर्वं सन्ध्योपासनेन जन्यते। व्यर्थापूर्वस्य कथं प्रयोजनत्वम् इत्यत आह—**तच्चेति** (८४–१)। व्यर्थापूर्वं प्रत्यवायविरोधि भवति। प्रत्यवायो दुःखहेतुर्भवति, तद्विरोधित्वात् दुःखविरोधित्वाच्च व्यर्थापूर्वं तत्काम्यम् इच्छाविषयं भवति। प्रत्यवायविरोधित्वेन व्यर्थापूर्वस्य काम्यतेत्याह—**न त्विति**–(८४–१)। व्यर्थापूर्वस्य अपूर्वत्वेन काम्यता नास्ति किन्तु प्रत्यवायविरोधित्वेन काम्यता। दूषयति—**पूर्वोक्तेनेति** (८४–२)। व्यर्थापूर्वस्य यदि अपूर्वत्वेन काम्यता तदा अपूर्वत्वहानिः स्यादिति हेतोर्व्यर्थापूर्वस्य प्रत्यवायविरोधित्वेनैव काम्यत्वम्। अयमाशयः-तद् यदपूर्वं तत्प्रत्यवायविरोधि, कः प्रत्यवायो निशि कृतः प्रत्यवायो वाऽनुपासनजन्यः प्रत्यवायो वा यस्यापूर्वं विरोधि। नाद्यः निशिकृतप्रत्यवायस्य सर्वत्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावात् सन्ध्योपासनस्य नित्यताहानिः स्यात् । न द्वितीयः । अनुपासनजन्य-प्रत्यवायस्याङ्गीकारेऽन्योन्याश्रयादित्यग्रे वक्ष्यते । ननु पण्डापूर्वं पण्डापूर्वत्वेनैव प्रयोजनमित्यत आह—**तथाभूत** (८४—२) इति । पण्डापूर्वे प्रमाणं नास्ति । **अन्यथे**ति (८४—३) । यदि पण्डापूर्वं प्रयोजनं न स्यात् तदा सन्ध्योपासनं विहितमेव न स्यादित्यन्यथानुपपत्तिरित्यर्थः । समाधत्ते **अन्यथे**ति (८४—३) । उपसंहरति । **तस्मादि**ति (८४—४) पूर्वोक्तयुक्तेर्नित्यस्थले इति कोऽर्थः ? सन्ध्योपासनस्थले । **काम्यस्ये**ति (८४—४) । गौणमुख्यप्रयोजनाभावान्न तत्र सन्ध्योपासनस्थले इष्टसाधनत्वमिति कृत्वा इष्टसाधनत्वं विध्यर्थो न । एतदेवाह—**इष्टसाधनते**ति (८४—४) ।

समाधत्ते नैयायिकः । **यत्** तावदिति । **मुख्य** (८४—५) इति । सन्ध्योपासनस्थले यदिष्टं तस्य मुख्यप्रयोजन एवान्तर्भावात् । किं तन्मुख्यत्वं गौणत्वं चेत्यत आह— **समानाधिकरणे**ति (८४—६) । समानाधिकरणा या इच्छा एकात्मनिष्ठा या इच्छा तया अजन्या या इच्छा तद्विषयत्वं सुखेऽपि वर्त्तते दुःखाभावेऽपि वर्त्तते । न हि सुखेच्छा दुःखाभावेच्छा वा कयाचिदन्येच्छया जन्यते इति समानाधिकरणेच्छया अजन्या भवति सुखेच्छा दुःखाभावेच्छा । इदं च गौणप्रयोजने पाकादौ तण्डुलक्रयणे वा नास्ति । कुतः ? तं देवदत्तकृततण्डुलक्रयणस्य देवदत्तस्य या पाकेच्छा तज्जन्या या इच्छा तण्डुलक्रयणेच्छा तद्विषयत्वं तण्डुलक्रयणे वर्त्तते इति कृत्वा गौणम् एव पाकादावपि । लक्षणान्तरमप्याह—**प्रयोजने**ति (८४—६) । प्रयोजनस्याजनकं यत् प्रयोजनं तत्त्वस्य मुख्यप्रयोजनत्वस्य सुखे वा दुःखाभावे वा वर्त्तमानत्वात् । गौणे च प्रयोजने तण्डुलक्रयणादौ प्रयोजनाजनकत्वं नास्ति किं त्वोदनरूपप्रयोजनजनकत्वाद् इति न तत्र गौणप्रयोजने इदं लक्षणद्वयमतिप्रसक्तम् ।

ननु तर्हि निरुपधीच्छाविषयत्वं मुख्यत्वमिति प्राचां मुख्यप्रयोजनत्वनिरुक्तिर्न स्याद् इत्यत आह—**एतदेवे**ति (८४—८) । पूर्वोक्तं समानाधिकरणेच्छाजन्यत्वम् अथवा प्रयोजनाजनकत्वं वा । तदेव निरुपधीच्छाविषयत्वम् । **एतदि**ति (८४—८) । एतन्मुख्यप्रयोजनत्वस्य लक्षणद्वयं सन्ध्योपासनेऽसिद्धमिति न च तदमुख्यं प्रयोजनम् । विवृणोति—**तथा हीति** (८४—९) । **काम्यत्वमि**ति (८४—९) इच्छाविषयत्वम् स्वतः प्रयोजनत्वमुपपादयति । **दुःखे**ति (८४—११) । **किञ्चिदि**ति (८४—११) । किञ्चित्प्रयोजनानुकूलतया दुःखहेत्वभावो न काम्यते । **किन्त्वि**ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(८४–११)। दुःखहेत्वभावः स्वरूपत एव काम्यते। न तु किञ्चित्प्रयोजनान्तरमुद्दिश्य काम्यते येन गौणत्वं दुःखहेत्वभावस्य स्यात्। एतदेव दृष्टान्तेन विवृणोति–**सर्पेति** (८४–१२)। अहिकण्टकनाशो यः स दुःखहेत्वभावत्वेनैव काम्यते, न तु किञ्चित् प्रयोजनान्तरमुद्दिश्य काम्यते। अहिकण्टकनाशः स्वतो दुःखहेत्वभावत्वेन प्रयोजनं मुख्यं तद्वत् सन्ध्योपासनमपि दुःखहेत्वभावत्वेनैव स्वतः प्रयोजनमित्यर्थः। अत्राशङ्कते–**न चैवमिति** (८४–१३)। तथा च सति यदि दुःखहेत्वभावः स्वतः प्रयोजनं तदा सुखं दुःखाभावश्चेति प्राचां मुख्यप्रयोजनद्वयस्य विभागो न स्यादित्यर्थः। समाधत्ते **दुःखाभाव** (८४–१३) इति। तथाच एकविंशतिप्रभेदाद् भिन्नं यद्दुःखमनुपासनं तदभावः सन्ध्योपासनं स्वतः प्रयोजनमेव।

ननु तर्हि एकविंशतिदुःखनाशो यः स स्वतः मुख्यं प्रयोजनं न स्यात्। कुतः? सुखं दुःखाभाव इत्यत्र विभागे दुःखाभावपदेन एकविंशतिप्रभेदभिन्नदुःखस्याभावो विवक्षित इति एकविंशतिदुःखाभावस्य मुख्यप्रयोजनत्वं न स्यादित्यरुचेराह–**यद्वेति** (८४–१५)। **इदमिति** (८४–१५)। सन्ध्योपासनं गौणं प्रयोजनम्। **अत्राशङ्कते–नन्विति** (८४–१५)। गौणत्वनिरुक्तिमाह–**किञ्चिदिति** (८४–१५) यथा हि तण्डुलक्रयणादिकम् ओदनरूपप्रयोजनजनकं भवतीति कृत्वा गौणं प्रयोजनं सन्ध्योपासनेन तु न किञ्चित् प्रयोजनान्तरं जन्यते इति कथं गौणत्वमित्यर्थः। समाधत्ते **साधनतेति** (८४–१६)। न प्रयोजनान्तरजनकत्वं किन्तु साधनताज्ञानेन जन्या या इच्छा तद्विषयत्वं, वर्त्तते च तण्डुलक्रयणादौ ओदनसाधनताज्ञानजन्येच्छाविषयत्वम्। नास्ति च गौणप्रयोजनत्वं सुखदुःखाभावयोः, न हि सुखं वा दुःखाभावो वा किञ्चित् साधनज्ञानजन्येच्छाविषयः। न हि सुखेन वा दुःखाभावेन कश्चिदिच्छाविषयः प्रयोजनं जन्यते। **एतदिति** (८४–१७)। साधनताज्ञानजन्येच्छाविषयत्वं सन्ध्योपासनस्थले असिद्धम्। न हि अनेन सन्ध्योपासनेन किञ्चित् प्रयोजनं जन्यते येन साधनताज्ञानजन्येच्छाविषयत्वं गौणत्वं भविष्यतीत्यर्थः। अनुपपत्तिपूर्वकं समाधत्ते–**यद्यपीति** (८४–१७)। **तथाऽपीति** (८४–१८)। तथा चानुपासनस्य प्रत्यवायसाधनत्वात् प्रत्यवायप्रतियोगिकसाधनताज्ञानजन्येच्छाविषयत्वं वर्त्तते। **तदभावत्वेनेति** (८४–१९)। प्रत्यवायसाधनायाभावत्वेन सन्ध्योपासनस्य प्रयोजनत्वं सम्भवत्येव। तथाच एवंसति सन्ध्योपासनस्थले प्रतियोग्यंशे साधनताज्ञानजन्येच्छाविषयत्वमादाय तदभावत्वेन प्रत्यवायाभावनिरूपितसाधनताज्ञानजन्येच्छाविषयत्वेन गौणत्वं सन्ध्योपासनस्य तिष्ठत्येव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव दृष्टान्तद्वारेण विवृणोति—**सर्पेति** (८४–२०)। सर्पोपसर्पणे दुःख-हेतुत्वज्ञानजन्येच्छाविषयत्वं वर्त्तते इतिकृत्वा दुःखाभावहेतुत्वज्ञानजन्येच्छाविषयत्वात् सर्पोपसर्पणस्यापि गौणप्रयोजनत्वं वर्त्तते। अयमाशयः। यथा सर्पादीनां दुःख-हेतुत्वात् सर्पनाशस्य दुःखाभावहेतुत्वात् गौणप्रयोजनत्वमेवं सन्ध्यानुपासनस्यापि प्रत्यवायद्वारा दुःखसाधनत्वात् सन्ध्योपासनस्य दुःखाभावहेतुत्वेन गौणप्रयोजनत्वम्।

उपसंहरति **एवमिति** (८४–२१)। सन्ध्योपासनस्य दुःखाभावरूपे प्रयोजने व्यवस्थिते। **तद्भावनाया** (८४–२२) इति सन्ध्योपासनभावनायाः सन्ध्योपासनानुकूलकृतेः। **इष्टेति** (८४–२२)। सन्ध्योपासनानुकूलकृतेः इष्टसाधनत्वेनान्वयः। अयमाशयः—अहरहः सन्ध्यामुपासीत इत्यत्र धातुना सन्ध्योपासनमुपस्थापितम्। इ(ई)तप्रत्ययेन आख्यातत्वेन रूपेण कृतिरुपस्थापिता लिङ्त्वेन रूपेण इष्टसाधनत्वमुपस्थापितम्। तथाच सन्ध्योपासनानुकूला कृतिरिष्टसाधनमित्येकपदोपस्थाप्ययोः कृतीष्टसाधनत्वयोरन्वयः **सुन्दलो**पाध्यायमतेन।

ननु यथा न कलञ्जं भक्षयेदित्यत्र बलवदनिष्टाननुबन्धीष्टसाधनत्वं लिङर्थः तत्र यथा बलवदनिष्टानुबन्धित्वविशेषणस्यान्वयो नास्ति किंतु इष्टसाधनत्वमात्रेणैवान्वयः तथा अहरहः सन्ध्यामुपासीतेत्यत्र लिङ्प्रत्ययार्थस्य इष्टसाधनत्वस्यानन्वयेऽपि बलवदनिष्टाननुबन्धित्वस्यैवोपासनानुकूलकृतावन्वयो भविष्यति, वेदबोधितलिङ्समानत्वेन कर्त्तव्यतामनुमाय प्रवृत्तिर्भविष्यतीत्यस्वरसादाह—**यद्वेति**(८४–२२)। **इष्टाभावादिति** (८४–२३)। सन्ध्योपासनस्य इष्टं नास्तीति कृत्वा इष्टसाधनत्वं सन्ध्योपासने नान्वेति। ननु सन्ध्योपासनस्थले लिङ्प्रत्ययस्यार्थं इष्टसाधनत्वं यदि नान्वेति तर्हि किमर्थम् इष्टसाधनत्वं लिङर्थ इत्यत आह—**लिङादेरिति** (८४–२४) तथाच स्वर्गकामो यजेत इत्यत्र यजिसमभिव्याहृतलिङ्प्रत्ययस्य इष्टसाधनत्वव्यतिरेकेण नान्यत्र शक्तिरिति पूर्वोक्तयुक्तिबलादिष्टसाधनत्वमेव लिङर्थः। तस्य च सन्ध्योपासनस्थलेऽभावेऽपि न लिङ्प्रत्ययार्थस्य व्याहतिरित्यर्थः।

एवं सत्याशङ्कते **नन्वेवमिति** (८५–१)। **एवमिति** (८५–१)। सन्ध्यामुपासीतेत्यत्र लिङर्थः इष्टसाधनत्वं नान्वेति सन्ध्योपासनस्थले तर्हीत्यर्थः। **प्रवृत्तिरिति** (८५–१)। प्रवर्त्तकेष्टसाधनताज्ञानाभावात् कथं सन्ध्योपासनादौ प्रवृत्तिर्भविष्यतीत्यर्थः—समाधत्ते—**आपातत** (८५–२) इति। तथाच इष्टसाधनताज्ञानाभावेऽपि प्रवृत्तिर्भविष्यति सन्ध्योपासनस्थले। आपातत इत्येनेनारुचिः सूचिता।

१. See introduction।

तथाच इष्टसाधनताज्ञानाभावे सन्ध्योपासनस्थले प्रवृत्तिः कथं स्यादित्यरुचिः । सन्ध्योपासनादौ प्रवृत्तिं समर्थयति-**वेदेति** (८५–२) । तथा च सन्ध्योपासनं वेदबोधितकर्तव्यताकं लिङ्समभिव्याहृतवेदवाक्योक्तत्वात् । अनेनानुमानेन सन्ध्योपासनस्य कर्त्तव्यतामनुमाय प्रवृत्तिर्भविष्यति ।

ननु नियता प्रवृत्तिः कथं भविष्यतीत्यत आह–**अकुर्वन्निति** (८५–३) । वेदविहिताकरणं प्रत्यवायसाधनमिति वाक्यबलात् सन्ध्योपासनस्य प्रत्यवायहेतुत्वमवगतं ततश्चानुपासनाभावरूपोपासनस्य प्रत्यवायाभावसाधकत्वमिति प्रत्यवायाभावमुद्दिश्य नियतं सन्ध्यावन्दनादौ प्रवृत्तेरविरोधात् । **तद्व्यतिरेकस्येति** (८५–४) । अनुपासनाभावरूपोपासनस्य काम्यत्वम् इच्छाविषयत्वम् । **अवधार्य तदुपाये** (८५–५) इति प्रत्यवायनिवर्तकोपासनोपाये प्रवर्त्तते । न तूपासने प्रवर्त्तते । **अयोग्यत्वादिति** (८५–५) । इष्टभावेनायोग्यत्वादित्यर्थः ।

मतान्तरमाह–**प्रकरणादीति** (८५–५) । इष्टसाधनतानन्वयेऽपि नानुपपत्तिरुपासने इष्टसाधनत्वस्य बाधात् । तथा प्रकरणोपस्थापितोपासनोपाये इष्टसाधनत्वमन्वेति । यत्र श्रुतिलिङ्गाद्यर्थेन नान्वयः इष्टसाधनस्य तत्र प्रकरणोपस्थितेनापि सहान्वयः । उपासनप्रकरणात् उपासनोपायस्तु प्रकरणोपस्थापितो भवत्येव । **कश्चिदि**(८५–६)त्यनेनास्वरसः । यथोपासनस्य इष्टाभावादिष्टसाधनत्वं नान्वेति । तथोपासनोपायेऽपीष्टसाधनत्वं नान्वेति । न चोपासनोपायस्य प्रत्यवायानुत्पादकत्वेन उपासनमेवेष्टमिति वाच्यम् । उपासनस्य फलाभावेन उपासनस्य वेदविहितत्वं कथं स्यादित्यनुपासनस्य प्रत्यवायहेतुत्वमपि नास्तीति नाऽयं पन्थाः ।

शङ्कते–**नन्विति** (८५ ७) । इष्टसाधनताज्ञानस्य प्रवर्त्तकत्वे ज्ञाने[१] इच्छाऽपि विशेषणमिति इच्छाज्ञानस्यापि प्रवर्त्तकत्वं स्यादित्यर्थः । अत्र शङ्कते **इच्छेति**-(८५–७) । तथाच अत्र एतादृशे ज्ञाने इच्छाविषयतया न विशेषणमिति न इच्छाज्ञानं प्रवर्त्तकमित्यभिप्रायः । न हीच्छाविषयतायां अवच्छेदको यः प्रकारः स्वर्गत्वादिस्तद्वान् यः स्वर्गः तत्प्रतियोगिका या कार्यता तन्निरूपितं कारणं याग इति ज्ञाने इच्छा विशेषणमिति सम्भवति इति न हि, किन्तु स्वरूपसत्येव इच्छा विवक्षिता । दूषयति **अत्रापीति** (८५–९) । इच्छाविषयतावच्छेदकप्रकारतावत्प्रतियोगिकसाधनमिति ज्ञानेऽपि इच्छा विशेषणं वा उपलक्षणं वा । **तद्ज्ञानस्येति**[३] (८५–९) । इच्छाज्ञानस्यापि उपलक्षणत्वे दूषणमाह–**द्वितीये त्विति** (८५–१०) । उपलक्ष्यता-

१. Text has तद्व्यतिरेकरूपस्य । २. Ms. "इच्छाविषयरूपेष्टवत्" इत्यधिकं निरर्थकम् । ३. T. has तद्भानस्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वच्छेदकस्यानुगतस्याभावादित्यर्थः । **अननुगमे**ति (८५–१०) । उपलक्ष्यतावच्छेदकं यदि सुखत्वादि तदा दुःखाभावेऽपि नास्ति । तथाच दुःखाभावत्वमपि सुखे नास्तीत्यननुगम इत्यर्थः । दूषणान्तरमाह—**न चे**ति (८५–११) । यस्यार्थस्य ज्ञानं तत्र लिङ्शक्तिर्वक्तव्या, न चेच्छायाः ज्ञानं प्रवर्त्तकम् इतिकृत्वा इच्छान्तर्भावेन इच्छाविषयसाधनत्वे लिङ्शक्तिरयुक्ता । एतदेवाह—**इच्छाया** (८५–११) इति । इच्छा स्वरूपसती प्रवर्त्तिका न तु इच्छाज्ञानं प्रवर्त्तकमित्यर्थः । अत्राऽऽशङ्कते । **न चे**ति (८५–१२) । तथाच इष्टत्वं लिङ्शक्तिविषयप्रविष्टमपि न येन इच्छा विशेषणं उपलक्षणं वेति विकल्पावकाशः स्यात् किन्तु स्वर्गसाधनत्वादिकमेव लिङ्वाच्यतावच्छेदकं न त्विष्टसाधनत्वादिकम् । दूषयति—**अनेके**ति (८५–१३) । स्वर्गकामो यजेतेत्यत्र इ(ई)तप्रत्ययस्य स्वर्गसाधनत्वं लिङ्प्रत्ययवाच्यतावच्छेदकं, चित्रया यजेत पशुकाम इत्यत्र पशुसाधनत्वं लिङ्प्रत्ययवाच्यतावच्छेदकं, पुत्रेष्टया यजेत इत्यत्र पुत्रसाधनत्वं लिङ्प्रत्ययवाच्यतावच्छेदकमिति अनेकार्थत्वं स्यात् । कुतः ? शक्यतावच्छेदकनानात्वात् । **तन्मात्रज्ञानस्ये**ति (८५–१३) साधनत्वज्ञानमात्रस्येति । **सिद्धान्ते**ति (८५–१३) । लिङ्प्रत्ययवाच्यम् इष्टसाधनत्वमिति नैयायिकसिद्धान्तव्याकोपो भवति यदि साधनतामात्रं लिङ्प्रत्ययवाच्यमुच्येत । **नैवमि**ति (८५–१५) नैयायिकस्योक्तिः । **साधनते**ति (८५–१५) । साधनतामात्रमेव लिङ्प्रत्ययवाच्यम् ।

ननु इष्टसाधनत्वस्य लिङ्प्रत्ययावाच्यत्वे प्रवर्त्तकज्ञानालाभेन लकारान्तरज्ञानात् यथा प्रवृत्तिर्नास्ति तथाऽत्रापि प्रवृत्तिर्न स्यादिति लकारान्तरसाम्यापत्तिरित्यर्थः । समाधत्ते **विधी**ति (८५–१५) । अनुकूलप्रयत्ने सर्वेषामाख्यातानां शक्तिरितिकृत्वा कृतिमात्रोपस्थापकत्वेन साधारण्येऽपि साधनत्वमात्रोपस्थापकत्वेनासाधारण्यम् । **साधनते**ति (८५–१७) । विधिप्रत्ययेन साधनता उपस्थाप्यते । न च साधनत्वज्ञानमात्रात् प्रवृत्तिरित्यत आह—**स्वर्गे**ति (८५–१७) । तथा च स्वर्गादिपदसमभिव्याहारात् स्वर्गसाधनत्वं लभ्यते यागस्य तस्माच्च प्रवृत्तिर्भविष्यतीत्यर्थः । **इष्टसाधनते**ति (८५–१८) । न हीष्टसाधनत्वज्ञानमात्रात् पुरुषः प्रवर्त्तते किन्तु इष्टविशेषस्वर्गाद्यज्ञाने स्वर्गार्थिनो न प्रवृत्तिरिति स्वर्गसाधनत्वं समभिव्याहारलभ्यं वक्तव्यमेव । यथा यजेत इत्यनेन इष्टसाधनत्वे लब्धे स्वर्गकाम इत्यत्र स्वर्गपदसमभिव्याहारात् इष्टरूपो यः स्वर्गस्तस्य साधनत्वं लभ्यत इति

१. नैयायिकमते इष्टसाधनत्वं विध्यर्थोऽस्ति, भवतां साधनतामात्रं विध्यर्थ उच्यते इति नैयायिकेन सह विरोधः स्यात्–टि० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समभिव्याहार आवश्यके साधनत्वमात्र एव शक्तिरस्तु स्वर्गसाधनत्वं तु समभिव्याहारादेव भविष्यतीति न इष्टत्वांशे शक्तिरित्यर्थः । **तर्कस्येति**(८५–१९) । साधनत्वमात्र एव लिङादिशक्तिरित्यत्र तर्कस्योपजीव्यत्वादित्यर्थः ।

ननु यदि साधनत्वमात्रे लिङादिशक्तिः तदा इष्टसाधनत्वं लिङ्शक्यमिति **भाष्यवार्त्तिकादि**विरोध इत्यत आह–**वाक्यार्थेति**(८५–२०) । स्वर्गादिपदसमभिव्याहारेण यो वाक्यार्थस्तदभिप्रायेण इष्टसाधनता शक्या इति व्यवहारः । **न त्विति** (८५–२०) । लिङ्शक्यार्थाभिप्रायेणेति इष्टसाधनता शक्या इति न व्यवहारः । केवलं लिङ्वाच्यं इष्टसाधनत्वं न किन्तु स्वर्गादिपदसमभिव्याहारेण इष्टसाधनत्वं लिङा वाच्यम् । एतेन नैयायिकसिद्धान्तविरोधोऽपि न । यदापि इष्टसाधनत्वे शक्तिस्तदाऽपि नानुपपत्तिरित्याह–**फलेति**(८५–२१) । नहीष्टसाधनत्वे लिङ्शक्तिवादिनो मते इच्छाज्ञानमपि प्रवर्त्तकम् इति न हि, किन्तु इच्छांशे स्वरूपसती इच्छाविषयसाधनत्वे ज्ञाता अङ्गीक्रियते । एवं सति न इच्छाज्ञानं प्रवर्त्तकं न वा इष्टसाधनत्वे लिङ्शक्तिरिति सिद्धान्तविरोधोऽपि । तथाच इष्टसाधनत्वं लिङ् शक्यमेवास्तु । यथा घटपदस्य घटज्ञाने शक्तिः अत एव वस्तुतस्तु ज्ञाने पदानां शक्तिः शक्यत्वात् । तत्र च घटपदस्य ज्ञानांशे ज्ञाता शक्तिरुपयुज्यते न वा घटपदेन शक्त्या घटज्ञानमुपस्थाप्यते किन्तु ज्ञानांशे स्वरूपसती घटांशे ज्ञाता एतादृशी शक्तिस्तया घटपदेन घटपदार्थस्य ज्ञानं क्रियते । एवम् इच्छांशे स्वरूपसती तद्विषयसाधनत्वे ज्ञाता तया शक्त्या स्वरूपसदिच्छाविषयसाधनत्वज्ञानं क्रियते ।

साधनत्वमात्रे लिङ्शक्तिरिति पूर्वमते बाधकमाह-**अन्यथेति** (८५–२२) । यदि लिङ्प्रत्ययेन साधनत्वमात्रमुपस्थाप्यते तदा स्वर्गसाधनत्वज्ञानाभावे प्रवृत्तिरेव न स्यादित्यर्थः । अत्राशङ्कते–**न चेति** (८५–२२) । तथाच स्वर्गोपायत्वलाभार्थं लिङ्प्रत्ययस्य इष्टसाधनत्वे शक्तिरङ्गीक्रियते, तदा स्वर्गरूपेष्टसाधनत्वलाभस्तु स्वर्गादिसमभिव्याहारादेव भविष्यति किमर्थम् इष्टसाधनत्वे शक्तिरित्यर्थः । दूषयति **समभिव्याहारादपीति** (८५–२३) । सर्वत्र वाक्यार्थबोधे पदसमभिव्याहारात् स एवार्थोऽन्वेति यं विनाऽन्वयाऽनुपपत्तिस्तदेवान्वयापर्यवसानमित्यर्थः । न च प्रकृते तदस्तीत्याह-**नहीति** (८५–२४) । स्वर्गकामो यजेत इत्यत्र यजिपदात् यागः इ(ई)तप्रत्ययात् साधनत्वम् एवमुपस्थिते सति यत्साधनत्वं प्रत्ययार्थः स प्रकृत्यर्थ एवान्वेति अन्तरङ्गत्वात् न तु बहिरङ्गेण स्वर्गादिना । एवं सति यागरूपं यत् साध्यं तेन सह लिङ्प्रत्ययार्थः साधनत्वमन्वेति इति नान्वयापर्यवसानमित्यर्थः । **तदिति**(८६ – १)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधनत्वान्वयापर्यवसानम् । साधनत्वान्वयापर्यवसानं नास्तीत्यत्र युक्तिमाह–**साधनत्वं हीति** (८६–१) इ(ई)तप्रत्ययेन साधनत्वे उपस्थापिते तत्साधनत्वं कस्येत्याकाङ्क्षायां सन्निहितत्वात् यागरूपसाध्यान्वय एव पर्यवस्यति।

ननु स्वर्गपदोपस्थापितस्य स्वर्गस्य साकाङ्क्षत्वात् साधनत्वान्वयेन विना अन्वयापर्यवसानात् स्वर्गान्वयलाभार्थं भिन्नपदोपस्थाप्येनापि स्वर्गेण साधनत्वान्वयो भविष्यति इत्यत आह–**न त्विति** (८६–२) । लब्धः पुरुषेण सहान्वयो येन स्वर्गेण । तथाच स्वर्गकाम इत्यत्र स्वर्गस्य काम्यता यस्य एवम्भूतो यः स्वर्गकामः पुरुष इत्यर्थे लब्धे स्वर्गस्य पुरुषेणैव साकाङ्क्षत्वात् पुरुषेण सहैवान्वयपर्यवसाने साधनत्वेन निराकाङ्क्षः स्वर्गो न साधनत्वान्वये पर्यवस्यति । तथा च स्वर्गस्य पुरुषेणैवान्वयो लब्धो न तु साधनत्वेन ।

अत्र शङ्कते–**पचतीति** (८६–३) । ओदनं पचतीत्यत्र यथा देवदत्तान्वितः पाकः एवं यागोऽपि स्वर्गवत् पुरुषान्वित इति यागस्वर्गयोस्तुल्यत्वे कथं यागस्य साधनत्वान्वयो न स्वर्गस्येत्यर्थः। समाधत्ते–**एवमिति** (८६–३) । यागस्वर्गयोर्लब्धान्वये समानेऽपि साधनत्वं याग एवान्वेति न तु स्वर्गेण । तत्र हेतुमाह–**सन्निहितेति** (८६-४)। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वम् । अतः इ(ई)तप्रत्ययः प्रकृत्यर्थो यो यागस्तत्रैवान्वेति । **तथात्वमिति** (८६–४) । साधनत्वान्वयसम्भव इत्यर्थः ।

इष्टसाधनत्वस्य लिङर्थत्वेऽपि यागरूपसाध्येनैव साधनत्वान्वयः स्यात् । इत्यत आह–**इष्टसाधनतेति** (८६–४) । इष्टसाधनत्वं यदि लिङर्थस्तदा इ(ई) तप्रत्ययेन इष्टस्य साधनत्वस्योपस्थितौ एकपदोपस्थाप्यत्वसन्निधानवशात् साधनत्वमादौ इष्टे एवान्वेति न तु यागेन । कुतः, इष्टेन सह साकाङ्क्षत्वात्, योग्यत्वाच्च, पश्चाद् इष्टान्वयानन्तरं प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वं सन्निधानवशात् याग इष्टसाधनमित्यन्वयबोध इत्यर्थः । **तदेवेति** (८६–५) । इष्टमेवेत्यर्थः । **अन्वयमिति** (८६–५) साधनत्वान्वययोग्यमित्यर्थः। **अत** (८६–५) इति । इष्टसाधनत्वाभिधानमेव योग्यमित्यर्थः । अत्रानुकूलयुक्तिमाह । **अत एवेति** (८६–५) । अश्रुतफले विश्वजिता यजेत इति वाक्ये विश्वजिद्याग इष्टसाधनमिति प्रथमतो नान्वयबोधः। किन्तु सामान्यतः स्वर्गरूपं फलं प्रकल्प्य स्वर्गरूपेष्टसाधनं विश्वजिद्याग

१. इतप्रत्ययार्थेन । २. इतप्रत्ययार्थेन ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति वाक्यार्थबोधो जायते, यदि इष्टसाधनत्वं लिङर्थो न तर्हीष्टस्योपस्थितिरेव नास्ति किमर्थं विश्वजिता यजेतेत्यत्र स्वर्गरूपफलकल्पनेत्यर्थः ।

मतान्तरमाह–**कश्चिदि**ति (८६–७) । इष्टेति लिङर्थः साधनत्वमात्रमेवास्तु तच्च प्रत्ययोपस्थापितं साधनत्वं निरुपधीच्छाविषयेण स्वर्गेणैवान्वितं न तु इच्छामात्रविषयेण यागेन । यागस्य निरुपधीच्छाविषयत्वाभावात् । स्वर्गस्य निरुपधीच्छाविषयत्वात् । दूषयति–**तथात्वे ही**ति (८६–९) । यदि बहिरङ्गस्य स्वर्गस्य निरुपधीच्छाविषयत्वेन साधनत्वान्वयस्तदा चित्रया यजेत पशुकामः, अग्निकामो दारुणी मथ्नीयाद्, अत्र अग्निपश्वोः निरुपधीच्छाविषयत्वाभावात् साध्यत्वेनान्वयो न स्यात् , किन्तु यागेनैव सहान्वयः स्यादिति । अग्निकाम इत्यत्र यागरूपसाध्यसाधनत्वे लब्धे सर्वत्र यागरूपसाध्यसाधनत्वमेवार्थः स्यादित्यर्थः ।

न कलञ्जं भक्षयेदिति निषेधानुरोधात् बलवदनिष्टाननुबन्धीष्टसाधनत्वमेव लिङर्थ इति उपसंहरति । **तस्मादि**ति(८६–१०) । विशेषणत्रयस्य प्रयोजनमाह–**निष्फले**ति (८६–११) । उपलक्षणमेतत् । कृतिसाध्यमपि द्रष्टव्यम् । तथाच निष्फलवारणार्थम् इष्टसाधनत्वम् । [1]कृत्यसाध्यवारणार्थं **कृतिसाध्यत्वे**ति (८६–१०) । मधुविषसंपृक्तान्नभोजनेऽतिप्रसङ्गवारणार्थम् **बलवदनिष्टाननुबन्धी**ति (८६–१०) । अत्राशङ्कते–**श्येने**ति (८६–११) । तथाच बलवदनिष्टाननुबन्धीष्टसाधनत्वं न विध्यर्थः किन्तु श्येनयागस्य बलवदनिष्टानुबन्धित्वात् । तथाच श्येनयागः बलवदनिष्टाननुबन्धीष्टसाधनमिति कथं वाक्यार्थबोधः । कुतः ? इत्यत आह–**प्रायश्चित्ते**ति (८६–१२) । तथाच वैरिवधे प्रायश्चित्तं वर्त्तते इतिकृत्वा वैरिवधसाधकस्य श्येनयागस्य बलवदनिष्टानुबन्धितया श्येनयागे बलवदनिष्टाननुबन्धित्वस्यायोग्यत्वात् कथं बलवदनिष्टाननुबन्धीष्टसाधनमिति वाक्यार्थबोध इत्यर्थः । **तदि**ति (८६-१२) । बलवदनिष्टाननुबन्धित्वान्तर्भावेनेत्यर्थः । समाधत्ते–**तत्रे**ति (८६–१३) । यथा तत्त्वज्ञानान्निःश्रेयस इत्यत्र पञ्चम्या अनन्यथासिद्धनियतपूर्ववर्तित्वमुपस्थितं तच्च तत्त्वज्ञाने शास्त्रेऽनन्वितम् । शास्त्रस्य श्रवणादिनाऽन्यथासिद्धत्वात् । तत्र अनन्यथासिद्धत्वांशं विहाय यथा नियतपूर्ववृत्तित्वमात्रस्यैवान्वयः तथा इ(ई)तप्रत्ययेन बलवदनिष्टाननुबन्धित्वमुपस्थितमपि श्येनयागे नान्वेति किन्तु कृतिसाध्यत्वे सतीष्टसाधनत्वमात्रमेवान्वेति तेन सहैव योग्यत्वात् ।

ननु विशिष्टो यः इ(ई)तप्रत्ययः स चेत् श्येनयागेऽयोग्यस्तदा विशिष्टायोग्यवाक्यप्रणेतृत्वेन ईश्वरस्यानाप्तत्वं स्याद् इत्यत आह–**अपि चे**ति (८६–१३) ।

---

१. समुद्धरणे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाच न हि सर्वत्र इदं वाक्यमयोग्यं किन्तु विहितो य आततायिवधस्तमुद्दिश्य यः श्येनयागस्तस्मिन् श्येनयागे बलवदनिष्टाननुबन्धीष्टसाधनत्वस्य विशिष्टस्य योग्यत्वात् न तत्प्रणेतुरीश्वरस्यानाप्तत्वमित्यर्थः। विहितेति (८६–१३)। विहितो वेदोक्तो यो म्लेच्छजनपदाभिचारः शत्रुसमूहवधस्तमुद्दिश्य श्येनयागाभिधानं योग्यम्।

सर्वथाऽयोग्यत्वे किं स्यादित्यत आह–अन्यथेति (८६–१४)। श्येनेनाभिचरन् इति वाक्यस्यायोग्यत्वात् तत्प्रणेतुराप्तत्वं न स्याद् इत्यर्थः। तस्माज्जलेन सिञ्चतीत्यत्र यथा कुत्रचिद्वाक्यार्थो योग्यो यत्र जलेन सिञ्चनं नास्ति तत्रायोग्यत्वेऽपि जलेन सिञ्चतीति वाक्यमात्रप्रयोक्तुर्नानाप्तत्वम्। तथा श्येनेनाभिचरन् यजेतेत्यत्र कुत्रचिदयोग्यत्वेऽपि न तत्प्रणेतुरीश्वरस्यानाप्तत्वम्। एतदेव विभागेन दर्शयति–अत एवेति (८६–१५)। यतः म्लेच्छजनाभिचारमुद्दिश्य यः श्येनयागः तत्र प्रायश्चित्तं नास्तीत्यत एव योग्य इत्यर्थः। समस्तस्येति (८६–१५)। बलवदनिष्टाननुबन्धीष्टसाधनत्वस्येत्यर्थः। विधेरिति (८६–१५)। इ(ई)तप्रत्ययार्थस्येत्यर्थः। अयोग्यमुदाहरति–अविहित (८६–१६) इति। तथाच धनलोभेन अविहितो यः ब्राह्मणाभिचारः ब्राह्मणस्य कपटवधस्तमुद्दिश्यानुष्ठितः कृतो यः श्येनयागस्तस्मिन् प्रायश्चित्तश्रवणात् तत्र श्येनयागे बलवदनिष्टाननुबन्धित्वविशेषणमयोग्यमित्यर्थः। तथा चात्र श्येनयागे बलवदनिष्टानुबन्धात् प्रायश्चित्तविधेरपि सार्थकत्वमित्याह–प्रायश्चित्तविधेरिति (८६–१६)। अन्यथा कुत्रापि श्येनयागे बलवदनिष्टानुबन्धो नास्ति तदा बलवदनिष्टनिवृत्तये श्येनयागकर्तुः यत् प्रायश्चित्तं तन्न स्यादेवेति तत्सार्थकम्। तथा च प्रायश्चित्तविधिः सार्थकः।

अत्राशङ्कते–नन्विति (८६–१८)। एवम् इ(ई)तप्रत्ययस्यार्थो यदि बलवदनिष्टाननुबन्धीष्टसाधनत्वं तदेत्यर्थः। तथा च प्राणपञ्चकं बलवदनिष्टाननुबन्धिजीवनयोनिप्रयत्नसाध्यम् इष्टसाधनं च इति ज्ञाने सति प्राणपञ्चकेऽपि प्रवृत्तिः स्यादित्यर्थः। समाधत्ते नैयायिकः–प्राणादीति (८६–१८)। विकल्प्य दूषयति। तथा च प्राणपञ्चकशब्देन पञ्च प्राणा एव प्राणानां क्रिया वा। आद्ये दूषणमाह–प्रमाणेति (८६–२०)। न हि प्राणा एव जीवनयोनिप्रयत्नसाध्याः प्राणानामतीन्द्रियत्वेन तत्र प्रयत्नसाध्यत्वाभावात्। द्वितीये त्वाह–यदि श्वासोच्छ्वासक्रियामुद्दिश्य प्रवृत्तिः स्यादित्यापादने प्रवृत्तिशब्देन किमभिप्रेतमित्याह–प्रवृत्तीति (८६–२०)। तद्विशेष(८६–२१) इति। ज्ञानचिकीर्षापूर्विका कृतिरित्यर्थः। आद्ये आह–इष्टेति (८६–२२)। प्रवृत्तिः स्यादित्यापादने जीवन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

योनिप्रयत्नः सर्वदोत्पद्यते इति तदापादनं व्यर्थमेव। तथा च यन्नास्ति तस्यापादनं कर्त्तव्यम्। जीवनयोनिप्रयत्नस्तु सर्वदा उत्पद्यत एव तदापादनं व्यर्थमेवेति सङ्गतम्। द्वितीये त्वाह -**प्राणादी**ति (८६-२२)। चिकीर्षापूर्विका कृतिस्तदा उत्पद्येत यदि प्राणादिपञ्चकक्रिया ज्ञानचिकीर्षापूर्वककृतिसाध्या स्यात्। या प्राणादिपञ्चकक्रिया सा जीवनयोनिप्रयत्नसाध्या परं ज्ञानचिकीर्षापूर्वककृतिसाध्या न भवति इति प्राणादिपञ्चकक्रियायां कृतिविशेषसाध्यताज्ञानमेव नास्ति कुत्र प्रवृत्त्यापादनमित्यर्थः। **कृत्यसाध्यत्वा**दिति (८६-२३)। कृतिविशेषासाध्यत्वात् कस्याः ? प्राणादिपञ्चकक्रियायाः, प्राणादिपञ्चकक्रिया यदि कृतिविशेषसाध्या न, तदा किंसाध्या ? इत्यत आह—**जीवनयोनी**ति (८६-२३)। सा प्राणादिपञ्चकक्रिया जीवनयोनिप्रयत्नसाध्या।

ननु प्रयत्नसाध्यत्वेऽपि कृतिसाध्यताज्ञानं तिष्ठत्येवेति प्राणपञ्चकक्रियोद्देशेन प्रवृत्तिः स्यादित्यापादनं सम्भवत्येव इत्यत आह—**न चे**ति (८६-२४)। ननु जीवनयोनिप्रयत्नस्तु कृतिर्भवत्येव कृतिसाध्यताज्ञानमित्यत्र कृतिमात्रं विवक्षितं तथा च प्रवृत्त्यापादनं सम्भवत्येव इत्यत आह—**चिकीर्षे**ति (८६-२४)। तथाच बलवदनिष्टाननुबन्धित्वे सति कृतिसाध्यत्वे सतीष्टसाधनत्वमित्यत्र कृतिपदेन प्रयत्नमात्रं न विवक्षितं किन्तु चिकीर्षापूर्विका कृतिर्विवक्षिता। कृतिसाध्यत्वे सतीष्टसाधनत्वमित्यत्र न केवलं कृतिविशेषोऽस्माभिरेवोच्यते किन्तु प्राभाकराणामप्यावश्यक इत्याह—**अन्यथे**ति (८६-२४)। इदं मत्कृतिसाध्यं मत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वादित्यत्र कृतिसाध्यतानुमानवादिनोऽपि कृतिमात्रसाध्यताज्ञानं प्राणपञ्चकक्रियायां तिष्ठतीतिकृत्वा प्राभाकरमतेऽपि प्रवृत्तिः स्यादित्यापादनं तुल्यमेव। तदेवाह—**वृत्ती**ति। स्वमते दोषं विद्यमानमदृष्ट्वा परदोषापादनं स्थूलः प्रमादः, वस्तुतस्तु कृतिसाध्यताज्ञानमित्यत्र कृतिमात्रं विवक्षितमित्याह—**किञ्चे**ति। तथा च यत्र कृतिसाध्येष्टसाधनताज्ञानं तत्र प्रतिबन्धकाभावे सति प्रवृत्तिर्भवत्येव। परन्तु कृतिसाध्येष्टसाधनताज्ञाने सति न प्रवृत्तिरिति न अपि तु प्रवर्त्तते। तत्र प्रतिबन्धकाभावे सति एतस्य प्रयोजनमाह—**यत्रे**ति (८७-३)। तथाच जीवनयोनिप्रयत्नसाध्यताज्ञाने विद्यमानेऽपि प्राणपञ्चकोद्देशेन प्रवृत्तिः कृतिसाध्यताज्ञानस्य जीवनयोनिप्रयत्नेन अन्यथासिद्धत्वात् ज्ञानेन प्रवृत्तौ क्रियमाणायां जीवनयोनिप्रयत्न एव कृतिसाध्यताज्ञानस्य प्रतिबन्धकः। न हि प्रतिबन्धके सति कारणात्

१ जीवनयोनिप्रयत्नापादनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कार्यं न जायते इतिकृत्वा न कारणताहानिः । यथा वह्नौ विद्यमाने प्रतिबन्धके च विद्यमाने दाहो न जायते चेत्तदा वह्नेः कारणत्वहानिर्नास्तीत्यर्थः । **तत्रेति**-(८७-१) प्राणपञ्चकसञ्चारे इत्यर्थः । **फलेच्छेति** (८७-६) । तथा इच्छांशेऽपि इ(ई)तप्रत्ययस्य ज्ञाता शक्तिरित्यर्थः एवं सति इष्टसाधनताज्ञानवत् फलेच्छाज्ञानमपि प्रवर्त्तकमिति भावः । **तदिति** (८७-६) । फलेच्छा स्वरूपसत्येव प्रवर्त्तिका न तु तस्याः ज्ञानम् एतादृशानुभवाभावात् ।

**इति वाचनाचार्यगुणरत्नगणिकृते शशधरटिप्पने विधिवादः ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अपूर्ववादटिप्पनम् ।

उपोद्घातसङ्गत्याह—इष्टसाधनताज्ञानं तदा स्यात् यदीष्टसाधनस्य परम्पराघटकमपूर्वं लिङ्गादिवाच्यं स्यात् इत्युपोद्घातसङ्गत्या अपूर्वस्य लिङादिवाच्यत्वाभावेऽपि यागे इष्टसाधनतान्वये योग्यतासत्त्वात् इष्टसाधनत्वबोधः स्यादेवेति व्यवस्थापयितुं परमतमुपन्यस्यति । **नन्विति**(८८–१) । **स्वर्गोपायत्वेनेति**(८८–१) स्वमते । **कार्यत्वेनेति**(८८–१) परमते । **क्रियाया**(८८–१) यागादिक्रियाया **अन्वय** (८८–१) इति न युक्तम् । अत्र हेतुमाह—**तत्रेति**(८८–२) । षड्विधा बोधाः स्वर्गकामस्य शास्त्रे निरूपितास्तद्यथा—एकः कर्तृत्वेन बोधः १, एकः अधिकारित्वेन बोधः २, एको नियोज्यत्वेन बोधः ३, एकः स्वर्गकामत्वेन ४, एकस्तावत्फलभागित्वेन ५, एको नियन्तृत्वेन ६ । एते प्राभाकराणां मते सन्ति ते शास्त्रान्तराद् ज्ञेयाः । षण्णां मध्ये एकं नियोज्यत्वमादाय मम नियोज्यस्य यागः कार्यं इति प्राभाकरमते । नियोज्यस्य मम यागः स्वर्गसाधनम् इति नैयायिकमते । तथा च नियोज्यत्वरूपेण नियोज्यस्य यागः कार्यं इति बोधः, याग इष्टसाधनमिति वा बोधः । द्वयमपि न सम्भवति कर्त्तरि नियोज्यत्वान्वययोग्यताविरहात् । नियोज्यत्वं नाम यागसाध्यफलभोगित्वम्[1] । यागसाध्यता तु फले न सम्भवति । यागस्य आशुतरविनाशित्वेन कालान्तरभाविफलस्य यागसाध्यत्वाभावात् परम्पराघटकानुपस्थित्या परम्परयाऽपि यागसाध्यत्वाभावात् फलस्य । एवं साक्षात्परम्परया साध्यत्वबाधे तदन्वयार्थं परम्पराघटकं लिङादिवाच्यम् अवश्यं किञ्चित् स्वीकर्त्तव्यम् । अन्यथा अधिकारिणो नियोज्यत्वरूपेण यागक्रियायां कर्त्तव्यत्वावगम एव न भवति । एतदेवाह **नियोज्येति**(८८–२) । नियोज्यत्वरूपेणेत्यर्थः ।

नियोज्यस्य यागे कर्त्तव्यतावगमो नास्ति । कुतः ? यागसाध्यत्वं साक्षात् परम्परया बाधितम् । तर्हि नियोज्यत्वान्वयः कथमधिकारिणि इत्याह—**कामीति** (८८-२) । तथाच प्रथमतः कामी काम्यं यत् फलं तस्याव्यवहितं यत् साधनं तदेव कर्त्तव्यत्वेनादौ जानाति मम यागविषयकं कार्यमित्याकारकम् । एवं सति यागविषयस्य कार्यस्यापूर्वस्योपस्थितौ तद्द्वारा फले यागसाध्यत्वेऽवगते पश्चात् अधिकारिणि नियोज्यत्वान्वयबोधः । अनेन प्रकारेण अधिकारिणि नियोज्यत्वेऽवगते पश्चान्नियोज्यस्य मम यागः कार्यं इष्टसाधनं वा इत्यन्वयबोधो भविष्यति । तच्च परम्पराघटकम् अपूर्वं लिङादिवाच्यम् । अन्यथा तस्याऽपूर्वस्यानुपस्थितेः । एतदेव वि-

---

१. भोक्तृत्वम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृणोति । **काम्यादन्यदि**—(८८-२)ति । स्वर्गसुखपरम्परायां हि काम्याऽव्यवहितं पूर्वं पूर्वमपि काम्यं भवत्येव तत्रैव कर्त्तव्यत्वान्वयो भविष्यतीति कथमपूर्वे कर्त्तव्यत्वान्वय इत्यत उक्तं **काम्यादन्येदि**ति (८८-२)

तत् काम्ये काम्यादन्यत्तद्द्वारानुपस्थित्यादिपरम्परासाधनत्वबोधो भविष्यतीत्याशङ्कते—**न चे**ति (८८-३)। तथाच साक्षात् साधनताबाधेऽपि परम्पराघटकानुपस्थित्याऽपि परम्परासाधनत्वबोधो भवतीत्यर्थः । कथमन्यथा सस्यार्थिनः कृषीवलस्य परम्पराघटकानुपस्थित्यापि सस्यपरम्परासाधने कर्षणे प्रवृत्तिः । कर्षणस्य सस्यपरम्परासाधनत्वात् । **नाऽयं नियम**(८८-४) इति । साक्षात् साधनताबाधे यत् साधनत्वं तत्परम्पराघटकोपस्थित्यैवान्वितं भवतीत्ययं न नियमः सस्यार्थिनः कर्षकस्य परम्परासाधने कर्षणे साधनत्वबोधानन्तरं कर्षणे प्रवृत्तिदर्शनात् । दूषयति—**तत्राऽपी**ति (८८-४)साक्षादसाधनस्य यत् साधनत्वं परम्पराघटकानुपस्थित्याऽपि अन्वितं भवतीति कुत्राऽपि न दृष्टम् । कुतः ? सस्यार्थिनः कर्षकस्य या कर्षणे प्रवृत्तिः साऽपि परम्परया लोहरश्मिबलीवर्दव्यापारपरम्परामवगम्यैव कर्षणे साधनत्वबोधः, न तु व्यापारपरम्परामनवगम्य । एतदेवाह—**नान्यथे**ति (८८-५)। व्यापारपरम्परामनवगम्येत्यर्थः । विपक्षे बाधकमाह—**तथात्वे**ति (८८-५)। व्यापारपरम्परामनवगम्य साधनत्वबोधे इत्यर्थः । अत्रानुकूलतर्कमाह-**साक्षादि**ति(८८—६) । एकविशेषबाधे यः सामान्यप्रत्ययः सोऽपरविशेषमादायैव भवतीति नियमात् । अत्र दृष्टान्तमाह—**अत एवे**ति(८८-६)। घटसामान्यस्य द्वौ विशेषौ सच्छिद्रत्वमच्छिद्रत्वं च । सच्छिद्रस्य घटविशेषस्य जलाहरणान्वयबाधात् । अपरो विशेषः छिद्रेतरत्वं तमादायैव जलाहरणान्वयबोध इत्यर्थः । तस्मात् कामी पुरुषः काम्याऽव्यवहितसाधनमपूर्वमेवादौ कार्यत्वेन अवैति ।

अत्र शङ्कते—**नन्वि**ति(८८-९) । विधिप्रत्ययस्य लिङ्प्रत्ययस्यापूर्वे वाच्ये केन रूपेण शक्तिः ?। **क्रियेति** (८८-९)। लिङ्प्रत्ययेन यत् कार्यमुपस्थितं तदपि चेत् क्रियासाधारणतया आशुतरविनाशी(शि) स्यात् तदा आशुतरविनाशित्वात् क्रियाजन्यत्वं फले नास्ति । तथा यल्लिङ्प्रत्ययवाच्यं क्रियासाधारणम् आशुतरविनाशि परम्पराघटकं तद्द्वाराऽपि क्रियाजन्यत्वं फले न सम्भवत्येवेति स दोषस्तदवस्थ एव ।

दोषान्तरमाह—**शक्ये**ति(८८-११)। लिङ्प्रत्ययस्य यदि अपूर्वं वाच्यं तत्र शक्यतावच्छेदको धर्मः कार्यत्वं तच्च न सम्भवति । यथा घटपदस्य वाच्यो घटः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र शक्यतावच्छेदकं द्रव्यत्वं न सम्भवति, कुतः ? घटपदाशक्यपटादिवृत्तित्वात् तद्वत् । लिङ्वाच्यं यदपूर्वं तत्र शक्यतावच्छेदको धर्मः कार्यत्वं न सम्भवति लिङ्पदाशक्यघटादिवृत्तित्वात् ।

ननु अशक्यवृत्तिरपि धर्मः शक्यतावच्छेदको भवतु इत्यत आह—**अन्यथेति** (८८–११) । तथा च घटपदशक्यतावच्छेदकं घटत्वे न स्यात् किन्तु सामान्यधर्मः प्रमेयत्वमेव स्यात् । द्वितीयं दूषयति—**नेतर** (८८–१२) इति । **घटादीति** (८८–१२) । क्रियातिरिक्तकार्यत्वमपि न लिङ्पदशक्यतावच्छेदको धर्मः, कुतः ? लिङ्पदाशक्यघटादिवृत्तित्वात् । क्रियातिरिक्तकार्यत्वं घटेऽपि वर्त्तते । तृतीयं स्थिरकार्यत्वेनेति पक्षं दूषयति—**तत्त्वादेवेति** (८८–१३) । शक्याशक्यघटादिसाधारणत्वात् । अपूर्वत्वेनेति पक्षं दूषयति—**नोपान्त्य** (८८–१३) इति । यद्यपि अपूर्वत्वं लिङ्पदशक्यं यदपूर्वं तन्मात्रवृत्ति भवति न तु लिङ्पदाशक्यघटादिवृत्ति तथापि तदपूर्वत्वं प्रथममुपस्थितमनुपस्थितं वा । आद्ये आह—**उपस्थितावपि** (८८–१३) । **अन्वयबोधात्** यदि पूर्वमुपस्थितमपूर्वं तदा अपूर्वत्वव्याघातः, कुतः ? साधनत्वान्वयबोधानन्तरं कल्प्यं हि अपूर्वं तच्चेत् पूर्वमुपस्थितं तदा तस्य कल्प्यत्वाभावेन अपूर्वत्वव्याघातः । अन्त्ये यदि अपूर्वत्वमुपस्थितं नास्ति तदा केन रूपेण लिङादिपदशक्तिग्रहः स्यात् । चरमं दूषयति—**अनिर्वचनादिति** (८८–१४) । **स्थिरेति** (८८–१५) । लिङ्पदस्य कार्यत्वेन रूपेण कार्य एव घटादिसाधारणी शक्तिः । तया शक्त्या कार्यत्वेन रूपेण पदार्थस्मरणं भवति । यथा गोपदेन सकलमेव गोसाधारणं पदार्थस्मरणं भवति । वाक्यार्थबोधे तु अपूर्वं यथा गामानयेत्यत्र अपूर्वो गौरुपतिष्ठति तथाच वाक्यार्थबोधकाले कार्यत्वं विहाय अपूर्वमवगमयति लिङ्पदम् । यथा शब्दाश्रयत्वेन आकाशपदशक्तिग्रहे पदार्थस्मरणकाले शब्दाश्रयत्वेनैवोपस्थितिः, वाक्यार्थबोधकाले तु शब्दाश्रयत्वं विहाय निष्प्रकारिका आकाशस्योपस्थितिस्तद्वदेवेत्यर्थः । एतदेवाह—**लिङ्पदमिति** (८८–१६) यजेतिपदम् । **तर्केति** (८८–१६) । अस्थिरा क्रिया कालान्तरभाविस्वर्गाजनिका इति तर्कसहायेन अपूर्वं बोधयति ।

अत्र शङ्कते—**न चेति** (८८–१६) । यदि लिङ्प्रत्ययेन तर्कबलादपूर्वम् उपस्थाप्यते तर्हि न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणाभावविषयकं कार्यमित्यत्र नित्यनिषेधः । अपूर्वं च तयोर्लाभो न स्यात्, कुतः ? कलञ्जभक्षणाभावस्य विहितक्रियार्थाभावात् । किन्तु न कलञ्जं भक्षयेदित्यत्र वेदोक्तनिषेधोऽस्ति, न तु विधिः । अत्र कलञ्जभक्षणाभावस्थले निषेधजन्यम् अपूर्वं चेन्नास्ति तदा नित्यनिषेधोऽपि न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात् । द्वयोरलाभप्रसङ्गः स्यात् । समाधत्ते—**एकत्रे**ति (८८—१७) । वैदिकलिङः स्वर्गकामो यजेतेत्यत्र अपूर्ववाचकत्वस्थितौ निषेधस्थलेऽपि वैदिकलिङोऽपूर्ववाचकत्वं कल्प्यते । यतः एकत्र निर्णीतं तदेवापरत्र कल्प्यते । यथा मन्त्राणां दृष्टकार्यसम्पादकत्वेन प्रामाण्ये सिद्धेऽन्यत्रापि अदृष्टार्थबोधकस्य प्रामाण्यम् । यथा मन्त्रायुर्वेदस्थले वेदस्य प्रामाण्ये सिद्धे अपरस्यापि वेदस्य प्रामाण्यम् । तद्वदत्र विहितस्थले लिङः अपूर्ववाचकत्वे स्थिते निषेधस्थलेऽपि लिङोऽपूर्ववाचकत्वं कल्प्यते इत्युभयत्र विहितनिषेधस्थले लिङोऽपूर्ववाचकत्वमिति स्थिते शङ्कते—**न चैव**मिति (८८—१७) । यदि आशुतरविनाशिक्रियायाः कालान्तरभाविफले जनयितव्ये मध्ये चेदपूर्वं तर्हि पुष्टिकामो घृतं पिबेदित्यादौ घृतपानस्याशुतरविनाशित्वात् कालान्तरभाविपुष्टिं प्रति साक्षाज्जनकत्वासम्भवात् परम्परासाधनत्वोपपत्तयेऽपूर्वकल्पनापत्तिरित्यर्थः ।

समाधत्ते—**वैदिके**ति (८८—१८) । न हि सर्वत्र आशुतरविनाशिक्रियासमभिव्याहृतलिङोऽपूर्ववाचकत्वमित्युच्यते किं तर्हीत्यत आह—**लिङ्त्वेने**ति (८८—१८) । वैदिकलिङ्त्वेनैवाऽपूर्ववाचकत्वं कल्प्यते न तु लौकिकालौकिकसाधारणाऽऽशुतरविनाशिक्रियासमभिव्याहृतलिङ्त्वमात्रेणैव लिङोऽपूर्ववाचकत्वम् । कथं तर्हि घृतं पिबेदित्यादौ घृतपानस्य पुष्टिसाधनत्वान्वयबोध इति चेत् । न, लोकसिद्धमथवा वैदिकशास्त्रादवगतं वा धातुसाम्यं परिज्ञातं घृतपाने, तदा धातुसाम्यद्वारा पुष्टिर्भवति । तर्हि लौकिकस्थले दृष्टधातुसाम्यादिकमेव आशुतरविनाशिक्रियासमभिव्याहृतलिङः वाच्यमस्तु इत्याशयेनाह—**यद्वे**ति (८८—१८) । तत्र वैदिकस्थलेऽपूर्ववाचकत्वेन विना गतिर्नास्तीतिकृत्वा लिङोऽपूर्ववाचकत्वम् । लोकस्थले तु अपूर्वव्यतिरेकेणापि धातुसाम्यद्वारा फलसाधनत्वोपपत्तौ स एव लिङर्थ इत्यर्थः । **क्रियामात्रस्ये**ति (८८—१९) । क्रियामात्रं परम्परासाधनत्वोपपादकम् । न च कार्यमात्रव्यापारेण पुष्टिसाधनत्वोपपत्तिरित्यत आह—**तद्व्यापारस्ये**ति (८८—१९) । तस्याः घृतपानादिरूपायाः क्रियाया यो व्यापारो धातुसाम्यादिस्तस्य लिङर्थत्वात् ।

अत्र शङ्कते—**न चे**ति (८८—१९) । यदि लिङः वैदिकस्थलेऽपूर्वे शक्तिः लौकिकस्थले धातुसाम्यादौ शक्तिः तदा शक्यतावच्छेदकभेदात् लिङो नानार्थत्वापत्तिः । समाधत्ते—**लोक** इति (८८—२०) । यथा सर्वेषामाख्यातानां कृतौ शक्तिः रथो गच्छतीत्यत्र गमनानुकूलकृतेरभावात् गमनानुकूलव्यापारे लक्षणा तथा लिङोऽपूर्व एव शक्तिः । यत्र लौकिकस्थलेऽपूर्वं नास्ति तत्र लौकिकलिङः परम्परासाधनत्वोपपादकव्यापारमात्रे लक्षणेति न नानार्थत्वं लिङः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धान्तमाह—**साधनत्वस्येति** (८८–२१)। आशुतरविनाशियागक्रियायां कालान्तरभाविफलसाधनत्वस्य फलकारणत्वस्यान्वयायोग्यतया वैदिकस्थले व्यापारेऽपूर्वे शक्तिः लौकिकस्थले व्यापारे लक्षणा इति प्राभाकरस्याभिमतमिति पूर्वानुवादः। दूषयति—**एतच्चेति** (८८–२२)। अन्वयायोग्यतेत्यत्र क्रियायां इष्टसाधनत्वान्वये योग्यता नास्ति। तत्र का योग्यता नास्ति? इत्याह—**कासाविति** (८८–२२)। या आशुतरविनाशिक्रियायां योग्यता नास्ति सा का इत्याह?—**न तावदिति** (८८–२३)। **सजातीय** (८८–२३) इति। घटेन जलमाहरेत्यत्र घटत्वेन रूपेण घटसजातीये जलाहरणान्वयदर्शनं वर्त्तते इति घटेन जलमाहरेत्यत्राऽन्वययोग्यताऽस्ति। वह्निना सिञ्चेदित्यत्रायोग्ये वाक्ये इदं लक्षणं सजातीयेऽन्वयदर्शनमित्यादिकं नास्ति। वह्नित्वेन रूपेण वह्निजातीये कुत्रापि वह्नौ सिञ्चनान्वयदर्शनं कुत्रापि[1] दृष्टं नास्ति। तत्र वह्निना सिञ्चेदिति वाक्ये सजातीयेऽन्वयदर्शनमिति लक्षणं नास्ति।

इदं लक्षणं दूषयति—**न तावदिति** (८८–२४)। सजातीयेऽन्वयदर्शनमित्यत्र यत् साजात्यं विवक्षितं क्रियाकारकपदार्थयोस्तत् किं येन केन रूपेण वा पदार्थतावच्छेदकरूपेण वा। आद्ये आह—**अग्निनेति** (८८–२४)। द्रव्यत्वेन रूपेणाग्निसजातीये जलादौ सिञ्चनान्वयस्य दृष्टत्वात् तत्रापि योग्यता स्यादित्यर्थः। द्वितीये त्वाह—**पदार्थतेति** (८८–२५)। अग्निना सिञ्चेदित्यत्र यत् किञ्चिद्रूपं द्रव्यत्वादिकं तेन रूपेण वह्निसजातीये जले यद्यपि सिञ्चनान्वयदर्शनं वर्त्तते तथापि पदार्थतावच्छेदकरूपेण वह्नित्वादिना वह्निसजातीये सिञ्चनान्वयदर्शनं नास्तीत्यतिप्रसङ्गो न। यदि पदार्थतावच्छेदकरूपेण साजात्यं विवक्षितं तर्हि दोषमाह—**अद्यजात** (८८–२५) इति। अद्यजातगोत्वेन रूपेण पयःपानान्वयः कुत्रापि दृष्टो नास्तीति तत्र योग्यता न स्यात्। अत्र यद्यप्यद्यजातगोत्वं न पदार्थतावच्छेदकं किन्तु अद्य १ जात २ गो ३ त्रयाणां[2] पदानां यो वाक्यार्थस्तस्यावच्छेदकं, परं न पदार्थतावच्छेदकम्। पदार्थतावच्छेदकं तु अद्यत्वं १ जातत्वं २ गोत्वं ३ तेन तेन रूपेण सजातीयेऽद्यत्वेन सजातीये १ जातत्वेन सजातीये २ गोत्वेन सजातीये ३ अन्वयदर्शनं वर्त्तते एवेति नायं दोषः। तथाप्यद्यजातगोशब्देन शृङ्गग्राहिकान्यायेन अयं पयः पिबतीति

---

१. one कुत्रापि is redundant. But I think this is a peculiarity of गुणरत्न's style।

२. To use only प्रातिपदिक's in this manner without a suitable विभक्ति is also a peculiarity of गुणरत्न's style. Or, it may be the style of the scribe.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाक्ये एतत्वेन रूपेण सजातीयोऽन्यो नास्तीति तत्र योग्यतालक्षणं नास्तीत्ययं दोषो द्रष्टव्यः । **तदभावादिति** (८९–१) तस्य सजातीयान्वयदर्शनरूपयोग्यतालक्षणस्याभावादित्यर्थः ।

**अशक्येति**(८९-१) । एकस्मिन् पदार्थे अपरपदार्थाभावाप्रतियोगित्वं योग्यता । वह्निना सिञ्चेदित्यत्र इदं योग्यतालक्षणं नास्ति । सिञ्चनपदार्थस्य वह्निपदार्थनिष्ठो यः सिञ्चनपदार्थाभावस्तत्प्रतियोगित्वमेव सिञ्चनस्य वर्त्तते । विलोक्यतेऽप्रतियोगित्वं जलेन सिञ्चतीत्यत्र । इदं पूर्वोक्तं लक्षणं वर्त्तते, सिञ्चनपदार्थस्य जलपदार्थनिष्ठो योऽभावः स सिञ्चनाभावो जले नास्ति किन्तु घटाद्यभावस्तस्याप्रतियोगित्वं जले तिष्ठति । इदमपि योग्यतालक्षणं निर्वक्तुं न शक्यते । वृक्षः कपिसंयोगीत्यादौ एतल्लक्षणाभावः । कुतः ? इदं योग्यं वाक्यं भवति । अत्र इदं योग्यतालक्षणं नास्ति, कुतः ? वृक्षपदार्थेऽपरपदार्थस्य योऽभावः कपिसंयोगाभावस्तत्प्रतियोगित्वमेव कपिसंयोगे वर्त्तते इत्यादिकमपि लक्षणं न सम्भवति ।

किं तद्योग्यतालक्षणमित्यत आह– **तस्मादिति** (८९–२) । बाधकप्रमाणाभाव एव योग्यता । परस्परपदार्थसंसर्गाबाध इत्यर्थः । स च वह्निना सिञ्चेदित्यत्र नास्ति । परस्परपदार्थयोः वह्निसिञ्चनयोः संसर्गे बाधकमेवास्ति । जलेन सिञ्चतीत्यत्र जलसिञ्चनपदार्थयोः संसर्गे बाधो नास्ति । तत्र योग्यतालक्षणं वर्त्तते । तद्योग्यतालक्षणं योजयति–**सा चेति** (८९–२) । यागस्वर्गसाधनत्वपदार्थयोः संसर्गे कुत्रापि बाधस्तु दृष्टो नास्ति इति तत्र योग्यता वर्त्तते किमर्थमपूर्वं लिङादिवाच्यम् । **सा चेति** (८९–२) । बाधकप्रमाणाभावो योग्यता । अत्रेति यागस्वर्गसाधनत्वयोर्वर्त्तत एव । **साधनत्वेनेति** (८९–३) । साधनत्वेन प्रकारेण सा बाधकप्रमाणाभावो योग्यता वर्त्तते एव । स बाधकप्रमाणाभावः कथं वर्त्तत इत्यत आह–**न हीति** (८९–३) । यागे स्वर्गसाधनत्वं केनापि प्रमाणेन बाधितं दृष्टं नास्ति येन बाधकप्रमाणाभावरूपा योग्यता न स्यात् । किञ्च लिङादिवाच्यमपूर्वं तदा स्यात् यदि यागे स्वर्गसाधनत्वबोधः, परम्पराघटकव्यापारमादायैवं चेत् स्यात् तदा परम्पराघटकोपस्थित्यर्थं लिङादिवाच्यमपूर्वं स्यात् । तच्च नास्त्येवेत्याह–**न चेति** (८९–४) । न हि कपालस्य घटकारणत्वबोधे व्यापारमादाय घटकारणत्वबोधः । **अन्वयबोध** (८९–४) इति । साधनत्वबोध इत्यर्थः । एतदेवाह–**प्रमाणाभावादिति** (८९–४) । सर्वत्र साधनत्वबोधः व्यापारमन्तर्भाव्यैव भवतीत्यं नियमो नास्ति । अत्र प्रमाणं नास्तीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राशङ्कते—न चेति (८९–४)। यद्यपि सामान्यतः साधनत्वबोधः व्यापारमनन्तर्भाव्य भवत्ययं नियमो नास्ति तथापि साक्षात् साधनत्वबाधे परम्परासाधनत्वबोधो यः स व्यापारमनन्तर्भाव्य भवतीति न। किन्तु साक्षात् साधनताबाधे यः साधनत्वबोधः स परम्परामादायैव विश्रान्तो भवति। परम्पराघटकस्तु व्यापारोऽपेक्षत एव। स व्यापारोऽपूर्वमेव लिङादिवाच्यम् कल्प्यते इत्याह—एतावतैवेति (८९–५)। एतावता साक्षात् साधनताबाधे परम्परासाधनत्वप्रतीतिरित्यर्थः। क्रियाव्यापारे (८९–५) इति। यागादिकर्मव्यापारे। तथाच साक्षात् साधनत्वबाधे परम्परासाधनता प्रतीयते। सा च परम्पराघटकेन विना न प्रतीयते। परम्पराघटकं तु अपूर्वं लिङादिवाच्यं विना न सम्भवतीति। न च युक्तमित्यनेन सम्बन्धः।

दूषयति—छिद्रेतरेति (८९–६)। घटेन जलमाहरेत्यत्र सच्छिद्रघटस्य जलाहरणायोग्यत्वात्। छिद्रेतरघटेन जलाहरणान्वयबोधो जायते इतिकृत्वा छिद्रेतरत्वेऽपि शक्तिकल्पनापत्तिः। न हि छिद्रेतरत्वबाधकं किञ्चित् पदान्तरं तिष्ठति। तथाच घटपदस्यैव छिद्रेतरत्वे शक्तिकल्पनापत्तिः। तथा च तत्र यदि छिद्रेतरत्वरूपेणैव सर्वत्र घटे जलाहरणान्वयबोधो नास्तीत्युत्तरं तदा यागे स्वर्गसाधनत्वबोधः साक्षात्साधनत्वबाधदशायामेव भवति अयं नियमो नास्ति येन परम्परासाधनत्वस्यैव प्रतीतिरावश्यकी स्यादित्यभिप्रायेणाह— न चात्रेति (८९–६)। यागे स्वर्गसाधनत्वग्रहे परम्पराकारणताप्रतीतिरस्ति [ इति ] अयं नियमो नास्ति। युक्तिमाह—साक्षादिति (८९–७)। यदा साक्षात्साधनत्वबाधप्रतिसन्धानं नास्ति तदानीं परम्परासाधनस्य स्फुरणमपि नास्तीति कुतः परम्पराघटकाऽपूर्वोपस्थित्यर्थं लिङादिशक्तिकल्पनमित्यर्थः। अत एवाह—चरणेति (९९–८)। अपूर्वे लिङ्शक्तिप्रसारणं नास्तीत्यर्थः।

ननु साक्षात्साधनत्वबाधप्रतिसन्धानं यदा वर्त्तते तदानीं तु परम्परासाधनत्वप्रतीतिरावश्यकी यतः साक्षात्साधनत्वबाधे परम्परासाधनत्वेन विना साधनत्वमात्रमेवाऽनुपपन्नं स्यादित्यत आह—किञ्चेति (८९–९)। एकविशेषबाधेऽपि न सामान्यान्वयबाध इति न्यायेन साक्षात्साधनत्वबाधेऽपि साधनत्वसामान्यबाधो नास्ति। यथा घटे नीलरूपबाधेऽपि रूपसामान्यबाधो नास्ति तद्वदत्रापि साक्षात्साधनत्वबाधे साधनत्वसामान्यबाधो नास्ति। एतदेव विवृणोति—कारणत्वं हीति (८९–९)। तस्येति (८९–१०)। तस्य कारणत्वसामान्यस्य साक्षात्त्वं परम्परात्वं च विशेषणम्। यद्यपि साक्षात्त्वं परम्परात्वं कारणत्वं सामान्याश्रयनिष्ठो धर्मः तस्यैव विशेषणं तथापि कारणत्वं न कारणस्वरूपातिरिक्तमित्यभिप्रायेण कारणत्वस्य विशेषणमित्यभिप्रायेणोक्तं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाच विशेषणबाधे विशेषणस्यान्वयो मा भूत् । विशेषणस्य साक्षात्त्वस्य बाधे साक्षात् कारणत्वस्य अन्वयो मा भूत् । कारणत्वसामान्यं यद् विशेष्यं तस्यान्वय-बाधस्तु नास्तीत्याह–**तथात्रे**ति (८९–१०)। विशेषणे साक्षात्त्वरूपे बाधात् । **तस्ये**ति (८९–११) । साक्षात्त्वकारणत्वस्यान्वयो यागेऽन्वयो मा भूत् ।

ननु साक्षात्त्वरूपकारणबाधे कस्यान्वयो भविष्यतीत्यत आह–**सामान्ये**ति(८९-११) । साधनत्वसामान्यस्येत्यर्थः । एकविशेषबाधे सामान्यान्वयबाधो नास्तीत्यत्रानुरूपं दृष्टान्तमाह–**दण्डे**ति(८९-११) । पुरुषो विशेष्यं तस्यादण्डिभ्यो व्यावर्त्तकत्वाद्विशेषो विशेषणं दण्डस्तस्य बाधेऽपि विशेष्यस्य पुरुषस्य बाधो नास्ति किन्तु पुरुषस्यान्वय एव । पूर्वोक्तं दृष्टान्तमपि निराकरोति । **एवमि**ति(८९-१२) । घटे छिद्रत्वं विशेषधर्मः । तस्य बाधेऽपि छिद्रत्वेन जलाहरणान्वयो मा भूत् घटत्वेन रूपेण स्यादेवान्वय इत्याह–**घटत्वेने**ति (८९-१२)। **तत्रापी**ति(८९-१३) । जलाहरणादौ घटत्वेनान्वयबोधोऽविरुद्ध एव । अत्राशङ्कते–**घटत्वस्ये**ति(८९-१३) । अयोग्यवृत्तिधर्मेण घटत्वेन कथमन्वयः । जलाहरणेऽयोग्यो यः छिद्रघटस्तद्वृत्तिना घटत्वेन कथं जलाहरणान्वयः । **छिद्रसाधारण्यादि**ति (८९-१३) । घटत्वस्य छिद्रघटवृत्तित्वादित्यर्थः । यथाऽच्छिद्रे घटे घटत्वं तद्वत् सच्छिद्रेऽपि घटत्वं वर्त्तत एवेत्यर्थः । समाधत्ते–**तथात्वे**-(८९-१४) इति । अयोग्यवृत्तिधर्मेण नान्वय इति न, किन्तु अयोग्यमात्रवृत्तिधर्मेणान्वयो वर्त्तते । अन्यथा गोत्वस्य देशान्तरगोवृत्तितया देशान्तरगोव्यक्तेरानयनान्वयासम्भवेन गोत्वेनानयनान्वयो न स्यात् । तत्र यदि अयोग्यां गोव्यक्तिमपहाय योग्यगोव्यक्तिमादाय गोत्वेनानयनान्वयः न तु देशान्तरस्थगवेतरगोत्वेनान्वयस्तथाऽत्रापि घटत्वस्यायोग्यछिद्रवृत्तित्वेऽपि योग्यतया छिद्रव्यक्तिमपहायाच्छिद्रव्यक्तिमादाय घटत्वेनैवान्वयो न तु छिद्रेतरघटत्वेनेत्यर्थः । **तथात्वेऽपी**ति (८९–१४) । घटत्वस्यायोग्यत्ववृत्तित्वेपीत्यर्थः । ननु योग्यमात्रवृत्तिधर्मेणैव सर्वत्र क्रियान्वयो न तु योग्यायोग्यसाधारणेन धर्मेण अत एव देशान्तरस्थगोव्यक्तेरानयनान्वयायोग्यत्वेऽपि गोपदलक्षणया देशान्तरस्थगवेतरगोत्वेन रूपेणोपस्थितौ आनयनान्वयः । एवं घटपदलक्षणयाऽपि छिद्रेतरत्वेनोपस्थितौ जलाहरणान्वय इत्यत आह–**नहि**ति (८९–१४) । अच्छिद्रत्वेनेत्यर्थः । बाधकमाह –**युगपदि**ति (८९–१४) घटपदात् शक्त्या घटत्वेनोपस्थितिर्लक्षणयाऽच्छिद्रत्वेन तदा युगपद्वृत्तिद्वयविरोधः । **युगपद्वृत्तिद्वयविरोधस्या**(८९–१५)यमर्थः द्वाभ्यां वृत्तिभ्यां एकदा एकस्मात् पदान्नानार्थोपस्थितिस्तु नास्त्येव, तथाच घटपदात् शक्त्या घटत्वेनोपस्थितौ लक्षणया छिद्रेतरत्वे एकदा एकस्माद् घटपदात् उपस्थितौ वृत्तिद्वयविरोधः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलक्षणेन शक्तिग्रह इति दूषयति—**न चेति** (८९–१६) । **उपलक्ष्यस्येति** (८९–१६) । अनुगतस्योपलक्ष्यतावच्छेदकस्याभावादित्यर्थः । एवमग्रेऽपि । उपलक्षणं नाम उपलक्ष्यतावच्छेदकम् । **तदपूर्वत्वम्** (८९–१६) । उपलक्ष्यमपूर्वम् । तेन **अपूर्वत्वेन समम्** । तस्येति कोऽर्थः, **तस्याऽपूर्वस्य** सम्बन्धाज्ञानात् । यदि उपलक्षणेन उपलक्ष्यस्य सम्बन्धश्चेत्[1] ज्ञायते तदा तेन रूपेणोपस्थितिर्भवति । यथा काकवन्तो देवदत्तगृहा इत्यत्र काकपदेन उत्तृणत्वमुपलक्ष्यते । उपलक्ष्यतावच्छेदकस्य उत्तृणत्वस्य गृहस्य सम्बन्धश्चेत् ज्ञातो भवेत् तदा तेन रूपेण प्रतीतिः । अन्यथा तु न । एवमत्रापि । अपूर्वत्वेनाऽपूर्वस्य सम्बन्धो ज्ञातो न वा । यदि न ज्ञातस्तदा कथं तेन रूपेणोपस्थितिः । यदि ज्ञातस्तदाह—**प्रतिसन्धाने वेति** (८९–१७) । अपूर्वं हि कल्प्यं तच्च अपूर्वत्वेन रूपेण प्रथमतो ज्ञातं तदाऽपूर्वत्वक्षतिरित्यर्थः ।

प्रकारान्तरमाशङ्कते । **न चेति** (८९–१८) । तथाच लिङ्पदस्य कार्यत्वेन रूपेण कार्ये एव शक्तिस्तच्च कार्यमस्थिरक्रियादिकमपि भवतीति तद्वारणायापूर्वत्वं प्रयोगोपाधिः । प्रयोगोपाधिस्तु शक्यतावच्छेदकरूपेण शक्योपस्थितौ अतिप्रसङ्गवारणार्थं य उपाधिः स प्रयोगोपाधिः । अत्र च कार्यत्वेन रूपेण स्थिरास्थिरघटादिवारणार्थं लिङ्पदस्यापूर्वत्वं प्रयोगोपाधिः । अत्रानुरूपं दृष्टान्तमाह—**पङ्कजपदेति** (८९–१९) । केवलयोगवादिनां मीमांसकानां पङ्कजनिकर्तृत्वस्य कुमुदजलजन्तुसाधारण्यात् तत्र प्रसङ्गवारणार्थं पद्मत्वं प्रयोगोपाधिः तद्वदत्रापूर्वत्वं प्रयोगोपाधिः ।

दूषयति—**अप्रतीतस्येति** (८९–१९) । यथोपलक्ष्यतावच्छेदकं प्रतीतं चेद्भवति तदा तेन रूपेणोपस्थितिः । प्रतीतं चेन्न भवति तदा तेन रूपेण उपस्थितिर्न भवति । तथाऽत्रापि यदि अपूर्वत्वं प्रयोगोपाधिस्तद्यपूर्वत्वेन रूपेणोपस्थितं स्यात् तदा स प्रयोगोपाधिस्तदेव च न सम्भवति । वाक्यार्थबोधात् पूर्वं तस्याऽपूर्वस्याऽपूर्वत्वेन रूपेणोपस्थितिरेव नास्ति । यद्युपस्थितिः स्यात्तदाऽपूर्वत्वं व्याहन्येत । दूषणान्तरमाह—**प्रयोगोपाधीति** (८९–१९) । पद्मत्वे प्रयोगोपाधिर्न भवतीति व्याख्यातं पूर्वोक्तं दूषणम् ।

निरस्यति—**न चेति** (८९–२१) । विहितस्थले यथा लिङ्पदस्याऽपूर्वं वाच्यं तथा निषेधस्थलेऽपि न कलञ्जं भक्षयेदित्यादावपि लिङ्पदस्यापूर्वं वाच्यमित्यर्थः । **न चेत्यारभ्य** (८९–२१) **लाभ**(८९-२१)पर्यन्तेनान्वयः । दूषयति—**लोके** इति (८९–२१) । लिङ्पदस्य क्रियायामेव शक्तिर्गृहीता वर्तते इतिकृत्वा लिङ्पदात् क्रियाया

१. Use of both यदि and चेत् or use of यदि twice is also stylistic peculiarity of गुणरत्न.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवोपस्थितिः न कलञ्जं भक्षयेदित्यादौ अत्र क्रियाया असम्भवाल्लिङ्पदात् कथं क्रियोपस्थितिः स्यात् । कुतः ? कलञ्जभक्षणनिषेधस्य क्रियारूपत्वाभावात् । तस्मात्तत्र निषेधस्थले अपूर्वलाभो न स्यात् ।

अत्राशङ्कते—**न चेति** (८९–२२) । **तत्रे**ति विहितस्थले लिङ्पदात् शक्त्या अपूर्वोपस्थितिनिषेधस्थले लिङ्पदात् लक्षणया निषेधाऽपूर्वस्योपस्थितिरिति न च । दूषणमाह—**प्रमाणे**ति (८९–२२) । अपूर्वत्वेन रूपेण उभयोरपूर्वयोः समानत्वे एकत्र शक्तिरपरत्र लक्षणेति नियामकाभावात् निषेधापूर्वमेव लिङ्पदवाच्यं विहिताऽपूर्वे लक्षणा इति वैपरीत्यमेवास्तु इत्याह । **वैपरीत्यस्ये**ति(८९–२२) । ननु यागस्य स्वर्गसाधनत्वान्यथाऽनुपपत्त्या लिङ्पदवाच्यमपूर्वमित्यत आह—**अन्यथे**ति (८९–२३) अपूर्वस्य लिङ्पदवाच्यतां विनाऽपि यथा स्वर्गसाधनत्वान्वयस्तथा प्रागेवोक्तम् ।

दूषणान्तरमाह—अपूर्ववाच्यतायाम् **ब्रह्महत्ये**ति (८९–२४) । यदि विहितयागादिस्थले स्वर्गसाधनत्वान्वयोपपत्त्यर्थं लिङ्वाच्यमपूर्वं, तदा ब्रह्महत्यादिक्रियाया नरकसाधनत्वग्रहो न स्यात् । कुतः ? ब्रह्महत्यादिक्रियाया आशुतरविनाशित्वेन नरकसाधनत्वग्रहो न स्यात् । ननु यथा यागक्रियायाम् अपूर्वं वाच्यं तथा अत्रापि ब्रह्महत्यायां नरकफलव्यापारोऽपूर्ववाच्यमस्तु इत्यत आह—**तत्रे**ति (८९–२४) । तत्र ब्रह्महत्यादिस्थले परेण दुरदृष्टं कल्प्यमेव स्वीक्रियते न तु लिङादिवाच्यम् ।

भवतु वा ब्रह्महत्यादिक्रियायां दुरदृष्टं लिङादिवाच्यं तथाऽपि अनुभवस्य स्मरणं प्रति कारणताग्रहे का गतिरित्याह—**अनुभवस्ये**ति (८९–२५) । तथाच संस्कारस्याऽतीन्द्रियत्वात् तद्द्वारा ग्रहे कार्यकारणभावनिश्चयो न स्यात् इत्यर्थः । **तत्रापी**ति (९०–१) अनुभवस्मरणस्थले यागे स्वर्गसाधनत्वान्वयानुपपत्तिवत् अनुभवस्य स्मरणं प्रति साधनत्वग्रहो न स्यात् इत्यर्थः । प्राभाकरोक्तदूषणगणस्तु साधनत्वान्वयानुपपत्तिः । अनुभवस्य स्मरणं प्रति तद्द्वारा ग्रहे कारणत्वग्रहश्चेत् तदाह—**अत्रे**ति (९०–२) । अनुभवस्मरणयोः तद्द्वारा ग्रहे चेत् कारणत्वग्रहस्तदा यागस्वर्गयोः किमपराद्धं कारणत्वग्रहेण । परिहासपूर्वमुपसंहरति **तस्मादि**ति (९०–२) । अपूर्वे वाच्यत्वाभिमानः **अपूर्व** (९०–३) एव निर्युक्तिक एव । **परस्ये**ति (९०–३) प्राभाकरस्येति । **तस्मात्** (९०–२) यागे स्वर्गसाधनत्वग्रहानन्तरम् । सा स्वर्गसाधनता व्यापारेण विना न सम्भवतीति अपूर्वमेव व्यापारः कल्प्यते ।

१. Text reads only द्वारा ग्रहे instead of तद्द्वारा ग्रहे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राशङ्कते **नन्विति** (९०–४)। अपूर्वं कल्प्यमपि न भवति, कुतः ? इत्यत आह—**अन्यथेति** (९०–४) अपूर्वव्यापारेण विनाऽपि स्वर्गसाधनत्वं सम्भवत्येवेत्यर्थः। तर्हि को व्यापार इत्यत आह—**याग** (९०–४) इति। तथाच यागध्वंस एव यागजन्यो फलपर्यन्तस्थायी स एव व्यापारोऽस्त्वित्यर्थः। अत्राशङ्कते—**ध्वंसस्येति** (९०–५)। तथा च ध्वंसस्यानन्तत्वेन फलस्याप्यनन्तत्वापत्तिः। यावत्पर्यन्तसामग्री तावत्पर्यन्तकार्यं तथाच अनिर्मोक्षापत्तिरिति स्वर्गसुखस्यानन्तत्वात् तस्य विनाशो नास्तीति अशेषविशेषगुणोच्छेदो न स्यादित्यर्थः। दूषयति—**तावदिति** (९०–६)। तथाच अपूर्वकल्प्यवादिनोऽपि मते तादृशादपूर्वादनन्तं फलं कुतो न भवति। यद्यपूर्वस्य तादृशः स्वभावः तावत्कालमेव फलं जनयितव्यं तर्हि ध्वंसस्यापि तथा स्वभावोऽस्तु तावत्समयं तावत्कालं यत् फलं तस्य यज्जनकत्वं स स्वभावो यस्य तस्य भावः **स्वाभाव्यम्** (९०–६) इति।

ननु ध्वंसस्याभावरूपत्वेन गुरुत्वात् अपूर्वमेव व्यापारो लघुभूत इत्यत आह—**धर्मीति** (९०–७)। अपूर्ववादिमते अपूर्वमपि कल्प्यं तत्र व्यापारत्वं धर्मोऽपि कल्पनीयः। प्रकृते तु ध्वंसस्योभयवादिसिद्धत्वात् धर्मी सिद्धस्तत्र व्यापारमात्रं धर्म एव कल्प्यते। धर्मी ध्वंसः व्यापारत्वं धर्मः। स एव कल्प्यः। धर्मी अपूर्वं। तत्कल्पनातः सिद्धे धर्मिणि यागध्वंसे व्यारत्वमात्रकल्पना लघीयसी।

शङ्कते—**नन्विति** (९०–९)। तथाच धर्म एव यागस्य व्यापारः येन कीर्त्तनेन फलजनको व्यापार धर्म एव नाश्यते। व्यापारनाशस्तु ध्वंसे व्यापारे कल्प्यमाने न सम्भवतीत्याह—**तत् त्विति**(९०–१०)। तत् क्षरणं नाश इत्यर्थः। कुत ? इत्यत आह **विरोधादिति** (९०–१०)। ध्वंसस्य नाशे नष्टस्य घटस्य पुनरुन्मज्जनप्रसङ्गः। दूषणान्तरमाह—**प्रायश्चित्तेति** (९०–१०)। यदि अगम्यागमनात् पापं नोत्पद्यते पापध्वंस एव चेद्व्यापारस्तदा प्रायश्चित्तं विफलं स्यात्। दूषणान्तरमाह—**यागेति** (९०–१०)। यदि यागध्वंस एव व्यापारस्तदा कारणीभूताभावप्रतियोगित्वेन यागस्य प्रतिबन्धकता स्यात्, स्वर्गं प्रति कारणीभूतो योऽभावः यागध्वंसस्तत्प्रतियोगित्वं यागस्य वर्त्तते इतिकृत्वा यागस्य प्रतिबन्धकता स्यात् इत्यर्थः। **नैवमिति** (९०–११)। ध्वंसो व्यापारो **न सम्भवती**(९०–१०)त्युपसंहारः। **ननु** (८९–९) इत्यारभ्य **न** (८९–१०) पर्यन्तं शङ्का।

दूषयति—**अस्त्विति**(९०–१२)। माऽस्तु यागध्वंसो व्यापारः व्यापाराऽनपेक्षयैव स्वर्गो भोगयोग्यमतीन्द्रियं यागेन जन्यते तेन च शरीरेण ऐहिकशरीरपरित्यागानन्तरं स्वर्गो जन्यत इति न व्यापारान्तरापेक्षा। प्रकारान्तरमाह—**यद्वेति**(९०–१३)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा च कल्पनाया अविशेषे कालपरम्परैव व्यापारोऽस्तु । ननु कालस्य सर्वसाधारणत्वात् स न व्यापारः सम्भवतीत्यत आह—**अस्त्विति**(९०—१३) । तथा च याग एव सूक्ष्मरूपेण फलपर्यन्तं तिष्ठतीति न व्यापारान्तरस्याप्यपेक्षा । क्रियाशब्देनात्र यागक्रिया । सिद्धान्तमाह—नैयायिकः—**न तावदिति**(९०—१३) । ध्वंसव्यापारवत्त्वं तु पूर्वमेव खण्डितम् । यदि यागक्रियायाः शरीरं व्यापारः तदा प्रलयानन्तरं यत् फलं तन्न स्यात् । प्रलये सर्वशरीराणां नाशात् । तथा च इदानीं क्रियमाणस्य प्रलयानन्तरं यत् फलं तन्न स्यात् । तस्य यागव्यापारस्य शरीरस्य प्रलये नष्टत्वात् । ननु इदानीं क्रियमाणात् यागात् प्रलयानन्तरं फलं नास्त्येव इत्यत आह—**प्रलयानन्तरमिति**(९०—१४) । तथा च प्रलयानन्तरमपि इदानीं क्रियमाणात् यागात् स्वर्गादिरूपं फलं प्रमाणसिद्धं भवति । बलिरिन्द्रो भविष्यतीत्यादिना प्रलयानन्तरमपि स्वर्गो भविष्यति

अत्राशङ्कते—**प्रलये**(९०—१५)इति । तथा च यागजन्यं स्वर्गोपभोगयोग्यं तादृशं शरीरं यत् प्रलयेऽपि न नश्यते इत्यर्थः । दूषयति । **धर्मीति**(९०—१५) । तथा च येन प्रमाणेन प्रलयः सिद्धः तेन प्रमाणेन सकलकार्यद्रव्यविनाशविशिष्ट एव सिद्धः । तथा च प्रलये सर्वेषां कार्यद्रव्याणां विनाशात् तन्मध्ये शरीरस्यापि विनाशः । कुतः ? शरीरस्यापि कार्यद्रव्यरूपत्वेन तस्यापि नाशात् कथं व्यापारत्वं शरीरस्य । दूषणान्तरमाह—**किञ्चेति**(९०—१७) । तथाच शरीरं प्रति यागस्य कथं कारणत्वम् ? । साक्षाद्यागजन्यत्वं शरीरस्य न सम्भवति, किञ्चिन्मध्ये व्यापारो वक्तव्यः, तथा च सः को व्यापार इत्यत आह—**अत**(९०—१७)इति । शरीरारम्भकपरमाणुक्रियाद्वारा शरीरस्य यागजन्यत्वं वक्तव्यं, न च सा परमाणुक्रिया यागजन्या इत्याह—**तस्याश्चेति**(९०—१८) । तस्याः परमाणुक्रियायाः यागजन्यत्वं न सम्भवति । कुत इत्यत आह—**व्यभिचारादिति**(९०—१८) । यागव्यतिरेकेणापि परमाणुक्रियायाः नोदनाभिघातात् जायमानत्वात् । अत्राशङ्कते—**न चेति** (९०—१८) तथा च नोदनाभिघातजन्या परमाणुक्रिया विलक्षणा, यागक्रियाजन्या परमाणुक्रिया सा विलक्षणा । तथा च विलक्षणां परमाणुक्रियां प्रति यागो न व्यभिचारीति । परमाणुक्रियातज्जन्यशरीरद्वारा स्वर्गं प्रति यागस्य कारणत्वं स्यादेव ।

दूषयति—**तद्विशेषेति**(९०—२०) । अक्लृप्तयागजन्यपरमाणुक्रियायां स्वर्गोपभोगजनकशरीरारम्भकवैजात्यकल्पने कल्पनागौरवप्रसङ्ग इत्यर्थः । नोदनाभिघातजन्यपरमाणुक्रियातः यागजन्यपरमाणुक्रियायाः वैजात्यम् । विपक्षे बाधकमाह—**अक्लृप्ते-**

२४

ति(९०–२०)। तथा च दण्डादीनामपि घटादिकार्यं प्रति कारणत्वं न स्यात्। यत्र दण्डाभावे कार्यं न जायते तत्र कपालविशेषो नास्ति। यथा दण्डाभावे घटादिकार्यं न जायते इतिकृत्वा दण्डः कारणं तच्च नास्त्येव। कुतः? यत्र दण्डाभावे कार्यं न जायते तत्र कपालविशेषो नास्तीति कपाले विशेषं परिकल्प्य दण्डादीनामपि कारणत्वं व्याहन्येत। तत्र कपालस्थले अतीन्द्रियाक्लृप्तविशेषकल्पने गौरवमिति दण्डः कारणमिति यदि तदा प्रकृतेऽपि तुल्यम्। **अतिप्रसङ्गादिति**(९०-२१)। पूर्वोक्तयुक्त्या दण्डादीनामपि कारणत्वं न स्यादित्यर्थः। यागस्य समयपरम्परैव व्यापार इति पूर्वोक्तं निरस्यति–**अत एवेति**(९०–२१)। यतः शरीरं न व्यापारः ध्वंसोऽपि न व्यापारः एवं कालपरम्पराऽपि न व्यापारस्तस्याः कालपरम्परायाः साधारणकारणत्वात्।

कालपरम्पराव्यापारकल्पने अनुभवस्य स्मरणं प्रति कालपरम्परैव व्यापारो भविष्यतीति संस्कारस्याप्युच्छेदप्रसङ्ग इत्याह–**किञ्चेति**(९०–२२)। **एवंविधेति**(९०–२२)। कालपरम्परारूपव्यापारेणेत्यर्थः। अत्राशङ्कते–**नन्विति** (९०–२३)। मध्ये शङ्कते–**न चेति**(९०–२३)। तथा च **चिरध्वस्तस्य**(९०–२३) वस्तुनः फलं प्रति जनकता सा व्यापारद्वारैव। व्यापारं विना कारणत्वं न स्यादित्यर्थः। दूषयति–**व्याप्ताविति**(९०–२५)। चिरध्वस्तस्य या कारणता सा व्यापारद्वारैव इति व्याप्तौ प्रमाणाभावात्। अत्राशङ्कते–**न चेति**(९०–२५)। यदि चिरध्वस्तस्य व्यापारं विना कारणत्वं स्यात् तदा कारणाभावेऽपि कार्यम् अकारणाभावेऽपि कार्यं तदा कारणाकारणयोरविशेषापत्तिः। स्वर्गेऽकारणं घटः तदभावेऽपि कार्यं स्वर्गलक्षणं जायते, यागाभावे चेत् कार्यं स्वर्गस्तदा घटयागयोरविशेषप्रसङ्गः। कुतः? कार्यकाले स्वर्गकार्यकाले घटयागयोरविद्यमानत्वात्। **निरन्वयेति**(९०-२५)। व्यापारशून्यं सच्चिरध्वस्तमित्यर्थः। दूषयति–**कारणत्वस्येति**(९०–२६)। उभयोः चिरध्वस्ताकारणयोः कार्यकालेऽविद्यमानत्वेऽपि चिरध्वस्ते कारणेऽकारणापेक्षया कारणत्वमेव विशेषः। अकारणे कारणत्वं नास्त्ययमेव विशेषः। दूषयति–**एतदपीति**(९०-२६)। यदि चिरध्वस्तस्य व्यापारं विना कारणता स्यात् तदा कारणत्वमेव न स्यात्। कुतः? कारणत्वं हि कार्याव्यवहितपूर्ववर्तित्वम्। व्यापारशून्यस्य चिरध्वस्तस्य कार्याव्यवहितपूर्ववृत्तित्वमेव नास्ति, कथं कारणत्वं स्यात्। व्यापारश्चेत् चिरध्वस्तस्य स्वीक्रियते तदा व्यापार एव कार्याव्यवहितपूर्ववृत्तित्वं तच्चिरध्वस्तस्यैव चिरध्वस्तस्य कारणता स्यादित्यर्थः। ननु व्यापारपक्षेऽपि कार्याव्यवहितपूर्ववृत्तित्वं चिरध्वस्ते नास्ति कथं कारणत्वं स्यात् इत्यत आह–**तत्पूर्वेति** (९०–२७)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कार्याव्यहितपूर्वे इत्यर्थः । तथाच व्यापारव्यापारिणोर्मध्ये यदन्यतरस्य कार्याव्यवहित-पूर्ववृत्तित्वं तदेव व्यापारिणः पूर्ववृत्तित्वं कारणत्वमित्यर्थः । व्यापारी यागः । व्यापारोऽपूर्वं, तथाच यद्यपि यागस्य स्वर्गाव्यवहितपूर्ववृत्तित्वं नास्ति तज्जन्यस्याऽपूर्वस्य स्वर्गाव्यवहितपूर्ववृत्तित्वं वर्त्तते तद्यागस्यैव पूर्ववृत्तित्वमिति यागकारणत्वमक्षतमिति ॥

**वाचनाचार्यगुणरत्नगणिविरचिते शशिधरटिप्पनेऽपूर्ववादः ॥ छ ॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अन्यथाख्यातिवादटिप्पनम् ।

अन्यथाख्यातौ प्राचीनविप्रतिपत्तिनिराकरणपूर्वकं विप्रतिपत्तिं रचयितुमुपक्रममाह—**अन्यथाख्याता**विति(९१–१) । ज्ञानस्य व्यधिकरणप्रकारकत्वे । **सम्प्रदाये**ति(९१–१) । अत्रायमाशयः । नैयायिकमते इदं रजतमित्यत्र प्रथमतः शुक्तौ चाकचिक्यं दृष्ट्वा पुरोवर्त्तिशुक्तिरजतयोः नेदं रजतमिति भेदग्रहो नास्ति तदानीं चाकचिक्यवशात् स्मृतं यद्रजतं तद्वृत्ति यद्रजतत्वं तेन सह पुरोवर्त्तिशुक्तेः शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं जायते, इदमेव यदरजतविशेष्यकं रजतत्वप्रकारकं ज्ञानं स एव भ्रमः । सैव चाऽन्यथाख्यातिः । प्राभाकरमते तु चाकचिक्यवशात् स्मृतं यद्रजतं तेन सह भेदाग्रहः १ पुरोवर्त्ति ज्ञानं २ रजतस्मरणं ३ इति त्रयं प्रभाकरमते स एव भ्रमः । अत एव नैयायिकानां या भ्रमसामग्री स्मृतरजतभेदाग्रहः पुरोवर्त्तिज्ञानम् इदमेव शुक्तिरजतयोर्भेदाग्रहसहितं यत् पुरोवर्त्तिज्ञानं रजतस्मरणमिति ज्ञानद्वयम् स एव भ्रमः प्राभाकरमते । अत एव नेदं रजतमिति विपरीतदर्शनकाले रजतस्मरणं पुरोवर्त्तिज्ञानम् इदं ज्ञानद्वयं यद्यपि तिष्ठति तथाऽपि नैयायिकानां मते भ्रमो नोत्पद्यते । प्राभाकराणां तु नैयायिकाभिमता या भ्रमसामग्री तद्रूपो यो भ्रमः सोऽपि नास्ति, शुक्तिरजतयोर्भेदाग्रहस्याभावात् । ज्ञानद्वयवद् भेदग्रहोऽस्ति भेदाग्रहस्यापि भ्रमसामग्रीत्वात् । अत एव सुषुप्तौ भेदाग्रहस्य विद्यमानत्वेऽपि पुरोवर्त्तिज्ञान-रजतस्मरणरूपा या भ्रमसामग्री सैव नास्तीति सुषुप्तौ भ्रमो नोत्पद्यते नैयायिकमते । प्राभाकराणां तु नैयायिकमते या भ्रमसामग्री स एव भ्रमः । सा भ्रमसामग्री तु ज्ञानद्वयात्मिका पुरोवर्त्तिज्ञानं १ रजतस्मरणं च २ तदात्मिका भ्रमसामग्री सैव नास्ति । तथा त्रयं मिलित्वा भ्रमसामग्री भेदाग्रहः १ पुरोवर्त्तिज्ञानं २ रजतस्मरणं ३ [इति त्रयं] मिलित्वा भेदसामग्री भवति । तथा च नैयायिकमते प्रथमतः पुरोवर्त्तिज्ञानं १ तदनन्तरं पुरोवर्त्तिनि यच्चाकचिक्यं दृष्टं तस्माद्यद्रजतस्मरणं जायते तद् द्वितीयं २ तयोः पुरोवर्त्तिस्मृतरजतयोर्यो भेदग्रहाभावलक्षणो भेदाग्रहः ३ इति त्रयं भ्रमसामग्री तया सामग्र्या शुक्तिविशेष्यकरजतत्वप्रकार-

१. आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरेव च ।
तथाऽनिर्वचनख्यातिरित्याहुः ख्यातिपञ्चकम् ॥१॥

२. भेदग्रहो यत्रास्ति नेदं रजतमिति असंसर्गग्रहो यत्रास्ति रजतत्वं नास्तीत्येतादृशे ज्ञाने भ्रमो नास्ति उक्तवैपरीत्ये भ्रमोऽस्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कज्ञानलक्षणो भ्रमो जायते । नैयायिकमते व्यधिकरणप्रकारकज्ञानलक्षणो भ्रमः । प्राभाकराणां तु अनया सामग्र्या शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं भिन्नं जायते इदं नास्ति प्रमाणाभावात्, किन्तु नैयायिकाभिमतत्रितयरूपा या भ्रमसामग्री स एव भ्रमः । न तु सामग्रीजन्यमतिरिक्तं शुक्तिविशेष्यकं रजतत्वप्रकारकं विशिष्टज्ञानमन्यथाख्यातिरूपं भ्रमः ।

**अरजतमिति** (९१–१) । तथा च अरजतस्य शुक्त्यादेर्यदा रजतत्वप्रकारकज्ञानविषयता आगता तदेव शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं भ्रमः इति नैयायिकानां विधिकोटिः । यदा रजतस्य शुक्त्यादेः रजतत्वप्रकारिका ज्ञानविषयता नास्ति तदानीं शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं व्यधिकरणप्रकारकं स भ्रमो नास्तीति । **न वेति**(९१–२) प्राभाकराणां कोटिः ।

विप्रतिपत्त्यन्तरमाह–**रजत[ज्ञान]मिति**(९१–२) । रजतत्वप्रकारकं ज्ञानम् अरजतविशेष्यकम् । अत्रापि अरजतविशेष्यकं रजतत्वप्रकारकं ज्ञानं स एव भ्रमः पूर्ववदेव विधिकोटिर्नैयायिकानां निषेधकोटिः प्राभाकराणाम् ।

विषयतापक्षमधिकृत्याह–**अरजतेति**(९१–२) । ऐतन्मते[1] अरजतविशेष्यकरजतत्वप्रकारकज्ञानं न भ्रमः किन्तु अरजतविशेष्यकरजतत्वप्रकारकज्ञानविषयताकत्वं भ्रमः । तदेवाह–**रजतत्वप्रकारकेति**(९१–२) । तथा चारजतस्य शुक्त्यादेः रजतत्वप्रकारकविषयताश्रयत्वमागतं स एव भ्रमः । **न वेति**(९१–३) पूर्ववत् । विशेष्यिकां विप्रतिपत्तिमाह–**रजतत्वेति** (९१–३) । अत्रापि रजतत्वप्रकारिका विषयता चेदरजतनिष्ठा आगता तदा अरजतविशेष्यकं रजतत्वप्रकारकविषयताज्ञानमागतमित्यन्यथाख्यातिसिद्धिः ।

ज्ञानपक्षिकां विप्रतिपत्तिमाह–**ज्ञानमिति**(९१–४)। **स्वविषयतेति**(९१-४) । विशेष्यनिष्ठा विषयतेत्यर्थः । अत एव शुक्तिविषयताकं यद्रजतत्वप्रकारकं ज्ञानं स एव भ्रमः । **इदमिति**(९१–४) । पुरोवर्तिनि यदिदं ज्ञानं तद्विशेष्यनिष्ठा या विषयता तया व्यधिकरणो यः प्रकारो रजतत्वादिस्तेनावच्छिन्ना या विषयता सा विद्यते यस्य तत्कत्वम् । तथा च पुरोवर्त्तिज्ञानस्य पुरोवर्त्तिविषयताव्यधिकरणप्रकारावच्छिन्नविषयताकत्वं स एव भ्रमः ।

१. नैयायिकैकदेशिमते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विप्रतिपत्त्यन्तरमाह—**ज्ञानमि**ति(९१—४)। तथा च ज्ञानं विशिष्टज्ञानत्वेन प्रवृत्तिजनकं चेदागतं, तदा विसंवादिप्रवृत्तिस्थले विशिष्टज्ञानं प्रवर्तकं वक्तव्यं तच्च पुरोवर्तिशुक्तिविशेष्यकं रजतत्वप्रकारकं विशिष्टज्ञानं तदेव भ्रमः।

दूषयति—**समूहे**ति(९१—६)। तथा च शुक्तौ रजते च इमे शुक्तिरजते इदं यत् समूहालम्बनं प्रमारूपं तादृशमेव ज्ञानं सिध्यति, न त्वयन्थाख्यातिरूपम् इदमपि समूहालम्बनं शुक्त्यंशेऽरजतविशेष्यकं प्रमारूपं तद्रजतांशे रजतज्ञानं भवति, अरजतं या शुक्तिस्तद्विषयं भवति, रजतांशे यद्रजतत्वप्रकारकं ज्ञानं तस्य विषयोऽपि भवति यतः शुक्तिरजतयोरिदं एकमेव समूहालम्बनरूपं ज्ञानम्। **नापी**ति(९१—६)। इदमेव यत्समूहालम्बनं शुक्तिरजतोभयविशेष्यकं प्रमारूपं तद्रजतांशे रजतज्ञानं भवति अरजतं या शुक्तिस्तद्विषयकमपि भवति, यतो ह्युभयविषयकम् एकमेव ज्ञानम्। **अत एवे**ति(९१—६)। समूहालम्बनेनार्थान्तरत्वादेवेत्यर्थः।

दूषणान्तरमाह—**अन्यथाख्याती**ति(९१—७। रजतत्वप्रकारकज्ञानविषयत्वाभावो हि निषेधकोटिः सा चाप्रसिद्धा। कुत्रापि पदार्थे रजतत्वप्रकारकज्ञानविषयत्वाभावो नास्ति यथा सर्वं रजतमिति भ्रममादाय सर्वस्यापि पदार्थस्य रजतत्वप्रकारकज्ञानविषयत्वात्। **तैरि**ति(९१—७) नैयायिकैः। **केवलान्वयित्वे**ति(९१—८)। यतः सर्वं रजतमिति यद्रजतत्वप्रकारकं ज्ञानं तद्विषयत्वं सर्वस्मिन्निति रजतत्वप्रकारकज्ञानविषयत्वस्य सर्वत्र वृत्तित्वात् केवलान्वयित्वम्।

**नापी**ति(९१—८)। इदमिति ज्ञानस्य यद्यप्यन्यथाख्यातिरूपत्वमागतं तथाऽपि भिन्नभिन्नानां चैत्रमैत्रादिज्ञानानां भ्रमरूपत्वेन यत् साधारण्यं तत्तु नागतमेव। यथा इयं मदीयो गौः गोत्वात् सास्नादिमत्त्वात्। अत्र एतस्यां मम गवि गोत्वं यद्यपि सिद्धं तथापि चैत्रमैत्रगोव्यक्तिषु साधारण्येन गोत्वं न सिद्धं तद्वत् कस्यचिद् ज्ञानस्य यद्यपि अन्यथाख्यातिरूपत्वमागतं तथापि [न] सर्वसाधारण्येन। **नापी**ति(९१—९)। विषयतायां मानाभावात्तदप्रसिद्ध्याऽप्रसिद्धिरित्यर्थः। **नापी**ति(९१—९)। प्राभाकरं प्रति विषयताव्यधिकरणप्रकारावच्छिन्नविषयताकत्वमप्रसिद्धं यावान् प्रकारः स स्वाश्रयविषयतया समानाधिकरण एव। यतः प्राभाकरमते रजतमिति ज्ञाने रजतत्वं प्रकारः, तच्च रजतत्वं स्वाश्रयरजतविषयतया समानाधिकरणमेवेति। न च शुक्तिनिष्ठा या विषयता तया व्यधिकरणो यः प्रकारः रजतत्वं तदवच्छिन्नविषयताकत्वं विवक्षितमिति व्यक्तिविशेषविवक्षया नोक्तदोष इत्यत आह—**व्यक्ती**ति(९१—९)। तथा च

१. अप्रसिद्धिर्नास्तीत्ययं दोषः किन्तु प्रसिद्धिरेव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुक्त्यादिव्यक्तिविशेषाभिधाने सर्वत्र साधारण्येनान्यथाख्यातिर्न सिद्धा किन्तु क्वचिदेव ।

दूषणान्तरमाह—**किञ्चेति**(९१-१०) । तथा च रजतत्ववद्विशेष्यकं रजतत्वप्रकारकं यत् सत्यं ज्ञानं तद्वा पक्षीकृतमिति प्रथमः पक्ष। **शुक्तीति**(९१-११) । रजतत्वाभाववति या शुक्तिः तद्विशेष्यकं यद्रजतत्वप्रकारकं ज्ञानं तद्वा पक्षीकृतमिति द्वितीयः पक्षः । दूषयति—**तत्रेति**(९१-११) । तथा च सत्यज्ञानस्यायथार्थत्वे साध्ये बाध इत्यर्थः । **व्यधिकरणे** (९१-११) इति अयथार्थत्वे इत्यर्थः । **परमिति** । (९१-१२)। तथा च शुक्तिविशेष्यकं रजतत्वप्रकारकं यदन्यथाख्यातिरूपं ज्ञानं तदद्यापि सिद्धमेव नास्ति । पक्ष एव सिद्धो नास्ति किं साध्यते । **बाधादिति**(९१-११) । इदंज्ञानस्य वा रजतज्ञानस्य वा पक्षत्वे उभयत्र बाधः । उभयोः इदं-रजतज्ञानयोः समानाधिकरणप्रकारकत्वादेव न व्यधिकरणप्रकारकत्वमिति ।

**तथा हीति**(९१-१२) । **रजतार्थीति**(९१-१२) रजतार्थिनो या प्रवृत्तिः तं प्रति कारणत्वं पक्षः । **प्रवृत्तीति**(९१-१३) । रजतार्थिप्रवृत्तिसमानविशेष्यिका एवम्भूता या रजतत्वप्रकारावच्छिन्ना या[1] विषयता तत्प्रतियोगि यद्ज्ञानं तत्त्वेन अवच्छिन्नम् इति साध्यम् । अत्र च रजतार्थिप्रवृत्तिकारणत्वम् उभयत्र तिष्ठति । संवादिप्रवृत्तिहेतुभूतेऽपि ज्ञाने तिष्ठति विसंवादिप्रवृत्तिहेतुभूतेऽपि ज्ञाने तिष्ठति । तथा च उभयत्र विद्यमानं यत् कारणत्वं तत् तादृशज्ञानत्वावच्छिन्नं चेज्जातं तादृशज्ञानत्वव्याप्यमेव जातम् । एवं सति विसंवादिप्रवृत्तिस्थले यत् ज्ञाननिष्ठं प्रवृत्तिकारणत्वं तत् प्रवृत्तिहेतुभूते ज्ञाने तिष्ठति, तत्र कारणत्वस्य यद् व्यापकं प्रवृत्तिसमानविषयरजतत्वप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानत्वं चेत् तत्रागतं तदा अन्यथाख्यातिरागतैव । यतः विसंवादिप्रवृत्तिकारणीभूते पुरोवर्तिज्ञाने शुक्तिविशेष्यकरजतत्वप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानत्वं चेदागतं तदा शुक्तिविशेष्यकरजतत्वप्रकारकं ज्ञानं तदेवान्यथाख्यातिरूपमागतं व्याप्यसत्त्वे व्यापकावश्यम्भावात् । यथा धूमो वह्न्यवच्छिन्नः[2] । धूमो वह्न्यभाववदवृत्तिरिति धूमे यदा वह्न्यभाववदवृत्तित्वमागतं तदा धूमे वह्निव्याप्यत्वमेवागतम् । धूमे यदा वह्निव्याप्यत्वं जातं तदा धूमवति पर्वते वह्निसिद्धिः सुजातैव । कुतः ? यत्र व्याप्यं तत्र व्यापकेन स्थातव्यमवश्यमिति कृत्वा

१. Repetition of या seems to be also a stylistic peculiarity of गुणरत्न.

२. अवच्छिन्नं नाम तदभाववदवृत्तित्वम् अवच्छेद्यस्य । यथा धूमो वह्न्यवच्छिन्नः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूमरूपव्याप्यवति पर्वते धूमव्यापकवह्निसत्त्वनियमात् । एवं प्रवृत्तिकारणत्वे तादृशज्ञानत्वव्याप्यत्वं चेदागतं तदा व्याप्यसत्त्वे व्यापकावश्यम्भावनियमात् । अत्र प्रवृत्तिकारणत्वं व्याप्यं प्रवृत्तिसमानविषयरजतत्वप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानत्वं व्यापकम् । यत्र प्रवृत्तिकारणत्वं तत्र तत्र तादृशज्ञानत्वम् । एवं सति विसंवादिप्रवृत्तिहेतुभूते ज्ञाने तादृशप्रवृत्तिकारणत्वं वर्त्तते तत्र चेद् व्याप्यं तिष्ठति तदा तस्मिन् ज्ञाने तादृशस्य कारणत्वस्य व्यापकं तादृशज्ञानत्वं तदप्यागतं व्यापकम् । तथा च प्रवृत्तिकारणीभूते पुरोवर्त्तिज्ञाने शुक्तिविशेष्यकरजतत्वप्रकारावच्छिन्ना या विषयता तत्प्रतियोगित्वं ज्ञानत्वं चेदागतं तदा शुक्तिविशेष्यकरजतत्वप्रकारकं ज्ञानमन्यथाख्यातिरूपमागतमेव ।

खण्डयति—इयं चेति (९१—१४) । इयं पूर्वोक्ता विप्रतिपत्तिः । अन्यथाख्यातौ न किन्तु तद्व्याप्ये इति कोऽर्थः ? अन्यथाख्यातिव्याप्ये, यथा धूमवत्त्वं वह्न्यवच्छिन्नं नवेयं वह्निव्याप्यत्वे विप्रतिपत्तिः, न तु वह्नौ विप्रतिपत्तिः । भवतु व्याप्य एव विप्रतिपत्तिः ततः किमित्यत आह—स्वविषयेति (९१—१२) यद्विषयिणी विप्रतिपत्तिः तद्विषयकः संशयः, तद्विषयक एव विचारः कर्त्तव्यः । भवतु विप्रतिपत्तिसंशयविचाराणां समानविषयत्वं ततोऽपि किमित्यत आह—अनयेति (९१—१५) चोप्यर्थे (९१—१५) । तथा च अनया पूर्वोक्तया विप्रतिपत्त्या समानविषयकः संशयः समानविषयको विचारः कार्यः । एवं सति किमनिष्ट इत्यत आह—तद्विषयश्चेति । तथा च विप्रतिपत्तेरन्यथाख्यातिव्याप्यत्वं चेद् विषयः तदा व्याप्यविषयक एव विचारः । स च प्रकृते चानुपयुक्तः यतो ह्यन्यथाख्यातिरुद्देश्या, न तु अन्यथाख्यातिव्याप्यं यतो रजतार्थीति या विप्रतिपत्तिः सा व्याप्यविषयिणी । तदिति (९१—१७) अन्यथाख्यातिः तस्याः अन्यथाख्यातेः व्याप्यरूपो विषयो भवति, न तु अन्यथाख्यातिरूपः ।

अत्र शङ्कते—न चेति (९१—१७) । तथा च व्याप्ये या विप्रतिपत्तिः सा च व्यापकविचारार्थमेवेति नास्य विचारस्यानुपयुक्तत्वमित्यर्थः । अन्यथाख्यातिरूपव्यापकसिद्ध्यर्थं व्याप्यसाधनम् । तादृशकारणत्वे तादृशज्ञानत्वावच्छिन्नलक्षणं यद् व्याप्यत्वसाधनमित्यर्थः । कथायामिति (९१—१८) । वादिविवादकथायाम् । दूषयति—अप्राप्तेति (९१-१८) । अनाकाङ्क्षताभिधानलक्षणमप्राप्तकालत्वमित्यर्थः । अन्यथाख्यातिरूपे व्यापके आकाङ्क्षा, न तु अन्यथाख्यातिव्याप्ये ज्ञानत्वावऽच्छिन्नलक्षणे शुक्तिविशेष्यकरजतत्वप्रकारकज्ञाने आकाङ्क्षा, न तु प्रवृत्तिकारणत्वस्य पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानत्वाच्छिन्नत्वलक्षणं यदन्यथाख्यातिव्याप्यं तत्राकाङ्क्षा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नास्तीत्यर्थः। **रजतार्थिप्रवृत्तीति**(९१–१२) या विप्रतिपत्तिरुक्ता तथा नैयायिकस्यान्यथाख्यातिसाधनं न, न वा प्राभाकरस्याऽन्यथाख्यातिनिषेधोऽपीत्याह—**न वेति** (९१-१३)। **वैशिष्ट्यस्येति** (९१–१८) प्रकारत्वस्येत्यर्थः। तथा च प्रवृत्तिकारणत्वस्य प्रवृत्तिसमानविषयरजतत्वप्रकारावच्छिन्नविषयताप्रतियोगिज्ञानत्वावच्छिन्नत्वनिषेधेन प्राभाकरस्यान्यथाख्यातिरपि निषिद्धा न भवतीत्यर्थः।

स्वयं समाधत्ते—**रजतत्वावच्छिन्नेति** (९१–२०)। रजतत्वप्रकारिका या कार्यज्ञानविषयता सा अरजतनिष्ठात्यन्ताभावाप्रतियोगिनीति कोऽर्थः, अरजतवृत्तिनी न वा, तस्यां विप्रतिपत्तौ अन्यथाख्यातिः कथम् आगता। अरजतवृत्तिरजतत्वप्रकारकविषयताप्रतियोगिज्ञानमेवान्यथाख्यातिः। पूर्वोक्तविप्रतिपत्तौ नञ्द्वयगर्भितत्वेन गौरवादाह—**रजतत्वेति**(९१–२१)। अरजतवृत्तिरजतत्वप्रकारकज्ञानविषयताकत्वमेवान्यथाख्यातिः। शङ्कते—**न चेति** (९१–२२) **असाधारण्यमिति**(९१–२२)। शुक्तिरजतस्थले यद्यप्यन्यथाख्यातिरागता तथापि सर्वत्र घटपटादिस्थले नागतैव। समाधत्ते—**एतावतेति** (९१–२२)। एकत्र स्थलेऽन्यथाख्यातिस्तु सिद्धैव। तथा चैकत्र सिद्धाऽन्यत्रापि सेत्स्यति।

पूर्वोक्तां विप्रतिपत्तिं समर्थयति—**यद्वेति** (९१–२३)। ज्ञानत्वं यथार्थत्वव्याप्यमिति विधिकोटिः प्राभाकराणां निषेधकोटिर्नैयायिकानाम्। साधारण्येन विप्रतिपत्तिमाह—**यद्वेति** (९१–२३)। **स्वेति** (९१–२३)। स्वशब्देन विषयता तस्या यः प्रकारस्तस्य यो व्याप्यवृत्त्यत्यन्ताभावस्तेन सह समानाधिकरणम्। अत्र विधिकोटिः नैयायिकानां, निषेधकोटिः प्राभाकराणाम्। अत्र रजतत्वप्रकारकज्ञानविषयत्वं चेद्रजतत्वं प्रकारस्य व्याप्यवृत्तिर्योऽत्यन्ताभावः शुक्तिनिष्ठस्तेन सामानाधिकरण्यं चेज्जातं तदा शुक्तिविशेष्यकरजतत्वप्रकारज्ञानविषयत्वं लब्धं सैवान्यथाख्यातिः।

**रजततयेति** (९२–२)। **तत्रेति**(९२–२) यत्र रजतार्थिनः शुक्तौ प्रवृत्तिर्जायते तत्रेत्यर्थः। तथा च व्याहारः शब्दाभिलापः व्यवहारः प्रवृत्तिः तयोर्याऽन्यथाऽनुपपत्तिः कार्यं कारणेन विनाऽनुपपन्नम्। शब्दाभिलापः प्रवृत्तिश्च द्वे कार्ये, कार्यं कारणेन विनाऽनुपपन्नं, कारणं किं ! यत्प्रकारको यद्विशेष्यको व्यवहारः तद्विशेष्यकतत्प्रकारकज्ञानसाध्यः व्यवहारश्चेच्छुक्तिविशेष्यकः रजतत्वप्रकारकः तदा

१. रजतत्वप्रकारकज्ञानविषयता ईश्वररजतत्वप्रकारकज्ञानविषयता अरजतवृत्तिनी भवत्येव, ईश्वररजतत्वप्रकारकज्ञानस्य सर्वविषयत्वात्। न च तदन्यद्वा ख्यातिरूपं तत् इतिकृत्वा कार्यपदम्। ईश्वरज्ञानं तत्कार्यं न भवति।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानेनैव साध्यः, यच्छुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं सैवान्यथाख्यातिः ।

दूषयति प्राभाकरः–**तयोरिति** (९२–३) । व्याहारव्यवहारयोः । रजतत्वप्रकारकज्ञानसाध्यत्वमेव लाघवात्, न तु पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानसाध्यत्वम् । पुरोवर्त्तिविशेष्यत्वं नाम व्यवहर्त्तव्यविशेषकत्वम् अथवा प्रवृत्तिविषयविशेष्यकत्वम् । ननु रजतत्वप्रकारकज्ञानं चेत् कारणमागतं तर्हि तदेवान्यथाख्यातिरूपम् आयास्यति इत्यत आह–**तच्चेति** (९२–३) । न हि रजतत्वप्रकारकज्ञानमात्रमन्यथाख्यातिः, किन्तु पुरोवर्त्तिविशेष्यकं यद् रजतत्वप्रकारकज्ञानं तदन्यथाख्यातिरूपं, तच्च नास्त्येवेत्यर्थः । अत एवाह–**नन्विति** (९२–४) । **व्यवहर्त्तव्येति** (९२–४) पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानजन्यतेत्यर्थः । युक्तिमाह–**गौरवादिति** (९२–५) । रजतत्वप्रकारकज्ञानत्वापेक्षया पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानत्वस्य गौरवादित्यर्थः ।

शङ्कते–**न चेति** (९२–५) । विशिष्टज्ञानं द्विविधम् एकं [यद्] रजतत्वसमवायसम्बन्धेन पुरोवर्त्तिनि ज्ञायते तद्रजतत्वसंसर्गग्रहात्मकं रजतत्वविशिष्टज्ञानं, पुरोवर्त्ति विशेष्यं रजतत्वं विशेषणं समवायसम्बन्धश्च । अपरं च [यद्] रजतत्वाश्रयाभेदसम्बन्धेन रजतत्वमारोप्यते । तत्र रजतत्वाश्रयाभेदः संसर्गः द्वयोर्विशिष्टज्ञानयोरेकः संसर्गग्रहः एकोऽभेदग्रहः, उभयथाऽपि विशिष्टज्ञानम् इति अस्मन्मते नैयायिकमते । तच्चेन्नाङ्गीक्रियते, किन्तु उभयथाऽपि रजताभेदः तर्हि यत्र नेदं रजतमिति भेदग्रहः तत्रापि इदं रजतमिति रजताभेदव्यवहारः स्यात् । एवमत्र पुरोवर्त्तिनि रजतत्वं नास्ति इति रजतत्वात्यन्ताभावरूपस्य रजतत्वासंसर्गस्य ग्रहे रजतत्वसंसर्गव्यवहारापत्तिः ।

**क्वचिदिति** (९२–५) । यत्र प्रथमतः इदं रजतमिति ज्ञानं तदनन्तरं नेदं रजतमिति ज्ञानं तत्र सर्वत्र रजतमिति शब्दाभिलापः स्यात् । एवं सति रजतमिति रजतत्वसंसर्गाभिलापः स्यात् । कुतः ? रजतत्वप्रकारकं ज्ञानं स्मरणरूपं तिष्ठत्येव । समाधत्ते–**अभेदेति** (९२–६) । रजताभेदव्यवहारे हि रजतभेदज्ञानाभावरूपस्य रजतभेदाग्रहस्य कारणत्वं, रजतत्वसंसर्गव्यवहारे हि रजतत्वाभावज्ञानाभावरूपस्य रजतत्वासंसर्गाग्रहस्य कारणत्वं वर्त्तते । अत एव नेदं रजतमिति रजतभेदज्ञानं वर्त्तते, तत्र रजतभेदज्ञानाभावरूपो रजतभेदाग्रहो नास्तीतिकृत्वा रजतमिति अभेदव्यवहारो न, एवं यत्र रजतत्वं नास्ति इति रजतत्व(त्वा)भावज्ञानं वर्त्तते तत्र रजतत्वाभावज्ञानाभावरूपः रजतत्वासंसर्गाग्रहः, स च नास्तीति कृत्वा रजतमिति न रजतत्वसंसर्गव्यवहारः कारणाभावात ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं सति युक्तिमाह—**अस्य चेति** (९२–७) । भेदाग्रहासंसर्गाग्रहरूपद्वयस्येत्यर्थः । नैयायिकमतेऽपि नेदं रजतमिति भेदग्रहे इदं रजतमिति रजताभेदग्रहरूपं विशिष्टज्ञानं न जायते, रजताभेदग्रहरूपरजतत्वसंसर्गग्रहरूपे विशिष्टज्ञानाभावे इदं रजतमिति रजताभेदव्यवहारोऽपि न जायते । एवमत्र रजतत्वं नास्तीति रजतत्वाभावज्ञानरूपे रजतत्वासंसर्गग्रहे इदं रजतमिति रजतत्वसंसर्गग्रहात्मकं भ्रमरूपं विशिष्टज्ञानं न जायते । रजतत्वसंसर्गग्रहभ्रमरूपविशिष्टज्ञानाभावे इदं रजतमिति रजतत्वसंसर्गव्यवहारश्चेदङ्गीक्रियते तर्हि संसर्गव्यवहारोऽपि न जायते । तथा च द्वयोरप्यभेदारोपसंसर्गारोपयोः भेदाग्रहः १ असंसर्गाग्रहश्च २ कारणम् । एवं सति द्वयोरारोपयोर्यत् कारणद्वयं तस्मात् साक्षात् अभेदव्यवहार एव संसर्गव्यवहार एव भवतु, मध्ये विशिष्टज्ञानात्मके अभेदारोपेण संसर्गारोपेण वा किम्, आरोपद्वयनियामकद्वयादेव द्विविधव्यवहारोत्पत्तौ अन्तर्गडु आरोपद्वयकल्पने गौरवादिति ।

ननु सत्यरजतस्थले रजतप्रवृत्तिं प्रति रजतव्यवहारं प्रति पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकं नाम रजतत्ववैशिष्ट्यावगाहि[३]ज्ञानस्य कारणत्वे असत्यप्रवृत्तिव्यवहारस्थलेऽपि पुरोवर्त्तिविशेष्यकरजतत्ववैशिष्ट्यावगाहिज्ञानं शुक्तिविशेष्यकरजतत्वप्रकारकमन्यथाख्यातिरूपं कारणं भविष्यति तथा चान्यथाख्यातिसिद्धिरित्यत आह—**सत्यरजतस्थलेऽपीति** (९२–७) । तथा च सति सत्यस्थलेऽपि पुरोवर्त्तिनि रजतत्ववैशिष्ट्यज्ञानात्मको रजताभेदग्रहो न कारणं प्रवृत्तिं प्रति आवश्यकात् रजतभेदाग्रहात् रजतत्वासंसर्गाग्रहात् अभेदव्यवहारः १ रजतत्वसंसर्गव्यवहारो २ वा भविष्यति, न तु रजतत्ववैशिष्ट्यग्रहात्मकं रजताभेदग्रहरूपं रजतत्वसंसर्गग्रहरूपं वा ज्ञानं कारणम् । एतदेवाह—**तदुपपत्ताविति** (९२–८) । अभेदव्यवहारोपपत्तौ संसर्गव्यवहारोपपत्तावित्यर्थः । **वैशिष्ट्यस्येति** (९२–८) । पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्येत्यर्थः । प्रकारकत्वस्य वैशिष्ट्यगर्भितत्वात् । तदभिप्रायेण वैशिष्ट्यपदम् । अन्यथा पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकत्वस्याप्रयोजकत्वादित्येव वक्तव्यम् ।

अत्राशङ्कते—**नन्विति** (९२–९) । न हि उभयविधव्यवहारकार्यानुरोधेन उभयविधम् आरोपरूपं विशिष्टज्ञानमभेदग्रहरूपं संसर्गग्रहरूपं वा कारणमङ्गीक्रियते । येन भेदाग्रहात् असंसर्गाग्रहाद्वा उभयविधव्यवहारद्वयकार्योपपत्तौ तादृशग्रहयोरन्यथासिद्धतया तत्कल्पने अभेदग्रहसंसर्गद्वयकल्पने प्रमाणाभावादिति स्यात् । तर्हि

---

१. रजतत्वारोपो नाम रजतत्वसंसर्गारोपः । २. रजतारोपो नाम अभेदारोपः । ३. रजताभेदग्रहस्य रजतत्वसंसर्गग्रहस्य । ४. अभेदग्रह–रजतत्वसंसर्गग्रहरूपज्ञानयोः । ५. रजताभेदग्रहरूपे रजतत्वसंसर्गग्रहरूपे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथं कल्प्यत इत्यत आह– किं त्विति (९२–९)। तज्ज्ञानद्वयमभेदग्रहसंसर्गग्रहलक्षणं मनसा प्रत्यक्षसिद्धमेव।

ननु तर्हि तयोर्ज्ञानयोरभेदव्यवहारसंसर्गव्यवहारयोः कारणत्वं तु नागतमेवेत्यत आह–तस्य चेति (९२–१०)। अभेदग्रहस्य संसर्गग्रहस्य चान्वयव्यतिरेकाभ्यां कारणत्वम्। अयमाशयः–ज्ञानं तु द्विविधं[१] मानसप्रत्यक्षसिद्धं वर्त्तत एव। द्वयोरपि व्यवहारयोरन्वयव्यतिरेकौ द्वयोरपि ज्ञानयोर्वर्त्तेत एव। एवं तयोर्द्वयोर्व्यवहारयोः प्रतिभेदाग्रहासंसर्गाग्रहयोरपि अन्वयव्यतिरेकौ वर्त्तेते एव। एवं सति द्वयोर्व्यवहारयोः प्रति तयोर्ज्ञानयोः कारणत्वं वक्तव्यं किं वा भेदाग्रहासंसर्गाग्रहयोर्वा कारणत्वं वक्तव्यं तत्र लाघवात् द्वयोर्विशिष्टज्ञानयोरभेदग्रहसंसर्गग्रहलक्षणयोः कारणत्वं वक्तव्यं, न तु भेदाग्रहासंसर्गाग्रहयोः कारणत्वं, कुतः ? तयोर्भेदाग्रहासंसर्गाग्रहयोः ज्ञानापेक्षया गुरुत्वेन कारणत्वाभावादिति द्वयोर्भ्रमरूपयोर्ज्ञानयोः अभेदग्रहसंसर्गग्रहलक्षणयोर्व्यवहारकारणत्वम्। भेदाग्रहासंसर्गाग्रहौ तु द्वाभ्यां ज्ञानाभ्यामन्यथासिद्धाविति। तच्च ज्ञानद्वयं संवादिविसंवादिव्यवहारसाधारणमित्याह–यथेति(९२–११) यथा सत्यरजतस्थले ज्ञानद्वयं भवति तथा यत्र विपरीतरजतबाधो नेदं रजतमित्युत्तरकाले यत्र ज्ञानं तत्र विसंवादिप्रवृत्तिस्थलेऽपि ज्ञानद्वयं जायत एव।

अत्र युक्तिमाह–कथमिति(९२–१२)। यदि विसंवादिप्रवृत्तिस्थले पुरोवर्त्तिनि इदं रजतमिति रजताभेदग्रहरूपं रजतत्वसंसर्गग्रहरूपं[२] वा ज्ञानं चेन्न जायते तर्हि मयाऽत्रेयं शुक्तिः रजततया ज्ञाता इति रजताभेदग्रहः रजतत्वसंसर्गग्रहो वा, तस्योल्लेखः कथं स्यादिति। ननु अयम् उल्लेखः प्रमाणमेव न भवतीत्यत आह–तदिदमिति(९२–१२)। यदि अनुव्यवसायेन[३] वस्तुसिद्धिर्न भवति तदा घटोऽयमिति ज्ञानेऽपि घटत्वसंसर्गग्रहो न सिध्येत् [इति] मतं दूषयति–एतदपीति(९२–१५)। विषयबाधे सति प्रतीतेरन्यथात्वकल्पनम्। यथा शशशृङ्गं नास्तीति प्रतीतेः शशशृङ्गाभावो विषयो न, अलीकप्रतियोगिकस्याभावस्यानङ्गीकारात्, किन्तु प्रतीतेरन्यथात्वकल्पनं शृङ्गे शशीयत्वाभावमात्रं विषयः, तद्वत् विसंवादिप्रवृत्तिस्थले रजताभेदस्य रजतत्वसंसर्गस्य वा शुक्तौ ग्राहकसामग्र्यभावे रजताभेदस्य रजतत्वसंसर्गस्य भानाभावेन रजताभेदरजतत्वसंसर्गविषयानुव्यवसायस्य विषयान्तरकल्पनमेवोचितमित्यर्थः।

---

१. अभेदग्रहसंसर्गग्रहयोः। २. अभेदग्रहसंसर्गग्रहरूपं.। ३. शुक्ती रजततया ज्ञातेत्ययमनुव्यवसायः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ननु रजताभेदस्य रजतत्वसंसर्गस्य कारणभानसामग्री नास्तीत्यत आह- **शुक्ताविति**(९२-१५) । ननु रजताभेदस्य रजतत्वसंसर्गस्य वा भानसामग्र्यभानं चेन्नास्ति तदा शुक्ती रूप्यतया ज्ञातेति रजताभेदविषयकरजतत्वसंसर्गविषयकानुव्यवसायस्य का गतिरित्यत आह-**शुक्तीति**(९२-१६) । शुक्ती रूप्यतया ज्ञातेत्ययमनुव्यवसायो न भवति किन्तु व्यवहार एव । सोऽयं व्यवहारः व्यवहारकारणीभूतो यो रजतभेदाग्रहः रजतत्वासंसर्गाग्रहश्च तद्विषयक एव । न तु रजताभेदरजतत्वसंसर्गविषयक एव । **प्राचीनेति**(९२-१६) । प्राचीनो नाम व्यवहारकारणीभूतः । **भेदाग्रहेति** (९२-१६) भेदग्रहाभावः । कारणबाधमेव विवृणोति- **रजतेति** (९२-१७) । **सन्निकर्षः** (९२-१७) संयोगः । **तद्व्यतिरेकेणेति** (९२-१७) रजतसंयोगव्यतिरेकेणेत्यर्थः । **तदुत्पत्तीति**(९२-१७) । रजताभेदग्रहस्य रजतत्वसंसर्गग्रहस्य वा उत्पत्तिसम्भावना नाम उत्पत्तिसंशयः कथं शुक्तौ ।

अत्राशङ्कते-**न चेति**(९२-१८) । न हि रजतसाक्षात्कारे रजतसंयोगः कारणं, किन्तु सर्वत्र साक्षात्कारमात्रे विशेष्येन्द्रियसन्निकर्षः कारणम् । तथा च रजतसाक्षात्कारेऽपि विशेष्यसन्निकर्ष एव कारणं न तु रजतसंयोगः । विसंवादिप्रवृत्तिस्थले विशेष्येन्द्रियसन्निकर्षस्य विद्यमानत्वात् रजतसाक्षात्कारो भविष्यत्येव । एतदेवाह-**विशेष**(९२-१८)इति । यद्यपि साक्षात्कारसामान्ये विशेष्येन्द्रियसन्निकर्षः कारणं तथापि रजतरूपविशेष्यसाक्षात्कारे रजतसंयोगः कारणं भविष्यति तथापि सामान्यसामग्रीत एव रजतसाक्षात्कारोत्पत्तौ रजतसंयोगत्वेन कारणत्वे प्रमाणाभावात् । तथा च रजतसंयोगाभावेऽपि विशेष्येन्द्रियसन्निकर्षमात्रात् शुक्तौ रजतसाक्षात्कारो भ्रमरूपो भविष्यतीत्यर्थः । तथा च साक्षात्कारे विशेष्येन्द्रियसन्निकर्षः कारणं न तु रजतसंयोगो विशेष्येन्द्रियरूपः कारणम् ।

दूषयति-**क्वचिदिति**(९२-२०) । तथा च साक्षात्कारमात्रे विशेष्येन्द्रियसन्निकर्षः कारणम् एतदपि नास्ति । कुतः ? विशेष्येन्द्रियसन्निकर्षाभावेऽपि साक्षात्काररूपभ्रमस्य जायमानत्वात् इति त्वया नैयायिकेनाङ्गीकारात् । एतदेव विवृणोति-**साक्षादिति** (९२-२१) । यत्र प्रथमतः ऊर्ध्वं वस्तु दूराद् दृश्यते तत्र सामान्यत उच्चवस्तुदर्शनानन्तरं ततोऽन्यत्र गत्वा तदुच्चवस्तु स्मृत्वा तस्मिन् वस्तुनि स्थाणुर्वा पुरुषो वेति संशयो जायते तत्र विशेष्यं यदूर्ध्वं वस्तु तत्सन्निकर्षाभावेऽपि तस्य संशयस्य जायमानत्वात् । अत्राशङ्कते-**न चेति** (९२-२३) । उच्चवस्तु परित्यक्त्वा[०त्यज्य]

१. नेदं रजतम् इति ज्ञानं यदा नास्ति तदा रजतभेदाग्रहः रजताभेदो नाम रजतम् ।

२. Is it another example of Jaina Sanskrit? See आनयित्वा in the begining of the टिप्पनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्रान्यत्र गतस्तस्य यः संशयः स चाक्षुषो न भवत्येव किन्तु मानस एव। यदि चाक्षुषः स्यात् तदा विशेष्येन्द्रियसन्निकर्षस्यापेक्षा स्यात्, तच्च नास्त्येव। **ज्ञाने**ति(९२–२३)। अन्यत्र गत्वा यः संशयः स ज्ञानविशेष्यक एव न तु वस्तुविशेष्यक एव। समाधत्ते **ज्ञाने**ति(९२–२३)। तथा च ज्ञानधर्मिकस्तदा संशयः स्याद्यदि ज्ञानं भासेत ज्ञानभानाभावेऽपि स्थाणुर्वा पुरुषो वेति संशयस्य जायमानत्वात्। यथा संशये विशेष्येन्द्रियसन्निकर्षो न कारणं तथा विपर्ययेऽपि विशेष्येन्द्रियसन्निकर्षो न कारणमित्यर्थः।

अत्राशङ्कते—**न चे**ति(९३–१)। यत्रोर्ध्ववस्तुपरित्यागानन्तरमन्यत्र गत्वा यत्र संशयो जायते तत्र दोषस्यैव सन्निकर्षत्वम्। दोषो दूरत्वादिदोषः। एवं शुक्तिस्थले रजतसाक्षात्कारो जायते तत्र रजतेन सह चाकचिक्यं दोष एव सन्निकर्षः। तथा च रजतसन्निकर्षोऽपि वर्त्तते रजतभ्रमो भविष्यतीत्याशङ्कार्थः। दूषयति—**षोढे**ति(९३–१)। संयोगादिका षोढा प्रत्यासत्तिस्तन्मध्ये तु चाकचिक्यादिदोषो नास्तीति दोषस्य सन्निकर्षबहिर्भावात्। दोषस्य सन्निकर्षबहिर्भावेऽपि रजतज्ञानमेवात्र सन्निकर्षो भविष्यतीत्याशङ्कते—**न चे**ति(९३–२)। **तत्रे**ति(९३–२)। शुक्तिरजतस्थले। **ज्ञानान्तरोपनीते**(९३–२) इति। स्मृत्युपनीते[1] स्मृत्या उपस्थिते रजते। **मन एवे**ति(९३–२)। मानस एव भ्रमो भविष्यतीत्याशङ्कार्थः।

दूषयति—**बहिरि**ति(९३–३)। मानसो भ्रमो बहिर्विशेष्यको न भवति, इदं रजतमित्ययं भ्रमस्तु बहिर्विशेष्यकः कथं मानसः स्यात्। ननु उपनयवशाद् बहिर्विशेष्यकोऽपि मानसो भ्रमो भविष्यतीत्यत आह—**ज्ञानान्तरे**ति(९३–३)। ज्ञानान्तरोपनयवशात् बहिर्विशेषणको मानसो भ्रमो भवति। न तु बहिर्विशेष्यकः। तत्र बहिर्विशेष्यके बोधे मनसोऽसामर्थ्यात्। **तद्विशेषणक**(९३–३) एवेति। बहिर्विशेषणक इत्यर्थः।

अत्र युक्तिमाह—**परमाणुमि**ति। यदि बहिर्विशेष्यको मानसो बोधः स्यात् तर्हि ज्ञातो मया परमाणुरित्येव स्यात् न तु परमाणुमहं जानामीत्यात्मविशेष्यको बोधः। **तथाऽदर्शनादि**ति (९३–४) बहिर्विशेष्यकमानसबोधादर्शनादित्यर्थः। ननु परमाणुमहं जानामीत्ययं बोधो नास्त्येव किन्तु मया ज्ञातः परमाणुरित्येव बोधः। एवं सति बहिर्विशेष्यकोऽपि मानसो बोधो भविष्यतीत्यत आह—**अन्यथे**ति(९३–४) तथा च यदि बहिर्विशेष्यकोऽपि मानसो बोधः स्यात् तर्हि पर्वतो वह्निमानित्यादि

१. स्मरण०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुमितिरपि उच्छिद्येत । कुतः ? इदमपि बहिर्विशेष्यकं मानसमेव ज्ञानं भविष्यतीत्यनुमितेरुच्छेदः स्यात् । स्वपक्षे न कोऽपि दोष इत्याह—**अग्रहेति** (९३—५) । शुक्तौ रजतत्वाग्रहपक्षे । **अस्येति** (९३—५) । असन्निकृष्टभानादिरूपदोषस्याभावादित्यर्थः । तस्मात् शुक्तौ रजतत्वाग्रहपक्ष एव समीचीनः ।

अत्राशङ्कते नैयायिकः—**नन्विति** (९३—६) । संवादिविसंवादिप्रवृत्तिर्भेदाग्रहादेव भवतीतीदमनुपपन्नम् । **यथेति** (९३—६) । उपस्थितं यदिष्टं तेन सह यो भेदस्तस्याग्रहो नाम ज्ञानाभावस्तस्य प्रवर्त्तकत्वं वक्तव्यम् । **तथेति** (९३—७) । तथा तेनैव प्रकारेण उपस्थितं यदनिष्टं तेन सह यो भेदस्तस्याग्रहो नाम ज्ञानाभावस्तस्य निवर्त्तकत्वं वक्तव्यम् । तथा चोपस्थितेष्टानिष्टभेदाग्रहयोरेव प्रवृत्तिनिवृत्तिजनकत्वं वक्तव्यं, न तु भेदाग्रहमात्रस्य । **इष्टभेदाग्रहस्येति** (९३—७) । इष्टभेदाग्रहमात्रस्येत्यर्थः । विपक्षे बाधकमाह—**तथात्वे** (९३—८) इति । इष्टभेदाग्रहमात्रस्य प्रवर्त्तकत्वे रजत एव नेदं रजतमिति ज्ञानं जातं तत्र निवृत्तिरेव जायते न तु प्रवृत्तिः । तत्र प्रवृत्तिः स्यात् । तत्र सत्यरजतस्थले नेदं रजतमिति ज्ञानं जायते तत्र इष्टभेदाग्रहो[१] वा भेदाग्रहो वा । आद्ये आह—**तत्रेति** (९३—९) । तथा च इष्टभेदाग्रहस्य सत्त्वात् नेदं रजतमित्यादौ प्रवृत्तिः स्यात् । अन्त्ये त्वाह—**भावे वेति**(९३—९) । यत्र रजत एव नेदं रजतमिति भेदग्रहस्तदाऽन्यथाख्यातिः स्यात् ।

ततः किमित्यत आह—**तथा चेति** (९३—९) । शुक्तावेव इदं रजतं न शुक्तिरिति ज्ञानात् युगपत् प्रवृत्तिनिवृत्त्यापत्तिः । कुतः ? तत्र शुक्तौ उपस्थितस्येष्टस्य भेदाग्रहो वर्त्तते इतिकृत्वा प्रवृत्तिः स्यात्, उपस्थितस्यानिष्टस्य भेदाग्रहोऽपि वर्त्तते इतिकृत्वा निवृत्तिः स्यात् यदि तत्र शुक्तौ नेदं रजतमिति ज्ञानम् अनिष्टं भेदग्रहस्तदाऽन्यथाख्यात्यापत्तिः यतोऽनिष्टेऽनिष्टभेदाभावात् । अनिष्टभेदाभाववति अनिष्टभेदस्य ग्रहोऽन्यथाख्यातिः । शुक्तौ अनिष्टभेदग्रहमाशङ्कते—**न चेति** (९३—११) । शुक्तौ नेयं शुक्तिरित्ययमनिष्टभेदग्रह एव न तु अनिष्टभेदाग्रहः । दूषणमाह—**अन्यथेति** (९३—११) । तथा च शुक्तावनिष्टे एव यदि अनिष्टभेदग्रहस्तदाऽन्यथाख्यातिः स्यात् ।

अत्राशङ्कते—**न चेति** (९३—१२) । स्वातन्त्र्येणोपस्थितं यदिष्टं तस्य भेदाग्रहः इष्टे प्रवर्त्तकस्तथा स्वातन्त्र्येणोपस्थितं यदनिष्टं तस्य भेदाग्रहो निवर्त्तकः । तथा च इष्टे एव यत्र नेदं रजतमिति ज्ञानं तत्र इष्टभेदाग्रहो[२] यद्यपि वर्त्तते तथापि

१. प्रवृत्तिस्तु न जायते । २. दोषात् । ३. इष्टभेदग्रहेऽन्यथाख्यातिः । 'इयं शुक्तिरेव न रजतम्' अयं भेदग्रहः, इदं भेदग्रहरूपं ज्ञानं नास्ति स भेदाग्रहः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वातन्त्र्येणोपस्थितस्येष्टस्य भेदाग्रहो नास्ति। कुतः? तत्र नेदं रजतमिति ज्ञाने अभाव एव स्वातन्त्र्येणोपस्थितः, न तु इष्टं रजतादि उपस्थितम्। एवं यत्र शुक्तावेव नेयं शुक्तिस्तत्र यद्यपि अनिष्टशुक्तिभेदाग्रहो वर्त्तते। कुतः? यदि शुक्तावनिष्टे शुक्तिरूपाऽनिष्टभेदग्रहेऽन्यथाख्यातिः स्यात् तथापि तद्यदनिष्टं शुक्तिः सा न स्वातन्त्र्येणोपस्थिता किन्त्वभाव एव स्वातन्त्र्येणोपस्थितः, न तु शुक्तिरूपमनिष्टम्। नेयं शुक्तिरिति तत्र प्रवृत्तिरेवास्ति न तु निवृत्तिः। कुतः? स्वतन्त्रोपस्थितानिष्टभेदाग्रहाभावात्। दूषयति—**स्वातन्त्र्ये**ति(९३–१३)। किं तत् स्वातन्त्र्यमिति तन्निर्वक्तुं न शक्यते।

प्राभाकरः नैयायिकदूषणं खण्डयति—**एतदपी**ति (९३–१४)। **अभावे**ति-(९३–१४)। यत्राभावविशेषणत्वेन इष्टस्योपस्थितिर्नास्ति किन्तु रजतमित्याकारेण इष्टस्योपस्थितिः तस्येष्टस्य भेदाग्रहः प्रवर्त्तकस्तथाऽभावविशेषणत्वेन यस्यानिष्टस्योपस्थितिः नास्ति किन्तु इयं शुक्तिरेव इति प्राधान्येनानिष्टस्योपस्थितिः तादृशस्यानिष्टस्याभावाविशेषणत्वेनोपस्थितस्यानिष्टस्य भेदाग्रहो निवर्त्तकः। उपसंहरति—**तेने**ति (९३–१५)। रजत एव नेदं रजतं तत्र न प्रवृत्तिः, स्वातन्त्र्येणोपस्थितं यदिष्टं तस्य भेदाग्रहो नास्ति, कुतः? सत्यरजतस्थले यत्र नेदं रजतमिति ग्रहः तत्राभाव एव स्वातन्त्र्येणोपस्थितो न तु इष्टं रजतम्। उपलक्षणमेतत् यत्र शुक्तावपि नेयं शुक्तिः किन्तु रजतं तत्र यद्यपि अनिष्टभेदाग्रहो वर्त्तते, कुतः? अनिष्टभेदग्रहेऽन्यथाख्यातिः स्यात्। तथापि स्वातन्त्र्येणोपस्थितं यदनिष्टं तस्य भेदाग्रहो नास्ति। तत्राभाव एव स्वातन्त्र्येणोपस्थितो नेयं शुक्तिरित्यादौ, न तु अनिष्टं शुक्त्यादि। एतदेवाह—**तस्य** चेति (९३–१६)। **तस्य** (९३–१६) स्वतन्त्रोपस्थितेष्टभेदाग्रहस्य। तथा स्वतन्त्रोपस्थितानिष्टाभेदाग्रहस्य। स एव नास्ति। **प्रकृते** (९३–१६) इति। यत्र रजते एव नेदं रजतमिति ग्रहः अथ चानिष्टशुक्त्यादौ नेयं शुक्तिरिति ग्रहस्तत्र चेत्यर्थः। **असम्भवादि**ति (९३–१६)। स्वतन्त्रोपस्थितेष्टभेदाग्रहस्य [च] स्वतन्त्रोपस्थितानिष्टभेदाग्रहस्यासम्भवादित्यर्थः।

ननु तर्हि रजत एव यत्र रजतं न भवति। शुक्तावेव इयं शुक्तिर्न भवति तत्र रजते प्रवृत्त्यापत्तेः। कुतः? रजतस्य स्वतन्त्रेणोपस्थितत्वादभावस्याप्राधान्येन। एवं यत्र न शुक्तिर्न तत्र निवृत्तिः स्यात्, कुतः? तत्र शुक्तिरेव स्वातन्त्र्येणोपस्थिता अभावस्त्वप्राधान्येन। तथा च रजते स्वतन्त्रोपस्थितेष्टभेदाग्रहो वर्त्तते [इति] प्रवृत्तिः स्यात्। शुक्तौ स्वतन्त्रोपस्थितानिष्टभेदाग्रहो वर्त्तते [इति] निवृत्तिः स्यात्। इत्यरुचेराह—**यद्वे**ति (९३–१७)। अयमाशयः। फलानुरोधात् कारणकल्पना। तथा च प्रवृत्तिः सत्यस्थलेऽपि जायते असत्यस्थलेऽपि जायते। उभयत्र इष्टभेदाग्रहः तिष्ठत्येव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं सति रजत एव नेदं रजतमिति यदा ग्रहः तदानीमयं रजतभेदग्रहस्तु न भवति । कुतः ? रजते रजतभेदग्रहेऽन्यथाख्यातिः स्यात् । तथा च अत्र रजतभेदाग्रहे विद्यमानेऽपि यदि रजते प्रवृत्तिर्न जायते प्रत्युत निवृत्तिरेव जायते । एवं सति रजतभेदाग्रहरूपे कारणे विद्यमानेऽपि यदि प्रवृत्तिलक्षणं कार्यं न जायते तदा तद्भेदाग्रहमात्रं कारणमेव न भवति किन्तु भेदाग्रहे विशेषः । स च विशेषः फलबलकल्प्यः । तथा च यत्र प्रवृत्तिलक्षणं फलं दृश्यते स एव भेदाग्रहः कारणम्, न तु भेदाग्रहसामान्यम् ।

**आरोप**(९३–१७) इति । त्वया नैयायिकेनापि कुत्रचित् शुक्तौ रजतारोपो जायते कुत्रचित् रजतेऽपि रजतज्ञानं न जायते अत्र आरोपाऽनारोपयोः किं निमित्तं त्वया वक्तव्यम् । तस्माद्भेदाग्रहे कश्चन विशेषः आरोपरूपफलानुरोधात् कल्पनीयः । रजतमिति शुक्तौ आरोपः । तस्मिन्नारोपे यन्नियामकं तदेवास्माकं प्राभाकराणां प्रवृत्तौ नियामकम् । एवं सति रजत एव नेदं रजतमिति ग्रहस्तत्र इदं रजतमिति आरोपो न जायते नैयायिकमते । कुतः ? भेदाग्रहविशेषाभावात् । स भेदाग्रहविशेषः रजतार्थिप्रवृत्तिप्रयोजकोऽस्माकमपि नास्ति येन कृत्वा नेदं रजतमिति यत्र ग्रहस्तत्र प्रवृत्तिर्न जायते । **प्रकृते** (९३–१८) इति । रजत एव नेदं रजतमिति स्थले तथाविशेषो नाम भेदाग्रहविशेषो नास्ति । **अन्यथे**ति (९३–१८) । यदि भेदाग्रहमात्रं चेत् प्रवृत्तिं प्रति कारणं तदा इदं रजतमिति आरोपात् पूर्वं नैयायिकमते शुक्तिभेदाग्रहस्तिष्ठति । रजतभेदाग्रहोऽपि तिष्ठति । तदानीं त्वन्मते रजतस्यैवारोपो जायते शुक्तेरपि ज्ञानं कुतो न जायते । तथा **चोभयभेदाग्रहात्** (९३–१८) । शुक्तिर्वा रजतं वेति उभयारोपरूपः संशय एव स्यान्न तु इदं रजतमिति एकस्यैवारोप इत्याह–**न त्विदमि**ति (९३–१९) । **विपर्ययः** (९३–१९) आरोपः ।

आशयमविद्वान् अत्र शङ्कते–**नन्वि**ति(९३–२०) । तथा च एकत्र स्थाणौ स्थाणुर्वा पुरुषो वेति संशयानन्तरं यत्र पुरुष एवेत्यारोपस्तत्र पुरुष एवेति ग्रहे न भेदाग्रहस्य कारणत्वम् । कुतः ? इत्यत आह–**स्थाणावि**ति(९३–२०) । तथा च पुरुषभेदाग्रहात् यथा स्थाणौ पुरुष एवेति व्यवहारो जायते तथा स्थाणुभेदाग्रहादपि अयं स्थाणुरित्यपि व्यवहारः स्यात् । कुतः ? इत्यत आह–**स्थाण्वि**ति (९३–२०) । यथा पुरुषभेदाग्रहो वर्त्तते तथा स्थाणुभेदाग्रहोऽपि वर्त्तते । एवं सति किं स्यादित्यत आह–**एककोटिके**ति(९३-२२) । तथा च पुरुष एवायमित्येककोटिको व्यवहारो जायते, स न स्यात्, किन्तु स्थाणुपुरुषभेदाग्रहात् उभयभेदाग्रहरूपः संशय एव स्यादि-



Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्याह- **संशये**ति (९३-२२)। संशयमेव विवृणोति-**एकस्मिन्नि**ति (९३-२३)। तथा च एकस्मिन् धर्मिणि परस्परविरुद्धयोः पदार्थयोर्यो भेदाग्रहः स एव तव प्राभाकरस्य संशयः।

अत्राशङ्कते प्राभाकरो-**न चे**ति (९३-२३)। तथा च सति स्थाणौ स्थाणुभेदाग्रहश्चेत् तदा संशयः स्यात्, अत्र स्थाणुभेदाग्रहस्तु नास्ति किन्तु स्थाणुभेदग्रह एव। दूषयति-**विपरीते**ति (९३-२४)। तथा च यदि स्थाणौ स्थाणुभेदग्रहस्तदाऽन्यथाख्यातिः स्यात्। उपसंहरति-**तस्मादि**ति (९३-२४)। विपरीता ख्यातिरन्यथाख्यातिः।

प्राभाकरः समाधत्ते-**संशयानन्तरमि**ति (९४-१)। स्थाणौ पुरुष एवायमिति व्यवहारः। सोऽपि पुरुषस्यान्यथाख्यातिरूपादारोपान्न, किन्तु पुरुषभेदाग्रहादेव। **न चे**ति (९४-२)। तथा च पुरुष एवायमिति व्यवहारकालेऽपि परस्परविरुद्धोभयभेदाग्रहस्य विद्यमानत्वात् पूर्ववत् संशयः स्यादित्यर्थः। समाधत्ते-**स्वतन्त्रे**ति (९४-२)। तथा चोभयविरुद्धभेदाग्रहमात्रं न संशयः, किन्तु स्वतन्त्रोपस्थितविरुद्धोभयभेदाग्रह एव संशयः। ततः किम्? इत्यत आह-**पुरुष एवे**ति (९४-३)। तथा च यत्र स्थाणौ पुरुष एवायं न स्थाणुरिति व्यवहारस्तत्र यद्यपि स्थाणुभेदाग्रहो वर्त्तते तथापि स स्वातन्त्र्येण स्थाणुभेदाग्रहो भवति स्वतन्त्रोपस्थितयोर्विरुद्धयोर्भेदाग्रहः संशयः। कुतः? स्वतन्त्रोपस्थितस्थाणुभेदाग्रहो न भवतीत्यत आह-**अभावे**ति (९४-३)। तथा च न स्थाणुरित्यत्र स्थाणोरभावविशेषणत्वेनैवोपस्थितत्वात्, न तु स्वातन्त्र्येणोपस्थितिरित्यर्थः।

विपक्षे बाधकमाह-**अन्यथे**ति (९४-४)। यदि स्थाणुपुरुषयोः स्वतन्त्रोपस्थितेष्टभेदाग्रहो वर्त्तते तदा नैयायिकमतेऽपि पुरुष एवायमित्यारोपात् पूर्वम् उभयग्रहयोर्विद्यमानत्वात् पुरुष एवायमित्यारोपकाले संशयः स्यादित्यर्थः। आशङ्कते-**नन्वयमि**ति (९४-५)। **असंसर्गाग्रहाद्** (९४-५) इत्युपलक्षणं रजतभेदाग्रहादित्यपि द्रष्टव्यं, तथा च रजताभेदाग्रहात् रजतत्वासंसर्गाग्रहाद्वा यदि रजते प्रवृत्तिस्तदा वह्न्यर्थिनो वह्निमदभेदाग्रहात् वह्न्यसंसर्गाग्रहाद्वा वह्निमति प्रवृत्तिर्भविष्यति। वह्न्यर्थिनो वह्निमति प्रवृत्तौ धूलीपटले धूमज्ञानापेक्षैव नास्ति। सा अपेक्षा तु वर्त्तते, सा न स्यात्।

अत्र शङ्कते-**उपस्थिते**ति (९४-६)। तथा च उपस्थितभेदाग्रहात् प्रवृत्तिः। धूमात्त वह्नेरुपस्थितिर्ज्ञायते पश्चादपस्थितवह्निमदभेदाग्रहात वह्नौ वह्न्यर्थिनः प्रवत्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रिति । **सेति** (९४–६)। सा धूमोपस्थितिरुपस्थितवह्निमद्भेदाग्रहार्थम्। अत्रापि वह्न्यसंसर्गाग्रह इत्युपलक्षणं वह्निमद्भेदाग्रहोऽपि द्रष्टव्यः । पूर्वं धूमाद्वह्न्युपस्थितिर्जायते पश्चादुपस्थिते वह्नौ उपस्थितवह्निमद्भेदाग्रहात् वह्निमति प्रवृत्तिरिदं च वह्निमति प्रवृत्तिपक्षे । यदा वह्नावेव प्रवृत्तिस्तदा वह्नित्वासंसर्गाग्रहादिति द्रष्टव्यम् ।

दूषयति–**पूर्वमपी**ति(९४–७) । यदि वह्न्युपस्थित्यर्थं धूमोपस्थितिस्तदा धूलीपटले धूमप्रतिसन्धानात् पूर्वमपि वह्न्युपस्थितिर्वर्त्तत एव । उपसंहरति–**तस्मा-दि**ति (९४–७ ) । यदि धूमग्रहस्यापेक्षा वर्त्तते चेत् वह्न्यर्थिप्रवृत्तौ तदा निर्वह्नौ पर्वते वह्न्यर्थिप्रवृत्त्यनुरोधेन वह्नेर्भ्रमरूपानुमितिरेव स्वीकर्त्तव्येत्यर्थः । कुतो ? वह्नेर्भ्रम-रूपानुमित्यर्थं धूमज्ञानस्योपयोगो वर्त्तते निर्वह्नौ पर्वते भेदाग्रहे तु धूमज्ञानस्योपयोगो नास्त्येव ।

दूषणान्तरमाह–**किञ्चे**ति (९४–९) । यदि अन्यथाख्यातिरूपं ज्ञानं नास्ति तदा निर्वह्नौ पर्वते धूमज्ञानानन्तरं वह्न्यर्थिप्रवृत्तिर्जायते । सा च प्रवृत्तिः वह्निमनुमिनोमीति अनुव्यवसायानन्तरं जायते । यदि[1] निर्वह्नौ पर्वते वह्नेर्भ्रमरूपा चेद-नुमितिर्नास्ति तदा सोऽनुव्यवसायो न स्यात् । अनुव्यवसाय इत्युक्तौ परमतानुरो-धात् व्यवहार इत्युक्तम् । **त**(त्व)**त्पक्ष**(९४–९) इति प्राभाकरपक्षे इत्यर्थः ।

ननु प्रत्यक्षोपस्थिते पर्वते विशेष्ये वह्नेरसंसर्गाग्रहादेव वह्निमद्भेदाग्रहादेव वा अयं वह्निमनुमिनोमीति व्यवहारो वह्निवमद्भेदाग्रहादेव भविष्यति इत्यत आह–**प्रत्यक्ष** (९४–९) इति । तथा च प्रत्यक्षोपस्थिते विशेष्ये योऽसंसर्गाग्रहेण व्यवहारः स तु साक्षात्करोमीत्येव जायते न तु अनुमिनोमीति । तत्र दृष्टान्तमाह–**पीत**-(९४–१०) इति । तथा च पीतः शङ्ख इत्यत्र प्रत्यक्षोपस्थिते शङ्खे पीतत्वासंसर्गा-ग्रहेण पीतं शङ्खं साक्षात्करोमीत्येवं व्यवहारो जायते । तथा निर्वह्नौ पर्वते वह्नेर-संसर्गाग्रहेण वह्निं साक्षात्करोमीत्येव स्यात् न तु वह्निमनुमिनोमीत्यर्थः । **त्वये**ति (९४–११) प्राभाकरेण ।

प्राभाकरः समाधत्ते–**एतदपी**ति (९४–११) । **पूर्वमि**ति (९४–११) । यद्यपि धूमज्ञानात् पूर्वं वह्न्यसंसर्गाग्रहो वर्त्तते तथापि तत्र निर्वह्नित्वस्याप्यसंसर्गाग्रहो वर्त्तते । यतो धूमज्ञानात् पूर्वं वह्नेरप्यभावज्ञानं नास्ति । अथ च निर्वह्नित्वस्याप्य-भावज्ञानं नास्ति । धूमज्ञानानन्तरं तु यः वह्नेरसंसर्गाग्रहः स स्वतन्त्रोपस्थितेष्टवह्न्य-

---

१. यदि is redundant here, but as I have noted already, this may be a stylistic peculiarity of गुणरत्न ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसर्गाग्रहः, तस्मादेव प्रवृत्तिः। ननु बाष्पे धूमज्ञानात् पूर्वं वह्नेरसंसर्गाग्रहमात्रात् वह्न्यर्थी निष्कम्पं प्रवर्त्तते। **तदसंसर्गाग्रहादि**ति (९४–१४)। धूमज्ञानानन्तरं यो स्वतन्त्रोपस्थितेष्टवह्निस्तदसंसर्गाग्रहादित्यर्थः। तर्हि पीतः शङ्ख इतिवत् साक्षात्करोमीति व्यवहारः स्यान्न तु अनुमिनोमीत्यत आह–**अनुमिनोमी**ति (९४–१४)। तथा च यत्र प्रत्यक्षोपस्थिते विशेष्ये[२] विशेषणस्या[३]संसर्गाग्रहादप्रवृत्तिस्तत्र साक्षात्करोमीति व्यवहारः, यत्र च प्रत्यक्षोपस्थिते विशेष्ये[४] व्याप्यस्यासंसर्गाग्रहाद् व्यापकस्यासंसर्गाग्रहस्तस्मात् प्रवृत्तिस्तत्रानुमिनोमीति व्यवहारः। भवतां नैयायिकानां यद् व्याप्यज्ञानं तत्स्थानाभिषिक्तोऽस्माकं व्याप्यासंसर्गाग्रहः। अतो निर्वह्नौ पर्वते वह्निव्याप्यधूमज्ञानाभिषिक्तोऽस्माकं वह्निव्याप्यधूमासंसर्गाग्रह एव, भवतां वह्निरूपव्यापकानुमितिस्थानाभिषिक्तोऽस्माकं प्राभाकराणां वह्निरूपव्यापकासंसर्गाग्रह एवेति। तस्माद्वह्न्यसंसर्गाग्रहादेव वह्निमनुमिनोमीति व्यवहारः, वह्न्यर्थिनो निष्कम्पा प्रवृत्तिरेतदेवाह–**लिङ्गे**ति (९४–१५)। उपस्थितं यल्लिङ्गं धूमादि तस्यासंसर्गाग्रहाद्यो व्यापकस्य वह्नेरसंसर्गाग्रह इत्यर्थः। **निबन्धनमि**ति (९४–१५)। निष्कम्पप्रवृत्तिरनुमिनोमीति व्यवहारश्च तयोर्द्वयोर्निमित्तमित्यर्थः। उपसंहरति–**तस्मादि**ति (९४–१६)। **एतावते**ति(९४–१६)। अनुमिनोतीति व्यवहारानुरोधेन अन्यथाख्यातिर्न सिद्ध्येत्यर्थः।

अन्यथाख्यातिपक्षे दोषान्तरमाह–**किञ्चे**ति (९४–१७)। **अनयोरि**ति (९४–१८)। अनयोः शुक्तिरजतयोः। तादात्म्यमभेदः। **सामानाधिकरण्यमि**ति (९४–१८) एकाधिकरण्यम्। **रजतत्वेने**ति (९४–१८)। रजतत्वेन प्रकारेण शुक्तिर्वा भासते। प्रथमं दूषयति–**समूहे**ति (९४-१९)। यदि भ्रमरूपज्ञानस्य शुक्तिरजते एव विषयस्तर्हि शुक्तिरजते एतादृशं समूहालम्बनमपि भ्रमः स्यात्, अस्मिन् समूहालम्बने शुक्तिः रजतं द्वयमपि विषयो भवत्येव। **असदि**ति (९४–२०)। तथा च शुक्तिरजतयोस्तादात्म्यमभेदः स चासन्नेव सोऽभेदश्चेदसन्नेव खपुष्पादिवद् भासते तदा असतः पदार्थस्य भानमसत्ख्यातिः स्यात्। अत **एवे**ति। (९४–२०) यथा शुक्तिरजतयोस्तादात्म्यमसदेव, तथा शुक्तित्वरजतत्वयोः सामानाधिकरण्यमप्यसदेव, कुतः? शुक्तित्वरजतत्वयोः विरुद्धत्वात्। **तृतीये**ति (९४–२०)। रजतत्वेन प्रकारेणेति तृतीयार्थ इत्यर्थः। तथा च तृतीयार्थो यदि रजतत्वसम्बन्धमात्रं तर्हि रजतत्वसम्बन्धः शुक्तिश्च इदं द्वयं भ्रमविषयः तर्हि शुक्तिरजतत्वं सम्बन्ध इति समूहालम्बनेऽपि द्वयं विषयो भवत्येव। यदि शुक्तिरजतयोरभेदरूपस्तृतीयार्थस्तदा पूर्वोक्ता असत्ख्यातिः स्यात्।

---

१. प्रवृत्तिः। २. शङ्खे। ३. पीतत्वस्य। ४. पर्वते। ५. वह्नेरसंसर्गाग्रहः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दूषणान्तरमाह—**किञ्चेति** (९४—२२) । तथा च दोषाणां शुक्तित्वेन रूपेण शुक्तिप्रमाप्रतिबन्धकत्वम् । ननु रजतत्वेन प्रकारेण शुक्तेर्यद् विपरीतज्ञानं तज्जनकत्वं यदि दोषाणां विपरीतकार्यजनकत्वं तदा बाधकमाह—**कथमन्यथेति** (९४—२३) । यथा भ्र(भृ)ष्टात् कुटजबीजात् कुटजाङ्कुरस्य प्रतिबन्धो जायते न तु न्यग्रोधाङ्कुरस्योत्पत्तिर्जायते, विपरीतकार्यं न जायते ।

अत्र शङ्कते नैयायिकः—**नन्विति** (९५—१)। तथा च यदि अन्यथाख्यातिर्नास्ति तर्हि इदं रजतमिति ज्ञानं बाध्यम् । नेदं रजतमिति ज्ञानं बाधकम् । अनयोर्बाध्यबाधकभावव्यवस्था न स्यात् । एतदेव विकल्प्य दूषयति—**किमिति** (९५—१) । तथा च नेदं रजतमिति ज्ञानेन इदमंशो वा बाध्यते रजतांशो वा ज्ञानमात्रं वा । तत्र प्रथमं दूषयति—**इदमिति** (९५—१) । न हि नेदं रजतमिति ज्ञानेन पुरोवर्त्तिनि इदन्तांशो बाध्यते अपह्नियते वा । इदन्त्वस्य पुरोवर्त्तिनि बाध्यबाधकज्ञानकाले तथैव सत्त्वात् । द्वितीयं दूषयति—**नेतर** इति (९५—२) । रजतमपि न बाध्यते क्वचिद्रजताश्रये बाध्यबाधकज्ञानकाले तथैव सत्त्वात् । नापि ज्ञानम् । तृतीयपक्षः अनुक्तोऽपि पक्षो बोध्यः । जातस्य उत्पन्नस्य ज्ञानस्य नेदं रजतमिति ज्ञानेन विनाशः क्रियते । विनाशस्तु विरोधिगुणप्रादुर्भावादेव भविष्यति न तु बाधकज्ञानापेक्षा । नेदं रजतमिति ज्ञानस्यापेक्षा नास्ति ।

अतोऽन्यथाख्यातिं विना नेदं रजतमिति ज्ञानस्य बाधकत्वं न स्यादित्युपसंहरति—**तस्मादिति** (९५—३) । तथा च शुक्तौ रजतत्वं ज्ञानम् इदं रजतमिति बाध्यज्ञानेन विषयीकृतं तदेव रजतत्वं नेदं रजतमिति ज्ञानेन शुक्तौ बाध्यते । अथवा रजते विद्यमानो रजताभेदः इदं रजतमिति ज्ञानेन शुक्तौ विषयीक्रियते । स एव रजताभेदः नेदं रजतमिति ज्ञानेन शुक्तौ बाध्यते । बाधो नाम तदभावबोधनम् ।

एतावता कथमन्यथाख्यातिसिद्धिरित्यत आह—**उभयथेति** (९५—४) । तथा च नेदं रजतमिति ज्ञानेन इदं रजतमिति ज्ञानस्य यो विषयः शुक्तौ रजतत्वं रजताभेदो वा स चेद् बाध्यते तदा इदं रजतमिति ज्ञानं शुक्तिविशेष्यकं रजतत्वप्रकारकं जातम्, अयमेव च भ्रमः ।

समाधत्ते प्राभाकरः । **भेदाग्रहेति** (९५—५) । नेदं रजतमिति ज्ञानेन अभेदज्ञानं न बाध्यते किन्तु शुक्तौ रजतभेदाग्रहेण प्रसञ्जितो नाम कृतो यो रजतं रजतमित्यभेदव्यवहारः स एव बाध्यते ।

---

१. चाकचक्यादीनां ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र शङ्कते नैयायिकः—नन्विति (९५–५)। भेदाग्रहश्चेत् प्रवर्त्तकस्तदा भेदाग्रहस्य संवादिप्रवृत्तावपि विद्यमानत्वात् विसंवादिप्रवृत्तावपि भेदाग्रहस्य विद्यमानत्वात् कारणस्याविशेषप्रवृत्तिलक्षणे फले संवादिविसंवादिवैचित्र्यं न स्यात् इत्यर्थः। अन्यथाख्यातिपक्षे तु वैचित्र्यमुपपद्यते इत्याह—तस्मादिति (९५–६)। अभेदग्रहः रजते रजताभेदग्रहः[1] संवादिप्रवृत्तिहेतुः। अथ च शुक्तौ रजतभेदाग्रहः[2] विसंवादिप्रवृत्तिहेतुः। ततः किमित्यत आह—तथा चेति (९५–७)। प्रवृत्तिसामान्ये अनुगतकारणाभावोऽननुगमः।

समाधत्ते प्राभाकरः—मैवमिति (९५–७)। संवादिप्रवृत्तावपि न रजताभेदग्रहः कारणं किन्तु रजतभेदाग्रह एव। एवं संवाद्यसंवादिप्रवृत्तिवैचित्र्यं तु यत्र रजते एव रजतस्य भेदाग्रहः पुरोवर्त्तिनि अविद्यमानेष्टभेदाग्रह इति यावत्। स संवादिप्रवृत्तिजनकः पुरोवर्त्तिनि शुक्तौ विद्यमानो य इष्टभेदो रजतभेदस्तस्याग्रहो विसंवादिप्रवृत्तौ हेतुरित्याह——विपरीत इति (९५–८)। अरजते शुक्तौ विद्यमानस्य रजतभेदस्य योऽग्रहः स विसंवादिप्रवृत्तिहेतुस्तथा चानुगमः। भेदाग्रहस्यैव प्रवृत्तिसामान्ये कारणमागतं प्रवृत्तिवैचित्र्यं तु विद्यमानाविद्यमानभेदाग्रहादेव भविष्यतीति पूर्वपक्षः।

सिद्धान्तमाह—रजतत्वेति (९५–१०)। रजतत्वप्रकारकज्ञानं रजतव्यवहारे कारणमिदमुभयवादिसिद्धम्। तच्च स्मरणरूपं वा अनुभवरूपं वा। पुरोवर्त्तिनि अनुभवरूपं नैयायिकानाम्, स्मरणरूपं प्राभाकराणाम्—अत्र विवादः।

एवं सति किमित्यत आह — तत्रेति (९५–११)। यदि रजतत्वप्रकारज्ञानमात्रं कारणं तदा नेदं रजतमिति भेदग्रहकालेपि रजतत्वप्रकारकं स्मरणरूपं ज्ञानं तिष्ठत्येव तदापि प्रवृत्तिः स्यात्। तथा च तत्रातिप्रसङ्गवारणार्थं भेदाग्रहः कारणान्तरं वा वक्तव्यम्। अथवा व्यवहर्त्तव्यविशेष्यकत्वं नाम पुरोवर्त्तिविशेष्यकत्वम् क्लृप्तकारणे रजतत्वप्रकारकेऽवच्छेदकं वा कल्पनीयम्। तत्र क्लृप्तकारणे पुरोवर्तिविशेष्यकत्वस्यैवावच्छेदकत्वे लाघवमित्याह——अतन्त्रत्वे इति (९५–११)। अतन्त्रत्वेऽनवच्छेदकत्वे। सोऽपीति (९५–१२)। स भेदाग्रहः। यत्र नेदं रजतमिति भेदग्रहो वर्त्तते तत्रातिप्रसङ्गवारणार्थं भेदाग्रहः कारणान्तरं वक्तव्यम्। न तस्य भेदाग्रहस्य केवलं[5] कारणान्तरत्वमात्रमपि तु तस्मिन् भेदाग्रहेऽपि किञ्चित् कारणतावच्छेदकं कल्प-

१. रजतमिति ज्ञानं। २. इदं रजतं न भवतीति भेदस्याग्रहः। ३. रजतत्वप्रकारकज्ञानस्य रजतव्यवहारं प्रति कारणं क्लृप्तम्। ४. गेहादौ रजतत्वप्रकारकं ज्ञानं वर्त्तत एव। ५. Use of both केवलम् and मात्र is another stylistic peculiarity of गुणरत्न.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नीयमित्याह—**किं त्विति** (९५-१२)। यत्र कुत्रापि चेद्रजतभेदाग्रहः कारणं तदा पुरोवर्त्तिनि शुक्तौ रजतभेदग्रहे विद्यमानेऽपि तदानीं प्रवृत्तिः स्यात्। एवं पुरोवर्त्तिनि भेदाग्रहमात्रं चेत् कारणं तदा पुरोवर्त्तिनि शुक्तौ नेदं रजतमिति भेदग्रहकाले द्रव्यभेदाग्रहस्य विद्यमानत्वात् प्रवृत्तिः स्यादिति। अत एवोक्तं **न यस्य कस्यापीति**(९५-१२)। द्रव्यभेदाग्रहाद्रजतभेदग्रहकाले प्रवृत्तिर्न जायते। एवं यत्र कुत्रापीति गेहस्थरजतादौ रजतभेदाग्रहे विद्यमानेऽपि पुरोवर्त्तिनि रजभेदग्रहकाले प्रवृत्तिर्न जायते इतिकृत्वाऽतिप्रसङ्गवारणार्थं तस्मिन् पुरोवर्त्तिनि रजतप्रतियोगिक[1]भेदग्रहाभावः कारणं प्रवृत्तौ।

एवं सति कथं लाघवगौरवमित्याह— **तथा चेति** (९५-१३)। पुरोवर्त्तिनि रजतभेदविषयकग्रहाभावो नाम रजतप्रतियोगिकभेदविषयकग्रहाभावः। अयमर्थः—पुरोवर्त्तिनि शुक्तौ रजतप्रतियोगिको भेदो वर्त्तते तस्य ज्ञानं यदा नास्ति स भेदग्रहाभावः। तस्य भेदाग्रहस्य प्रवृत्तौ कारणत्वम् वक्तव्यं, किं वा क्लृप्तस्य रजतग्रहस्य कारणस्य पुरोवर्त्तिविशेष्यकत्वं वाऽवच्छेदकं कल्पनीयमित्याह—**पुरोवर्त्तिनीति** (९५-१३)। **पुरोवर्त्तिनि रजतग्रहस्येति** (९५-१५)। पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्येत्यर्थः। **आद्येति** (९५-१६)। पुरोवर्त्तिनि रजतप्रतियोगिकभेदग्रहाभावस्येत्यर्थः। अभावरूपत्वेन गौरवमित्यर्थः। **द्वितीय इति** (९५-१६)। पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्येत्यर्थः। भावरूपत्वेन प्रवृत्तिं प्रति कारणत्वे लाघवमित्यर्थः।

अत्र प्राभाकरः शङ्कते—**न चैवमिति** (९५-१६)। यदि पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवात् कारणत्वं तदा विसंवादिप्रवृत्तिस्थले इदमिति ग्रहणात्मकं रजतमिति स्मरणात्मकमेतादृशज्ञानद्वयातिरिक्तमन्यथाख्यातिरूपं विशिष्टज्ञानमतिरिक्तं कल्पनीयं स्यादित्यतिरिक्तधर्मिकल्पनागौरवं स्यादिति शङ्कार्थः।

समाधत्ते नैयायिकः—**प्रमाणवत इति** (९५-१७)। अवच्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वात्। यथा घटं प्रति दण्डस्य कारणता चैत्रीयदण्डत्वेन वा कारणता दण्डत्वेन वा। तत्र लाघवात् दण्डत्वेनैव कारणत्वं न तु चैत्रीयदण्डत्वेन। तत्र यदि लाघवेन दण्डत्वेन कारणता स्यात् तदा बहूनां चैत्रमैत्रदण्डानां कारणता स्यात्। यदि चैत्रदण्डत्वेन कारणत्वं तर्हि चैत्रदण्डस्यैव एकव्यक्तेरेव कारणत्वं न बहूनाम्। तत्र दण्डत्वस्य कारणतावच्छेदकस्य लघुभूतत्वे बहूनां व्यक्तीनां कारणत्वं यथा न दोषः, तथा रजतत्वप्रकारकज्ञानस्य पुरोवर्त्तिविशेष्यकत्वे कारणतावच्छेदके लघुभूते सति अन्यथाख्यातिरूपविशिष्टज्ञानकल्पनागौरवं न दोषाय।

---

१ Add इति here.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्धेतोरेवास्तु किं तेनेत्याशङ्कते प्राभाकरः—**न चेति** (९५–१८)। अन्यथा-ख्यातिकारणतया स्वीकृतो यो भेदाग्रहस्तस्यैव व्यवहारकारणत्वमस्तु किमन्यथा-ख्यातिस्वीकारेणेत्यर्थः। **तस्यैवेति** (९५–१८)। अन्यथाख्यातिकारणत्वेनावश्य-कस्य भेदाग्रहस्य कारणत्वमस्त्वित्यर्थः। समाधत्ते नैयायिकः—**अन्यथेति**(९५–१९) यदि लाघवेन पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य कारणत्वे सिद्धेऽन्यथाख्यातौ सिद्धायां कार्यं कारणं विना नोपपद्यते इत्यन्यथाख्यातिरूपकार्यान्यथाऽनुपपत्त्या भेदाग्रह एव कारणत्वेन स्वीक्रियते। **तत्रेति** (९५–१९) तस्यामन्यथाख्यातौ अग्रहो नाम भेदाग्रहस्तस्य कारणत्वकल्पनस्योचितत्वात्।

ननु भेदाग्रहस्यान्यथाख्यातिं प्रति कारणता, सा व्यवहारे एवास्तु इत्यत आह—**नन्वेवमिति** (९५–२१)। व्यवहारे भेदाग्रहस्य कारणता गुरुभूता। अन्यथा-ख्यातेः कारणता लघुभूता। **तत्रेति** (९५–२१) रजतव्यवहारे। **अग्रहेति** (९५–२१) भेदाग्रहणकारणतायाम्। **विवादादिति** (९५–२१)। गौरवेण भेदाग्रहस्य व्यवहारकारणतायां गौरवादित्यर्थः।

प्राभाकरः शङ्कते—**रजतज्ञानस्येति** (९५–२१)। रजतव्यवहारे कारणता रजतज्ञानस्यावश्योपजीव्यत्वेन तिष्ठतु तथापि तत्र प्रवृत्तिसमानविषयत्वं नाम यत्प्र-वृत्तौ विशेष्यं तद्विशेष्यकत्वं यत् तत्तु उपजीव्यं न भवति रजतज्ञानकारणतायाम्। यदि रजतज्ञानकारणतायां प्रवृत्तिसमानविशेष्यकत्वम् उपजीव्यं स्यात् तदा प्रवृत्तौ विशेष्यं शुक्तिः तद्विशेष्यकं शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं कारणमागतमित्यन्य-थाख्यातिसिद्धिः स्यात्। तदेव प्रवृत्तिसमानविशेष्यकत्वमुपजीव्यं नास्ति रजतज्ञानस्य। ननु संवादिप्रवृत्तिस्थले प्रवृत्तिसमानविशेष्यत्वस्य रजतज्ञानकारणतायामुपजीव्यत्वात् विसंवादिप्रवृत्तिस्थलेऽपि तदेव प्रवृत्तिसमानविशेष्यकत्वम् उपजीव्यमस्तु इत्यत आह—**सत्यरजतेति** (९५–२३)। सत्यरजतस्थलेऽपि या रजतज्ञानस्य प्रवृत्तिसमान-विशेष्यता सा तु दैवादागता न तु कारणत्वानुरोधेनेत्यर्थः।

दूषयति नैयायिकः—**प्रवृत्तीति** (९५–२३)। रजतप्रकारकज्ञानस्य कारणतायाम् उभयवादिसिद्धायां प्रवृत्तिं प्रति रजतभेदग्रहस्थले रजतत्वप्रकारकज्ञाने स्मरणरूपे विद्यमानेऽपि प्रवृत्तिर्न जायते। तत्रातिप्रसङ्गवारणार्थं प्रवृत्तिसमानविशेष्य-कत्वमेव कारणतावच्छेदकत्वेन उपजीव्यं, न तु भेदाग्रहः कारणमेवेति पूर्वोक्तमेव। **अनुपजीव्यत्वे** (९५–२३) इति। कारणतायामनुपजीव्यत्वे इत्यर्थः। **अति-प्रसङ्गादिति** (९५–२४)। भेदग्रहे सत्यपि प्रवृत्तिः स्यादित्यतिप्रसङ्ग इत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राशङ्कते प्राभाकरः—**न चेति** (९५–२४) । यदि रजतभेदग्रहस्थले रजतत्वप्रकारके ज्ञाने विद्यमानेऽपि प्रवृत्तिर्न जायते इति तत्र प्रवृत्तिः स्यादित्यतिप्रसङ्गवारणार्थं भेदाग्रह एव कारणान्तरं वक्तव्यम् । न तु प्रवृत्तिसमानविशेष्यकत्वमित्यर्थः । **तद्वारणार्थमिति** (९५–२४) । अतिप्रसङ्गवारणार्थमित्यर्थः । **अग्रह इति** (९५–२४) । अग्रहो भेदाग्रहः ।

समाधत्ते—**अन्तरङ्गेति** (९५–२४) । रजतज्ञानकारणतायां विषये एव कारणतावच्छेदकत्वेनान्तरङ्गः, न तु रजतत्वप्रकारकज्ञाने अविषयरूपः भेदाग्रहः कारणान्तरम् । विषयरूपं प्रवृत्तिविशेष्यविशेष्यकत्वलक्षणं प्रवृत्तिसमानविषयत्वं तदेव कारणतावच्छेदकमुचितमित्यर्थः । न तु भेदाग्रहः कारणं प्रवृत्तिं प्रति ।

प्राभाकरः अत्राशङ्कते—**न चेति** (९५–२५) भेदाग्रहे सति प्रवृत्तिस्तूभयवादिसिद्धा एवं सति प्रवृत्तिं प्रति नियतपूर्ववर्त्तिनि भेदाग्रह एव अन्यथासिद्धत्वं कल्प्यते । न तु अन्यथाख्यातिरूपे विशिष्टज्ञाने तस्याऽन्यथाख्यातिरूपविशिष्टज्ञानस्य प्रवृत्तिं प्रति उभयवादिसिद्धत्वाभावात् ।

समाधत्ते नैयायिकः—**न हीति**(९५–२७) । न हि उभयवादिसिद्धत्वं कारणतायां प्रयोजकं किन्तु लाघवाख्यतर्कसहकृतं प्रमाणं कारणत्वनियामकम् । एवं सति रजतत्वप्रकारकज्ञाने कारणतावच्छेदकं किं प्रवृत्तिसमानविशेष्यत्वं वक्तव्यं किं वा भेदाग्रहो वा कारणान्तरं वक्तव्यम् । तत्र रजतत्वप्रकारकज्ञानस्य प्रवृत्तिसमानविशेष्यकत्वेन कारणत्वे एका कारणता आयाति । भेदाग्रहस्य तु कारणत्वे रजतत्वप्रकारकज्ञानमपि कारणम् भेदाग्रहोऽपि कारणम् इति कारणताद्वयमिति गौरवम् । इदमेव प्रभाकरमतमनूद्य नैयायिकः खण्डयति—**न चेति** (९६–१) । लाघवाख्यतर्कसहकृतं प्रमाणं भेदाग्रहमेव कारणत्वेन विषयीकरोत्येवं तु न हि । कुतः ? इत्यत आह—**गौरवेति** (९६–१) । रजतत्वप्रकारकज्ञानस्य प्रवृत्तिसमानविशेष्यकरजतत्वप्रकारज्ञानत्वेन कारणत्वे एका कारणता, भेद ग्रहकारणतायां कारणद्वयकल्पना इति गौरवमित्यर्थः ।

अत्राशङ्कते—**नै चेति** (९६–३) । विशिष्टज्ञानसामग्री विशेष्येन्द्रियसन्निकर्षः विशेषणज्ञानं तदुभयासंसर्गाग्रहो विशेषणसन्निकर्षश्च । यथा दण्डी पुरुष इत्यत्र पुरुषेण विशेष्येण सहेन्द्रियसन्निकर्षः दण्डस्य विशेषणस्य ज्ञानम् पुरुषे विशेष्ये दण्डस्य विशेषणस्यासंसर्गाग्रहः दण्डाभावज्ञानाभावः एवं हि दण्डविशिष्टज्ञानसामग्री । सा सामग्री सर्वत्र भ्रमे नास्ति । कुतो नास्ति, यतो विशेष्यासन्निकर्षेऽपि बहिः

१. प्रवृत्तिसमानेत्यादिकः । २. प्राभाकरः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पदार्थविशेष्यकमानसभ्रमः शीतो वायुरित्यादौ स्वीकृतः । न हि वायुना विशेष्येण सह मानसः सन्निकर्षोऽस्ति । तथा च सर्वत्र भ्रमे विशिष्टज्ञानसामग्री नास्तीतिकृत्वा विशिष्टज्ञानात्मको भ्रमो न सम्भवत्येव । **विशेष्येति**(९६–३) । भ्रमे विशेष्यं यत् तस्यासन्निकर्षः । **बहिरिति** (९६–३) । शीतो वायुरित्यादिको बहिर्विशेष्यको भ्रम इत्यर्थः । **कारणबाधादिति** (९६–३) विशेष्येन्द्रियसन्निकर्षरूपकारणबाधादित्यर्थः । **तद्बाध** (९६–४) इति भ्रमरूपविशिष्टज्ञानबाध इत्यर्थः ।

समाधत्ते–**ज्ञानान्तरेति** (९६–४) । तथा च ज्ञानान्तरोपनीते बहिःपदार्थे तद्विशेषणकं बहिःपदार्थविशेषणकं अन्तःपदार्थविशेष्यकं यथा विशिष्टज्ञानं जायते । एवं ज्ञानान्तरोपनीते बहिःपदार्थे तद्विशेष्यकं यथा मानसं ज्ञानं जायते, तद्वत् ज्ञानान्तरोपनीतबहिःपदार्थविशेष्यकं मानसमपि भ्रमरूपं ज्ञानं भविष्यति । यथा ज्ञानान्तरोपनीते घटे घटविशेषणकं घटज्ञानवानहमिति मानसं ज्ञानं जायते एवं ज्ञातो घट इति ज्ञानं ज्ञानान्तरोपनीत इह बहिःपदार्थो घटस्तद्विशेष्यकमपि मानसं ज्ञानं भवति । ज्ञातो घट इति बहिःपदार्थविशेष्यकं मानसं परित्यज्य **ज्ञातः परमाणु**-(९६–४) रित्युदाहरणम् । तत्सर्वथेन्द्रियासन्निकृष्टविशेष्यमित्यभिप्रायेण । एवं सति उपनीते बहिःपदार्थे सति बहिःपदार्थविशेषणकं बहिःपदार्थविशेष्यकं वा मानसं ज्ञानं प्रमारूपं जायते । एवम् उपनीते बहिःपदार्थे बहिर्विशेषणकं बहिःपदार्थविशेष्यकं वा मानसं भ्रमरूपमपि ज्ञानं भविष्यति । उपनयविशेषसामग्र्यविशेषात् । एतदेवाह–**कार्यदर्शनस्येति** (९६–५) । यथा कार्यं बहिःपदार्थविशेषणकं बहिःपदार्थविशेष्यकं वा मानसं ज्ञानं उपनयवशात् तुल्यमेव ।

ननु ज्ञानान्तरोपनीतं चेन्मानसे बोधे बहिःपदार्थविशेष्यके भासते तदा महानसादौ वह्निज्ञानोपनीतो यो वह्निः स बहिःपदार्थो यः पर्वतादिस्तद्विशेष्यके मानसे बोधे भासताम् । तथा च पर्वतो वह्निमानिति मानसमेव ज्ञानं स्यान्न तु अनुमितिरूपमित्याशङ्कते–**न चेति** (९६–६) । समाधत्ते–**अत्रेति** (९६–६) । तृतीयलिङ्गपरामर्शस्थले येन विशेषेणानुमित्युच्छेदो न भवति तादृशविशेषस्योक्तत्वात् ।

इष्टभेदाग्रहस्याप्रवर्त्तकत्वमुक्त्वा अनिष्टभेदाग्रहस्य निवर्त्तकत्वमपि नास्तीत्याह–**न चेति** (९६–७) यथा स्वतन्त्रोपस्थितेष्टभेदाग्रहः प्रवर्त्तको न भवति एवं स्वातन्त्र्योपस्थितानिष्टभेदाग्रहो निवर्त्तकोऽपि न भवतीत्यर्थः । विपक्षे बाधकमाह–**परस्परेति** (९६–७) । इयं शुक्तिर्न रजतम् इदं शुक्तौ ज्ञानम् । रजते इदं रजतं न शुक्तिरिति समूहालम्बनज्ञानात् शुक्तौ रजतार्थी न निवर्त्तेत रजते वा न प्रवर्त्तेत । कुतः ?

१. पूर्वज्ञानात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इष्टानिष्टयोः स्वातन्त्र्येणोपस्थित्यभावात् । न शुक्तिरित्यनेन शुक्तेरभावविशेषणतया उपस्थितत्वात् न रजतमित्यत्र रजतस्यापि अभावविशेषणतयोपस्थितत्वात् तथा च स्वातन्त्र्येणोपस्थितेरभावात् ।

दूषणान्तरमाह—**किञ्चेति** (९६–९)। रजतरङ्गयोः इमे रङ्गरजते इति ज्ञानात् रङ्गे प्रवर्त्तते रजते च निवर्त्तते । तन्न स्यात् । किन्तु रजते प्रवर्त्तेत रङ्गे च निवर्त्तेत । कुतः ? रङ्गरजते इति ज्ञाने रङ्गस्यापि स्वातन्त्र्येणोपस्थितत्वाद्रजतस्यापि स्वातन्त्र्येणोपस्थितत्वात् तयोर्भेदाग्रहस्तिष्ठत्येव भेदग्रहेऽन्यथाख्यातिः स्यात् । एवं च सति रङ्गरजत इति ज्ञानेन स्वतन्त्रोपस्थितस्य रङ्गस्य भेदाग्रहो रङ्गे तिष्ठति । स्वतन्त्रोपस्थितस्य रजतस्य भेदाग्रहो रजतेऽपि तिष्ठत्येव। तथा च रङ्गे निवृत्तिः स्यात् । रजते च प्रवृत्तिः स्यादित्यर्थः । **किमिति** (९६–१०) । रजते इष्टभेदाग्रहस्य रङ्गेऽनिष्टभेदाग्रहस्य विद्यमानत्वाद्यथा रङ्गे प्रवर्त्तते तद्वन्निवर्त्तेत, एवं यथा रजते निवर्त्तते तथा प्रवर्त्ततेति एकैकस्मिन् युगपत्प्रवृत्तिनिवृत्ती स्यातामित्यर्थः ।

अत्राशङ्कते—**न चेति** (९६–१०) तथा च यस्मिन् पुरोवर्त्तिनि यो विद्यमानो धर्मः चाकचिक्यादिः तेन स्मारितं यदिष्टं रजतादि तस्य तादृशधर्माश्रये पुरोवर्त्तिनि यो भेदाग्रहः स प्रवर्त्तकः । एवं पुरोवर्त्तिनि विद्यमानो यो मालिन्यादिधर्मस्तेन स्मारितं यदनिष्टं तस्य तादृशमालिन्याश्रये पुरोवर्त्तिनि यो भेदाग्रहः स निवर्त्तको भवति । मालिन्याश्रये प्रकृते च रङ्गे प्रवृत्तिरेव जायते, न निवृत्तिः । कुतः ? रङ्गनिष्ठेन चाकचिक्येन स्मृतस्येष्टस्य रजतस्य रङ्ग एव भेदाग्रहो वर्त्तते इतिकृत्वा रङ्गे प्रवृत्तिः । एवं रजतनिष्ठेन मालिन्येनोपस्थापितस्य रङ्गस्यानिष्टस्य भेदाग्रहो रजत एव वर्त्तते इतिकृत्वा तत्र निवृत्तिरेव, न तु प्रवृत्तिरित्यर्थः । **सादृश्येनेति** (९६–११) रङ्गनिष्ठं यच्चाकचिक्यं तद्रजतसमानधर्मो भवतीतिकृत्वा रजतसादृश्यम् । **तत्रेति** (९६–११) तादृशसादृश्याश्रये । **तद्भेदाग्रहस्येति** (९६–११) यस्य सादृश्यं तद्भेदाग्रहस्येत्यर्थः ।

समाधत्ते—**अनुभूयेति** (९६–११) तथा च पुरोवर्तिनिष्ठो यः आरोप्यसाधारणो धर्मस्तद्दर्शनेन यत् स्मारितं यदिष्टमथ चानिष्टं तयोर्भेदाग्रहो यथाक्रमेण प्रवर्त्तको निवर्त्तकश्च तर्हि अनुभूयमानारोपस्थले प्रवृत्तिर्न स्यात् । कुतः ? तत्रानुभूयमानारोपस्थले पित्तद्रव्यगतं पित्तमनुभूय नयनावरणं पीताम्बरस्थं पीतं रूपमनुभूय शङ्खादावारोप्यते, तत्र पीतरूपं न शङ्खनिष्ठं न वा तेन पीतरूपेण पीतं रूपं स्मर्यते । तथा च अनुभूयमानारोपस्थले शङ्खो न पीतः किन्तु श्वेतः इति मानसज्ञानविरहदशायां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पीतार्थिनः प्रवृत्तिर्जायते, सा न स्यात्, तादृशभेदाग्रहाभावात् । सत्यरजतस्थलेऽपि या प्रवृत्तिः साऽपि न स्यात् । कुतः ? इत्यत आह—**तदभावादिति** (९६–१२) । पुरोवर्त्तिनिष्ठेन आरोप्यसादृश्येन स्मृतं यदारोप्यं रजतं तस्य भेदाग्रहाभावादित्यर्थः ।

अत्राशङ्कते–**न चेति** (९६–१२) । तथा च तत्रानुभूयमानारोपस्थले यत्र निकटस्थं रजतमनुभूय यत्रारजते रजतम् आरोप्यते तत्र रजतभेदाग्रहो न प्रवर्त्तकः, किन्तु अरजतभेदग्रह एव प्रवर्त्तकः । अत्राशङ्कते–**न चेति** (९६–१३) तथा च अरजते अरजतभेदो नास्ति, अरजतभेदस्य ग्रहेऽन्यथाख्यातिः स्यादित्यर्थः । समाधत्ते **अरजतेति** (९६–१३) । न हि अरजतभेदग्रहो ज्ञानम् उच्यते, किं तु अरजतभेदस्य असंसर्गाग्रह एव अरजतभेदग्रहपदार्थः । तथा च अरजतभेदस्यासंसर्गाग्रहात् रजतभेदग्रहाभावेऽपि रजतार्थिनोऽनुभूयमानारोपस्थले प्रवृत्तिः स्यादेव ।

दूषयति–**सत्येति** (९६–१४) यदि अरजतभेदस्यासंसर्गाग्रह एव रजतार्थिप्रवृत्तिनियामकस्तदा सत्यरजतस्थले यदा प्रवर्त्तते तदानीं निवृत्तिरपि स्यात् । यथाऽरजतभेदासंसर्गाग्रहो वर्त्तते तथा रजतभेदासंसर्गाग्रहोऽपि वर्त्तते । एवं सति यथा प्रवर्त्तेत तथा निवर्त्तेत । अयमाशयः–यदा रजत एव रजतत्वप्रकारकं ज्ञानं सत्यं जायते तदनन्तरं प्रवर्त्तते तत्राऽरजतभेदरूपस्य[1] प्रतियोगिनो यदा उपस्थितिर्नास्ति तदानीं प्रतियोगिज्ञानाभावेन अरजतभेदाभावलक्षणस्यारजतभेदासंसर्गस्य ज्ञानं नास्तीति कृत्वा अरजतभेदासंसर्गाग्रहाद्यथा प्रवर्त्तते तथा यदा रजतमिति ज्ञानकाले रजतभेदलक्षणस्य प्रतियोगिनो ज्ञानं नास्ति तदानीं रजतभेदाभावलक्षणस्य रजतभेदासंसर्गस्यापि ज्ञानं नास्तीतिकृत्वा रजतभेदासंसर्गाग्रहो वर्त्तते इतिकृत्वा निवृत्तिरपि स्यात् । कुतः ? अरजतभेदलक्षणस्य प्रतियोगिनो यथोपस्थितिर्नास्ति तदा अरजतभेदासंसर्गाग्रहो वर्त्तते एवं रजतभेदासंसर्गाग्रहोऽपि[2] वर्त्तते । रजतभेदलक्षणस्य प्रतियोगिना यदोपस्थितिर्नास्ति तदा तादृशभेदासंसर्गाग्रहोऽपि नास्ति । इति युक्तं प्रवृत्तिवत् निवृत्त्यापादनम् ।

दूषणान्तरमाह–**शुक्ताविति** (९६–१५) यथा सत्यरजतस्थले युगपत् प्रवृत्तिनिवृत्ती स्यातां तथा असत्यस्थलेऽपि युगपत् प्रवृत्तिनिवृत्ती स्याताम् इत्यर्थः । यथा अरजतभेदस्यासंसर्गाग्रहात् प्रवृत्तिस्तथा रजतभेदस्यासंसर्गाग्रहान्निवृत्तिरपि स्यादित्यर्थः । अत्राशङ्कते–**न चेति** (९६–१६) । यदा शुक्तौ रजतार्थी प्रवर्त्तते

१. रजतत्वाभावाग्रहात् । २. भेदाभावस्य । ३. अरजतभेदाऽसंसर्गाग्रहो नाम अरजतत्वाभावाग्रहः तस्मान्निवृत्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदानीमिदं रजतं परं नेदमरजतं शुक्त्यादि इतिकृत्वा रजतभेदस्यासंसर्गग्रह एव वर्त्तते । परं तु रजतभेदासंसर्गाग्रहो नास्ति कथं निवृत्त्यापादनम् । समाधत्ते— **अन्यथेति** (९६–१७) तथा च शुक्तौ यदा रजतार्थी प्रवर्त्तते तदानीं रजतभेदवत्यां शुक्तौ रजतभेदाभावग्रहे अन्यथाख्यात्यापत्तेः । अत्र शङ्कते—**न चेति** (९६–१७) । **तत्रेति** (९६–१७) यत्र रजतार्थी प्रवर्त्तते तत्र रजतभेदस्य संसर्गग्रहो नास्ति । तथापि परं रजतभेदासंसर्गस्यासंसर्गाग्रहो वर्त्तत एव । एतावता रजतमिति भ्रमकार्यमेव भविष्यति न तु नेदं रजतमिति बाधकार्यं निवृत्तिलक्षणम् ।

प्राभाकराणां मते यावद्भ्रमकार्यं तावदसंसर्गाग्रहस्य कार्यम् । यथा शुक्तौ रजतत्वेन रूपेण रजतत्वस्य ग्रहो भ्रमः नैयायिकानाम् एवम् इदं रजतमित्यत्र रजतत्वेन रूपेण रजतत्वाभावस्य यो ग्रहः रजतत्वासंसर्गाग्रहलक्षणः स प्राभाकराणां भ्रमस्थानाभिषिक्तः तस्मादेव प्रवृत्तिः ।

दूषयति—**असंसर्गेति** (९६–१८) । यदि रजतभेदासंसर्गस्यासंसर्गाग्रहात् प्रवृत्तिः तदा रजतभेदासंसर्गस्यासंसर्गोऽतिरिक्तो नास्ति किन्तु रजतत्वाभावात्मक एव । तथा च रजतत्वाभावाग्रहात् रजतत्वासंसर्गाग्रहलक्षणात् रजतभेदाग्रहलक्षणाद्वा प्रवृत्तिरित्येवागतम् । तत्र दूषणम् उक्तमेव ।

दूषणान्तरमाह—**अग्रहस्येति** (९६–१८) । यदि रजतज्ञानकार्यं रजतत्वासंसर्गाग्रहात् रजतभेदाग्रहाद्वा तदा कुत्रापि घटोऽयं पटोऽयमिति घटत्वपटत्वविशिष्टं ज्ञानं न सिध्येत् । कुतः ? घटत्वपटत्वासंसर्गाग्रहादेव घटपटादौ प्रवृत्तिर्भविष्यतीत्युक्तमेव । तस्माद्भेदाग्रहोऽसंसर्गाग्रहो वा व्यवहारस्य प्रवृत्तेर्वा न नियामकः, किन्तु विशिष्टज्ञानमेव शुक्तिविशेष्यकं रजतत्वप्रकारकं रजतार्थिप्रवृत्तिनिमित्तम् अन्यथाख्यातिरूपं सिध्यतीति ।

पुनः शङ्कते—**नन्विति** (९६–१९) । कीदृशो भेदाग्रहः कीदृशोऽसंसर्गाग्रहो वा प्रवृत्तौ व्यवहारे वा नियामक इति वा विशेषनिष्टङ्कितेन किमित्यर्थः । तर्हि किमित्यत आह—**यदेवेति** (९६–१९) । तथा च नैयायिकानां यादृशी भ्रमसामग्री सैवास्माकं प्राभाकराणां प्रवृत्तिसामग्री । नैयायिकमते यो हि भ्रमनिमित्तं भेदाग्रहः स एवास्माकं प्रवृत्तिनिमित्तम् । **अन्यथेति** (९६–२०) । यदि भेदाग्रहात् निवृत्त्यापादनं क्रियते तदानीं भ्रमात् पूर्वं तव मतेऽस्मन्मते एकैव सामग्री तया सामग्र्या तव भ्रमलक्षणं ज्ञानम् अस्माकं तयैव सामग्र्या प्रवृत्तिरेव जायते न त्वन्तर्गडुभ्रमरूपं

१. रजतभेदस्यासंसर्गो नाम रजतत्वम् असंसर्गो नाम अभावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञानमिति । एवं सामग्रीसाम्ये यदि अस्मान् प्रति यत्र शुक्तौ रजतार्थी प्रवर्तते तत्र निवृत्त्यापादनं तर्हि अस्माभिरपि त्वां प्रति नेदं रजतमिति भेदज्ञानलक्षणं बाधः स्यादित्यापादनं कर्त्तव्यमेवेत्यर्थः ।

समाधत्ते-**भ्रमेति** (९६-२१) । भ्रमनियामिका या सामग्री सैव प्रवृत्तिनियामिकेति वक्तुं न शक्यते । कुतः ? सत्यरजतस्थले या प्रवृत्तिर्जायते सा तु रजतत्वविशिष्टज्ञानाज्जायते न तु सादृश्येन ! स्मृतरजतभेदाग्रहात् । तदेवाह-**न चेति** (९६-२१) । यत्र रजते रजतार्थिनः प्रवृत्तिर्जायते तत्रेत्यर्थः । तत्र पुरोवर्तिनिष्ठेन सादृश्येन स्मृतरजतभेदाग्रहाभावात् । कुतः ? इत्यत आह-**सादृश्यं** हीति (९६-२२) । न हि रजते रजतसादृश्यं यतः सादृश्यं हि तथाशब्दार्थः । ततः किमित्यत आह-**न चेति** (९६-२२) । **तत्रेति** (९६-२२) । रजते यतो हि रजतगतभूयोधर्मवत्त्वं भेदघटितं सादृश्यमभिन्ने नास्तीत्याह-**रजते** (९६-२२) इति ।

दूषणान्तरमाह-**भ्रमेति** (९६-२३) । वदतो व्याघात इत्यर्थः । कथं शुक्तौ रजतत्वप्रकारकज्ञानस्य या सामग्री सा प्रवृत्तिनियामका इत्यत्र भ्रमः किमनङ्गीकृतो अङ्गीकृतो वा । आद्ये आह-**भ्रमस्येति** (९६-२३) । भ्रमाभावे भ्रमनियामिका सामग्री प्रवृत्तिनियामिकेति कथं वक्तव्यमित्यर्थः । वन्ध्यापुत्रमाता सुन्दरीतिवत् । अन्त्ये त्वाह-**अङ्गीकारे** (९६-२४) इति । यदि शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं भ्रमः स्वीकृतस्तर्हि । **विवादेति** (९६-२४) । सिद्धं नः समीहितं, प्रतिज्ञाहानिर्निग्रहस्थानं तवेत्यर्थः । त्वयाऽन्यथाख्यातिर्नाङ्गीक्रियते इति प्रतिज्ञा तव प्राभाकरस्येत्यर्थः ।

दूषणान्तरमाह-**उपजीव्येति** (९६-२४) । भ्रमसामग्र्यैव प्रवृत्त्युपपत्तौ भ्रमकल्पने प्रमाणाभावात् इत्यत्र भ्रमश्चेत् सिद्धस्तदा भ्रमसामग्रीसिद्धिरिति । भ्रममुपजीव्य प्रवृत्ता या भ्रमसामग्री सा भ्रमं न खण्डयति । यथा यागकारणतामुपजीव्य प्रवृत्तं यदपूर्वं तद्यागकारणतां न खण्डयति । कुतः ? **उपजीव्यप्रमाणविरोधात्** (९६-२४) । यागकारणताग्राहकं यदुपजीव्यप्रमाणं तेन सह विरोध इत्यर्थः । तद्वदत्र भ्रमसाधकं यद् प्रमाणं तदुपजीव्य भ्रमसामग्री प्रवृत्ता सा न भ्रमं खण्डयति । कुतः ? भ्रमसाधकोपजीव्यप्रमाणविरोधात् इत्यर्थः ।

पूर्वोक्तं दूषणं निरस्यति-**न चेति** (९७-१) । रजतत्वेन प्रकारेण शुक्तिर्ज्ञाता अत्र रजतत्वेन प्रकारेणेति **तृतीयार्थोनिर्वचनम्** (९७-१) । यथा शुक्तिरजत-

---

१. शङ्कते ।

तादात्म्यं वा शुक्तिरजतत्वसम्बन्धो वेत्यादिना पूर्वं खण्डितमेव । समाधत्ते-**प्रकारत्वेति** (९७-१) । रजतत्वेन शुक्तिर्ज्ञातेत्यत्र रजतत्वेनेति तृतीयार्थः प्रकारत्वं, तथा च शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं वृत्तमिति रजतत्वेन शुक्तिर्ज्ञातेत्यस्य विषयः । **तत्त्वादिति** (९७-१) तृतीयार्थत्वादित्यर्थः । शङ्कते-**न चेति** (९७-१) । किं तत् प्रकारत्वम् ? । प्रकारत्वं यदि स्वरूपसम्बन्धविशेषः तदा स च संयोगातिरिक्तः सम्बन्धः प्राभाकरैर्नाङ्गीक्रियते ।

समाधत्ते-**उभयेति** (९७-२) । यद्यपि स्वरूपसम्बन्धानङ्गीकारेऽपि ग्रहणस्मरणात्मकज्ञानद्वयवादिमते[1] रजतस्मरणं रजतत्वप्रकारकम् । तत्र प्रकारत्वं किं नामेति तत्रापि प्राभाकरस्य समाधेयम् । इत्युभयवादिसमाधेयेनैकस्य पर्यनुयोगो नामाधिक्षेप इत्यर्थः ।

पूर्वोक्तमाक्षिपति प्राभाकरः-**न चेति** (९७-२) । दोषस्य पित्तादेः प्रकृतकार्यप्रतिबन्धकत्वमेव न तु विपरीतकार्यजनकत्वमित्यर्थः । समाधत्ते-**दवदग्धेति** (९७-३) । दोषाणां प्रकृतकार्यप्रतिबन्धकत्वेऽपि विपरीतकार्यजनकत्वं दृष्टं, यथा दवदग्धवेत्रबोजस्य वेत्राङ्कुरप्रतिबन्धकत्वेऽपि विजातीयकदलीप्रकाण्डजननं दृष्टम् । नन्विदमप्रमाणकं केन वा दृष्टमित्यत आह-**अन्यथेति** (९७-४) । यदि दोषाणां विपरीतकार्यजनकत्वं नास्ति तदा त्वन्मतेऽपि शुक्तिप्रवृत्तिप्रतिबन्धकत्वेऽपि विपरीतरजतार्थिप्रवृत्तिजनकत्वं कथं स्यादित्यर्थः । अत्राशङ्कते-**न चेति** (९७-४) । तथा च सर्वत्रज्ञानेऽप्रामाण्यशङ्कया कुत्रापि ज्ञानात् प्रवृत्तिर्न स्यात् । **समाश्वासेति** (९७-५)। तथा च कस्मिन्नपि ज्ञाने विश्वासो न स्यादित्यर्थः । समाधत्ते-**विसंवादीति** (९७-५) । प्राभाकरमते व्यधिकरणप्रकारत्वलक्षणमप्रामाण्यं यद्यपि ज्ञाने नास्ति तथापि विसंवादिप्रवृत्तिजनकत्वलक्षणमप्रामाण्यं त्वन्मतेऽपि ज्ञाने तिष्ठतीति त्वन्मते प्राभाकरमतेऽपि विश्वासः कथं स्यादिति विश्वासोऽपि उभयवादिसमाधेय एव ।

नैयायिकः स्वमतं स्थापयित्वा परमतं दूषयति-**न चेति** (९७-७) । रजतभेदाग्रहेण प्रसञ्जितो नाम कृतः एवम्भूतो योऽभेदव्यवहारः स प्राभाकरमतेनेदं रजतमिति ज्ञानेन बाध्यते इत्यर्थः । तत्र व्यवहारशब्दार्थः क इत्याह-**व्यवहारो हीति** (९७-७) । आद्यं दूषयति-**न हीति** (९७-८) । **प्रवृत्तेरिति** (९७-९) । इदं रजतमिति ज्ञानाद्यत्र प्रवृत्तिर्न जाता तत्र नेदं रजतमिति ज्ञानेन किं बाध्यमित्यर्थः ।

१. प्राभाकरमते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र शङ्कते प्राभाकरः- **नापीति** (९७-९)। यद्यपि इदं रजतमिति ज्ञानात् प्रवृत्तिर्न जाता तथापि इदं रजतमिति ज्ञानात् प्रवृत्तियोग्यता तिष्ठत्येव। दूषयति— **अशक्यत्वादिति** (९७-९)। व्यवहारशब्दो हि प्रवृत्तौ शब्दाभिलापे वा रूढो न तु योग्यतायामित्यर्थः। **न हीति** (९७-१०)। नेदं रजतमिति ज्ञानेन यदि रजतशब्दाभिधेयं पुरोवर्त्ति न भवतीदं बोध्येत तदा शब्दप्रयोगरूपस्य व्यवहारस्य बाधः स्यात्। स बाधो नास्ति। कुत? इत्यत आह—**अनुभवेति** (९७-११)। नेदं रजतमिति ज्ञाने पुरोवर्त्तिनि रजतत्वाभावो विषयोऽनुभूयते। न तु रजतशब्दाभिधेयत्वाभावो[1]विषयो नानुभूयते इत्यनुभवविरोधादित्यर्थः।

नैयायिको वक्ति। त्वन्मते बाधः कथं स्यादित्यत आह—**मम त्विति**। मम नैयायिकस्य मते दोषेणोत्पन्ने रजतज्ञाने नेदं रजतमिति ज्ञानेन रजतत्वाभाववति रजतत्वप्रकारकत्वलक्षणः भ्रमत्वबुद्धिरेव क्रियते स एव बाधः। अत्राशङ्कते—**न चेति** (९७-११)। तथा च पूर्वोक्तो यः रजतन्त्रोपस्थितेष्टभेदाग्रहः स चेत् प्रवर्त्तकः स्यात् तदा पूर्वोक्तं दूषणं स्यात्। किन्तु भेदग्रहाः रजतप्रवृत्तौ प्रतिबन्धकाः। तथा च इष्टभेदग्रहाणामभावकूटलक्षणो भेदाग्रहः रजते प्रवर्त्तकः। यथा मणिमन्त्रौषधीनां प्रतिबन्धकानामभावकूटो दाहजनकः। एवं यत्र यत्र यादृशभेदग्रहाः प्रसिद्धाः तादृशभेदाग्रहाणामभावकूटं प्रवृत्तौ कारणम्। तदेवाह—**रजतभेदेति** (९७-११)। कुत्रचिद्रजतप्रवृत्तौ रजतस्मरणं १ पुरोवर्त्ति ज्ञानं २ तच्चेद्रजतभेदप्रकारकं नाम रजतभिन्नं स्यात् तदा प्रवृत्तिप्रतिबन्धः स्यादितिकृत्वा यत्र प्रतिबन्धकं वर्त्तते तत्र तादृशरजतभेदाप्रकारकं पुरोवर्त्तिज्ञानं प्रवर्त्तकम्। यत्र रजतभेदो न भासते पुरोवर्त्तिज्ञाने स एव तत्र भेदाग्रहः प्रवर्त्तक इत्यर्थः। **रजतोपस्थितिरिति** (९७-११)। रजतस्मृतिरित्यर्थः। एवं सति ग्रहणस्मरणात्मकं रजतभेदाप्रकारकं ज्ञानं प्रवर्त्तकमित्यर्थः।

प्रकारान्तरमाह—**पुरोवर्त्तीति** (९७-१२)। यत्र विशिष्टो रजतभेदः प्रसिद्धो नास्ति तत्र पुरोवर्त्तिनिष्ठा ये घटादिभेदाः तेषु घटादिभेदेषु रजतप्रतियोगित्वं चेद् गृह्यते तदा प्रतिबन्धो भवति। तत्र भेदेषु रजतप्रतियोगित्वं चेन्न गृह्यते तादृशप्रवृत्तौ पुरोवर्त्तिनिष्ठे भेदे रजतप्रतियोगित्वस्याग्रह एव भेदाग्रहः। ननु भेदाग्रहशब्देन भेदग्रहाभावः। रजतप्रतियोगित्वाग्रहः कथं भेदाग्रह इत्यत आह—**अग्रहपदेनेति** (९७-१३)। भेदाग्रहशब्देन असुराऽविद्यावत् पर्युदासवृत्त्या भेदग्रहविरोधी अग्रह-

१. वाच्यत्वाभावः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेष एव लक्ष्यते । दूषयति—सत्येति (९७–१४) । सत्यरजतस्थले नेदं रजतमिति यदा व्यवहारस्तदाऽपि प्रवर्त्तेत, कुतः ? यतः पुरोवर्त्तिज्ञानं रजतभेदप्रकारकं न हि, अथवा पुरोवर्त्तिनिष्ठे भेदे रजतप्रतियोगित्वं भासते एवमपि न हि । उभयविधप्रतिबन्धकभेदग्रहाभावात् प्रवृत्तिः स्यादित्यर्थः । एतदेवाह—न हीति (९७–१५) । सत्यरजत एव नेदं रजतमिति यदा व्यवहारस्तदा पुरोवर्त्तिज्ञानं रजतभेदप्रकारकं न भवतीति कृत्वा प्रथमः प्रतिबन्धको भेदग्रहो नास्तीति कृत्वा भेदाग्रहात् प्रवृत्तिः स्यात् प्राभाकरमते । नाप्युत्तर इत्याह—न वेति (९७–१६) । तदिति (९७–१६) । पुरोवर्त्तिनिष्ठः पुरोवर्त्तिज्ञानविषयो भेदस्तस्मिन् रजतप्रतियोगित्वं वा गृह्यते इत्यपि नास्ति नेदं रजतमिति ज्ञानकाले । तथा चोत्तरस्यापि प्रतिबन्धकस्य भेदग्रहस्याभावात् सुतरां रजत एव नेदं रजतमिति ज्ञानकाले प्रवृत्तिः स्यादित्यर्थः ।

ननु उभयथाऽपि प्रवृत्तिर्भवति यतो नेदं रजतमिति ज्ञानकाले इदमिति पुरोवर्त्तिज्ञानं रजतभेदविषयकं भवत्येव । अन्यथा नेदमिति स्फुरणं कथं स्यात् । एवं पुरोवर्त्तिनिष्ठे भेदेऽपि रजतप्रतियोगित्वं भासत एव । तथा च भेदग्रहस्य प्रतिबन्धकस्य विद्यमानत्वात् कथं प्रवृत्त्यापादनमित्यत आह—अन्यथेति (९७–१६) यदि सत्यरजतस्थले रजते पुरोवर्त्तिनि रजतभेदो नास्ति तत्पुरोवर्तिज्ञानं रजतभेदविषयकं चेत्तदा सुतरामन्यथाख्यातिः । यतश्च पुरोवर्त्ति यद्रजतं तन्निष्ठे भेदे रजतप्रतियोगिकत्वं नास्ति तत्र पुरोवर्त्तिनिष्ठे भेदे रजतप्रतियोगित्वं चेद् भासते तदा सुतरामन्यथाख्यातिः । पुरोवर्त्ति रजतं तस्मिन् रजते रजतभेदस्तु नास्ति, किन्तु रजतादितरे पदार्था घटादयस्तेषामेव भेदो वर्त्तते । एवं सति पुरोवर्त्तिरजतनिष्ठो यो घटादिभेदस्तस्मिन् घटादिभेदे रजतप्रतियोगित्वं नास्ति । तस्मिन् घटादिभेदे रजतप्रतियोगित्वं चेद् भासते तदाऽन्यथाख्यातिः स्यात् ।

दूषणान्तरमाह—किंचेति (९७–१८) । प्राभाकरेण त्वया भेदाग्रहः प्रवर्त्तक इत्युच्यते । भेदस्याग्रहो भेदाग्रहः । तथा च भेदस्तु एकः स्वरूपात्मकः एको वैधर्म्यात्मकः एकोऽन्योन्याभावात्मकः । यथा घटः पटो न भवतीत्यत्र घटे पटभेदस्तिष्ठति स पटभेदः, कः ? घटस्वरूपमेव । अयं च स्वरूपात्मको भेदः १, एवं घटे पटभेदः घटत्वात्मकः, पटस्य वैधर्म्यं हि घटत्वं, अयं वैधर्म्यात्मको भेदः २, एवं घटे पटभेदः घटस्वरूपं घटत्वात्मकं यत् पटवैधर्म्यं ताभ्यामतिरिक्तोऽन्योन्याभावरूपोऽतिरिक्तस्तेषां त्रयाणां मध्ये कस्याग्रहो भेदाग्रहः यः प्रवृत्तिं व्यवहारं वा जनयति । न प्रथम इत्याह—न तावदिति (९७–१८) ।

१. भेदाग्रहं ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि स्वरूपलक्षणभेदाग्रहात् प्रवृत्तिस्तदा शुक्तिशकले इदं रजतमिति ज्ञानात् प्रवृत्तिर्न स्यात् । यतः रजतभेदो नाम शुक्तिस्वरूपं, तच्च इदंत्वेन रूपेण गृहीतमेव तत्र विसंवादिप्रवृत्तिस्थले भेदग्रह एव वर्तते, प्रवृत्तिर्न स्यात् । वैधर्म्यलक्षणो भेद इति द्वितीयं पक्षं निरस्यति–**नापी**ति (९७-१९) । विसंवादिप्रवृत्तिस्थले रजतवैधर्म्यं शुक्तित्वादिकं तस्य योऽग्रहः सोऽपि किं स्वरूपेण वा वैधर्म्यत्वेन वेति विकल्प्य दूषयति–**किं स्वरूपेणे**ति (९७-२०) । रजतवैधर्म्यस्य शुक्तितत्वस्य केनापि रूपेणाग्रह इत्यर्थः । **वैधर्म्यत्वेने**ति (९७-२०) । रजतवैधर्म्यत्वं नाम शुक्तितत्वं तेन रूपेण शुक्तित्वस्याग्रहो वा । आद्यं दूषयति–**वस्तुगत्ये**ति (९७-२०) ; तथा च शुक्तितत्वस्य रजतवैधर्म्यस्य प्रमेयत्वादिना रूपेण ग्रहेऽपि या इदं रजतमितिज्ञानात् प्रवृत्तिर्जायते, सा न स्यात् । कुतः ? रजतवैधर्म्यस्य शुक्तित्वादेर्भेदस्य गृहीतत्वात् । तथा च प्रवृत्तिर्न स्यात् । द्वितीयं निराकरोति–**वैधर्म्यत्वस्ये**ति(९७-२१) । वैधर्म्यत्वं नाम शुक्तित्वं तच्च शुक्तिवृत्तित्वे सति शुक्तित्वात्यन्ताभाववदवृत्तित्वम् । तच्च त्वया प्राभाकरेण नाङ्गीकृतमित्याह–**अत्यन्ताभावस्ये**ति (९७-२२) । अत्यन्ताभावोऽपि स्वरूपात् अधिकरणस्वरूपात् अतिरिक्तो नाङ्गीक्रियते ।

ननु शुक्तित्वादेर्वैधर्म्यस्य शुक्तित्वांशे किञ्चिद्धर्माप्रकारक एवम्भूतो यः शुक्तित्वस्य ग्रहः इयं शुक्तिरिति अनेन रूपेण स एव भेदग्रहः रजतप्रवृत्तौ प्रतिबन्धकः । तस्याग्रह एव भेदाग्रहः रजतप्रवृत्तौ कारणमित्यस्वरसादाह—**किञ्चे**ति (९७-२३) । येन शुक्तित्वं रजतत्वं विरुद्धं न ज्ञातं तस्य शुक्तित्वग्रहेऽपि इयं शुक्तिः रजतमिति ज्ञानादपि रजतार्थिनः प्रवृत्तिर्जायत एव । **तद्ग्रहादि**ति (९७-२३) । येन बालेन शुक्तित्वं रजतत्वं विरुद्धमिति न ज्ञातं तत्र रजतार्थिप्रवृत्तिस्थले शुक्तित्वस्य ग्रहादित्यर्थः ।

ननु यो धर्मो यदवृत्तित्वेन येन ज्ञातः तस्य तत्प्रवृत्तौ तादृशधर्मग्रह एव भेदग्रहः तादृशप्रवृत्तौ प्रतिबन्धकः । तदग्रह एव भेदाग्रहः प्रवृत्तौ कारणम् । एवं सति येन पुरुषेण शुक्तित्वरूपो धर्मः रजतावृत्तित्वेन ज्ञातः तस्य पुरुषस्य रजतप्रवृत्तौ शुक्तित्वग्रह एव भेदग्रहः, तदग्रह एव भेदाग्रहः प्रवृत्तौ कारणम् । शुक्तित्वाग्रह एव भेदाग्रहः प्रवृत्तौ कारणमित्यत आह–**तदीयत्वेने**ति (९७-२३) यो धर्मो येन ज्ञात इति विशेषणे प्रवृत्तिमात्रं प्रति अनुगतकारणाभावात् अन-

१ ज्ञानाभावात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुगम इत्यर्थः । तृतीयं दूषयति—**नापीति** (९७–२४) । **तस्येति** (९७–२४) तस्यान्योन्याभावस्य । भेदाग्रहस्य प्रवृत्तिकारणत्वे दूषणान्तरमाह—**किञ्चेति** (९७–२५) । भेदो नाम रजतान्योन्याभावस्तस्याग्रहो ज्ञानाभावः । तस्य प्रवर्त्तकत्वं सत्यरजतस्थले न सम्भवति । विकल्प्य दूषयति भेदाग्रहं, **तत्रेति** (९८–१) पुरोवर्त्तिना सह रजतभेदस्याग्रहो रजतभेदाग्रहो वा, किं वा येन केनचित् सह रजतभेदस्याग्रहो वा भेदाग्रहः । अन्त्ये आह—**अतिप्रसङ्गादिति** (९८–१) तदेव विवृणोति—**अन्येति** (९८–२) । घटादिषु रजतभेदग्रहे विद्यमानेऽपि सत्यरजतस्थले इदं रजतमिति ज्ञानात् प्रवृत्तेः । प्रथमं दूषयति—**अप्रसिद्धेरिति** (९८–२) । यदि पुरोवर्त्तिरजतयोर्यो भेदस्तस्य यो ग्रहस्तदभावो भेदाग्रहस्तर्हि सत्यस्थले प्रवृत्तिर्भवतु । कुतः ? पुरोवर्त्तिनि शुक्तिः रजतम् [इति] तयोर्भेदः प्रसिद्धो वर्त्तते, तदग्रहः कारणं भवतु, परं सत्यरजतस्थले भेदाग्रहो न सम्भवति । कुतः ? सत्यरजतस्थले पुरोवर्त्त्येव रजतं ज्ञातमिति कृत्वा पुरोवर्त्तिरजतयोर्भेदः प्रसिद्ध एव नास्ति, कथं भेदाग्रहः कारणम् ।

ननु पुरोवर्त्तिनि रजतत्वप्रकारकभेदग्रहस्तदभाव एव कारणमित्याशङ्क्य निराकरोति—**नापीति** (९८–२) । सत्यरजतस्थले प्राभाकरमते रजतत्वप्रकारकभेदग्रहः प्रसिद्धो न वा । यदि च प्रसिद्धस्तदा पुरोवर्त्तिनि रजतभेदस्याभावात् तत्र पुरोवर्त्तिनि रजतत्वप्रकारकभेदग्रहेऽन्यथाख्यातिः स्यात् । यदि अप्रसिद्धस्तदा आह—**रजतत्वप्रकारकेति** (९८–३) । रजतत्वप्रकारकभेदग्रहस्त्वन्मते प्रसिद्ध एव नास्ति, कस्याभावः कारणमित्यर्थः । यदि पुरोवर्त्तिनि रजतत्वप्रकारकभेदग्रहाभावः कारणं, तदा दूषणान्तरमाह—**सामान्येति** (९८–३) । यदा द्रव्यत्वेन रूपेणोपस्थिते रजते यदा प्रवर्त्तते तदानीं रजतत्वप्रकारकभेदग्रह एव नास्ति, तदानीं रजतत्वप्रकारकभेदग्रहाभावे विद्यमानेऽपि प्रवृत्तिर्न जायते इति कथं स प्रवर्त्तक इत्यर्थः ।

अत्राशङ्कते—**न चेति** (९८-४) **तत्रेति** । यत्र द्रव्यत्वेन रूपेण पुरोवर्त्तिनो ज्ञानं तत्र रजतत्वेन रूपेण पुरोवर्त्तिन उपस्थितिरेव नास्ति इतिकृत्वा पुरोवर्त्तिनि रजतत्वप्रकारिका या उपस्थितिः साऽपि कारणमित्यर्थः । तर्ह्यन्यथाख्यातिरेव सिध्यतीत्याह—**विशिष्टेति** (९८-५) । यदि पुरोवर्त्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं प्रवृत्तिकारणं तदा विसंवादिप्रवृत्तिस्थले शुक्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं

१. प्रसिद्धौ सत्यां अन्यथाख्यातिः स्यात् । २. Use of two यदा–s seems to be also a stylistic peculiarity of गुणरत्न । ३. भेदाग्रहः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवर्त्तकमागतं तदेवान्यथाख्यातिः, विशिष्टज्ञानं नाम पुरोवर्त्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं तदेवान्यथाख्यातिः ।

अत्राशङ्कते-**न चेति** (९८-६) । न मया पुरोवर्त्तिविशेष्यकं रजतत्वप्रकारकं ज्ञानं कारणमुच्यते किन्तु पुरोवर्त्तिनि ज्ञानं पुरोवर्त्तिनिष्ठेन चाकचिक्यादिना या रजतोपस्थितिः तस्य स्मृतस्य रजतस्य पुरोवर्त्तिनि भेदाग्रहः । साऽपि कारणं प्रवृत्तौ । पूर्वोक्तं भेदाग्रहं दूषयति-**गेहे** (९८-६) इति । यत्र पुरोवर्त्तिनि चाकचिक्यं न दृष्टं तत्रापि गेहे रजतमिति वाक्यात् या प्रवृत्तिर्जायते सा न स्यात् । कुतः ? पुरोवर्त्तिनिष्ठं चाकचिक्यं दृष्टमेव नास्तीतिकृत्वा पुरोवर्त्तिनिष्ठं यच्चाकचिक्यं तेन स्मृतं यद्रजतं तस्य भेदाग्रहो नास्तीति कृत्वा, प्रवृत्तिस्तु दृश्यते । **तत्रेति** (९८-७) । यत्र गेहे रजतमिति वाक्यजात् ज्ञानात् प्रवृत्तिर्दृश्यते तत्र धर्मिणीत्यर्थः । **चाकचिक्यादेरभावादिति** (९८-७) । गेहे रजतं यद् विद्यते तस्मिन् चाकचिक्यस्याभावो नास्ति किन्तु अदर्शनादित्यर्थः ।

प्रकारान्तरेण भेदाग्रहं दूषयति-**नापीति** (९८-७) । पुरोवर्त्तिनि रजतत्वप्रकारको यो भेदनिश्चयस्तस्याभावो भेदाग्रहः स एव प्रवृत्तिकारणम् । एतदपि न सम्भवतीत्यर्थः । सत्यरजतस्थले यत्र प्रवृत्तिर्जायते तत्र पुरोवर्त्तिनि रजतत्वप्रकारकभेदनिश्चयः प्रसिद्धो न वा । आद्ये आह-**अन्यथेति** (९८-८) । यत्र सत्यरजते रजतत्वप्रकारको भेदनिश्चयः प्रसिद्धस्तर्हि तत्रान्यथाख्यातिरेव सिद्धा । यतः रजतत्वप्रकारकभेदाभाववति रजते रजतत्वप्रकारकं भेदज्ञानं भ्रम एव । द्वितीये पक्षे आह-**अप्रसिद्धत्वादिति** (९८-९) । प्रतियोग्येव यत्राप्रसिद्धस्तत्र तदभावस्य कारणता कथं स्यात् इत्यर्थः ।

उपसंहरति-**तस्मादिति** (९८-९) । शुक्तौ रजतं प्रतीयते तदेवान्यथाख्यातिरूपं ज्ञानम् । अन्यथाख्यातिस्वीकारे अन्यदपि प्रयोजनमाह- **तेन चेति** (९८-९) । यतोऽन्यथाख्यातिरूपज्ञानात् इष्टसाधनतामनुमाय रजतार्थिप्रवृत्तिर्भविष्यति । इदं पुरोवर्त्ति मदिष्टसाधनं रजतत्वात्, गेहस्थरजतवत् इतीष्टसाधनत्वानुमानमित्यर्थः । भेदाग्रहपक्षे तन्नै सम्भवतीत्याह-**न त्विति** (९८-१०) । भेदाग्रहस्य प्रवर्त्तकत्वपक्षे इष्टसाधनत्वानुमितिर्नास्ति, लिङ्गाभावात् । तथा च इष्टसाधनभेदाग्रह एव प्रवर्त्तको वक्तव्यः । स च इष्टसाधनभेदाग्रहः इष्टसाधनत्वानुमित्यपेक्षया गुरुभूत इति स न प्रवर्त्तक इति सङ्क्षेपः ॥

**वाचनाचार्यगुणरत्नगणिविरचिते शशधरटिप्पनेऽन्यथाख्यातिवादः ॥ छ ॥**

१. इष्टसाधनताज्ञानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अर्थापत्तिवादटिप्पनम् ।

ननु रजतार्थिप्रवृत्तिः पुरोवर्त्तिविशेष्यकरजतत्वप्रकारकज्ञानसाध्या प्रवृत्तित्वात्, सत्यरजतप्रवृत्तिवत् । न च सत्यरजतप्रवृत्तावपि पुरोवर्त्तिविशेष्यकरजतप्रकारकज्ञानसाध्यत्वं नास्त्येव । न च व्यतिरेकी कर्त्तव्यः । तत्र व्याप्तिपक्षधर्मतयोरभावेन व्यतिरेकिणोऽप्रमाणत्वात् । कथं तर्हि व्यतिरेकिणोऽप्रमाणत्वे जीवित्वे सति गृहाभावदर्शनेन बहिर्भावानुमानमिति चेत् अर्थापत्तिप्रमाणेनैव । एवं व्यवस्थिते उपोद्घातसङ्गत्याऽर्थापत्तिं निरूपयति । अथवा सत्यरजतस्थले रजतार्थिप्रवृत्त्यन्यथाऽनुपपत्त्या रजतत्वविशिष्टज्ञानस्य कारणत्वव्यवस्थितौ विसंवादिप्रवृत्तिस्थलेऽपि रजतत्वविशिष्टज्ञानमन्यथाख्यातिरूपं सिध्यतीत्युक्तं तत्रान्यथानुपपत्तिः किं प्रमाणान्तरं वा व्यतिरेक्यनुमानं वेति विचारयितुं प्रसङ्गसङ्गत्या तावदाह– इहेति (९९-१) । यत्रानुपपत्त्या विशिष्टज्ञानकारणत्वव्यवस्थितिः तत्रेत्यर्थः ।

तत्रार्थापत्तिमनुपपत्तिं व्यतिरेक्यनुमानातिरिक्तं प्रमाणं ये मन्यन्ते प्राभाकरादयः । अनुपपत्तिज्ञानं व्यतिरेक्यनुमित्यतिरिक्तप्रमाकरणं न वा इति विप्रतिपत्तिः । व्यतिरेक्यनुमित्यतिरिक्तप्रमाकरणमिति प्राभाकराणां कोटिः । **नेति** (९९-३) नैयायिकानाम् । तत्र विप्रतिपत्तौ भूमिमारचयति–**जीवतश्चैत्रस्येति**[1] (९९-२) । इदं तु उभयवादिसिद्धम् । जीवतश्चैत्रस्य गेहाभावदर्शनेन बहिःसत्त्वं ज्ञायते । तच्च बहिःसत्त्वज्ञानम् अनुमितिरूपमिति नैयायिकाः । अर्थापत्तिजन्यं ज्ञानमिति प्राभाकराः ।

प्राभाकरः शङ्कते– **त**[न्व]ति (९९-३) । देवदत्तो बहिरस्ति गृहेऽभावात् । अत्र गृहाभावो न हेतुः, कुतः ? इत्यत आह–**व्यधिकरणत्वादि**ति (९९–३) । देवदत्तः पक्षः । गृहाभावो हेतुः । स च गृहाभावो हेतुः पक्षवृत्तिरपेक्षितः, पक्षवृत्तिस्तु न भवति । किन्तु गृहनिष्ठ इति कृत्वा व्यधिकरण इत्यर्थः । पक्षधर्मतां खण्डयित्वा व्याप्तिमपि खण्डयति– **न चेति** (९९–३) । यत्र जीवित्वे सति गृहाभावस्तत्र बहिःसत्त्वमिति व्याप्तिप्रतिसन्धानमपि नास्ति । बहिःसत्त्वं बहिःपदार्थवृत्तिनिष्ठगृहाभावो गृहनिष्ठः, अनयोः साहचर्यलक्षणा या व्याप्तिस्तस्याः ज्ञानमपि नास्ति । व्याप्तिं खण्डयित्वा पक्षधर्मतां खण्डयित्वा पक्षधर्मताज्ञानमपि नास्तीत्याह–**कथमि**ति (९९–४) । यद्यपि गृहनिष्ठाऽत्यन्ताभावप्रतियोगित्वं देवदत्तनिष्ठो धर्मस्तेन पक्षधर्मताऽप्युपपद्यत एव, तथाऽतीन्द्रियासन्निकृष्टे देवदत्ते पक्षे गृहनिष्ठात्यन्ताभावप्रतियोगित्वस्य हेतोः ग्रहः स्यात्, स च नास्ति । ननु व्याप्तिपक्षधर्मतयोर्ज्ञानं विनाऽप्यनुमानं स्यादित्यत आह–

---

१. मूले– जीवतो देवदत्तस्येति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**न च तौविति** (९९–५)। व्याप्तिपक्षधर्मते विनेत्यर्थः। **अतिप्रसङ्गादिति** (९९–५)। अव्याप्येन हेतुना, अपक्षधर्मेण हेतुनाऽप्यनुमितिः स्याद्यथा धूमेन ह्रदे वह्न्यनुमितिः स्यात्। रासभेन पर्वते वह्न्यनुमितिः स्यात्। उदाहरणान्तरेणाऽप्यर्थापत्तिप्रमाणं समर्थयति—**एवमपीति** (९९–५)। यथा पूर्वं गृहाभावे व्याप्तिपक्षधर्मतयोर्ग्रहो नास्त्येवं दिवाभोजिनोऽपि पीनत्वे व्याप्तिपक्षधर्मतयोर्ग्रहो नास्तीति पूर्ववत् ज्ञातव्यः।

नैयायिकः शङ्कते—**नन्विति** (९९–८)। अत्र गृहाभावस्य याऽनुपपत्तिः सा का। तामेव विकल्प्य दूषयति–**बहिःसत्त्वेति** (९९–८)। देवदत्तस्य गृहासत्त्वं तस्य याऽनुपपत्तिः सा किं बहिःसत्त्वमात्रं विना उत देवदत्तबहिःसत्त्वं विनेत्यर्थः। प्रथमं खण्डयति—**एवं बहीति** (९९–९)। **न त्विति** (९९–९)। न तु देवदत्तस्य बहिःसत्त्वं सिध्येत, किन्तु बहिःसत्त्वमात्रमेव सिध्येत। द्वितीयं दूषयति—**तदीयमिति** (९९–९)। यदि देवदत्तबहिःसत्त्वं विना देवदत्तगृहासत्त्वं चेदनुपपन्नं चेत्तदा प्रथमतः देवदत्तबहिःसत्त्वं ज्ञातमज्ञातं वा। **आद्य इति** (९९-१०)। देवदत्तबहिःसत्त्वज्ञानार्थमर्थापत्तिः स्वीकर्त्तव्या। तच्च देवदत्तबहिःसत्त्वज्ञानमर्थापत्तेः पूर्वं यस्मात् प्रमाणाज्जातं तदेव प्रमाणमस्तु, किमर्थापत्तिप्रमाणेन। द्वितीयं दूषयति—**कथमिति** (९९–११)। देवदत्तबहिःसत्त्वं चेदज्ञातम्, तदा देवदत्तबहिःसत्त्वं विना गृहासत्त्वमनुपपन्नमित्यर्थापत्त्यवतार एव नास्ति। अनिरूपितयाऽर्थापत्त्या चेदर्थसिद्धिस्तदा देवदत्तगृहासत्त्वेन चैत्रस्य बहिःसत्त्वं सिध्येतेत्यतिप्रसङ्गः।

ननु नैयायिकमते देवदत्तबहिःसत्त्वसिद्धिः कथमनुमानात् सिध्यतीत्यत आह—**अनुमानं त्विति** (९९–१२)। तथा च नैयायिकमते यत्र बहिःसत्त्वाभावस्तत्र गृहासत्त्वाभावः, यथा गृहकोणे स्थितोऽहं तद्वत् इति सामान्यतो व्यतिरेकव्याप्त्या देवदत्तनिष्ठेन गृहासत्त्वहेतुना देवदत्तबहिःसत्त्वं पक्षधर्मताबलादेव सिध्यति। **विशिष्टेति** (९९–१३)। देवदत्तबहिःसत्त्वसाधकमनुमानमेव प्रमाणम्। **तत्रेति** (९९-१३)। तत्र देवदत्तबहिःसत्त्वसिद्धौ नार्थापत्तिः प्रमाणमित्यर्थः।

समाधत्ते प्राभाकरः—**विशकलिते** (९९–१४) इति। यथा नैयायिकमते सामान्यव्याप्त्या पक्षधर्मताबलाद्विशेषसिद्धिः फलम्। एवं मन्मतेऽपि सामान्या-

१. Text has न च ते विना। २. व्याप्तिर्यत्र नास्ति। ३. अपक्षधर्मेण। ४. अव्याप्येन हेतुनेति। ५. Repetition of चेत् is also a mannerism of गुणरत्न. ६. प्रतौ०णे स्थितमद्वत् इति। ७. बहिःसत्त्वं विना गृहासत्त्वमनुपपन्नं इयं सामान्यव्याप्तिः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नुपपत्त्या विशेषतर्कसहकृतया विशेषसिद्धिः फलमस्मिन्मतेऽपि समानम् । विशकलितं नाम केवलं बहिःसत्त्वं तेन विना गृहासत्त्वमात्रं चेदनुपपन्नं, तदा देवदत्तगृहासत्त्वमपि देवदत्तबहिःसत्त्वेन विनाऽनुपपन्नं स्यादिति विशेषतर्कसहकारात् विशिष्टावगमो नाम देवदत्तबहिःसत्त्वावगमः । स चार्थापत्तेरेव फलमित्यर्थः ।

उदाहरणान्तरेऽप्यर्थापत्तिं प्रमाणयति–**एवमिति** (९९–१४) । तथा च सामान्यतो दिवाभोजित्वे सति पीनत्वान्यथानुपपत्त्या विशेषतर्कसहकृतया देवदत्तरात्रिभोजनसिद्धिः । अत्र देवदत्तरात्रिभोजनेऽर्थापत्तिरेव प्रमाणं न त्वनुमानमित्याह–**रात्रिभोजनं** त्विति (९९–१६) । देवदत्तरात्रिभोजनमित्यर्थः । देवदत्तरात्रिभोजनरूपस्य साध्यस्याप्रसिद्धौ नानुमानावतारः । मतान्तरमाह–**भोजनं** त्विति (९९-१७) । अत्र मते दिवाऽभोजनपीनत्वयोर्यद् विरोधिज्ञानं तदेव रात्रिभोजनप्रमापकत्वादर्थापत्तिपदवाच्यमित्यर्थः । विरोधप्रतिसन्धानमेव विवृणोति–**पुष्टीति** (९९–१७) । पुष्टिकारणत्वेन भोजनमवगतम् । अयं तु दिवाऽभोजी । तथा च भोजनाभावपीनत्वयोरेकस्मिन् धर्मिणि यो विरोधः स किञ्चिद् विषयं विना न विश्राम्यति, स विषयः कः ? समयान्तरे रात्रौ यद्भोजनं तेन विना स विरोधो न विश्राम्यति ।

एवं सति अर्थापत्तिफलमाह–**फलमिति** (९९–१८) । सामान्यप्रवृत्तं प्रमाणं भोजनं पुष्टिकारणं, विशेषप्रवृत्तं प्रमाणमयं दिवाऽभोजी, अनयोर्भिन्नविषयतया अविरोधबुद्धिः, दिवाऽभोजनरात्रिभोजनयोर्विरोध एव नास्ति । तथा चाविरोधबुद्धिरेवार्थापत्तिफलमित्यर्थः । अत्र मते केषाञ्चिद्दूषणमुपन्यस्यति–**अत्रेति** (९९–२०) । तथा च भिन्नविषयतयाऽविरोधबुद्धिः विरुद्धधर्माध्यासस्यैव फलं न त्वर्थापत्तेः फलमित्यर्थः । **अनयोरिति** (९९–२०) । सामान्यप्रमाणविशेषप्रमाणयोरित्यर्थः । अत्राशङ्कते–**न चेति** (९९–२१) । यदि विरुद्धधर्माध्यासः स्यात्तदा विरुद्धधर्माध्यासस्य फलं भिन्नविषयत्वसिद्धिः स्यात् । स च विरुद्धधर्माध्यासोऽसिद्ध एवेत्यर्थः । विरुद्धधर्माध्यासासिद्धिं दूषयति–**अस्तीति** (९९–२१) । पुष्टिकारणतया भोजनमस्ति, दिवा तु भोजनं नास्तीति अस्तित्वनास्तित्वलक्षणो विरोधोऽनुभवसाक्षिक एव । अथवा शतवर्षी जीवी देवदत्त इति जीवनग्राहकं प्रमाणं ज्योतिःशास्त्रं गृहनियमग्राहकं प्रमाणं प्रत्यक्षम् । पश्चाद्गृहाभावदर्शनेन तयोर्जीवनग्राहकप्रत्यक्षयोर्यद् विरोधप्रतिसन्धानं स एव विरुद्धधर्माध्यासः । स बहिःसत्त्वेन विनाऽनुपपन्नः स एव बहिःसत्त्वप्रमापकोऽस्तु । किमर्थापत्त्या ।

१. सामान्यप्रवृत्तप्रमाणविशेषप्रवृत्तप्रमाणयोः । २. निश्चयः । ३. विरुद्धधर्माध्यासः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अन्यथेति** (९९–२२)। यदि बहिः सत्त्वं न कल्प्येत तदा एकस्मिन् धर्मिणि विरुद्धयोर्जीवित्वगृहसत्त्वयोर्विरोधस्त्वेतादृशः–जीवनग्राहकप्रमाणात् जीवित्वं निश्चितं गृहसत्त्वग्राहकप्रत्यक्षप्रमाणात् गृहसत्त्वं निर्णीतं तदानीं विरोध एव नास्ति। पश्चादेवदत्तस्य गृहाभावो दृष्टः तदनन्तरं तयोर्जीवित्वगृहसत्त्वयोर्विरोधबुद्धिर्जायते गृहे तु योग्यानुपलब्ध्या देवदत्तस्याभावो निर्णीतो वर्त्तते। एवं सति यदि जीवनग्राहकप्रमाणाद्यदि[1] जीवित्वं स्यात्तदा गृहसत्त्वमनुपपन्नं स्यात्। यदि गृहसत्त्वं प्रमाणं स्यात् तदा जीवित्वमनुपपन्नं स्यात्। इति विरोधप्रतिसन्धानानुपपत्तिरित्यर्थः। दूषयति–**तदपीति** (९९–२३)। तथा च विरोधपरिहारार्थम् एकस्य बाध्यत्वं वक्तव्यं, तच्च बाध्यत्वं गृहान्यत्वेन बहिःसत्वेन विनाऽनुपपन्नम् इति या सामान्यतो बहिःसत्त्वसिद्धिः सा अर्थापत्त्यधीना। तथा च सामान्यतोऽर्थापत्त्या बहिःसत्त्वसिद्धौ सत्यां देवदत्तबहिःसत्त्वसिद्धिश्चेद् विरुद्धधर्माध्यासाद् भवति, भवतु, प्राथमिकबहिःसत्त्वसिद्धिस्तु अर्थापत्तिफलम्। **सामान्यत** (९९–२३) इति। यः सामान्यतो जीवी सन् स क्वचिद्देशे तिष्ठति इति देशभेदावगमः, देशभेदावगमे जातेऽपि गृहान्यत्वेन गृहभिन्नदेशता नाम बहिःसत्त्वं तस्य परिच्छेदो नाम सिद्धिः। क्वचिदस्तीति प्रमाणे विद्यमानेऽपि या गृहदेशान्यदेशसिद्धिः साऽर्थापत्तिरेवेत्यर्थः।

अयमाशयः–गृहाभावदर्शनानन्तरं जीवननिश्चायकप्रमाणं गृहसत्त्वग्राहकप्रमाणं तयोर्विरोधज्ञानम्। कथं विरोधज्ञानं? गृहाभावदर्शनानन्तरं यदि देवदत्तस्य जीवित्वं स्यात् तदा प्रमाणविषयः गृहसत्त्वं कथं स्यात्, यदि च प्रमाणविषयो गृहसत्त्वं स्यात् तदा जीवित्वं कथं स्यात्–इदं विरोधप्रतिसन्धानं तदा विरुद्धधर्माध्यासो जातः। तन्निवृत्तये जीवनग्राहकप्रमाणाज्जीवता क्वचित् स्थातव्यमिति देशभेदावगमे गृहे चेन्नास्ति तदा बहिस्तिष्ठति इति विरुद्धधर्माध्यासात् बहिःसत्त्वसिद्धिः फलमिति पूर्वोक्तं मतम्। अपरमते जीवता क्वचिद्देशे स्थातव्यमिति देशभेदावगमः विरुद्धधर्माध्यासस्य फलं, विशेषतो गृहभिन्नदेशसिद्धिस्तु अर्थापत्तेरेव फलम् इति आपादतो मतद्वयम्। मतद्वयस्य सङ्क्षेपत उपसंहारो यथा–विरुद्धयोरविरोधोपपत्तये जीवनप्रमाणाज्जीवित्वे सुदृढे जीवता क्वचित् स्थातव्यम् इति सामान्यतो देशभेदावगमो जातस्तदनन्तरं गृहे चेन्नास्ति तदाऽर्थाद् गृहान्यदेशे तिष्ठति इति गृहान्यदेशलक्षणं यद्बहिःसत्त्वं सिध्यति तद्विरुद्धधर्माध्यासादेव इदं पूर्वोक्तं मतम्। अपरमते अविरोधोपपत्तये सुदृढजीवनप्रमाणाज्जीवित्वे निश्चिते जीवता क्वचित् स्थातव्य-

१. Note the repetition of यदि। २. गृहसत्त्वं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिति सामान्यतो देशभेदावगमो भवतु विरुद्धधर्माध्यासस्य फलं, परन्तु देशभेदेऽवगते गृहे चेन्नास्ति तदाऽर्थाद् बहिस्तिष्ठती[ती]दं ज्ञानं तदर्थापत्तेरेव फलं, न तु विरुद्धधर्माध्यासस्य फलं, विरुद्धधर्माध्यासस्तु देशभेदावगममात्रेण चरितार्थः ।

मतान्तरमप्याह–**विरोधेति** (९९-२४) । विरुद्धयोर्विरोधसम्भावना नाम गृहाभावदर्शनानन्तरं गृहसत्त्वं वा तिष्ठति, किं वा जीवित्वं वा तिष्ठति, परन्तु द्वयं न तिष्ठति–इयं विरोधसम्भावना । किंवा गृहाभावदर्शनानन्तरं किं गृहसत्त्वग्राहकं प्रमाणं जीवित्वग्राहकम् अप्रमाणं, किं वा जीवित्वग्राहकं प्रमाणं गृहसत्त्वग्राहकम् अप्रमाणम् इति प्रामाण्यसम्भावना । सैव बहिःसत्त्वप्रमां प्रति कारणम् । सातिशयं कारणं करणं, विरुद्धयोर्या विरोधसम्भावना प्रमाणसम्भावना वा सा बहिःसत्त्वं प्रमां प्रति करणमित्यर्थः । ततः किमित्यत आह–**तदेवेति** (९९–२५) ।

मतान्तरमप्याह –**तर्क एवेति** (१००–१) । तर्क एवार्थापत्तिस्थानेऽभिषिक्त इत्यर्थः । तर्कस्वरूपं विवृणोति–**एवं हीति** (१०० १) । मूलोक्त एव तर्को ज्ञेयः । **यद्वेति** (१००–२) । जीवित्वग्राहकप्रमाणाज्जीवित्वं निश्चितं, नियमग्राहकप्रमाणाद् गृहसत्त्वं निश्चितम्, इदं जीविनो गृहसत्त्वग्राहकं यत् प्रमाणं तत् गृहे नास्तीति गृहाभावग्राहकं प्रमाणं, तेन सह समानविषयकं नाम एकविषयकं स्यात्, तदा गृहनियमग्राहकम् अप्रमाणमेव स्यादिति । यतो जीविनो द्वयम् अनुपपन्नं यतो गृहसत्त्वं गृहासत्त्वं चेति द्वयमनुपपन्नम्–इति नियमग्राहकस्य याऽप्रामाण्यप्रतिपत्तिस्तस्याः प्रतिसन्धानं नाम अनुवृत्तिः, सैव । **अत्रेति** (१००–४) । बहिःसत्त्वप्रमां प्रति **कारणम्** (१००–४) । नन्वनयोर्जीवित्वगृहसत्त्वयोरेकं बाध्यं, विरुद्धार्थग्राहकत्वात्–अनेनानुमानेन गृहसत्त्वबाधे देवदत्तो बहिरस्ति जीवित्वे सति गृहाभावप्रतियोगित्वादित्यनुमानादेव बहिःसत्त्वसिद्धौ किमर्थापत्त्येत्यत आह–**व्यवस्थितमिति** (१००–४) । अत्र योजना व्यवस्थितमनुमापकम् । **अव्यवस्थितं कल्पकमिति** (१००–४) ।

अयमाशयः–यदा गृहनियमस्यैव बाधानन्तरं यदा बहिःसत्त्वज्ञानं तदा भवत्वनुमानं, यदा तु गृहनियमग्राहकं वा प्रमाणं जीवित्वग्राहकं वा प्रमाणमित्येकत्र बाधानिर्णयदशायां तर्काद्यद बहिःसत्त्वज्ञानं तदर्थापत्तेरेव । अत एवाह–**अव्यवस्थितं कल्पकमि**(१००–४)त्यस्यैकत्र बाधानिर्णय इत्यर्थः ॥

१. Note the repetition of यदा, a mannerism of गुणरत्न ।

२. जीवी गृह एव इदं प्रमाणं; जीवित्वग्राहकप्रमाणं ज्योतिःशास्त्रम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिद्धान्तमाह--**कासाविति** (१००-६)। जीविनो बहिःसत्त्वमन्तरेण गृहा-भावस्यानुपपत्तिः सा केत्यर्थः, यस्याः व्याप्तिपक्षधर्मताज्ञानं विना बहिःसत्त्वज्ञानं प्रति कारणत्वमुच्यते। शङ्कते-**बहिःसत्त्वमिति** (१००-७)। बहिःसत्त्वं विना जीविनो **देवदत्तस्य** गृहसत्त्वाभावो नावतिष्ठते इति शेषः। **सेति** (१००-७) सा अर्थापत्तिः। दूषयति-स तु बहिःसत्त्वेन विनाऽनवस्थितो गृहाभावो अविनाभाव एव। ततः किमित्यत आह- **इयमेवेति** (१००-८)। उपसंहरति-**तथा चेति** (१००-८)।

पक्षान्तरेणार्थापत्तिं दूषयति-**एतेनेति** (१००-९)। व्यतिरेकिप्रमाणमर्था-पत्तिः। दूषयति-**व्यतिरेकिण** (१००-९) इति। तथा च व्याप्तिपक्षधर्मताभ्यां हीनो व्यतिरेकी अर्थापत्तिर्वा। किं वा व्याप्तिपक्षधर्मताविशिष्टो व्यतिरेकी अर्थापत्तिर्वा। आद्ये व्याप्तिं विना तव प्राभाकरस्यापि नार्थापत्तिः। अन्त्ये आह-**व्यतिरेकि-णोऽपीति** (१००-१०)। तथा च व्याप्तिपक्षधर्मताविशिष्टो व्यतिरेक्यनुमानप्रमाण-मेव। तथा चार्थापत्तिर्व्यतिरेक्यनुमानं च नामान्तरमेव।

शङ्कते-**न चेति** (१००-११)। बहिःसत्त्वानुमाने लिङ्गं नास्ति कुतोऽनुमान-प्रमाणम्। उत्तरमाह-**गृहेति** (१००-१२)। बहिःसत्त्वानुमाने गृहासत्त्वमेव लिङ्गम्। अत्राशङ्कते-**न चेति** (१००-१२)। गृहाभावो गृहनिष्ठः देवदत्ते पक्षे नास्ति। समाधत्ते-**गृहेति** (१००-१२) तथा च गृहेऽभावः गृहनिष्ठः यद्यपि तथाऽपि गृह-निष्ठाभावप्रतियोगित्वं तु देवदत्तनिष्ठमेव तदर्थत्वादिति गृहासत्त्वमित्यस्य गृहनिष्ठा-भावप्रतियोगित्वमेवार्थः।

लिङ्गपरामर्शो न सम्भवतीत्याशङ्कते-**न चेति** (१००-१२)। असन्निकृष्टे देवदत्ते गृहनिष्ठाभावप्रतियोगित्वं देवदत्ते कथं ग्राह्यम्। **तद्ग्रह** (१००-१३) इति। देवदत्तनिष्ठात्यन्ताभावस्य प्रतियोगित्वग्रह इत्यर्थः। समाधत्ते-**उभयेति** (१००-१३)। अयमाशयः-गृहे देवदत्तस्याभावस्तर्हि देवदत्तस्येति षष्ठ्यर्थः। प्रतियो-गित्वं गृहे देवदत्ताभावे ज्ञाते देवदत्तेऽपि गृहनिष्ठाभावप्रतियोगित्वं शक्यत एव। असन्निकृष्टस्थलेऽपि परामर्शो जायते इत्याह-**यथेति** (१००-१४)। परमाणुः परिमाणवान् द्रव्यत्वात् इति परमाणुवृत्तिद्रव्यत्वस्यासन्निकर्षेऽपि उपनीतानां पूर्वं ज्ञातानां मानसः परामर्शः भवत्येव।

अत्राशङ्कते-**न चेति** (१००-१६)। जीवो देवदत्तः क्वचिदस्तीति प्रमाणेन देवदत्तस्य गृहसत्त्वसंशयेन गृहाभावोऽपि सन्दिग्धः। भवतु सन्दिग्धस्तथाऽपि किमित्यत आह-**सन्दिग्धमिति** (१००-१७)। सन्दिग्धं तु लिङ्गं न भवतीत्यर्थः। निश्चितस्यैव लिङ्गत्वात्। समाधत्ते-**गृहासत्त्वस्येति** (१००-१७)। यदि गृहाभावः संदिग्धस्तर्हि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदाऽप्यनुपपत्तिप्रतिसन्धानाभावेन तदाप्यर्थापत्तिः प्रमाणं न स्यात् । विशेषणसन्देहं निराकरोति—**एवमिति** (१००–१८) । जीवित्वे सति गृहाभावप्रतियोगित्वं हेतुः । अत्र हेतुविशेषणजीवित्वस्य संशये नैयायिकानामनुमानाऽनवतारेऽपि प्राभाकराणामर्थापत्त्यवतारोऽपि नास्ति । कुतः ? जीवित्वे निश्चिते गृहाभावनिर्णयेन बहिःसत्त्वं कल्प्यते । तच्चेन्निर्णीतं नास्ति, कथं बहिःसत्त्वकल्पना ।

विपक्षे बाधकमाह—**अन्यथेति** (१००–१८) । यदि जीवित्वं सन्दिग्धं तदा बहिःसत्त्वकल्पनवत् मरणकल्पनाऽपि स्यात्, प्राभाकराणां सिद्धान्तविरोधश्चेत्याह-**जीविन** (१००–१९) इति । व्यवस्थितं नाम निश्चितम् । तत् कल्पकमिति बहिःसत्त्वकल्पकमित्यर्थः । इति प्राभाकरमतम् ।

दूषणान्तरमाह—**किं चेति** (१००-२१) । जीवनग्राहकप्रमाणेन जीवित्वे निश्चिते जीवी देवदत्तः क्वचिदस्तीत्यनेन सामान्यतो देवदत्तस्य गृहसत्त्वमपि गृहीतम् । एवं सति गृहासत्त्वग्राहकप्रमाणेन प्रत्यक्षेण गृहासत्त्वं गृहीतम्, क्वचिदस्तीति प्रमाणेन गृहसत्त्वम् । एवं सति विरुद्धसामग्र्या संशय एव भवति । तथा सति गृहासत्त्वसंशये कथमनुमानप्रवृत्तिरित्युक्तम् । तदपि न सम्भवतीत्यर्थः । कुतो न सम्भवति । यतः क्वचिदस्तीति प्रमाणेन सामान्यतो गृहसत्त्वं विषयीक्रियते, न तु गृहत्वेन रूपेण, गृहासत्त्वं तु गृहाभावग्राहकप्रमाणेन गृहत्वेन रूपेण गृहे देवदत्ताभावो विषयीक्रियते, तथा चात्र संशय एव न भवति । यतः क्वचिदस्तीति प्रमाणेन गृहविषयता निर्णीता नास्ति किन्तु सन्दिग्धा । एकांशे गृहासत्त्वांशे निर्णायका सामग्री गृहे नास्तीत्येवंरूपा; क्वचिदस्तीति या सामग्री सा गृहसत्त्वनिर्णायका न भवति । न च निर्णायकसंशायकसामग्रीभ्यां संशयः कदापि सम्भवति । तथा च गृहाभावो न संदिग्धः । तथा चानुमानप्रवृत्तिः ।

यदि च क्वचिदस्तीत्येतावन्मात्रेण गृहे तिष्ठति अन्यत्र वा इति चेत् संशयः स्यात् तदा आह—**तदेति** (१००–२२) **तेनैवेति** (१००–२२) । गृहाभावग्राहकप्रमाणेनैव । तत्संशयो नाम गृहे सन् असन् वा इति संशयो निरस्तो भविष्यति । न[१] च निश्चयानन्तरमपि क्वचिदस्तीत्यनेन संशयः स्यात् इत्यत आह—**निश्चितेति** (१००–२२) । **अन्यथेति** (१००–२३) । यदि निश्चयानन्तरमपि संशयः स्यात् तदा संशयस्य उच्छेद एव न स्यात् ।

पूर्वोक्तं मतं खण्डयति—**न चेति** (१००–२४) । एतत् प्राभाकरमते । प्रमाणयोर्विरोधज्ञानमर्थापत्तिः । प्रमाणयोर्विरोधज्ञानमेव विवृणोति आक्षेपसमाधानाभ्यां **क्वचिदस्तीति**(१००–२४) । यद्यपि क्वचिदस्ति गृहे नास्ति । अनयोः

१. ज्योतिःशास्त्रेण । २. आशङ्कते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रमाणयोर्वस्तुगत्या विरोधो नास्ति । कुतः ? देशान्तरस्थस्यापि देवदत्तादेर्गृहाभावो वर्त्तते एव । तथापि विरोधप्रतिसन्धानं नाम विरोधज्ञानं तिष्ठत्येव । तदेव विरोधप्रतिसन्धानमग्रे विशदयिष्यति–तदिति (१००–२५) । विरोधज्ञानमित्यर्थः । दूषयति–अस्त्विति(१००–२५) । विरोधप्रतिसन्धानमस्तु । एवमपीति (१००–२५) । विरोधप्रतिसन्धानं वर्त्तते यद्यपि तथापि अतिरिक्तोऽर्थापत्तिपक्षो नास्ति ।

शङ्कते–अस्तित्वेति (१००–२५) । क्वचिदस्ति गृहे नास्ति इत्यत्र यद्यपि विशिष्टयोर्विरोधो नास्ति तथापि अस्तित्वनास्तित्वमात्रांशे विरोध इत्यर्थः । विरोधः क इत्यत आह–सहेति (१०१–१) । तथा तयोरिति (१०१-१)अस्तित्वनास्तित्वयोः सहानवस्थानं कुतः । शङ्कते–वैपरीत्येति (१०१–१) । परस्पराभावव्याप्तिरूपता । अत एव सहानवस्थानम् । दूषयति–तथा चेति (१०१–२) । तर्हि परस्पराभावव्याप्तिज्ञानमावश्यकम् । तदा तदनुमानमेव जातम्, परमर्थापत्तिः प्रमाणान्तरं न जातम् ।

अस्त्विति (१०१–३) । बहिःसत्त्वप्रमां प्रति संशयः करणं भवत्वित्यर्थः । संशयं विवृणोति–शतवर्षेति (१०१–३) । जीवीति (१०१–३) । जीवी गृहेऽवतिष्ठतीयं व्याप्तिः, प्रत्यक्षेणोपलब्ध्वा तदनन्तरं कदाचित् गृहे देवदत्ताभावमुपलभ्य तदनन्तरं जीवी न वा किंवा गृह एवेति न वा एतादृशः संशयो जायते । ननु स संशयः कथं बहिःसत्त्वं कल्पयतीत्यत आह–स चेति (१०१–५) । लाघवेति (१०१–५) । गृहाभावदर्शनानन्तरं जीवित्वग्राहकम्, अथ च व्याप्तिग्राहकं द्वयं तु प्रमाणं न भवति । एकस्य बाधः कर्त्तव्यः । तन्मध्ये कस्य बाधः कर्त्तव्यः । जीवित्वग्राहकस्य उत नियमग्राहकस्य । द्वयोर्मध्ये जीवित्वग्राहकबाधे मरणं कल्पनीयम् । नियमग्राहकबाधे बहिःसत्त्वं कल्पनीयम् । तत्र मरणस्याभावरूपत्वेन गुरुत्वाद् द्वयोर्जीवित्वग्राहकनियमग्राहकयोर्बाधः स्यादिति लाघवान्नियमग्राहकमेव बाध्यते । लघुभूतं बहिःसत्त्वमेव कल्प्यते । एतादृशो यो लाघवाख्यतर्कः स एव बहिःसत्त्वं कल्पयति ।

शङ्कते–न चेति (१०१–६) । जीवनग्राहकबाधे मरणमेव कुतो न कल्प्यते इत्यर्थः । उत्तरमाह—क्वचिदस्तीति (१०१–७) । एवं सति क्वचिदस्तिताचिरजीवित्वग्राहकं प्रमाणं ज्योतिःशास्त्रं नियमग्राहकं च द्वयोरपि बाधप्रसङ्गात् । जीवित्वे बाधिते क्वचिदस्तितताया अपि बाधः प्रमाणयोर्द्वयोर्बाधः । क्वचिदस्तिताबाधः

१. जीवी गृह एवेयं व्याप्तिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्भवमात्रेणोक्तः । तस्मात् बहिःसत्त्वमेव लाघवात् कल्प्यते इत्याह—**बहिःसत्त्वेति** (१०१–७) । बहिःसत्त्वकल्पने एकस्यैव बाधः कल्प्यते । जीवित्वबाधे प्रमाणद्वयस्य बाधः इति लाघवमस्ति ।

नैयायिक आह—**संशयेति** (१०१–९) । बहिःसत्त्वप्रमां प्रति संशयः करणम् उक्तः । स च न सम्भवति, कुतः ? आवश्यकतर्कसहकृतानुमानादेव बहिःसत्त्वप्रमा भविष्यतीत्याह—**अनयोरिति** (१०१–९) । जीवित्वग्राहकप्रमाण-नियमग्राहकप्रमाणयोर्मध्ये एकं प्रमाणमन्यदप्रमाणम् । कुतः ? विरुद्धार्थग्राहकत्वादिति । सामान्यतो दृष्टेऽनुमान एव लाघवं सहकारि भवतु अक्लृप्ते संशये । तथा च लाघवात् बाध्यत्वं नियमग्राहकस्यैव जातम् । एवं सति जीवित्वे निश्चिते सति जीवित्वे सति गृहाभावप्रतियोगित्वेन बहिःसत्त्वानुमानं सुकरमेव, किं संशयरूपकरणेनाऽर्थापत्त्या ।

लाघवासहकारे[1] तु तत्रापि अर्थापत्त्याऽपि बहिःसत्त्वसिद्धिर्नास्तीत्याह—**अन्यथेति** (१०१–१०) लाघवास्वीकारे **फलं** (१०१–११) बहिःसत्त्वप्रमा तस्याः **निःसरणम्** (१०१–११) उत्पत्तिः सा नास्ति । बहिःसत्त्वप्रमां प्रति संशयकरणत्वे दूषणान्तरमाह—**अन्यथेति** (१०१–११) । यदि बहिःसत्त्वप्रमां प्रति संशयः कारणं स्यात् तदा **अन्यत्रापीति** (१०१–११) । अनुमितिशब्दप्रमादौ संशय एव करणं स्यादित्यर्थापत्तिरेव प्रमाणं स्यान्न त्वनुमानादिकम् ।

तर्क एवार्थापत्तिरूप इति मतं खण्डयति—**न चेति** (१०१–१२) । दूषयति **विपर्ययेति** (१०१–१२) विपर्ययपर्यवसानं यथा—यदि देवदत्तो बहिर्न स्यात् तदा जीविनो गृहेऽभावो न स्याद्, वर्त्तते तु गृहेऽभाव इदं विपर्ययपर्यवसानम् । तथा च विपर्ययपर्यवसानादेव बहिःसत्त्वसिद्धेः ये ये पक्षा वादिनां अर्थापत्तिकरणत्वे तेऽनया रीत्या खण्डनीयाः ॥

**वाचनाचार्यगुणरत्नगणिविरचिते शशधरटिप्पनेऽर्थापत्तिप्रकरणं** सम्पूर्णम् ॥
**शुभं भूयात् ॥ श्रीरस्तु ॥ कल्याणमस्तु लेखकपाठकयोः श्रीः शुभं भवतु ॥श्रीः॥**

---

१ प्रतौ लाघवो सहकारे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ERRATA

The editor wishes to apologize for a number of printing errors that have crept into this book. He was unable to see the final proofs. Some of the errors are noted below :

*Introduction*

| Page | Line | Read | For |
|---|---|---|---|
| 1 | 2 | Raghunātha | Raghunātna |
| 1 | 28 | -prakaraṇam | -prakaṇaṇam |
| 1 | 29 | -prakaraṇam | -prakarnam |
| 2 | 10 | necessity | the necessity |
| 2 | 11 | background | the background |
| 3 | 4 | the printer's | a printer's |
| 4 | 1 | collated | colated |
| 8 | 15 | chapters | chapter |
| 10 | 6 | (Delete the paranthesis) | |
| 12 | 25 | in 1958, | in 1958 |
| 12 | last line | a date to | a date of |
| 16 | 30 | fairness that | fairness, |
| 17 | 18 | Udayana | Udayan |
| 17 | 20 | Śaśadhara | Śaśdhara |
| 20 | 15 | sasparśaṃ | saśparsaṃ |
| 20 | 23 | physical | phyical |
| 20 | 26 | physical | phyical |
| 20 | 28 | -sion | -ssion |
| 21 | 10 | Kharataragaccha | Kharargaccha |
| 21 | 32 | -sindhu- | -sīndhu- |
| 22 | 26 | -guraṇāṃ | -gurūṇāṃ |
| 23 | 38 | shows that the 17th | shows that 17th |
| 24 | 19 | following | folliwing |
| 25 | 27 | Liṅgaparāmarśa | Lingaparāmarāśa |
| 25 | 35 | This evidence shows | These evidences show |
| 25 | last line | Matilal | Mati Lal |
| 28 | 6 | Banarsidass | Bhanarsidass |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Text

| Page | Line | Read | For |
|---|---|---|---|
| 1 | 14 | अन्यद्वा ६। नाद्यः तथावि– | अन्यद्वा ६। तथावि– |
| 2 | 6 | न च | न४ च |
| 6 | note 7 | $M_2$ | M |
| 8 | note 3 | P reads | preads |
| 8 | note 14 | Pn reads | P nreads |
| 9 | note 21 | i nportant | impotant |
| 10 | note 3 | drop | drops |
| 10 | note 4 | स्पर्शवत्त्वस्यैव | स्पर्शवत्वस्यै |
| 10 | note 13 | read | reads |
| 11 | note 5 | omit | omits |
| 12 | note 2 | चेत् न | चेत् |
| 12 | note 9 | read | reads |
| 13 | 9 | तदव्यवच्छेदः | तदव्यवच्छेदः |
| 14 | note 2 | –कल्पने | –कल्पवे |
| 19 | 15 | प्रतिबन्धकध्वंसात् | प्रतिबन्कध्वंसात् |
| 19 | 23 | प्रहराभ्यन्तर | प्रहराभ्यतर |
| 20 | 9 | व्यवस्थिते | व्यस्थिते |
| 20 | 21 | संसर्गाभावत्वेन | संर्गाभावत्वेन |
| 29 | 16 | ज्ञानविषयतया | र्ज्ञानविषयतया |
| 36 | note 13 | read | reads |
| 37 | 5 | (Omit the comma) | |
| 37 | 12 | ध्वंसप्रतियोगिवृत्ति कार्यमात्रवृत्ति धर्मत्वात् | ध्वंसप्रतियोगिवृत्ति कार्यमा - त्रवृत्तिधर्मत्वात् |
| 38 | 4 | एव | एवं |
| 45 | 10 | जागराद्यानुभवस्य | जागराद्यनुभवस्य |
| 45 | 17 | सकलजनसाधारणः | सकलजानसाधारणः |
| 47 | 18 | समवायिविशेष्यकेन'' 'इदं | समवायिविशेष्यकेन 'इदं''.. |
| 49 | 14 | व्यतिरेकित्वाभावात् | व्यतिरेकित्वाभात् |
| 49 | 21 | योग्यानुपलब्ध्या | योग्यातुपलब्ध्या |
| 50 | note 1 | वादिवागीश्वरस्तु | गदिवागीश्वरस्तु |
| 75 | 6 | ( Omit the first *daṇḍa* ) | |
| 77 | 23 | चिकीर्षाविषयतावच्छेदकरूपवत्त्वं | चिकीर्षाविषयतावच्दछेकरूपव- त्त्वं |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| page | line | Read | For |
|---|---|---|---|
| 83 | 7 | ०–साधनता विधिरिति | ०–साधनताविधिरितिं |
| 88 | 1 | स्वर्गोपायत्वेन | सर्गोपायत्वेन |
| 90 | 1 | परोक्तदूषण– | परोवतदूषण– |
| 90 | 5 | –स्थानेऽभिषिच्यताम् | स्थानऽभिषिच्यताम् |
| 119 | 8 | न भूतल– | न भूतल |
| 121 | 8 | लक्षणनिर्वाहात् | लक्षणानिर्वाहात् |
| 124 | 16 | ०–सामयिकापरत्व–० | ०–सामयिकपरत्व–० |
| 124 | 21 | ०–सामयिकापरत्व–० | ०–सामयिकपरत्व–० |
| 136 | 7 | प्रवर्त्तकत्वं | प्रवर्त्तकत्वे |
| 136 | 28 | सिद्धविषयिणी | सिद्धविषयणी |
| 141 | 2 | पाकादिकमिष्टहेतु | पाकादिकामेष्टहेतु |
| 145 | 13 | (७८–२३) | (८७–२३) |
| 163 | 6 | पूर्वोक्तयुक्तेः । नित्यस्थले | पूर्वोक्तयुक्तेर्नित्यस्थले |
| 163 | 28 | विषयत्वम् । स्वतः | विषयत्वम् स्वतः |
| 166 | 2 | प्रवृत्तिं | प्रवृत्ति |
| 166 | 22 | इच्छा विषयतया | इच्छाविषयतया |
| 166 | 26 | –प्रकारता तावत् तत्प्रतियोगिक– | प्रकारतावत्प्रतियोगिक– |
| 179 | 24 | (Delete the comma) | |
| 180 | 5 | (Delete the *danda*) | |
| 183 | 5 | अपूर्वोपस्थितिर्निषेधस्थले | अपूर्वोपस्थितिनिषेधस्थले |
| 184 | 15 | धर्मी अपूर्वम् तत्क– | धर्मी अपूर्वं । तत्क– |
| 184 | 29 | –क्ष्यैव | –क्षयैव |
| 191 | 24 | वह्न्यभाववद्वृत्तिरिति | वह्न्यभावद्वृत्तिरिति |
| 191 | note 2 | अवच्छेद्यस्य | अवच्छेद्यय |
| 194 | 5 | व्यवहर्त्तव्यविशेष्यकत्वम् | व्यवहर्त्तव्यविशेषकत्वम् |
| 194 | 16 | विशिष्टज्ञानयोरेकः | विविष्टज्ञानयोरेकः |
| 195 | 19 | रजतत्ववैशिष्ट्य– | रजत्ववैशिष्ट्य– |
| 216 | 19 | पुरोवर्त्तिज्ञानं | पुरोर्त्तिज्ञानं |
| 220 | 17 | –स्तर्हि | –स्तहि |
| 221 | 2 | पुरोवर्त्तिविशेष्यकरजतत्व– | पुरोवर्त्तिविशेष्यकरजत– |
| 221 | 22 | बहिःपदार्थवृत्ति ग्रहाभावो | बहिःपदार्थवृत्तिनिष्ठग्रहाभावो |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org